No. 11.]

THE

VIZIANAGRAM SANSKRIT SERIES

UNDER THE SUPERINTENDENCE OF

ARTHUR VENIS M. A. OXON.

PRINCIPAL, SANSKRIT COLLEGE, BENARES.

THE

NYÂYASÛTRAS

WITH

VÂTSYÂYANA'S BHÂSHYA

AND

EXTRACTS FROM THE NYÂYAVÂRTTIKA AND THE TÂTPARYAṬÎKÂ

EDITED BY

MAHÂMAHOPÂDHYÂYA GAṄGÂDHARA ŚÂSTRÎ TAILAṄGA

PROFESSOR, SANSKRIT COLLEGE, BENARES.

VOLUME IX.



PRINTED, PUBLISHED AND SOLD BY

E. J. LAZARUS & Co., BENARES.

MAY BE HAD ALSO FROM GANESH DAS AND CO., CHOWK, BENARES.

JAYESTHARAM MUKUNDJI AND CO., BOMBAY:

OTTO HARRASSOWITZ AND M. SPIRGATIS, LEIPZIG:

LUZAC AND CO., LONDON.

1896.

गौतमसूत्राणामकारादिक्रमेण सूचीपत्रम् ।

अ.

अ॰	आ॰	सू॰	
३	२	७६	अणुश्यामतानित्यत्ववदेतत्स्यात्।
४	१	६७	अणुश्यामतानित्यत्ववद्वा ।
२	१	४४	अत्यन्तप्रायैकदेशसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ।
१	१	५	अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च।
२	२	२७	अध्यापनादप्रतिषेधः ।
२	२	४	अनर्थापत्तावर्थापत्त्यभिमानात् ।
४	२	२५	अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः ।
२	२	४६	अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ।
५	२	२२	अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ।
३	२	२४	अनित्यत्वग्रहाद्बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् ।
४	१	२२	अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ।
४	१	२३	अनिमित्तनिमित्तत्वाच्चानिमित्ततः।
२	२	५२	अनियमे नियमाच्चानियमः ।
५	१	२२	अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ।
२	२	२१	अनुपलम्भात्मकत्वादनुपलब्धेर्हेतुः ।
५	१	३०	अनुपलम्भात्मकत्वादनुपलब्धेर्हेतुः ।
२	२	२०	अनुपलम्भादप्यनुपलब्धिसद्भावाच्चावरणानुपपत्तिरनुपलम्भात्।
२	१	६०	अनुवादोपपत्तेश्च ।
३	१	३६	अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ।
१	२	५	अनैकान्तिकः सव्यभिचारः ।
४	२	२०	अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः ।
२	२	३०	अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः ।
३	१	१५	अपरिसंख्यानाच्च स्मृतिविषयस्य।
१	१	३१	अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ।
४	२	४३	अपवर्गेऽप्येवं प्रसङ्गः ।
३	१	६२	अप्रेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ।
३	१	४६	अप्रतीघातात्सन्निकर्षोपपत्तिः ।
३	२	७	अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात् ।
३	२	५	अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ।
३	१	४४	अप्राप्य ग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ।
४	१	१४	अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ।
३	१	४२	अभिव्यक्तौ चाभिभवात् ।
२	२	२८	अभ्यासात् ।
२	१	५६	अभ्युपेत्य कालभेदे दोषवचनात् ।
३	१	२३	अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ।
४	२	४२	अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ।
५	२	१५	अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ।
५	१	२१	अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ।
२	२	३	अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ।
३	२	६१	अलातचक्रदर्शनवत्तदुपलब्धिराशुसंचारात् ।
३	१	१०	अवयवनाशेऽप्यवयव्युपलब्धेर्हेतुः ।
५	२	११	अवयवविपर्यासवचनमप्राप्तकालम् ।
४	२	१२	अवयवान्तराभावेऽप्यवृत्तेरहेतुः ।
४	२	१५	अवयवावयविप्रसङ्गश्चैवमा प्रलयात् ।
१	१	४०	अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ।

अ·	आ·	सू·	
५	२	१७	अविज्ञातं वाज्ञानम् ।
१	२	१२	अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ।
१	२	१३	अविशेषे वा किंचित्साधर्म्याद्वैधर्म्याच्च छलप्रसङ्गः ।
५	२	६	अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ।
३	२	४५	अव्यक्तग्रहणमनवस्थायित्वाद्विद्युत्संपाते रूपाद्यव्यक्तग्रहणवत् ।
३	१	३८	अव्यभिचाराच्च प्रतिघातो भौतिकधर्मः ।
४	१	४	अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ।
४	२	२२	अव्यूहाविष्टम्भविभुत्वानि वाकाशधर्माः ।
३	२	३३	अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ।
२	२	६	असत्यर्थे नाभाव इति चेद् नान्यलक्षणोपपत्तेः ।
२	२	२२	अस्पर्शत्वात् ।
२	२	३७	अस्पर्शत्वादप्रतिषेधः ।

आ.

४	२	१८	आकाशव्यतिभेदात्तदनुपपत्तिः ।
४	२	१९	आकाशासर्वगतत्वं वा ।
२	२	६५	आकृतिर्जातिर्लिङ्गाख्या ।
२	२	६०	आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ।
४	१	१०	आत्मनित्यत्वे प्रेत्यभावसिद्धिः ।
३	२	३१	आत्मप्रेरणयदृच्छाज्ञाताभिश्च न संयोगविशेषः ।
१	१	६	आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ।
३	१	४६	आदर्शोदकयोः प्रसादस्वाभाव्यादूपोपलब्धिवत्तदुपलब्धिः ।
३	१	४७	आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात् ।
२	२	१३	आदिमत्त्वादैन्द्रियकत्वात्कृतकवदुपचाराच्च ।
१	१	७	आप्तोपदेशः शब्दः ।
३	१	५२	आप्तोपदेशसामर्थ्याच्छब्दादर्थसंप्रत्ययः ।
४	१	५१	आश्रयाव्यतिरेकाद्वृक्षफलोत्पत्तिवदित्यहेतुः ।

इ.

१	१	१०	इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति ।
३	१	१२	इन्द्रियान्तरविकारात् ।
३	१	५५	इन्द्रियार्थपञ्चत्वात् ।
१	१	४	इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ।
३	२	२१	इन्द्रियैर्मनसः सन्निकर्षाभावात्तदनुत्पत्तिः ।

ई.

४	१	१९	ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ।

उ.

५	२	१८	उत्तरस्याप्रतिपत्तिरप्रतिभा ।
४	१	४९	उत्पादव्ययदर्शनात् ।
१	१	३४	उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः ।
१	१	३८	उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ।
५	१	२६	उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ।
३	२	७१	उपपत्तश्च तद्वियोगः कर्मक्षयोपपत्तेः ।
२	१	५०	उपलब्धेरद्विप्रवृत्तित्वात् ।
२	२	३४	उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ।
५	१	२५	उभयकारणोपपत्तेरुपपत्तिसमः ।
५	१	१६	उभयसाधर्म्यात् प्रक्रियाप्रसिद्धेः प्रकरणसमः ।

ऋ.

४	१	५९	ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ।

ए.

५	१	२३	एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात्सद्भावोपपत्तेरविशेषसमः ।
३	१	६	एकविनाशे द्वितीयाविनाशाच्चैकत्वम् ।

अ·	आ·	सू·	
४	२	११	एकस्मिन् भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ।
३	१	६४	एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तराणां तदनुपलब्धिः ।
३	२	७०	एतेनानियमः प्रत्युक्तः ।

ऐ.

३	२	५८	ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ।

क.

३	१	३७	कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ।
३	२	१	कर्माकाशसाधर्म्यात्संशयः ।
३	२	४४	कर्मानवस्थायिग्रहणात् ।
२	२	१७	कारणद्रव्यस्य प्रदेशशब्देनाभिधानाच्चित्येष्वप्यव्यभिचार इति।
५	१	२८	कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ।
५	२	१६	कार्यव्यासङ्गात्कथाविच्छेदो विच्छेदः ।
५	१	३८	कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ।
१	२	६	कालात्ययापदिष्टः कालातीतः ।
४	१	४६	कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ।
५	१	५	किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ।
३	१	४५	कुड्यान्तरितानुपलब्धेरप्रतिषेधः ।
३	२	३८	कुम्भादिष्वनुपलब्धेरहेतुः ।
२	१	४३	कृततात्कर्तव्यतोपपत्तेस्तूभयथा ग्रहणम् ।
४	२	७	कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ।
३	१	३०	कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भात् संशयः ।
३	२	५४	केशनखादिष्वनुपलब्धेः ।
४	२	१३	केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः ।
४	१	१८	क्रमनिर्देशादप्रतिषेधः ।
३	२	६	क्रमवृत्तित्वादयुगपद्ग्रहणम् ।
५	१	२४	क्व चित्तद्धर्मानुपपत्तेः क्व चिच्चोपपत्तेः प्रतिषेधाभावः ।
३	२	१७	क्व चिद्विनाशकारणानुपलब्धेः क्व चिच्चोपलब्धेरनेकान्तः ।
३	२	१३	क्षीरविनाशे कारणानुपलब्धिवद्व्यच्युत्पत्तिः ।
४	२	४०	क्षुदादिभिः प्रवर्तनाच्च ।

ग.

३	१	५७	गन्धत्वाद्व्यतिरेकाद्गन्धादीनामप्रतिषेधः ।
३	१	६१	गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ।
१	१	१४	गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ।
२	२	५४	गुणान्तरापत्त्युपमर्दह्रासवृद्धिश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकाराः ।
५	१	३	गोत्वाद्गोसिद्धिवत्तत्सिद्धिः ।
३	२	४७	ग्रहणे हेतुविकल्पाद्ग्रहणविकल्पो न बुद्धिविकल्पात् ।

घ.

५	१	८	घटादिनिष्पत्तिदर्शनात्पीडने चाभिचाराद्अप्रतिषेधः ।
१	१	१२	घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ।

च.

१	१	११	चेष्टेन्द्रियार्थाश्रयः शरीरम् ।

ज.

२	१	५६	जातिविशेषे चानियमात् ।
३	२	३५	ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ।
३	१	१७	ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ।
४	२	४७	ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ।
२	१	२३	ज्ञानलिङ्गत्वादात्मनो मानसबोधः।
५	१	३१	ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम् ।
३	२	२५	ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ।
३	२	५६	ज्ञानायौगपद्याद्येकं मनः ।

त.

४	१	२१	तत्कारितत्वादहेतुः ।

अ·	आ·	सू·	
१	२	११	तत्त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं चेति ।
४	१	३	तत्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ।
४	२	३७	तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ।
२	२	१५	तत्त्वभाक्त्वयोर्नानात्वविभागाद्व्यभिचारः ।
४	२	५०	तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ।
२	१	१४	तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ।
२	२	६	तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ।
४	१	५४	तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ।
२	२	१०	तत्सिद्धेरलक्षितेष्वहेतुः ।
२	१	५	तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ।
४	१	२	तथा दोषाः ।
५	१	१३	तथा भावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ।
१	१	३५	तथा वैधर्म्यात् ।
३	२	६७	तथा ऽऽहारस्य ।
३	१	४८	तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ।
१	१	२२	तदत्यन्तविमोक्षो ऽपवर्गः ।
३	२	७२	तददृष्टकारितमिति चेत्पुनस्तत्प्रसङ्गो ऽपवर्गे ।
४	१	२७	तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ।
५	१	२६	तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ।
२	२	१६	तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ।
३	१	३३	तदनुपलब्धेरहेतुः ।
२	२	२६	तदन्तरालानुपलब्धेरहेतुः ।
२	१	५७	तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ।
४	२	४५	तदभावश्चापवर्गे ।
३	१	५	तदभावः सात्मकप्रदाहे ऽपि तच्चित्यत्वात् ।

अ·	आ·	सू·	
२	२	३१	तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः ।
२	१	२४	तदयोगपद्यलिङ्गत्वाच्च न मनसः ।
४	२	४६	तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ।
२	२	५६	तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात्संशयः ।
४	२	५	तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ।
३	२	२०	तदात्मगुणत्वे ऽपि तुल्यम् ।
३	१	१४	तदात्मगुणसद्भावादप्रतिषेधः ।
४	२	२८	तदाश्रयत्वादपृथग्ग्रहणम् ।
३	१	७३	तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ।
१	२	२०	तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ।
२	१	१८	तद्विनिवृत्तेर्वा प्रमाणसिद्धिरवत्प्रमेयसिद्धिः ।
१	१	३७	तद्विपर्ययाद्वा विपरीतम् ।
३	१	६६	तद्ध्रुवस्थानं तु भूयस्त्वात् ।
३	१	३	तद्ध्रुवस्थानादेवात्मसद्भावाव्प्रतिषेधः ।
१	१	२६	तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ।
४	२	३	तन्निमित्तं त्ववयव्यभिमानः ।
२	१	४०	तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात् ।
४	१	३१	तल्लक्षणावरोधादप्रतिषेधः ।
३	२	३६	तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ।
४	२	४८	तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयात् ।
४	२	५१	ताभ्यां विगृह्य कथनम् ।
३	१	७१	तेनैव तस्याग्रहणाच्च ।
२	२	५५	ते विभक्त्यन्ताः पदम् ।
४	१	६	तेषां मोहः पापीयाञ्चामूढस्येतरोत्पत्तेः ।
४	२	८	तेषु चावृत्तेरवयव्यभावः ।
२	१	२७	तैश्चापदेशो ज्ञानविशेषाणाम् ।
२	१	१५	त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्तत्सिद्धेः ।
२	१	१२	त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ।
५	१	१८	त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ।
३	२	५५	त्वक्पर्यन्तत्वाच्छरीरस्य कोशनखादिष्वप्रसङ्गः ।

अ·	आ·	सू·	
३	१	५२	त्वगव्यतिरेकात् ।

द·

३	१	१	दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ।
२	१	२२	दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ।
१	१	२	दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ।
४	१	५९	दुःखविकल्पे सुखाभिमानाच्च ।
३	१	५०	दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः ।
३	१	११	दृष्टान्तविरोधादप्रतिषेधः ।
५	१	९	दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ।
५	१	३४	दृष्टान्ते च साध्यसाधनभावेन धर्मस्य हेतुत्वात्तस्य चोभयथाभावाच्चाविशेषः ।
४	२	२	दोषनिमित्तं रूपादयो विषयाः सङ्कल्पवशताः ।
४	२	१	दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ।
३	१	३५	द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ।
२	२	४३	द्रव्यविकारे वैषम्यवद् वर्णविकारविकल्पः ।
३	२	४९	द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ।

ध·

१	२	१४	धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम् ।
२	१	३५	धारणाकर्षणोपपत्तेश्च ।

न·

३	२	७३	न करणाकरणयोरारम्भदर्शनात् ।
२	१	५८	न कर्मकर्तृसाधनवैगुण्यात् ।
२	२	२३	न कर्मानित्यत्वात् ।
४	१	४२	न कारणावयवभावात् ।
३	१	९	न कार्याश्रयकर्तृवधात् ।
३	१	४३	नक्तंचरनयनरश्मिदर्शनाच्च ।
४	१	६५	न क्लेशसन्ततेः स्वाभाविकत्वात् ।
३	२	८	न गत्यभावात् ।
४	१	१२	न घटाद् घटानिष्पत्तेः ।
२	२	१४	न घटाभावसामान्यनित्यत्वाभित्त्येष्वप्यनित्यवदुपचाराच्च ।
२	२	१	न चतुष्टयमितिह्यर्थापत्तिसंभवाभावप्रामाण्यात् ।
४	२	१०	न चावयव्यवयवाः ।
२	१	३२	न चैकदेशोपलब्धिरवयविसद्भावात् ।
२	२	५८	न तदनवस्थानात् ।
३	१	५६	न तदर्थबहुत्वात् ।
१	२	१६	न तदर्थान्तरभावात् ।
३	२	२६	न तदाशुगतित्वान्मनसः ।
४	१	८	न दोषलक्षणावरोधान्मोहस्य ।
४	२	४४	न निष्पन्नावश्यंभावित्वात् ।
३	२	५५	न पयसः परिणामगुणान्तरप्रादुर्भावात् ।
३	२	५१	न प्राकृतगुणान्तरोत्पत्तेः ।
३	१	६७	न पार्थिवाप्ययोः प्रत्यक्षत्वात् ।
४	१	५३	न पुत्रपशुस्त्रीपरिच्छदहिरण्यादिफलनिर्देशात् ।
४	१	२०	न पुरुषकर्माभावे फलानिष्पत्तेः ।
२	१	३१	न प्रत्यक्षेण यावत्तावदप्युपलम्भात् ।
२	१	१६	न प्रदीपप्रकाशसिद्धिवत्तत्सिद्धेः ।
४	२	१६	न प्रलयोऽणुसद्भावात् ।
४	१	६४	न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ।
३	१	५६	न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ।
३	२	४	न युगपद्ग्रहणात् ।
३	२	६०	न युगपदनेककियोपलब्धेः ।
३	१	५३	न युगपदर्थानुपलब्धेः ।
३	१	४०	न रात्रावप्यनुपलब्धेः ।
३	२	५७	न रूपादीनामितरेतरवैधर्म्यात् ।
२	२	११	न लक्षणावस्थितापेक्षासिद्धेः ।
२	२	४४	न विकारधर्मानुपपत्तेः ।
४	१	१७	न विनष्टेभ्यो ऽनिष्पत्तेः ।
३	१	२	न विषयव्यवस्थानात् ।
४	१	३३	न व्यवस्थानुपपत्तेः ।
३	१	७२	न शब्दगुणोपलब्धेः ।
४	१	४५	न सद्यः कालान्तरोपभोग्यत्वात् ।
३	१	६३	न सर्वगुणानुपलब्धेः ।
४	१	६८	न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ।
३	१	७१	नसङ्कल्पनिमित्तत्वाद्रागादीनाम् ।
३	२	६५	न साध्यसमत्वात् ।
४	१	५६	न सुखस्यान्तरालनिष्पत्तेः ।
३	२	३०	न स्मरणकालानियमात् ।

अ	आ	सू	
३	१	१३	न स्मृतेः स्मर्तव्यविषयत्वात् ।
४	१	३६	न स्वभावसिद्धिरापेक्षिकत्वात् ।
४	१	३८	न स्वभावसिद्धेर्भावानाम् ।
५	१	१६	न हेतुतः कार्यसिद्धेस्त्रैकाल्या-सिद्धिः ।
३	२	७७	नाकृताभ्यागमप्रसङ्गात् ।
२	२	६२	नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभि-व्यक्तेः ।
२	२	२४	नाणुनित्यत्वात् ।
२	१	४१	नातीतानागतयोरितरेतरापेक्षा-सिद्धिः ।
४	१	१६	नातीतानागतयोः कारकशब्दप्र-योगात् ।
२	२	४२	नातुल्यप्रकृतीनां विकारविक-ल्पात् ।
३	१	१६	नात्मप्रतिपत्तिहेतूनां मनसि स-म्भवात् ।
२	१	२१	नात्ममनसोः सन्निकर्षाभावे प्रत्य-क्षोत्पत्तिः ।
४	१	२६	नानित्यतानित्यत्वात् ।
३	१	३४	नानुमीयमानस्य प्रत्यक्षतो ऽनुप-लब्धिरभावहेतुः ।
२	१	६६	नानुवादपुनरुक्तयोरविशेषः श-ब्दाभ्यासोपपत्तेः ।
४	१	३५	नानेकलक्षणैरेकभावनिष्पत्तेः ।
३	२	२६	नान्तःशरीरवृत्तित्वान्मनसः ।
३	१	२४	नान्यत्र प्रवृत्त्यभावात् ।
२	२	२६	नान्यत्वे ऽप्यभ्यासस्योपचारात् ।
२	१	४७	नाप्रत्यक्षे गवये प्रमाणार्थमुपमा-नस्य पश्याम इति ।
२	२	७	नाभावप्रामाण्यं प्रमेयासिद्धेः ।
२	१	२६	नार्थविशेषप्राबल्यात् ।
४	२	३६	नार्थविशेषप्राबल्यात् ।
४	१	४८	नासच्च सच्च सदसत् सदसतोर्वैध-र्म्यात् ।
५	२	२१	निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनु-योज्योपेक्षणम् ।
३	२	७५	नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ।
२	२	४७	नित्यत्वे ऽविकाराद्नित्यत्वे चा-नवस्थानात् ।
४	१	६	नित्यनैमित्तिकोपपत्तेश्च तुल्यजा-तीयानामप्रतिषेधः ।
५	१	३५	नित्यमनित्यभावादनित्ये नित्य-त्वोपपत्तेर्नित्यसमः ।
४	१	२८	नित्यस्याप्रत्याख्यानं यथोपलब्धि-व्यवस्थानात् ।
२	२	४८	नित्यानामतीन्द्रियत्वात्तद्धर्मवि-कल्पाच्च वर्णविकाराणाम-प्रतिषेधः ।
४	१	७	निमित्तनैमित्तिकभावादर्थान्तर-भावो दोषेभ्यः ।
४	१	२४	निमित्तानिमित्तयोरर्थान्तरभावा-दप्रतिषेधः ।
३	२	३६	नियमानियमौ तु तद्विशेषकौ ।
३	१	१८	नियमश्च निरनुमानः ।
३	२	११	नियमहेत्वभावाद्यथादर्शनमभ्य-नुज्ञा ।
२	२	५३	नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ।
४	१	४३	निरवयवत्वाद्हेतुः ।
५	१	२७	निर्दिष्टकारणाभावे ऽप्युपलभा-दुपलब्धिसमः ।
३	१	४८	नेतरेतरधर्मप्रसङ्गात् ।
३	२	१८	नेन्द्रियार्थयोस्तद्विनाशे ऽपि ज्ञा-नावस्थानात् ।
२	१	३८	नैकदेशत्रासंसादृश्येभ्यो ऽर्थान्तर-भावात् ।
४	१	४	नैकप्रत्यनीकभावात् ।
३	१	८	नैकस्मिन्नासास्यिव्यवहिते द्वित्वा-भिमानात् ।
३	२	२२	नोत्पत्तिकारणानपदेशात् ।
४	१	३२	नोत्पत्तितत्कारणोपलब्धेः ।
३	२	६६	नोत्पत्तिनिमित्तत्वान्मातापित्रोः ।
३	२	१२	नोत्पत्तिविनाशकारणोपलब्धेः ।
४	१	३०	नोत्पत्तिविनाशकारणोपलब्धेः ।
३	१	२१	नोष्णशीतवर्षाकालनिमित्तत्वात्य-ज्वात्मकविकाराणाम् ।
२	२	४१	न्यूनसमाधिकोपलब्धेर्विकारा-णामहेतुः ।

प.

५	२	५	पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ।
३	१	२०	पद्मादिषु प्रबोधसंमीलनविका-रवत्तद्विकारः ।
३	२	३७	परश्वादावारम्भनिवृत्तिदर्शनात् ।
४	२	१७	परं वा त्रुटेः ।
३	२	४१	परिशेषाद्यथोक्तहेतूपपत्तेश्च ।
५	२	६	परिषत्प्रतिवादिभ्यां त्रिरभिहित-मप्यविज्ञातमविज्ञातार्थम् ।

अ·	आ·	सू·	
२	१	९०	पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ।
३	२	३५	पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ।
४	१	६२	पात्रचयान्तानुपपत्तेश्च फलाभावः ।
३	१	२८	पार्थिवं गुणान्तरोपलब्धेः ।
१	१	१९	पुनरुत्पत्तिः प्रेत्यभावः ।
३	१	५३	पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः ।
३	२	६३	पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ।
४	२	४१	पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ।
३	१	६८	पूर्वपूर्वगुणोत्कर्षात्तत्तत्प्रधानम् ।
२	१	६	पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ।
३	१	१६	पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः ।
४	२	६	पृथक्चावयवेभ्यो ऽवृत्तेः ।
१	१	१३	पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ।
५	२	१०	पौर्वापर्ययोगादप्रतिसम्बद्धार्थमपार्थकम् ।
५	२	७	प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ।
२	२	४०	प्रकृतिवियुद्धौ विकारविवृद्धेः ।
२	२	५१	प्रकृत्यनियमाद्वर्णविकाराणाम् ।
३	२	४३	प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणासादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यविरोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ।
३	२	३३	प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावादयुगपत्स्मरणम् ।
१	१	३२	प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ।
५	२	३	प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् ।
५	५	१	प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगो ऽप्रसिद्धान्तोहेत्वाभासाश्च निग्रहस्थानानि ।
५	२	४	प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ।
५	२	२	प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ।
५	१	११	प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ।
३	२	५२	प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ।
४	२	४९	प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ।
५	१	१७	प्रतिपक्षात् प्रकरणप्रसिद्धेः प्रतिषेधानुपपत्तिः ।
५	१	४१	प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ।
५	१	४२	प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ।
५	१	२०	प्रतिषेधानुपपत्तेः प्रतिषेद्धव्याप्रतिषेधः ।
२	२	५	प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् ।
५	१	३९	प्रतिषेधे ऽपि समानो दोषः ।
५	१	३८	प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः ।
२	१	२५	प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम् ।
२	१	३०	प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ।
२	१	२०	प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ।
२	१	८	प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ।
१	१	३	प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ।
२	१	४६	प्रत्यक्षेणाप्रत्यक्षसिद्धेः ।
३	२	४८	प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम् ।
५	१	१०	प्रदीपोपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः ।
४	१	६०	प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो मिन्द्वाप्रशंसोपपत्तेः ।

अ॰ आ॰ सू॰

१ २ १ प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ।

४ २ २६ प्रमाणतश्चार्थप्रतिपत्तेः ।

२ १ १७ प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ।

१ १ १ प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ।

४ २ ३० प्रमाणानुपपत्त्युपपत्तिभ्याम् ।

२ १ १६ प्रमेया च तुलाप्रामाण्यवत् ।

५ १ ३७ प्रयत्नकार्यानेकत्वात् कार्यसमः ।

१ १ १८ प्रवर्तनालक्षणा दोषाः ।

१ १ २० प्रवृत्तिदोषजनितोऽर्थः फलम् ।

४ १ १ प्रवृत्तिर्यत्रोक्ता ।

१ १ १७ प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति ।

१ १ ६ प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम् ।

२ १ ४५ प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ।

४ १ ६६ प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम् ।

२ २ १८ प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ।

२ २ १२ प्रागुत्पत्तेरभावोपपत्तेश्च ।

५ १ १२ प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ।

४ १ ४७ प्राङ्निष्पत्तेर्वृत्तफलवत्तत्स्यात् ।

३ २ ३४ प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्ते योगपद्यप्रसङ्गः ।

३ २ ६८ प्राप्तौ चानियमात् ।

५ १ ७ प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशिष्टत्वादप्राप्त्याऽसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ।

४ १ ५२ प्रीतेरात्माश्रयत्वादप्रतिषेधः ।

३ १ २२ प्रेत्याहाराभ्यासकृतात्स्तन्याभिलाषात् ।

ब.

४ १ ५७ बाधनानिवृत्तेर्वेदयतः पर्येषणादोषादप्रतिषेधः ।

अ॰ आ॰ सू॰

१ १ २१ बाधनालक्षणं दुःखमिति ।

६ १ ४१ बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ।

१ १ १५ बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ।

४ १ ५० बुद्धिसिद्धन्तु तदसत् ।

४ २ ३६ बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ।

४ २ २६ बुद्ध्या विवेचनात्तु भावानां यावात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत्तदनुपलब्धिः ।

भ.

३ १ ६० भूतगुणविशेषोपलब्धेस्तादात्म्यम् ।

३ २ ६४ भूतेभ्यो मूर्त्युपादानवत्तदुपादानम् ।

म.

३ १ ३६ मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ।

३ २ ७४ मनःकर्मनिमित्तत्वाच्च संयोगानुच्चेष्टः ।

२ १ ६८ मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ।

३ १ ३१ महदणुग्रहणात् ।

४ २ ३२ मायागन्धर्वनगरमृगतृष्णिकावद्वा ।

४ २ ३५ मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात्स्वप्नविषयाभिमानप्रणाशवत्प्रतिबोधे ।

४ २ २३ मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ।

य.

२ १ ७ यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ।

१ १ ३० यत्सिद्धावन्यप्रकरणासिद्धिः सोऽधिकरणसिद्धान्तः ।

३ २ ६२ यथोक्तहेतुत्वाच्चाणुः ।

३ २ ४० यथोक्तहेतुत्वात्पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ।

२ १ ६ यथोक्ताध्यवसायादेव तद्विशेषापेक्षात्संशये नासंशयो नात्यन्तसंशयो वा ।

अ·	आ·	सू·	
१	२	२	यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ।
१	१	२४	यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् ।
१	२	७	यस्मात् प्रकरणचिन्ता स निर्णेयार्थमपदिष्टः प्रकरणसमः ।
३	२	५०	यावच्छरीरभावित्वाद्रूपादीनाम् ।
२	२	५७	याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्युपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्भक्तिः ।
१	१	१६	युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ।
३	२	१९	युगपज्ज्ञेयानुपलब्धेश्च न मनसः ।
२	१	१९	युगपदसिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ।

र.

३	१	३२	रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ।
२	१	३७	रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ।

ल.

४	१	३९	लक्षणव्यवस्थानादेवाप्रतिषेधः ।
२	२	८	लक्षितेष्वलक्षणालक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः ।
३	२	१४	लिङ्गतो ग्रहणाच्चानुपलब्धिः ।
१	१	२५	लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ।

व.

१	२	१०	वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ।
५	२	८	वर्णक्रमनिर्देशवच्चिरर्थकम् ।
२	१	३९	वर्तमानाभावः पतनः पतितपतितव्यकालोपपत्तेः ।
२	१	४२	वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ।
१	२	१५	वाक्छलमेवोपचारच्छलं तदविशेषात् ।
२	१	६१	वाक्यविभागस्य चार्थग्रहणात् ।
२	२	५०	विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ।
२	२	४५	विकारप्राप्तानामपुनरापत्तेः ।
२	२	३६	विकारादेशोपदेशात्संशयः ।
५	२	१६	विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ।
४	२	४	विद्याविद्याद्वैविध्यात् संशयः ।
२	१	६३	विधिर्विधायकः ।
२	१	६५	विधिविहितस्यानुवचनमनुवादः ।
२	१	६२	विध्यर्थवादानुवादवचनविनियोगात् ।
२	२	३६	विनाशकारणानुपलब्धेश्चावस्थाने तच्चित्यत्वप्रसङ्गः ।
३	२	२३	विनाशकारणानुपलपलब्धेश्चावस्थाने तच्चित्यत्वप्रसङ्गः ।
२	२	३२	विनाशकारणानुपलब्धेः ।
१	२	१६	विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ।
२	१	३	विप्रतिपत्तौ च संप्रतिपत्तेः ।
२	१	२	विप्रतित्त्यव्यवस्थाध्यवसायाच्च ।
३	१	५४	विप्रतिषेधाच्च न त्वगेका ।
२	२	३८	विभक्त्यन्तरोपपत्तेश्च समासे ।
१	१	४१	विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ।
४	१	५५	विविधबाधनायोगाद्दुःखमेव जन्मोत्पत्तिः ।
३	१	५८	विषयत्वाव्यतिरेकादेकत्वम् ।
३	२	२	विषयप्रत्यभिज्ञानात् ।
३	१	६६	विष्टं खपरं परेण ।
३	१	२५	वीतरागजन्मादर्शनात् ।
४	२	६	वृत्त्यनुपपत्तेरपि तर्हि न संशयः ।
४	१	१३	व्यक्ताद्यटनिष्पत्तेरप्रतिषेधः ।
४	१	११	व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात् ।
२	२	६४	व्यक्तिर्गुणविशेषाश्रयो मूर्तिः ।
२	२	६३	व्यक्त्याकृतिजातयस्तु पदार्थः ।
२	२	६१	व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मन्त्रवके जातिः ।
४	१	५	व्यभिचारादहेतुः ।
४	१	१५	व्याघातादप्रयोगः ।
३	२	३७	व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ।
४	१	४०	व्याहतत्वादयुक्तम् ।
२	१	२८	व्याहतत्वादहेतुः ।
४	२	२७	व्याहतत्वादहेतुः ।
३	२	१६	व्यूहान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तिरनुमानात् ।

श.

अ·	आ·	सू·	
२	२	२	शब्दैतिह्यार्थान्तर्भावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः ।
४	२	२१	शब्दसंयोगविभवाच्च सर्वगतम् ।
५	२	१४	शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ।
२	१	५४	शब्दार्थव्यवस्थानादप्रतिषेधः ।
२	१	४६	शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ।
३	२	५६	शरीरगुणवैधर्म्यात् ।
३	१	४	शरीरदाहे पातकाभावात् ।
३	२	५३	शरीरव्यापित्वात् ।
३	२	६६	शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म ।
२	१	६७	शीघ्रतरगमनोपदेशवदभ्यासाच्चाविशेषः ।
३	१	२६	श्रुतिप्रामाण्याच्च ।

स.

३	१	२६	सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ।
३	१	७०	सगुणानामिन्द्रियभावात् ।
४	१	४४	रुद्धः कालान्तरे च निष्पत्तेःसंशयः ।
१	१	८	स द्विविधो दृष्टादृष्टार्थत्वात् ।
१	२	३	स प्रतिपक्षस्थापनाहीनो वितण्डा ।
४	२	३८	समाधिविशेषाभ्यासात् ।
१	१	२६	समानतन्त्रासिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ।
२	२	६६	समानप्रसवात्मिका जातिः ।
२	१	१	समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः ।
१	१	२३	समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्धिव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ।
४	१	६१	समारोपणादात्मन्यप्रतिषेधः ।
१	१	२७	सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ।
१	१	२८	सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ।
५	१	४०	सर्वत्रैवम् ।
४	१	२६	सर्वं नित्यं पञ्चभूतनित्यत्वात् ।
४	१	३४	सर्वं पृथग्भावलक्षणपृथक्त्वात् ।
२	१	१३	सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ।
४	१	२५	सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ।
४	१	३७	सर्वमभावो भावेष्वितरेतराभावसिद्धेः ।
२	१	३४	सर्वोपलब्धिरवयवव्यभिचारे ।
३	१	७	सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ।
१	२	४	सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः ।
२	२	५६	सहचरणास्थाननाट्यार्थवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकाचपुरुषेष्वतद्भावेऽपि तदुपचारः ।
४	१	४१	संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ।
२	२	१६	सन्तानानुमानविशेषणात् ।
२	२	२५	सम्प्रदानात् ।
२	१	५१	सम्बन्धाच्च ।
१	२	१३	सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् ।
४	२	२४	संयोगोपपत्तेश्च ।
३	१	६५	संसर्गाच्चानेकगुणग्रहणम् ।
५	१	२	साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ।
१	२	१८	साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ।
५	१	१	साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ।
५	१	३२	साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वं नित्यत्वप्रसङ्गादनित्यसमः ।
५	१	१५	साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशये ऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ।
५	१	३३	साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च ।
२	१	३३	साध्यत्वादवयविनि सन्देहः ।

अ·	आ·	सू·	
३	२	२७	साध्यत्वादहेतुः ।
५	१	४	साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः ।
१	१	३३	साध्यनिर्देशः प्रतिज्ञा ।
३	२	३	साध्यसमत्वादहेतुः ।
१	१	३६	साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ।
५	१	६	साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ।
१	२	८	साध्यविशिष्टः साध्यत्वात्साध्यसमः ।
२	१	५५	सामयिकत्वाच्छब्दार्थसंप्रत्ययस्य ।
५	१	१४	सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यासंशयसमः ।
१	२	६	सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ।
५	२	२३	सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ।
२	१	२६	सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः संनिकर्षनिमित्तत्वात् ।
२	२	४६	सुवर्णादीनां पुनरापत्तेरहेतुः ।
४	१	६३	सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ।
२	१	३६	सेनावनवद्ग्रहणमिति चेच्चातीन्द्रियत्वादणूनाम् ।
२	१	६४	स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ।
३	१	५१	स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ।
३	२	६	स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ।
३	२	१०	स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद् व्यक्तीनामहेतुः ।
३	२	४२	स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ।
३	२	२८	स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ।
४	२	३५	स्मृतिसंकल्पवच्च स्वप्नविषयाभिमानः ।
५	२	२०	स्वपक्षदोषाभ्युपगमात्परपक्षे दोषप्रसङ्गो मतानुज्ञा ।
५	१	४३	स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात्समानो दोष इति ।
४	२	३१	स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ।
४	२	१४	स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणास्यतथाभावो नाविषये प्रवृत्तिः ।

ह·

५	२	१२	हीनमन्यतमेनाप्यवयवेन न्यूनम् ।
५	२	१३	हेतूदाहरणाधिक्यमधिकम् ।
३	२	४६	हेतूपादानात्प्रतिषेधव्याभ्यनुज्ञा ।
१	१	३६	हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनम् ।
४	२	३३	हेत्वभावादसिद्धिः ।
५	२	२४	हेत्वाभासाश्च यथोक्ताः ।

इति ।

अत्र टिप्पण्याम् श्रौद्योतकरं वार्तिकम् ।
वाचस्पतिमिश्रकृता न्यायवार्तिकतात्पर्यटीका ।
उदयनाचार्यकृता तात्पर्यपरिशुद्धिः ।
विश्वनाथपञ्चाननकृता गौतमसूत्रवृत्तिः ।

एते ग्रन्थाः प्रमाणत्वेनाश्रिताः ।

श्रीगणेशाय नमः ।

श्रीवाचस्पतिमिश्रेण मिथिलेश्वरसूरिणा ।
लिख्यते मुनिमूर्धन्यश्रीगौतममतं महत् ॥ १ ॥

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ १ ॥ दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः ॥ २ ॥ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ ३ ॥ इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ ४ ॥ अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च ॥ ५ ॥ प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम् ॥ ६ ॥ आप्तोपदेशः शब्दः ॥ ७ ॥ स द्विविधो दृष्टादृष्टार्थत्वात् ॥ ८ ॥ आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ ९ ॥ इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति ॥ १० ॥

अत्र टिप्पण्यां येषां सूत्रत्वे प्रमाणमुपलब्धं तद्भावे वा तयोरदर्शनं वा तदुपन्यस्यते ।

१ तासां खल्वासां सद्विधानामिति भाष्येण सूत्रमवतार्य पठितमिति तात्पर्यटीका । २ तदनन्तरापायादिति पा० । क्रमप्रतिपादनार्थं चेदं सूत्रमिति वार्तिकम् । ३ अथोद्दिष्टविभागद्वारेण सूत्रमिति वार्तिकम् । ४ इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादिसूत्रमिति वार्तिकम् । ५ अनुमानविशेषणार्थं सूत्रमिति वार्तिकम् । ६ सूत्रार्थः पूर्ववदिति वार्तिकम् । ७ न शब्दमात्रमिति सूत्रार्थ इति वार्तिकम् । ८ इदं सूत्रं वङ्गाक्षरलिखितपुस्तके त्रुटितम् । स द्विविधो दृष्टादृष्टार्थत्वादित्यस्य सूत्रस्य तात्पर्यमाहेति तात्पर्यटीकायां दर्शनात्सूत्रमेवेदम् । ९ एतदर्थप्रकाशनायात्मादिसूत्रमिति वार्तिकम् । १० अत्रेतिशब्दः सूत्रानन्तर्गत एव भाष्ये अनुमानाच्च प्रतिपत्तव्यः कथम् इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति हेतुत्वार्थकतया संगतत्वात् स्थापितः । इदं सूत्रमिति वार्तिकम् ।

चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ ११ ॥ घ्राणरसनचक्षुस्त्वक्-श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥ १२ ॥ पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ॥ १३ ॥ गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥ १४ ॥ बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १५ ॥ युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १६ ॥ प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति ॥ १७ ॥ प्रवर्तनालक्षणा दोषाः ॥ १८ ॥ पुनरुत्पत्तिः प्रेत्यभावः ॥ १९ ॥ प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ २० ॥ बाधनालक्षणं दुःखमिति ॥ २१ ॥ तदत्यन्तविमोक्षोऽपवर्गः ॥ २२ ॥ समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥ २३ ॥ यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् ॥ २४ ॥ लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ २५ ॥ तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥ २६ ॥ सर्वत-

---

११ शरीरं लक्षयितुं सूत्रं चेष्टेत्यादीति ता॰ टी॰। १२ लक्षणसूत्राणि समानासमानजातीयविशेषणार्थानि सर्वाणीति सूत्रार्थो द्रष्टव्य इति वार्तिकम्। १३ अत्र २६ पृष्ठे टिप्पणी द्रष्टव्या। १४ एतत्सूत्रमिति वार्तिकम्। १५ बुद्धेरवसरप्राप्ताया लक्षणापदेशद्वारेण सूत्रमिति वार्तिकम्। १६ यस्मादिन्द्रियार्थसंनिकर्षे सत्यपि युगपज् ज्ञानानि न भवन्ति अतो गम्यते अस्ति तदिन्द्रियसंयोगि सहकारि निमित्तान्तरमव्यापि यस्य संनिधानासंनिधानानुविधानाज् ज्ञानस्योत्पत्त्यनुत्पत्ती भवत इति कुतः कारणवैकल्ये कार्यप्रतिबन्धादिति सूत्रार्थ इति वार्तिकम्। १७ तात्पर्यटीकापुस्तकेषु यत्र २ सूत्रं लिखितं तत्रैवाद्यन्तात्तरार्णि दृश्यन्ते। अत्र प्रवृ—भः इति लेखदर्शनादितिशब्दः सूत्रानन्तर्गत एव भाष्यपुस्तकेषु तथा दर्शनाच्चिवेशितः। १८ दोषलक्षणं प्रव—षा इति तात्पर्यटीका। १९ प्रेत्यभावं लक्षयति पुन— व इति ता॰ टी॰। २० प्रवृ—लमिति॰ ता॰ टी॰। २१ दुःखलक्षणं बाध—खमिति ता॰ टी॰। अत इतिशब्दः सूत्रानन्तर्गतः। २२ तद—र्गं इति ता॰ टी॰। २३ समानानेकधर्मोपपत्तेरिति सूत्रमिति वार्तिकम्। २४ प्रयोजनलक्षणं यम—नमिति ता॰ टी॰। २५ लौकिकपरीक्षकाणामिति सूत्रमिति वार्तिकम्। २६—२० अत्र ३६—३० पृष्ठे टिप्पणी द्रष्टव्या।

न्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ २७ ॥ सर्वतन्त्राविरुद्धस्तन्त्रे ऽधिकृतो ऽर्थः सर्वतन्त्रसिद्धान्तः ॥ २८ ॥ समानतन्त्रासिद्धः परतन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः ॥ २९ ॥ यत्सिद्धावन्यप्रकरणसिद्धिः सो ऽधिकरणसिद्धान्तः ॥ ३० ॥ अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ ३१ ॥ प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥ ३२ ॥ साध्यनिर्देशः प्रतिज्ञा ॥ ३३ ॥ उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः ॥ ३४ ॥ तथा वैधर्म्यात् ॥ ३५ ॥ साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ॥ ३६ ॥ तद्विपर्ययाद्वा विपरीतम् ॥ ३७ ॥ उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ ३८ ॥ हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ ३९ ॥ अविज्ञाततत्त्वे ऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥ ४० ॥ विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ ४१ ॥

इति गौतमसूत्रे प्रथमाध्यायस्य प्रथमाह्निकम् ॥

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ १ ॥ यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ २ ॥

---

२८ सर्व—न्त इति ता· टी· । २९ समा—न्त इति ता· टी· । ३० यत्सि—न्त इति ता· टी· । ३१ अभ्युपगमसिद्धान्तलक्षणसूत्रम् अ—न्त इति ता· टी· । ३२ अवयवानां विभागोद्देशार्थं सूत्रमिति वार्तिकम् । ३३ साध्य—ज्ञा इति ता· टी· । ३४ अत्र ४० पृष्ठे टिप्पणी द्रष्टव्या । ३५ सूत्रान्तरमवतारयति किमेतावदिति तया—त् इति ता· टी· । ३६ इदं सूत्रमिति वार्तिकम् । ३७ अत्र ४२ पृष्ठे टिप्पणी द्रष्टव्या । ३८ उद—य इति ता· टी· । ३९ हेत्व—नमिति ता· टी· । ४० इदं सूत्रमिति वार्तिकम् । ४१ इदं सूत्रमिति वार्तिकम् ।

१ इदं सूत्रमिति वार्तिकम् । २ समानजातिभ्यां वादवितण्डाभ्यामसमानजातीयेभ्यः प्रमाणादिभ्यो व्यवच्छेदः सूत्रार्थ इति ता· टी· ।

स प्रतिपक्षस्थापनाहीनो वितण्डा ॥ ३ ॥ सव्यभिचार-विरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः ॥ ४ ॥ अनैकान्तिकः सव्यभिचारः ॥ ५ ॥ सिद्धान्तमभ्युपेत्य तद्वि-रोधी विरुद्धः ॥ ६ ॥ यस्मात्प्रकरणचिन्ता स निर्णयार्थ-मपदिष्टः प्रकरणसमः ॥ ७ ॥ साध्यविशिष्टः साध्यत्वा-त्साध्यसमः ॥ ८ ॥ कालात्ययापदिष्टः कालातीतः ॥ ९ ॥ वचनविघातो ऽर्थविकल्पोपपत्त्या छलम् ॥ १० ॥ तत्त्रि-विधं वाक्छलं सामान्यच्छलमुपचारच्छलं चेति ॥ ११ ॥ अविशेषाभिहिते ऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्-छलम् ॥ १२ ॥ संभवतो ऽर्थस्यातिसामान्ययोगादसंभू-तार्थकल्पना सामान्यच्छलम् ॥ १३ ॥ धर्मविकल्पनिर्देशे ऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ १४ ॥ वाक्छलमे-वोपचारच्छलं तदविशेषात् ॥ १५ ॥ न तदर्थान्तर-भावात् ॥ १६ ॥ अविशेषे वा किञ्चित्साधर्म्यादेकच्छ-लप्रसङ्गः ॥ १७ ॥ साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ १८ ॥ विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्था-नम् ॥ १९ ॥ तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ २० ॥

इति गौतमसूत्रे प्रथमाध्यायः ॥ १ ॥

---

३ सप्र—डा इति ता· टी· । ४ विभागोद्देशपरं सूत्रं सव्य—सा इति ता· टी· । ५ अनैक्रान्तः इति वङ्गान्तरसूत्रपुस्तकपाठः । अनै—र इति ता· टी· । ६ को ऽस्य सूत्रस्यार्थ इति वार्तिकम् । ७ यस्मात्प्रकरणचिन्तेत्युक्तं सूत्रकृता । ता· टी· । ८ साध्या—म इति ता· टी· । ९ अत्र ५४ पृष्ठे टिप्पणी द्रष्टव्या । १० वच—लमिति ता· टी· । ११ विभागसूत्रमवतारयतीति ता· टी· । १२ अवि—लमिति ता· टी· । १३ संभ—लमिति ता· टी· । १४ धर्म—लमिति ता· टी· । १५ इदं सूत्रमिति वार्तिकम् । १६ सिद्धान्तसूत्रं न तद—त् इति ता· टी· । १७ कोस्य सूत्रस्यार्थ इति वार्तिकम् । १८ सूत्रार्थस्तु यथाश्रुतीति वार्तिकम् । १९ विप्र—नमिति ता· टी· । २० सूत्रान्तरमवतारयितुं भाष्यकार आहेति ता· टी· ।

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः ॥ १ ॥ विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ ॥ विप्रतिपत्तौ च संप्रतिपत्तेः ॥ ३ ॥ अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥ ४ ॥ तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ॥ ५ ॥ यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ ६ ॥ यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ॥ ७ ॥ प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ॥ ८ ॥ पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात्प्रत्यक्षोत्पत्तिः ॥ ९ ॥ पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ १० ॥ युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ ११ ॥ त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ १२ ॥ सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ॥ १३ ॥ तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ॥ १४ ॥ त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्तत्सिद्धेः ॥ १५ ॥ प्रमेया च तुलाप्रामाण्यवत् ॥ १६ ॥ प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥ १७ ॥

---

१ समानानेकधर्माध्यवसायादित्यादिसूत्रमिति वार्तिकम् । २ अस्य सूत्रत्वे विश्वनाथपञ्चाननवृत्तिः प्रमाणम् । ३ अत्र ६१ पृष्ठे टिप्पणी द्रष्टव्या । ४ अत्र ६१ पृष्ठे टिप्पणी द्रष्टव्या । ५ अत्र ६१ पृष्ठे टिप्पणी द्रष्टव्या । ६ अत्रैवकारो वङ्गाक्षरलिखितपुस्तके नास्ति । अत्र ६१ पृष्ठे टिप्पणी द्रष्टव्या । ७ अत्र ६४ पृष्ठे टिप्पणी द्रष्टव्या । ८ प्रमाणसामान्यात्तेषसूत्रम् । ९ अत्र ६४ पृष्ठे टिप्पणी द्रष्टव्या । १० पश्चात्सिद्धाविति सूत्रमिति वार्तिकम् । ११ युगपत्सिद्धाविति सूत्रमिति वार्तिकम् । १२ सिद्धान्तसूत्रमिति वृत्तिः । अयमपि प्रतिषेधस्त्रिष्वपि कालेषु नोपपद्य इत्ययं सूत्रार्थ इति वार्तिकम् । १३ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । १४ इदं सूत्रमिति परिशुद्धिः । १५ इदं सूत्रमिति वार्तिकम् । १६ अस्य चार्थस्य ज्ञापनार्थं सूत्रमिति वार्तिकम् । १७ पूर्वपक्षसूत्रमिति वृत्तिः ।

तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत्प्रमेयसिद्धिः ॥ १८ ॥ न प्रदीपप्रकाशसिद्धिवत्तत्सिद्धेः ॥ १९ ॥ प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥ २० ॥ नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥ २१ ॥ दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ॥ २२ ॥ ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २३ ॥ तदयोगपद्यलिङ्गत्वाच्च न मनसः ॥ २४ ॥ प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम् ॥ २५ ॥ सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ॥ २६ ॥ तैश्चापदेशो ज्ञानविशेषाणाम् ॥ २७ ॥ व्याहतत्वादहेतुः ॥ २८ ॥ नार्थविशेषप्राबल्यात् ॥ २९ ॥ प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥ ३० ॥ न प्रत्यक्षेण यावत्तावदप्युपलम्भात् ॥ ३१ ॥ न चैकदेशोपलब्धिरवयविसद्भावात् ॥ ३२ ॥ सध्यत्वादवयविनि संदेहः ॥ ३३ ॥ सर्वाग्रहणमवयव्यसिद्धेः ॥ ३४ ॥ धारणाकर्षणोपपत्तेश्च ॥ ३५ ॥ सेनावनवद् ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥ ३६ ॥ रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥ ३७ ॥

---

१८ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । १९ सिद्धान्तसूत्रमिति वृत्तिः एतदर्थे क्व चिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्व चिदनेकान्तः ॥ इति सूत्रमस्ति तत्र ७२ पृष्ठे टिप्पणी द्रष्टव्या । तत्सिद्धिः इति वं· पु· पाठः । २० प्रत्य—त् इति ता· टी· पूर्वपक्षसूत्रमिति परिशुद्धिः । २१ नात्ममनसोरित्यादिसूत्रमिति ता· टी· । २२ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २३ ज्ञान—ध इति ता· टी· । २४ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते अनवरोध इति वर्तत इति भाष्येण सूत्रत्वं प्रतीयते । २५ सिद्धान्तसूत्रमिति वृत्तिः । २६ अत्र ७५ पृष्ठे टिप्पणी द्रष्टव्या । २७ तैश्चा—णामिति ता· टी· । २८ व्याह—तुरिति ता· टी· । २९ परिहारसूत्रं नार्थ—त् इति ता· टी· । ३० पूर्वपक्षसूत्रमिति परिशुद्धिः । ३१ तदेतत्सूत्रं वार्तिककारो व्याचष्टे इति ता· टी· । ३२ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ३३ साध्यत्वादिति यथाश्रुतं सूत्रं गृहीत्वेति ता· टी· । ३४ संशयापाकरणार्थं सूत्रमिति वार्तिकम् । ३५ धार—श्चेति ता· टी· । ३६ आशङ्क्यात इतरसूत्रमिति ता· टी· । ३७ अत्र ७६ पृष्ठे टिप्पणी द्रष्टव्या ।

नैकदेशत्राससादृश्येभ्यो ऽर्थान्तरभावात् ॥ ३८ ॥ वर्तमाना-
भावः पततः पतितपतितव्यकालोपपत्तेः ॥ ३९ ॥ तयोरप्य-
भावो वर्तमानाभावे तदपेक्षत्वात् ॥ ४० ॥ नातीतानागत-
योरितरेतरापेक्षासिद्धिः ॥ ४१ ॥ वर्तमानाभावे सर्वाग्रहणं
प्रत्यक्षानुपपत्तेः ॥ ४२ ॥ कृततार्कर्तव्यतोपपत्तेस्तूभयथा ग्रह-
णम् ॥ ४३ ॥ अत्यन्तप्रायैकदेशसाधर्म्यादुपमानसिद्धेर्यथो-
क्तदोषानुपपत्तिः ॥ ४४ ॥ प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथो-
क्तदोषानुपपत्तिः ॥ ४५ ॥ प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४६ ॥
नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति ॥ ४७ ॥
तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥ ४८ ॥ शब्दो
ऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥ ४९ ॥ उपलब्धेर-
द्विप्रवृत्तित्वात् ॥ ५० ॥ संबन्धाच्च ॥ ५१ ॥ आप्तोपदे-
शसामर्थ्याच्छब्दादर्थसंप्रत्ययः ॥ ५२ ॥ पूरणप्रदाहपाटना-
नुपलब्धेश्च संबन्धभावः ॥ ५३ ॥ शब्दार्थव्यवस्थाना-
दप्रतिषेधः ॥ ५४ ॥ सामयिकत्वाच्छब्दार्थसंप्रत्यय-
स्य ॥ ५५ ॥ जातिविशेषे चानियमात् ॥ ५६ ॥ तद-
प्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥ ५७ ॥ न कर्म-
कर्तृसाधनवैगुण्यात् ॥ ५८ ॥

---

३८ अत्र ८७ पृष्ठे टिप्पणी द्रष्टव्या । ३९ वर्तमानकालप्रतिषेधार्थं सूत्र-
मिति वार्तिकम् । ४० एतदनुज्ञापनार्थं सूत्रमिति वार्तिकम् । ४१ अत्र
८८ पृष्ठे टिप्पणी द्रष्टव्या । ४२ अत्र ८९ पृष्ठे टिप्पणी द्रष्टव्या । ४३ अत्र ८९ पृष्ठे
टिप्पणी द्रष्टव्या । ४४ अत्य—द्विरिति ता॰ टी॰ । ४५ प्रसि—त्तिरिति ता॰ टी॰ ।
४६ प्रत्य—द्वेरिति ता॰ टी॰ । ४७–४८ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते ।
४९ अत्र ९१ पृष्ठे टिप्पणी द्रष्टव्या । ५० अस्य सूत्रत्वे प्रमाणं नोपलभ्यते ।
५१ अत्र ९२ पृष्ठे टिप्पणी द्रष्टव्या । ५२ अत्र ९२ पृष्ठे टिप्पणी द्रष्टव्या ।
५३–५४–५५ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । ५६ जाति—त् इति ता॰ टी॰ ।
५७ तद—भ्य इति ता॰ टी॰ । ५८ सिद्धान्तसूत्रमिति वृत्तिः ।

अभ्युपेत्य कालभेदे दोषवचनात् ॥ ५९ ॥ अनुवादोपपत्तेश्च ॥ ६० ॥ वाक्यविभागस्य चार्थग्रहणात् ॥ ६१ ॥ विध्यर्थवादानुवादवचनविनियोगात् ॥ ६२ ॥ विधिर्विधायकः ॥ ६३ ॥ स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥ ६४ ॥ विधिविहितस्यानुवचनमनुवादः ॥ ६५ ॥ नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥ ६६ ॥ शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥ ६७ ॥ मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥ ६८ ॥

इति गौतमसूत्रे द्वितीयाध्यायस्याद्यमाह्निकम् ॥

न चतुष्टयमैतिह्यार्थापत्तिसंभवाभावप्रामाण्यात् ॥ १ ॥ शब्दैतिह्यार्थान्तर्भावादनुमानेऽर्थापत्तिसंभवाभावानर्थान्तरभावाच्चाप्रतिषेधः ॥ २ ॥ अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥ ३ ॥ अनर्थापत्तावर्थापत्त्यभिमानात् ॥ ४ ॥ प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् ॥ ५ ॥ तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ ६ ॥ नाभावप्रामाण्यं प्रमेयासिद्धेः ॥ ७ ॥ लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः ॥ ८ ॥ असत्यर्थे नाभाव इति चेद् नान्यलक्षणोपपत्तेः ॥ ९ ॥ तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥

५९-६०-६१-६२-६३-६४-एषां सूत्रत्वे प्रमाणं नोपलभ्यते। ६५ विधि--द इति ता· टी·। ६६ कोऽस्य सूत्रस्यार्थ इति वार्तिकम्। ६७ शीघ्र--ष इति ता· टी ।
६८ अनन्तरसूत्रावतारणपरं भाष्यं किं पुनः प्रतिषेधेति ता· टी ।

१ अत्र १०० पृष्ठे टिप्पणी द्रष्टव्या । २ अत्र १०१ पृष्ठ टिप्पणी द्रष्टव्या । ३ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ४ सौत्रं दूषणमाहेति ता· टी· । वं· पुं· (नानैकान्तिकत्वन्नर्थापत्तेरित्यादावधिकः पाठः) । ५ प्रति--त इति ता· टी· । ६ अत्र १०२ पृष्ठ टिप्पणी द्रष्टव्या । ७ नाभा--ङेरिति ता· टी· । ८ तत्रानेकधाभिन्नप्रपञ्चस्योदाहरणार्थं सूत्रमिति वार्तिकम् । ९ अत्र १०३ पृष्ठे टिप्पणी द्रष्टव्या । १० तदनुपलब्धेरर्थासिद्धेरलक्षितेष्वहेतुः । एवं वं· पु· पाठः । अत्र १०४ पृष्ठ टिप्पणी द्रष्टव्या ।

न लक्षणावस्थितापेक्षासिद्धेः ॥ ११ ॥ प्रागुत्पत्तेरभावोपपत्तेश्च ॥ १२ ॥ आदिमत्त्वादैन्द्रियकत्वात्कृतकवदुपचाराच्च ॥ १३ ॥ न घटाभावसामान्यनित्यत्वाच्चित्येष्वप्यनित्यवदुपचाराच्च ॥ १४ ॥ तत्त्वभाक्तयोर्नानात्वविभागादव्यभिचारः ॥ १५ ॥ सन्तानानुमानविशेषणात् ॥ १६ ॥ कारणद्रव्यस्य प्रदेशशब्देनाभिधानाद् नित्येष्वप्यव्यभिचार इति ॥ १७ ॥ प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥ १८ ॥ तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥ १९ ॥ अनुपलम्भादप्यनुपलब्धिसद्भावान्नावरणानुपपत्तिरनुपलम्भात् ॥ २० ॥ अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ २१ ॥ अस्पर्शत्वात् ॥ २२ ॥ न कर्मानित्यत्वात् ॥ २३ ॥ नाणुनित्यत्वात् ॥ २४ ॥ संप्रदानात् ॥ २५ ॥ तदन्तरालानुपलब्धेरहेतुः ॥ २६ ॥ अध्यापनादप्रतिषेधः ॥ २७ ॥ अभ्यासात् ॥ २८ ॥ नान्यत्वेऽप्यभ्यासस्योपचारात् ॥ २९ ॥ अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः ॥ ३० ॥ तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः ॥ ३१ ॥ विनाशकारणानुपलब्धेः ॥ ३२ ॥ अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ ३३ ॥ उपलभ्यमाने च नुपलब्धेरसत्त्वादनपदेशः ॥ ३४ ॥

---

११ अस्य चार्थस्य ज्ञापनार्थं सूत्रमिति वार्तिकम् । १२ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । १३ कृतकवदुपचारादित्यनेन सूत्रेणेति वार्तिकम् । १४ अत्र १०६ पृष्ठे टिप्पणी द्रष्टव्या । १५-१६-१७ तत्त्वभाक्तयोः संतानानुमान-कारणद्रव्यस्येतिसूत्रैरिति ता॰ टी॰ । १८ अत्र १०८ पृष्ठे टिप्पणी द्रष्टव्या । १९-२० अत्र १०९ पृष्ठे टिप्पणी द्रष्टव्या । २१ अत्र ११० पृष्ठे टिप्पणी द्रष्टव्या । २२ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २३ अत्र ११० पृष्ठे टिप्पणी द्रष्टव्या । २४ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २५ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २६ अत्र १११ पृष्ठे टिप्पणी द्रष्टव्या । २७ सिद्धान्तसूत्रमिति वृत्तिः । २८ पूर्वपक्षसूत्रमिति वृत्तिः । २९ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ३०-३१ अत्र ११२ पृष्ठे टिप्पणी द्रष्टव्या । ३२-३३-३४ एषां सूत्रत्वे प्रमाणं नोपलभ्यते ।

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥ ३५ ॥ विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ ३६ ॥ अस्पर्शत्वादप्रतिषेधः ॥ ३७ ॥ विभक्त्यन्तरोपपत्तेश्च समासे ॥ ३८ ॥ विकारादेशोपदेशात्संशयः ॥ ३९ ॥ प्रकृतिविवृद्धौ विकारवृद्धेः ॥ ४० ॥ न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः ॥ ४१ ॥ नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ४२ ॥ द्रव्यविकारे वैषम्यवद् वर्णविकारविकल्पः ॥ ४३ ॥ न विकारधर्मानुपपत्तेः ॥ ४४ ॥ विकारप्राप्तानामपुनरापत्तेः ॥ ४५ ॥ सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ४६ ॥ नित्यत्वे ऽविकारादनित्यत्वे चानवस्थानात् ॥ ४७ ॥ नित्यानामतीन्द्रियत्वात्तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ ४८ ॥ अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ॥ ४९ ॥ विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ ५० ॥ प्रकृत्यनियमाद्वर्णविकाराणाम् ॥ ५१ ॥ अनियमे नियमाच्चानियमः ॥ ५२ ॥ नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥ ५३ ॥ गुणान्तरापत्त्युपमर्दह्रासवृद्धिश्लेषेभ्यस्तु विकारोपप-

---

३५ उक्तार्थं सूत्रमिति वार्तिकम् । ३६ सिद्धान्तिनः सूत्रान्तरमिति वृत्तिः । ३७ अत्र ११५ पृष्ठे टिप्पणी द्रष्टव्या । ३८ विभ—से इति सूत्रव्याख्ययैव भाष्यवार्तिके व्याख्याते इति ता॰ टी. । ३९ अत्र ११६ पृष्ठे टिप्पणी द्रष्टव्या । ४० अत्र ११७ पृष्ठे टिप्पणी द्रष्टव्या । ४१ अत्र १३८ पृष्ठे टिप्पणी द्रष्टव्या । ४२ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ४३ अत्र ११७ पृष्ठ टिप्पणी द्रष्टव्या । ४४ अत्र ११८ पृष्ठे टिप्पणी द्रष्टव्या । ४५ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । अपुनरावृत्तेः । इति पा॰ ४६ अत्र ११८ पृष्ठे टिप्पणी द्रष्टव्या । एतदुत्तरं तद्धिकाराणां सुवर्णभावाव्यतिरेकात् । इत्येकमेव सूत्रं सूत्रोद्धारे दृश्यते । सूत्रत्रयं मुद्रितपुस्तके तेषां सूत्रत्वे प्रमाणं नोपलभ्यते । ४७–४८–४९ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । ५० अत्र १२० पृष्ठे टिप्पणी द्रष्टव्या । ५१ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ५२ अत्र १२० पृष्ठे टिप्पणी द्रष्टव्या । ५३ अत्र १२१ पृष्ठे टिप्पणी द्रष्टव्या ।

त्तेर्वर्णविकाराः ॥ ५४ ॥ ते विभक्त्यन्ताः पदम् ॥ ५५ ॥ तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात्संशयः ॥ ५६ ॥ याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्युपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः ॥ ५७ ॥ न तदनवस्थानात् ॥ ५८ ॥ सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावे ऽपि तदुपचारः ॥ ५९ ॥ आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ॥ ६० ॥ व्यक्त्याकृतियुक्ते ऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्भवके जातिः ॥ ६१ ॥ नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥ ६२ ॥ व्यक्त्याकृतिजातयस्तु पदार्थः ॥ ६३ ॥ व्यक्तिर्गुणविशेषाश्रयो मूर्तिः ॥ ६४ ॥ आकृतिर्जातिर्लिङ्गाख्या ॥ ६५ ॥ समानप्रसवात्मिका जातिः ॥ ६६ ॥

इति गौतमसूत्रे द्वितीयो ऽध्यायः ॥ २ ॥

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥ १ ॥ न विषयव्यवस्थानात् ॥ २ ॥ तद्भावस्थानादेवात्मसद्भावादप्रतिषेधः ॥ ३ ॥ शरीरदाहे पातकाभावात् ॥ ४ ॥

---

५४ अत्र १२१ पृष्ठे टिप्पणी द्रष्टव्या । ५५ तेवि–दमिति ता॰ टी॰ । ५६ अस्य सूत्रत्वे वृत्तिकृतो ऽपि संशयः । ५७ अत्र १२२ पृष्ठे टिप्पणी द्रष्टव्या । ५८ अत्र १२२ पृष्ठे टिप्पणी द्रष्टव्या । ५९ सहचरणादिसूत्रमिति वार्तिकम् ।

६० अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ६१ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ६२ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ६३ पारमर्षसूत्रं व्यक्त्याकृतिजातयस्तु पदार्थ इति ता॰ टी॰ । ६४ व्यक्तिर्गुणविशेषाश्रयो मूर्तिरिति सूत्रमिति वार्तिकम् । ६५ आकृ–ख्या इति ता॰ टी॰ । ६६ समा–र्तिरिति ता॰ टी॰ । १ अत्र १२८ पृष्ठे टिप्पणी द्रष्टव्या । २ वि–त्इति ता॰ टी॰ । ३ तद्भ–धरति ता॰ टी॰ । तद्भावस्थानादात्मसद्भावादप्रतिषेध इति सूत्रमिति वार्तिकम् । ४ अत्र १३० पृष्ठे टिप्पणी द्रष्टव्या ।

तदभावः सात्मकप्रदाहे ऽपि तन्नित्यत्वात् ॥ ५ ॥ न कार्याश्रयकर्तृवधात् ॥ ६ ॥ सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥ ७ ॥ नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ॥ ८ ॥ एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥ ९ ॥ अवयवनाशे ऽप्यवयव्युपलब्धेरहेतुः ॥ १० ॥ दृष्टान्तविरोधादप्रतिषेधः ॥ ११ ॥ इन्द्रियान्तरविकारात् ॥ १२ ॥ न स्मृतेः स्मर्तव्यविषयत्वात् ॥ १३ ॥ तदात्मगुणसद्भावादप्रतिषेधः ॥ १४ ॥ अपरिसंख्यानाच्च स्मृतिविषयस्य ॥ १५ ॥ नात्मप्रतिपत्तिहेतूनां मनसि संभवात् ॥ १६ ॥ ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥ १७ ॥ नियमश्च निरनुमानः ॥ १८ ॥ पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसंप्रतिपत्तेः ॥ १९ ॥ पद्मादिषु प्रबोधसंमीलनविकारवत्तद्विकारः ॥ २० ॥ नोष्णशीतवर्षकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ॥ २१ ॥ प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् ॥ २२ ॥ अयसो ऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ॥ २३ ॥ नान्यत्र प्रवृत्त्यभावात् ॥ २४ ॥

---

५ तद—त् इति ता· टी· । ६ न कार्याश्रयकर्तृवधात् इति सूत्रमिति वार्तिकम् । ७ सव्येन चक्षुषा दृष्टमितरेण प्रत्यभिजानातीति सूत्रमिति वार्तिकम् । सव्य—त् इति ता· टी· । ८ नैक—त् इति ता· टी· । इदं सूत्रमिति वार्तिकम् । ९ एक—त्वमिति ता· टी· । १० अपरे तु अवयवनाशे ऽप्यवयव्युपलब्धेरहेतुरिति परिहारान्तरं वर्णयन्ति तस्योत्तरं दृष्टान्तविरोधादिति सूत्रमिति वार्तिकादस्य सूत्रत्वे मूलं चिन्त्यम् । ११ अस्य सूत्रत्वे पूर्वसूत्रस्यवार्तिकंप्रमाणम् । १२ इन्द्रिया—त् इति ता· टी· प्रतिसंधानं प्रकारान्तरेण सूत्रयतीति परिशुद्धिः । १३ अस्याक्षेपसूत्रमिति ता· टी· । १४ तदा—ध इति ता· टी· । १५ वं· पु· पञ्चदशसूत्रं नास्ति । अस्यसूत्रत्वे वृत्तिकृतो ऽपि संशयः । १६—१७—१८ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । १९ अस्यार्थस्य ज्ञापनार्थं पूर्वाभ्यस्तेत्यादि सूत्रमिति वार्तिकम् । २० अत्र १३९ पृष्ठे टिप्पणी द्रष्टव्या । २१ नाऽस्मिकः पद्मादिप्रबोधसंमीलनविकार इति सूत्रार्थ इति वार्तिकम् । २२ अत्र १३८ पृष्ठे टिप्पणी द्रष्टव्या । २३ अत्र १३८ पृष्ठे टिप्पणी द्रष्टव्या । २४ नान्यत्र प्रवृत्त्यभावादिति सूत्रमिति वार्तिकम् ।

वीतरागजन्मादर्शनात् ॥ २५ ॥ सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ॥ २६ ॥ न संकल्पनिमित्तत्वाद्रागादीनाम् ॥ २७ ॥ पार्थिवं गुणान्तरोपलब्धेः ॥ २८ ॥ श्रुतिप्रामाण्याच्च ॥ २९ ॥ कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात्संशयः ॥ ३० ॥ महदणुग्रहणात् ॥ ३१ ॥ रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ॥ ३२ ॥ तदनुपलब्धेरहेतुः ॥ ३३ ॥ नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥ ३४ ॥ द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥ ३५ ॥ अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ॥ ३६ ॥ कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥ ३७ ॥ अव्यभिचाराच्च प्रतिघातो भौतिकधर्मः ॥ ३८ ॥ मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥ ३९ ॥ न रात्रावप्यनुपलब्धेः ॥ ४० ॥ बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥ ४१ ॥ अभिव्यक्तौ चाभिभवात् ॥ ४२ ॥ नक्तंचरनयनरश्मिदर्शनाच्च ॥ ४३ ॥

---

२५ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २६ अनैकान्तिकपक्षे सूत्रमिति वार्तिकम् । २७ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २८ सिद्धान्तसूत्रमिति वृत्तिः । अस्यार्थे वङ्गान्तरलिखितपुस्तके पार्थिवाप्यतैजसं तद्गुणोपलब्धेः १ । निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् २ । गन्धस्वेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ३ । सूत्रत्रयमस्ति तद्गौतमप्रणीतं न भवतीति भाष्यालोचनात्प्रतीयते । २९ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते। ३० संशयप्रतिपादनार्थं सूत्रमिति वार्तिकम्। ३१ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ३२ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ३३ अत्र १४३ पृष्ठे टिप्पणी द्रष्टव्या । ३४ एवं तर्हीदं सूत्रं नोपलब्धेः कारणप्रतिपादकमिति वार्तिकम् । ३५ शेषं भाष्ये इति वार्तिकस्वरसादस्य सूत्रत्वं सिध्यति। ३६ एवं च सूत्रमिति वार्तिकम् । अत्र १४४ पृष्ठे टिप्पणी द्रष्टव्या । ३७ शेषं भाष्यइति वार्तिकस्वरसादस्य सूत्रत्वं सिध्यति । ३८–३९ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ४० अत्र १४५ पृष्ठे टिप्पणी द्रष्टव्या । ४१ चत्र १४५ पृष्ठे टिप्पणी द्रष्टव्या । ४२ अभित् इति ता॰ टी॰ । ४३ नक्तंचररश्मिदर्शनाच्चेति दृष्टान्तसूत्रम् इति वार्तिकम् ।

अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥ ४४ ॥ कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥ ४५ ॥ अप्रतीघातात्सन्निकर्षोपपत्तिः ॥ ४६ ॥ आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्ये ऽविघातात् ॥ ४७ ॥ नेतरेतरधर्मप्रसङ्गात् ॥ ४८ ॥ आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः ॥ ४९ ॥ दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः ॥ ५० ॥ स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ॥ ५१ ॥ त्वगव्यतिरेकात् ॥ ५२ ॥ न युगपदर्थानुपलब्धेः ॥ ५३ ॥ विप्रतिषेधाच्च न त्वगेका ॥ ५४ ॥ इन्द्रियार्थपञ्चत्वात् ॥ ५५ ॥ न तदर्थबहुत्वात् ॥ ५६ ॥ गन्धत्वाद्व्यतिरेकाद्गन्धादीनामप्रतिषेधः ॥ ५७ ॥ विषयत्वाव्यतिरेकादेकत्वम् ॥ ५८ ॥ न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥ ५९ ॥ भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ६० ॥ गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥ ६१ ॥ अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥ ६२ ॥ न सर्वगुणानुपलब्धेः ॥ ६३ ॥

---

४४ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते। ४५ अस्य सूत्रत्वे शेषं भाष्यइति वार्तिकस्वरसो मानम् । नुपलब्धेरहेतुरिति वङ्गान्तरलिखितपुस्तकपाठः । ४६ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ४७ अस्य सूत्रत्वे शेषं भाष्यइति वार्तिकं मानम् । ४८ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ४९ अस्य सूत्रत्वे शेषं भाष्यइति वार्तिकं प्रमाणम् । ५० अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ५१ प्रश्नपूर्वकं सूत्रमवतारयतीति ता· टी· । ५२ त्वग—त् इति ता· टी· त्वगव्यतिरेकादित्यस्य सूत्रतां सूचयतीति परिशुद्धिः । ५३ सौत्रं सिद्धान्तमाहेति ता· टी· । ५४ शेषं भाष्यइति वार्तिकस्वरसादस्य सूत्रत्वम् । ५५ इन्द्रियार्थपञ्चत्वादिति सूत्रमिति वार्तिकम् । ५६ पूर्वपक्षिणः सूत्रं न त—त् इति ता· टी· । ५७ अस्योत्तरद्वारकं सूत्रमिति वार्तिकम् । ५८ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ५९ इदं सूत्रमिति वार्तिकम् । ६० अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ६१–६२ अत्र १५४ पृष्ठे टिप्पणी द्रष्टव्या । ६३ न स–ब्धेरिति ता· टी· ।

ऐकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तराणां तदनुपलब्धिः ॥ ६४ ॥ संसर्गाच्चानेकगुणग्रहणम् ॥ ६५ ॥ बिष्टं ह्यपरं परेण ॥ ६६ ॥ न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥ ६७ ॥ पूर्वपूर्वगुणोत्कर्षात्तत्तत्प्रधानम् ॥ ६८ ॥ तद्भावस्थानं तु भूयस्त्वात् ॥ ६९ ॥ सगुणानामिन्द्रियभावात् ॥ ७० ॥ तेनैव तस्याग्रहणाच्च ॥ ७१ ॥ न शब्दगुणोपलब्धेः ॥ ७२ ॥ तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ७३ ॥

इति श्रीगौतमसूत्रे तृतीयाध्यायस्याद्यमाह्निकम् ॥

कर्म्माकाशसाधर्म्यात्संशयः ॥ १ ॥ विषयप्रत्यभिज्ञानात् ॥ २ ॥ साध्यसमत्वादहेतुः ॥ ३ ॥ न युगपदग्रहणात् ॥ ४ ॥ अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥ ५ ॥ क्रमवृत्तित्वादयुगपद्ग्रहणम् ॥ ६ ॥ अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात् ॥ ७ ॥ न गत्यभावात् ॥ ८ ॥ स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ॥ ९ ॥ स्फटिकेप्यपरापरोत्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः ॥ १० ॥ नियमहेत्वभावादयथादर्शनमभ्यनुज्ञा ॥ ११ ॥ नोत्पत्तिविनाशकारणोपलब्धेः ॥ १२ ॥ क्षीरविनाशे

---

६४ ऐकैकश्येनेति सूत्र निर्देश इति वार्तिकम् । ६५ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ६६ बिष्टं–णइति ता· टी· । ६७ अस्य सूत्रस्य विकल्पतोऽनेकः सूत्रार्थ इति वार्तिकम् । ६८ पूर्व–नम् इति ता· टी· । ६९ इदं सूत्रमिति वार्तिकम् । ७०–७१–७२ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । ७३ इदं सूत्रमिति वार्तिकम् ।

१ संशयप्रदर्शनाय सूत्रमिति वृत्तिः । २–३ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ४–५ अत्र १६० पृष्ठे टिप्पणी द्रष्टव्या । ६ वृत्तिवृत्तिमतोर्नानात्वादिति सूत्रार्थ इति वार्तिकम् । ७ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ८ अत्र १६१ पृष्ठे टिप्पणी द्रष्टव्या । ९ इदं सूत्रमिति वार्तिकम् । १० स्फटिके–तुरिति ता· टी· । ११ सिद्धान्तसूत्रमिति ता· टी· । १२ उत्तरं सूत्रमवतारयतीति ता· टी· ।

कारणानुपलब्धिवद्ध्युत्पत्तिः ॥ १३ ॥ लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ १४ ॥ न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥ १५ ॥ व्यूहान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तिरनुमानात् ॥ १६ ॥ क्व चिद्विनाशकारणानुपलब्धेः क्व चिच्चोपलब्धेरनेकान्तः ॥ १७ ॥ नेन्द्रियार्थयोस्तद्विनाशेपि ज्ञानावस्थानात् ॥ १८ ॥ युगपज् ज्ञेयानुपलब्धेश्च न मनसः ॥ १९ ॥ तदात्मगुणत्वेपि तुल्यम् ॥ २० ॥ इन्द्रियैर्मनसः सन्निकर्षाभावात्तदनुत्पत्तिः ॥ २१ ॥ नोत्पत्तिकारणानपदेशात् ॥ २२ ॥ विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ २३ ॥ अनित्यत्वग्रहाद्बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् ॥ २४ ॥ ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ॥ २५ ॥ नान्तःशरीरवृत्तित्वान्मनसः ॥ २६ ॥ साध्यत्वादहेतुः ॥ २७ ॥ स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ॥ २८ ॥ न तदाशुगतित्वान्मनसः ॥ २९ ॥ न स्मरणकालानियमात् ॥ ३० ॥ आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ॥ ३१ ॥ व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥ ३२ ॥ प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावा-

---

१३–१४ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते। १५ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । १६ शेषं भाष्ये इति वार्तिकस्वरसादस्य सूत्रत्वम् । १७ सिद्धान्तिनः सूत्रमिति वृत्तिः । १८ सिद्धान्तसूत्रमिति वृत्तिः । १९ युगपज् ज्ञेयानुपलब्धेश्च न मनस इति पूर्वसूत्रस्थंस्येति परिशुद्धिः । २० तदात्मगुणत्वेऽपि तुल्यमिति सूत्रमेवेति परिशुद्धिः । २१ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २२ अत्र १६९ पृष्ठे टिप्पणी द्रष्टव्या । २३ विना-गदति ता· टी· । २४–२५–२६ एषां सूत्रत्वे प्रमाणं नोपलभ्यते। २७ साध्य–तुरिति ता· टी· । २८ स्म–रधदुति ता· टी· । २९ न त–सदति ता· टी· । ३० न स्मरत्–इति ता· टी· । ३१ आत्मय इति ता· टी· । ३२ व्यास–नम् इति ता· टी· ।

दयुगपत्स्मरणम् ॥ ३३ ॥ प्रातिभवत्तु प्रणिधानादनपेक्षे स्मार्ते यौगपद्यप्रसङ्गः ॥ ३४ ॥ नास्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ॥ ३५ ॥ तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवादीष्वप्रतिषेधः ॥ ३६ ॥ परश्वादावारम्भनिवृत्तिदर्शनात् ॥ ३७ ॥ कुम्भादिष्वनुपलब्धेरहेतुः ॥ ३८ ॥ नियमानियमौ तु तद्विशेषकौ ॥ ३९ ॥ यथोक्तहेतुत्वात्पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ॥ ४० ॥ परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥ ४१ ॥ स्मरणं त्वात्मनो नास्वाभाव्यात् ॥ ४२ ॥ प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसंबन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ॥ ४३ ॥ कर्मानवस्थायिग्रहणात् ॥ ४४ ॥ अव्यक्तग्रहणमनवस्थायित्वाद्विद्युत्संपाते रूपाद्यव्यक्तग्रहणवत् ॥ ४५ ॥ हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा ॥ ४६ ॥ ग्रहणे हेतुविकल्पाद् ग्रहणविकल्पो न बुद्धिविकल्पात् ॥ ४७ ॥ प्रदीपार्चिःसंतत्यभिव्यक्तग्रहणवत्तद्ग्रहणम् ॥ ४८ ॥ द्रव्ये स्वगुणपरगुणोपलब्धेःसंशयः ॥ ४९ ॥ यावच्छरीरभावित्वाद्रूपादीनाम् ॥ ५० ॥ न पाकजगुणा-

---

वं॰ पु॰ चतुस्त्रिंशत्तमं सूत्रं नास्ति । वं॰ पु॰ अष्टत्रिंशत्तममपि नास्ति ।
वं॰ पु॰ चतुश्चत्वारिंशत्तमसूत्रं नास्ति ।

३३--३४ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ३५ ज्ञातुरेवेच्छादय इति सूत्रार्थ इति वार्तिकम् । ३६ अत्र १७४ पृष्ठे टिप्पणी द्रष्टव्या । ३७ अस्य सूत्रत्वे प्रमाणं नास्ति । ३८ अस्य सूत्रत्वे प्रमाणं नास्ति । ३९ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ४० यथो—स इति ता॰ टी॰ । ४१–४२ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ४३ प्रणिधानादिसूत्रमिति वार्तिकम् । १७८ पृष्ठे टिप्पणी द्रष्टव्या । ४४ कर्मानवस्थायिग्रहणादिति सूत्रमिति वार्तिकम् । ४५–४६–४७-४८ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । ४९ इदं सूत्रमिति वार्तिकम् । ५० अत्र १८२ पृष्ठे टिप्पणी द्रष्टव्या ॥

न्तरोत्पत्तेः ॥ ५१ ॥ प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ ५२ ॥ शरीरव्यापित्वात् ॥ ५३ ॥ केशनखादिष्वनुपलब्धेः ॥ ५४ ॥ त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः ॥ ५५ ॥ शरीरगुणवैधर्म्यात् ॥ ५६ ॥ न रूपादीनामितरेतरवैधर्म्यात् ॥ ५७ ॥ ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ॥ ५८ ॥ ज्ञानायौगपद्यादेकं मनः ॥ ५९ ॥ न युगपदनेकक्रियोपलब्धेः ॥ ६० ॥ अलातचक्रदर्शनवत्तदुपलब्धिराशुसंचारात् ॥ ६१ ॥ यथोक्तहेतुत्वाच्चाणु ॥ ६२ ॥ पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ६३ ॥ भूतेभ्यो मूर्त्युपादानवत्तदुपादानम् ॥ ६४ ॥ न साध्यसमत्वात् ॥ ६५ ॥ नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६६ ॥ तथाहारस्य ॥ ६७ ॥ प्राप्तौ चानियमात् ॥ ६८ ॥ शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म ॥ ६९ ॥ एतेनानियमः प्रत्युक्तः ॥ ७० ॥ उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः ॥ ७१ ॥ तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे ॥ ७२ ॥ न करणाकरणयोरारम्भदर्शनात् ॥ ७३ ॥ मनःकर्मनिमित्तत्वाच्च संयोगानुच्छेदः ॥ ७४ ॥ नित्यत्वप्र-

---

५१ सिद्धान्तसूत्रमिति वृत्तिः । ५२ सिद्धान्तसूत्रमिति वृत्तिः । ५३ शरीरव्यापित्वादित्यस्य सूत्रस्येति परिशुद्धिः । ५४ अत्र १८४ पृष्ठे टिप्पणी द्रष्टव्या । ५५ त्वक्पर्यन्तत्वाच्छरीरस्येति सूत्रव्याघातादिति परिशुद्धिः । ५६–५७ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ५८ उक्तः सूत्रार्थ इति वार्तिकम् । ५९ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ६० शेषं भाष्ये इति वार्तिकस्वारस्याद्स्य सूत्रत्वम् । ६१ अस्योत्तरद्वारकं सूत्रमिति वार्तिकम् । ६२ इदं सूत्रमिति परिशुद्धिः । ६३ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ६४ अत्र १८७ पृष्ठे टिप्पणी द्रष्टव्या । ६५ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ६६–६७ पूर्वसूत्रप्रतीकेन पूरयतीति तात्पर्यटीकादर्शनाद्नयोः सूत्रत्वम् । ६८ प्राप्तौ–त् इति ता॰ टी॰ । ६९ प्राप्तस्तर्हि इत्यधिकः वं॰ पु॰ । अस्योत्तरद्वारकं सूत्रमिति वार्तिकम् । ७० इदं सूत्रमिति परिशुद्धिः । ७१ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ७२–७३–७४ एषां सूत्रत्वे प्रमाणं नोपलभ्यते ।

सङ्गश्च प्रायणानुपपत्तेः ॥ ७५ ॥ अणुश्यामतानित्यत्वव-
देतत्स्यात् ॥ ७६ ॥ नाकृताभ्यागमप्रसङ्गात् ॥ ७७ ॥

इति गौतमसूत्रे तृतीयोध्यायः ॥ ३ ॥

प्रवृत्तिर्यथोक्ता ॥ १ ॥ तथा दोषाः ॥ २ ॥ तत्त्वै-
राश्यं रागद्वेषमोहार्थान्तरभावात् ॥ ३ ॥ नैकप्रत्यनीक-
भावात् ॥ ४ ॥ व्यभिचारादहेतुः ॥ ५ ॥ तेषां मोहः पापी-
यान्नामूढस्येतरोत्पत्तेः ॥ ६ ॥ निमित्तनैमित्तिकभावादर्था-
न्तरभावो दोषेभ्यः ॥ ७ ॥ न दोषलक्षणावरोधान्मोह-
स्य ॥ ८ ॥ नित्यनैमित्तिकोपपत्तेश्च तुल्यजातीयानाम-
प्रतिषेधः ॥ ९ ॥ आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ १० ॥
व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात् ॥ ११ ॥ न घटाद् घटा-
निष्पत्तेः ॥ १२ ॥ व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः ॥ १३ ॥
अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥ १४ ॥ व्याघा-
तादप्रयोगः ॥ १५ ॥ नातीतानागतयोः कारकशब्दप्रयो-
गात् ॥ १६ ॥ न विनष्टेभ्यो ऽनिष्पत्तेः ॥ १७ ॥ क्रमनिर्दे-
शादप्रतिषेधः ॥ १८ ॥ ईश्वरः कारणं पुरुषकर्माफल्यदर्श-
नात् ॥ १९ ॥ न पुरुषकर्माभावे फलानिष्पत्तेः ॥ २० ॥
तत्कारितत्वादहेतुः ॥ २१ ॥ अनिमित्ततो भावोत्पत्तिः

७५–७६ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ७७ अत्र १९२ पृष्ठे टिप्पणी द्रष्टव्या । १ शङ्कानिराकरणाय सूत्रमित्याहेति ता॰ टी॰ । २ प्रवृत्तिदोष-सूत्राभ्यामिति परिशुद्धिः । ३ सिद्धान्तसूत्रमिति वृत्तिः । ४–५–६–७–८–९ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । १० सिद्धान्तसूत्रमिति वृत्तिः । ११ रूपादि-मत्सामग्रीपूर्वकं गवादि व्यक्तमिति सूत्रार्थ इति वार्तिकम् । १२–१३–१४–१५–१६ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । १७ अत्र १९८ पृष्ठे टिप्पणी द्रष्टव्या । १८ पूर्वं बीजविनाशः पश्चादङ्कुरोत्पत्तिरिति सूत्रार्थ इति वार्तिकम् । १९ सूत्र-यति ईश्वर इतीति परिशुद्धिः । २० सिद्धान्तसूत्रमिति परिशुद्धिः । २१ तत्र सूत्रं योजयति तत्कारितत्वादिति परिशुद्धिः ।

कण्टकतैक्ष्ण्यादिदर्शनात् ॥ २२ ॥ अनिमित्तनिमित्तत्वान्ना-
निमित्ततः ॥ २३ ॥ निमित्तानिमित्तयोरर्थान्तरभावादप्रति-
षेधः ॥ २४ ॥ सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ २५ ॥
नानित्यता नित्यत्वात् ॥ २६ ॥ तदनित्यत्वमप्रमेयादाद्यं विना-
श्यानुविनाशवत् ॥ २७ ॥ नित्यस्याप्रत्याख्यानं यथोपलब्धि
व्यवस्थानात् ॥ २८ ॥ सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥ २९ ॥
नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३० ॥ तल्लक्षणावरोधा-
दप्रतिषेधः ॥ ३१ ॥ नोत्पत्तितत्कारणोपलब्धेः ॥ ३२ ॥
न व्यवस्थानुपपत्तेः ॥ ३३ ॥ सर्वं पृथग्भावलक्षणपृथक्त्वा-
त् ॥ ३४ ॥ नानेकलक्षणैरेकभावनिष्पत्तेः ॥ ३५ ॥ लक्षण-
व्यवस्थानादेवाप्रतिषेधः ॥ ३६ ॥ सर्वमभावो भावेष्वितरेत-
राभावसिद्धेः ॥ ३७ ॥ न स्वभावसिद्धेर्भावानाम् ॥ ३८ ॥ न स्व-
भावसिद्धिरापेक्षिकत्वात् ॥ ४९ ॥ व्याहतत्वादयुक्तम् ॥ ४० ॥
संख्यैकान्तासिद्धिः कारणानुपपपत्त्युपपत्तिभ्याम् ॥ ४१ ॥ न
कारणावयवभावात् ॥ ४२ ॥ निरवयवत्वादहेतुः ॥ ४३ ॥
सद्यः कालान्तरे च निष्पत्तेः संशयः ॥ ४४ ॥ न सद्यः का-
लान्तरोपभोग्यत्वात् ॥ ४५ ॥ कालान्तरेणानिष्पत्तिर्हेतु-

---

३५ रे नास्ति । ४४ फलनिष्पत्तेः । प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यसत्त्वो-
पपादकदर्शनात् इतिसूत्रानन्तरं तत्स्थाने ऽस्ति ।

२२ दृष्टान्तसूत्रमिति वार्तिकम् । २३–२४ नव्यास्तु सूत्रद्वयीमेवं व्याचक्षत-
इति वृत्तिः । २५ पूर्वपक्षसूत्रमिति वृत्तिः । सूत्रस्य दृष्टान्तार्थत्वादिति वार्ति-
कम् । २६ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २७ तदनित्यत्वमित्यादिसूत्रमिति
परिशुद्धिः । २८ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २९ आक्षेपसूत्रमिति वृत्तिः ।
३० अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ३१–३२–३३ एषां सूत्रत्वे प्रमाणं नोपल-
भ्यते । ३४ पूर्वपक्षसूत्रमिति वृत्तिः । ३५–३६ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते ।
३७–३८ किं पुनरनेन सूत्रेण क्रियते । पूर्वसूत्रविरोधश्चोच्यतइति वार्तिकादनयोः
सूत्रत्वम् । ३९–४० अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ४१ प्रतिषेधद्वारकं सूत्र-
मिति वार्तिकम् । ४२ एकान्तोप्ययं सूत्रार्थ इति वार्तिकम् । ४३–४४–४५ एषां
सूत्रत्वे प्रमाणं नोपलभ्यते ।

विनाशात् ॥ ४६ ॥ प्राङ्निष्पत्तेर्वृन्तफलवत्तत्स्यात् ॥ ४७ ॥ नासन्न सन्न सदसत्सदसतोर्वैधर्म्यात् ॥ ४८ ॥ उत्पादव्ययदर्शनात् ॥ ४९ ॥ बुद्धिसिद्धं तु तदसत् ॥ ५० ॥ आश्रयाव्यतिरेकाद्वृन्तफलोत्पत्तिवदित्यहेतुः ॥ ५१ ॥ प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥ ५२ ॥ न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात् ॥ ५३ ॥ तत्संबन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ॥ ५४ ॥ विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ॥ ५५ ॥ न सुखस्यान्तरालनिष्पत्तेः ॥ ५६ ॥ बाधनानिर्वृत्तेर्वेदयतः पर्यैषणदोषादप्रतिषेधः ॥ ५७ ॥ दुःखविकल्पे सुखाभिमानाच्च ॥ ५८ ॥ ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ॥ ५९ ॥ प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः ॥ ६० ॥ समारोपणादात्मन्यप्रतिषेधः ॥ ६१ ॥ पात्रचयान्तानुपपत्तेश्च फलाभावः ॥ ६२ ॥ सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ॥ ६३ ॥ न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ६४ ॥ न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ६५ ॥ प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेप्यनित्यत्वम् ॥ ६६ ॥ अणुश्यामतानित्यत्ववद्वा ॥ ६७ ॥ न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ॥ ६८ ॥

इति श्रीगौतमसूत्रे चतुर्थाध्यायस्याद्यमाह्निकम् ॥

४६-४७ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । वं॰ पु॰ एकोनपञ्चाशत्तमं सूत्रं नास्ति । ५० वं॰ पु॰ न अधिकमस्ति । ४८ सूत्रमेवं योजनीयमिति परिशुद्धिः । ४९-५०-५१ उत्पादव्ययदर्शनाद् बुद्धिसिद्धं तु तदसदित्यनयोरपि सूत्रत्वं सिद्धं भवतीति परिशुद्धिः । ५२ आश्रयव्यतिरेकात्तु सिद्ध इति सूत्रार्थः इति वार्तिकम् । ५३-५४ सूत्रार्थकथनेनैव भाष्यवार्तिके व्याख्याते इति ता॰ टी॰ । ५५-५६ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ५७-५८ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ५९ अपवर्गः प्रत्याख्यायतेऽनेन सूत्रणेति वार्तिकम् । ६० अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ६१-६२ समारोपणादात्मन्यप्रतिषेध इति सूत्रेण पात्रचयान्तानुपपत्तेश्च फलाभाव इत्यनेनापि इति परिशुद्धिः । ६३-६४-६५-६६-६७-६८ एषां सूत्रत्वे प्रमाणं नोपलभ्यते ।

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥ १ ॥ दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः ॥ २ ॥ तन्निमित्तं त्ववयव्यभिमानः ॥ ३ ॥ विद्याविद्याद्वैविध्यात्संशयः ॥ ४ ॥ तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥ वृत्त्यनुपपत्तेरपि तर्हि न संशयः ॥ ६ ॥ कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥ ७ ॥ तेषु चावृत्तेरवयव्यभावः ॥ ८ ॥ पृथक् चावयवेभ्यो ऽवृत्तेः ॥ ९ ॥ न चावयव्यवयवाः ॥ १० ॥ एकस्मिन्भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ११ ॥ अवयवान्तराभावेप्यवृत्तेरहेतुः ॥ १२ ॥ केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः ॥ १३ ॥ स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥ १४ ॥ अवयवावयविप्रसङ्गश्चैवमा प्रलयात् ॥ १५ ॥ न प्रलयो ऽणुसद्भावात् ॥ १६ ॥ परं वा त्रुटेः ॥ १७ ॥ आकाशव्यतिभेदात् तदनुपपत्तिः ॥ १८ ॥ आकाशासर्वगतत्वं वा ॥ १९ ॥ अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्यं तदभावः ॥ २० ॥ शब्दसंयोगविभवाच्च सर्वगतम् ॥ २१ ॥ अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥ २२ ॥ मूर्तिमतां च संस्थानोपपत्तेरवयव-

---

वं पु॰ विंशतितमं सूत्रं नास्ति ।

१ अत्र २२५ पृष्ठे टिप्पणी द्रष्टव्या । २ सूत्रं दोषनिमित्तमित्यादि ता॰ टी॰ । ३ सूत्रं तच्चिमित्तमिति ता॰ टी॰ । ४ संशयप्रदर्शनाय सूत्रमिति वृत्तिः । ५-६-७ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । ८ अस्य सूत्रत्वे वृत्तिकृतो ऽपि संशयः । ९ पूर्वपक्षिसूत्रमिति वृत्तिः । १० अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ११ सिद्धान्तसूत्रमिति वृत्तिः । १२ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । १३ इदं सूत्रमिति ता॰ टी॰ । १४ षुवृत्तिः इति वं॰ पु॰ । अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । १५ दोषान्तराभिधानाय सूत्रमिति वृत्तिः । अत्र २३० पृष्ठे टिप्पणी द्रष्टव्या । १६-१७ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । १८-१९ संयोगमात्रं चोत्तरसूत्रेणानूद्यत इति वार्तिकादस्योत्तरस्य च सूत्रत्वम् । २०-२१-२२ एषां सूत्रत्वे प्रमाणं नोपलभ्यते ।

सद्भावः ॥ २३ ॥ संयोगोपपत्तेश्च ॥ २४ ॥ अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः ॥ २५ ॥ बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः ॥ २६ ॥ व्याहतत्वादहेतुः ॥ २७ ॥ तदाश्रयत्वादपृथग्ग्रहणम् ॥ २८ ॥ प्रमाणतश्चार्थप्रतिपत्तेः ॥ २९ ॥ प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥ ३० ॥ स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥ ३१ ॥ मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥ ३२ ॥ हेत्वभावादसिद्धिः ॥ ३३ ॥ स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥ ३४ ॥ मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात्स्वप्नविषयाभिमानप्रणाशवत्प्रतिबोधे ॥ ३५ ॥ बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ॥ ३६ ॥ तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥ ३७ ॥ समाधिविशेषाभ्यासात् ॥ ३८ ॥ नार्थविशेषप्राबल्यात् ॥ ३९ ॥ क्षुदादिभिः प्रवर्त्तनाच्च ॥ ४० ॥ पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ४१ ॥ अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥ ४२ ॥ अपवर्गप्येवं प्रसङ्गः ॥ ४३ ॥ न निष्पन्नावश्यंभावित्वात् ॥ ४४ ॥ तदभावश्चापवर्गे ॥ ४५ ॥ तदर्थं यमनियमाभ्यामात्म-

---

२३ अस्य सूत्रत्वे ननु इदं सूत्रं संस्थानवत्त्वादित्यनेनैव चरितार्थमित्युत्तरसूत्रस्थं वार्तिकं प्रमाणम् । २४ अस्य सूत्रत्वे संयोगित्वादिति सूत्रार्थ इति वार्तिकं प्रमाणम् । २५ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २६ वं॰ पु॰ तदनुपलब्धिरिति नास्ति । पूर्वपक्षसूत्रमिति वृत्तिः । २७–२८–२९–३०–३१ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । ३२–३३ अनयोः सूत्रत्वे शङ्कते सूत्राभ्यामिति वृत्तिर्मूलम् । वं॰ पु॰ द्वात्रिंशत्तमादिसूत्रत्रयं नास्ति । ३४–३५–३६–३७–३८ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । ३९ अस्योत्तरसूत्रमिति ता॰ टी॰ । ४० अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ४१ अत्र २३८ पृष्ठे टिप्पणी द्रष्टव्या । ४२–४३ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ४४ अत्र २३८ पृष्ठे टिप्पणी द्रष्टव्या । ४५ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते ।

संस्कारो योगाच्चाध्यात्मविध्युपायैः ॥ ४६ ॥ ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ॥ ४७ ॥ तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयात् ॥ ४८ ॥ प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥ ४९ ॥ तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥ ५० ॥ ताभ्यां विगृह्य कथनम् ॥ ५१ ॥

इति गौतमसूत्रे चतुर्थोऽध्यायः ॥ ४ ॥

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ॥ १ ॥ साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥ २ ॥ गोत्वाद्गोसिद्धिवत्तत्सिद्धिः ॥ ३ ॥ साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षव-

---

४६–४७–४८ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । ४९ अत्र २४० पृष्ठे टिप्पणी द्रष्टव्या । ५० अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ५१ अत्र २४० पृष्ठे टिप्पणी द्रष्टव्या । १ साधर्म्यादिसूत्रमिति वार्तिकम् । जातिविशेषलक्षणावतारहेतुतया संगतेन विभागसूत्रेण सह त्रिभिः सूत्रैः सत्प्रतिपक्षदेशनाभासप्रकरणं लक्षणोत्तरसूत्रसंपिण्डने त्रिभिः सूत्रैः साध्यदृष्टान्तधर्मविकल्पप्रभवोत्कर्षसमादिषट्कप्रकरणं तथा द्विसूत्रकं प्राप्यप्राप्तियुगनद्वावहिविकल्पोपक्रमजातिद्वयप्रकरणं तथा त्रिभिः सूत्रैर्व्यवस्थिताव्यवस्थितोपक्रमजातिद्वयप्रकरणं तथा द्विद्विसूत्रकाण्येकैकजातिकानि द्वादश प्रकरणानि कथाभासरूपषट्पत्तीप्रकरणं चेति प्रथमाह्निके सप्तदश प्रकरणानि। अथ विभागसूत्रेण सह षड्भिः सूत्रैः प्रतिज्ञोपलक्षितोक्तमात्राश्रयनियहस्थानपञ्चकप्रकरणं तथा चतुर्भिः सूत्रैः प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनियहस्थानचतुष्कप्रकरणं तथा त्रिसूत्रकं स्वसिद्धान्तानुरूपप्रयोगाभासनियहस्थानत्रिकप्रकरणं तथा द्विसूत्रकं पुनरुक्तनियहस्थानप्रकरणं तथा चतुःसूत्रमनुत्तरफलनियहस्थानचतुष्कप्रकरणं तथा त्रिसूत्रकं भ्रान्तोत्तरनियहस्थानत्रिकप्रकरणं तथा द्विसूत्रकं प्रमाणान्तरोपनयनप्रयासोद्भाव्यनियहस्थानद्विकप्रकरणमित्येवं द्वितीयाह्निके सप्तप्रकरणानीति परिशुद्धिदर्शनात् पञ्चमाध्यायसूत्रनिर्णयः ।

२–३ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते ।

र्थापत्तिसमाः ॥ ४ ॥ किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥ ५ ॥ साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ ६ ॥ प्राप्य साध्यमप्राप्य वा हेतोः प्राप्याऽविशिष्टत्वादप्राप्याऽसाधकत्वाच्च प्राप्याप्राप्तिसमौ ॥ ७ ॥ घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेधः ॥ ८ ॥ दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ॥ ९ ॥ प्रदीपोपादानप्रसङ्गनिवृत्तिवत्सिद्धिनिवृत्तेः ॥ १० ॥ प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ११ ॥ अनुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ १२ ॥ तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥ १३ ॥ सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात्संशयसमः ॥ १४ ॥ साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशये ऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ १५ ॥ उभयसाधर्म्यात् प्रक्रियाप्रसिद्धेः प्रकरणसमः ॥ १६ ॥ प्रतिपक्षात्प्रकरणप्रसिद्धेः प्रतिषेधानुपपत्तिः ॥ १७ ॥ त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥ १८ ॥ न हेतुतः कार्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ १९ ॥ प्रतिषेधानुपपत्तेः प्रतिषेध्याप्रतिषेधः ॥ २० ॥ अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ २१ ॥ अनुक्तस्यार्थापत्तेः पक्षहानेरु-

---

११ बं॰ पु॰ च नास्ति १६ बं॰ पु॰ प्रसिद्धेरित्यत्र हेति नास्ति । १७ बं॰ पु॰ प्रकरणप्रसिद्धेरित्यत्र हेति नास्ति । प्रतिपक्षोपपत्तेः इति सूत्ररूपमस्ति ।

४ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ५ हेत्वर्थापरिज्ञानादिति सूत्रार्थ इति वार्तिकम् । ६–७ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ८ इदं सूत्रमिति ता॰ टी॰ ९–१०–११–१२–१३–१४ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । १५ अत्र २४७ पृष्ठे टिप्पणी द्रष्टव्या । १६–१७–१८ एषां सूत्रत्वे प्रमाणं नोपलभ्यते । १९ बं॰ पु॰ कार्यमित्यत्र साध्येत्यस्ति । विरोधः सूत्रार्थ इति वार्तिकम् । २० अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २१ उदाहरणपुरःसरं सूत्रं योजयतीति ता॰ टी॰ ।

पपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ॥ २२ ॥ एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात्सद्भावोपपत्तेरविशेषसमः ॥ २३ ॥ क्व चित्तद्धर्मानुपपत्तेः क्व चिच्चोपपत्तेः प्रतिषेधाभावः ॥ २४ ॥ उभयकारणोपपत्तेरुपपत्तिसमः ॥ २५ ॥ उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥ २६ ॥ निर्दिष्टकारणाभावेप्युपलम्भाद् उपलब्धिसमः ॥ २७ ॥ कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥ २८ ॥ तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥ २९ ॥ अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ ३० ॥ ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम् ॥ ३१ ॥ साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥ ३२ ॥ साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च ॥ ३३ ॥ दृष्टान्ते च साध्यसाधनभावेन धर्मस्य हेतुत्वात्तस्य चोभयथाभावान्नाविशेषः ॥ ३४ ॥ नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ॥ ३५ ॥ प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः ॥ ३६ ॥ प्रयत्नकार्यानेकत्वात्कार्यसमः ॥ ३७ ॥ कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥ ३८ ॥ प्रतिषेधेपि समा-

---

३४ वं॰ पु॰ प्रज्ञातस्येत्यधिकमस्ति ।

२२ अस्य प्रत्यादेशसूत्रमिति वार्तिकम् । २३ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २४ वं॰ पु॰ क्व चिच्चोपपत्तेरिति नास्ति । अस्य प्रत्यादेशसूत्रमिति ता॰ टी॰ । २५ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २६ विरोधः सूत्रार्थ इति वार्तिकम् । २७ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । २८ वं॰ पु॰ रनुपलब्धिसमः इत्यत्र रप्रतिषेधः इत्येव पाठः । अस्य प्रत्याख्यानसूत्रमिति ता॰ टी॰ । २९–३० अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ३१ ममापि तु सर्वजनप्रत्यात्मवेदनीयेत्याह सूत्रकार इति ता॰ टी॰ । ३२ वं॰ पु॰ च नास्ति । अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ३३ अस्य प्रत्याख्यानसूत्रमिति ता॰ टी॰ । ३४–३५ अनयोः सूत्रत्वे प्रमाणं नोपलभ्यते । ३६ अस्य प्रत्याख्यानसूत्रमिति ता॰ टी॰ । ३७ अस्य सूत्रत्वे प्रमाणं नोपलभ्यते । ३८ सूत्रं कार्यान्यत्वे इति ता॰ टी॰ ।

नो दोषः ॥ ३९ ॥ सर्वत्रैवम् ॥ ४० ॥ प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ॥ ४१ ॥ प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ॥ ४२ ॥ स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्द्देशे परपक्षदोषाभ्युपगमात्समानो दोष इति ॥ ४३ ॥

इति गौतमसूत्रे पञ्चमाध्यायस्याद्यमाह्निकम् ॥

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगो ऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ १ ॥ प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥ २ ॥ प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्द्देशः प्रतिज्ञान्तरम् ॥ ३ ॥ प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ ४ ॥ पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ॥ ५ ॥ अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ६ ॥ प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम् ॥ ७ ॥ वर्णक्रमनिर्द्देशवन्निरर्थकम् ॥ ८ ॥ परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥ पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकम् ॥ १० ॥ अवयवविपर्यासवचनमप्राप्तकालम् ॥ ११ ॥ हीनमन्य-

---

३९ तदेतत्सूत्रावतारपरं भाष्यमिति ता· टी· । ४० सर्वासु जातिष्वेवेयं युक्तिरिति सूत्रार्थं इति वार्तिकम् । ४१–४२–४३ एषां सूत्रत्वे प्रमाणं नोपलभ्यते ।

९ वं· पु· मिच्छतो इति अस्ति ।

एतदाह्निकस्थसूत्राणां सूत्रत्वे वृत्तिवार्तिकतात्पर्यटीकासु विशिष्य प्रमाणं नोपलभ्यते ऽथापि निग्रहस्थानविभागतद्विशेषलक्षणपरत्वेनैषां सूत्रत्वं निर्विवादम् ।

९ अपि नास्ति वं· पु· । ११ वचनं नास्ति वं· पु· ।

तमेनाप्यवयवेन न्यूनम् ॥ १२ ॥ हेतूदाहरणाधिक्यमधिकम् ॥ १३ ॥ शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥ १४ ॥ अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ॥ १५ ॥ विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ॥ १६ ॥ अविज्ञातं चाज्ञानम् ॥ १७ ॥ उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ १८ ॥ कार्य्यव्यासङ्गात्कथाविच्छेदो विक्षेपः ॥ १९ ॥ स्वपक्षदोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥ २० ॥ निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥ २१ ॥ अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥ २२ ॥ सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ॥ २३ ॥ हेत्वाभासाश्च यथोक्ताः ॥ २४ ॥

इति गौतमसूत्रे पञ्चमाध्यायः ॥

॥ इति न्यायसूत्राणि ॥

॥ श्रीः ॥

न्यायभाष्यस्य सूचीपत्रम् ।

पृ॰	पं॰	विषयाः ।
२६२	२१	अज्ञानलक्षणम् ।
८८	७	अतीतानागतकालसिद्धेः परस्परानपेक्षत्वम् ।
३८	७	अधिकरणसिद्धान्तलक्षणम् ।
२६२	३	अधिकलक्षणम् ।
२६२	१६	अननुभाषणलक्षणम् ।
२५३	१	अनित्यसमनिराकरणम् ।
२५२	१८	अनित्यसमलक्षणम् ।
२०२	१	अनिमित्ततो भावोत्पत्तिनिरासः ।
२४६	८	अनुत्पत्तिसमनिराकरणम् ।
२४६	३	अनुत्पत्तिसमलक्षणम् ।
२५२	१	अनुपलब्धिसमनिराकरणम् ।
२५१	११	अनुपलब्धिसमलक्षणम् ।
८६	१७	अनुमानप्रामाण्याक्षेपः ।
८७	३	अनुमानप्रामाण्याक्षेपनिरासः ।
१७	१	अनुमानलक्षणविभागो ।
६८	५	अनुवादपुनरुक्तयोर्वैलक्षण्योपपादनम् ।
६७	१३	अनुवादलक्षणम् ।
३०	६	अपवर्गनिरूपणम् ।
२६३	२०	अपसिद्धान्तलक्षणम् ।
२६१	१०	अपार्थकलक्षणम् ।
२६३	१	अप्रतिभालक्षणम् ।
२६१	१५	अप्राप्तकाललक्षणम् ।
१०३	१	अभावप्रामाण्याक्षेपः ।
१०३	४	अभावस्य वस्तुत्वव्यवस्थापनम् ।
१६८	४	अभावाद् भावोत्पत्तिनिरासः ।
३६	१	अभ्युपगमसिद्धान्तलक्षणम् ।
६६	२०	अर्थवादविभागः ।
२६०	११	अर्थान्तरलक्षणम् ।
१०२	८	अर्थापत्तिप्रामाण्यप्रतिषेधानुपपत्तिः ।
२४६	३	अर्थापत्तिसमनिराकरणम् ।
२४८	१८	अर्थापत्तिसमलक्षणम् ।
१०१	१२	अर्थापत्तेरप्रामाण्याक्षेपः ।
१०१	१६	अर्थापत्तेरप्रामाण्याक्षेपपरिहारः ।
३६	८	अवयवविभागः ।
७६	१३	अवयविनि पूर्वपक्षः ।
२२७	६	अवयविनि पूर्वपक्षः ।
८२	१	अवयवविसाधनम् ।
८२	६	अवयविनो ऽवयवेभ्यो ऽर्थान्तरत्वे युक्तिः ।
८५	४	अवयविन्याक्षेपपरिहारौ ।
२२८	४	अवयविसत्तोपपादनम् ।
७८	१३	अवयविसद्भावोपपादनम् ।
८३	६	अवयव्यनभ्युपगमे प्रत्यक्षानुपपत्तिः ।
२२६	४	अवयव्युपलम्भोपपादनम् ।
२६१	५	अविज्ञातार्थलक्षणम् ।
२४६	१७	अविशेषसमनिराकरणम् ।
२४६	११	अविशेषसमलक्षणम् ।
२४८	१०	अहेतुसमनिराकरणम् ।
२४८	४	अहेतुसमलक्षणम् ।
१२३	१८	आकृतिमात्रस्य पदवाच्यत्वपूर्वपक्षः ।
१२६	१	आकृतिलक्षणम् ।
१७१	१	आत्ममनःसंयोगस्य शरीरान्तःस्थत्वम् ।
१३७	३	आत्मनित्यत्वहेतावाक्षेपः ।
१३६	५	आत्मनित्यत्वे युक्त्यन्तरम् ।
१३८	१	आत्मनित्यत्वे हेत्वन्तरम् ।
१२८	१	आत्मनो देहादिव्यतिरिक्तत्वम् ।
१३३	१०	आत्मनो देहादिव्यतिरिक्तत्वे युक्तिः ।
१३६	१४	आत्मनो नित्यत्वहेतुः ।
१३१	४	आत्मनो नित्यत्वे ऽपि हिंसादोषोपपत्तिः ।
२४	७	आत्मानुमापकानि ।
११०	३	आवरणनिरासः ।
१०६	११	आवरणाक्षेपः ।
१३२	१	इन्द्रियचैतन्यनिरासः ।
१२६	१	इन्द्रियचैतन्यपूर्वपक्षतन्निरासौ ।
१५१	७	इन्द्रियपञ्चत्वसाधनम् ।
२६	४	इन्द्रियपरिगणनम् ।
१४५	१	इन्द्रियभौतिकत्वे युक्तिः ।
१४३	१	इन्द्रियविभुत्वे ऽनुपपत्तिः ।
१४६	६	इन्द्रियाणां प्राप्यकारित्वम् ।
१४७	४	इन्द्रियाणां प्राप्यकारित्वे आक्षेपनिरासः ।

पृ॰	पं॰	विषयाः ।
१४२	६	इन्द्रियाणां भौतिकत्वसाधनम् ।
१५३	१०	इन्द्रियाणामाव्यक्तिकत्वनिरासः ।
२७	१	इन्द्रियार्थनिरूपणम् ।
७६	१०	इन्द्रियार्थसंनिकर्षपदोपादाने युक्तिः ।
१५०	१२	इन्द्रियैकत्वनिरासः ।
१४६	७	इन्द्रियैकत्वपूर्वपक्षः ।
१५२	१३	इन्द्रियैकत्वसाधकहेत्वन्तरनिरासः ।
२००	१	ईश्वरस्वरूपनिरूपणम् ।
१०८	१४	उच्चारणात्प्राक् शब्दाभावः ।
२४४	३	उत्कर्षसमादिनिराकरणम् ।
२४३	७	उत्कर्षसमादिलक्षणम् ।
४१	८	उदाहरणलक्षणम् ।
५७	११	उपचारच्छललक्षणम् ।
४३	६	उपनयलक्षणम् ।
२५०	१५	उपपत्तिसमनिराकरणम् ।
२५०	११	उपपत्तिसमलक्षणम् ।
२१	२	उपमानफलम् ।
२०	८	उपमानलक्षणम् ।
६०	८	उपमानसाधनम् ।
६०	३	उपमानसिद्धौ पूर्वपक्षः ।
६०	१७	उपमानस्यानुमानवैलक्षण्योपपादनम् ।
६०	१३	उपमानस्यानुमानान्तर्भावाक्षेपः ।
२५१	३	उपलब्धिसमनिराकरणम् ।
२५०	२२	उपलब्धिसमलक्षणम् ।
८४	१	एकत्वमहत्त्वप्रत्ययाभ्यामवयवसिद्धिः ।
२२१	१०	ऐकाग्र्यनिरासे युक्तिः ।
१०१	१	ऐतिह्यादीनां प्रमाणचतुष्टयान्तर्भावः ।
१००	७	ऐतिह्यादीनां प्रमाणान्तरत्वाक्षेपः ।
२५४	१७	कार्यसमनिराकरणम् ।
२५४	१०	कार्यसमलक्षणम् ।
५४	१	कालातीतलक्षणम् ।
१६४	५	क्षणिकत्ववादेऽनुपपत्तिः ।
१६५	१	क्षणिकभावनिराकरणम् ।
१५४	१	गन्धादीनामाश्रयनिरूपणम् ।
७१	१	ग्राहकत्वग्राह्यत्वसमावेशोदाहरणम् ।
१५६	१६	घ्राणादीनां गन्धादिग्रहणसामर्थ्यम् ।
१५७	१४	घ्राणादीनां स्वगतगुणग्राहकत्वम् ।
१३३	१	चक्षुरिन्द्रियस्यैकत्वम् ।
५८	४	छलत्रित्वाक्षेपपरिहारौ ।

पृ॰	पं॰	विषयाः ।
५५	७	छललक्षणम् ।
५५	१०	छलविभागः ।
५०	४	जल्पलक्षणम् ।
२४०	८	जल्पवितण्डयोः प्रयोगावसरनिरूपणम् ।
१२४	५	जातिमात्रस्य पदवाच्यत्वपूर्वपक्षः
५८	१८	जातिलक्षणम् ।
१२६	७	जातिलक्षणम् ।
२४१	४	जात्युत्तरविभागः ।
२	१०	ज्ञातव्यपदार्थनिरूपणम् ।
१८१	४	ज्ञानगतव्यक्तत्वाव्यक्तत्वहेतुनिरूपणम् ।
१६६	७	ज्ञानयौगपद्यनिरासः ।
१६८	१०	ज्ञानस्य मनोगुणत्वनिरासः ।
१७७	३	ज्ञानस्यात्मगुणत्वोपसंहारः ।
१७३	२०	ज्ञानेच्छाद्वेषादीनामेकगुणत्वम् ।
२२५	१५	तत्त्वज्ञानफलम् ।
२२४	८	तत्त्वज्ञानविपर्ययविचारः ।
७	११	तत्त्वज्ञानस्यापवर्गे क्रमेणोपयोगः ।
२३७	१४	तत्त्वज्ञानोपायकथनम् ।
६	३	तर्कनिरूपणोपयोगः ।
४५	१२	तर्कलक्षणम् ।
४६	७	तर्कोपयोगनिरूपणम् ।
२१५	४	दुःखपरीक्षा ।
३०	३	दुःखलक्षणम् ।
२१६	६	दुःखस्य सुखाभावमात्रत्वनिरासः ।
३६	४	दृष्टान्तलक्षणम् ।
१६५	२	दोषचित्रत्वव्यवस्थापनम् ।
२८	१२	दोषलक्षणम् ।
४४	१	निगमनलक्षणम् ।
५६	१०	निग्रहस्थानबहुत्वम् ।
५६	४	निग्रहस्थानलक्षणम् ।
२५७	१७	निग्रहस्थानविभागः ।
४७	६	निर्णयलक्षणम् ।
४८	११	निर्णये सर्वत्र विमर्शानावश्यकत्वम् ।
२५३	१८	नित्यसमनिराकरणम् ।
२५३	१३	नित्यसमलक्षणम् ।
३१	४	नित्यसुखाभिव्यक्तिनिरासः ।
३३	१५	नित्यसुखाभ्युपगमे मोक्षानुपपत्तिः ।
२६३	१६	निरनुयोज्यानुयोगलक्षणम् ।
२६१	१	निरर्थकलक्षणम् ।
२६१	१८	न्यूनलक्षणम् ।

पृ॰	पं॰	विषयाः ।
५	७	पञ्चावयवनिरूपणोपयोगः ।
४५	१	पञ्चावयवप्रयोजनम् ।
१२१	१५	पदलक्षणम् ।
२३४	६	पदार्थानां प्रातीतिकमात्रत्वनिरासः ।
२३६	८	पदार्थानां प्रातीतिकमात्रत्वनिरासे युक्तिः ।
२६३	१२	पर्यनुयोज्योपेक्षणलक्षणम् ।
२३१	१	परमाणुनिरवयवत्वे आक्षेपः ।
२३२	६	परमाणुसावयवत्वाभ्युपगमे युक्तिः ।
२३०	६	परमाणुस्वरूपनिरूपणम् ।
२३३	१	परमाणूनां सावयवत्वनिरासः ।
१६६	५	परिणामवादनिरासः ।
२६२	६	पुनरुक्तलक्षणम् ।
१८	३	पूर्ववदनुमानोदाहरणम् ।
२४७	१६	प्रकरणसमनिराकरणम् ।
५३	१	प्रकरणसमलक्षणम् ।
२४७	१२	प्रकरणसमलक्षणम् ।
२५८	६	प्रतिज्ञान्तरलक्षणम् ।
४०	८	प्रतिज्ञालक्षणम् ।
२५६	३	प्रतिज्ञाविरोधलक्षणम् ।
२५६	६	प्रतिज्ञासंन्यासलक्षणम् ।
२५८	१	प्रतिज्ञाहानिलक्षणम् ।
३८	१	प्रतितन्त्रसिद्धान्तलक्षणम् ।
११	११	प्रत्यक्षलक्षणम् ।
१५	३	प्रत्यक्षलक्षणम् ।
१२	३	प्रत्यक्षलक्षणसूत्रस्यपदकृत्यम् ।
१३	४	प्रत्यक्षलक्षणसूत्रस्यपदकृत्यम् ।
१४	६	प्रत्यक्षलक्षणसूत्रस्यपदकृत्यम् ।
७३	६	प्रत्यक्षलक्षणाक्षेपः ।
७५	५	प्रत्यक्षलक्षणाक्षेपपरिहारः ।
७५	७	प्रत्यक्षलक्षणे हेत्वन्तरानुक्तावनुपपत्तिः ।
७८	१	प्रत्यक्षस्यानुमानत्वनिरासः ।
७७	९	प्रत्यक्षस्यानुमानत्वाक्षेपः ।
६४	११	प्रमाणपरीक्षारम्भः ।
६७	३	प्रमाणमात्रानभ्युपगमे प्रतिषेधस्याप्यनुपपत्तिः ।
१०	१	प्रमाणविभागः ।
३३५	४	प्रमाणादिप्रतीतेर्मिथ्यात्वनिरासः ।
७०	१५	प्रमाणैः प्रमाणसाधने ऽनवस्था ।
६८	३	प्रमाणैकदेशाभ्युपगमे प्रामाण्यमात्राक्षेपासंभवः ।
१३७	१	प्रमेयपरीक्षारम्भः ।

पृ॰	पं॰	विषयाः ।
२४	६	प्रमेयविभागः ।
३५	१७	प्रयोजनलक्षणम् ।
१६४	३	प्रवृत्तिदोषपरीक्षा ।
२८	८	प्रवृत्तिलक्षणम ।
२४५	११	प्रसङ्गप्रतिदृष्टान्तसमनिराकरणम् ।
२४५	३	प्रसङ्गप्रतिदृष्टान्तसमलक्षणे ।
२४४	१७	प्राप्त्यप्राप्तिसमनिराकरणम् ।
२४४	११	प्राप्त्यप्राप्तिसमलक्षणे ।
१	१	प्रामाण्यप्रहेयोपायप्रमाणफलनिरूपणम् ।
६६	२०	प्रामाण्यप्रतिषेधानुपपत्तिः ।
६६	१	प्रामाण्यप्रमेयत्वसमावेशः ।
६५	१२	प्रामाण्याक्षेपपरिहारः ।
१६६	६	प्रेत्यभावपरीक्षा ।
२६	५	प्रेत्यभावलक्षणम् ।
२१२	६	फलपरीक्षा ।
२६	१२	फललक्षणम् ।
२१३	१४	फलस्य सत्त्वासत्त्वतदुभयनिरासः ।
१६६	१	फलस्येश्वरमात्रहेतुकत्वनिरासः ।
२१३	३	फलस्योत्पत्तेः प्रागसत्त्वव्यवस्थापनम् ।
१५६	६	बुद्धिनित्यत्वपूर्वपक्षः ।
२७	५	बुद्धिनिरूपणम् ।
१५८	१२	बुद्धिपरीक्षाऽऽरम्भः ।
१७८	३	बुद्धिसन्तानमात्रचैतन्यनिरासः ।
१८०	३	बुद्धेरनित्यत्वम् ।
१६७	१५	बुद्धेरनित्यत्वोपसंहारः ।
६६	१४	ब्राह्मणवाक्यविभागः ।
१६३	४	भावानां क्षणिकत्वाक्षेपसंनिरासः ।
२०६	१	भावानां स्वभावसिद्धावाक्षेपपरिहारौ ।
१५५	५	भूतगुणनियमोपपादनम् ।
१७४	६	भूतचैतन्यपूर्वपक्षनिरासः ।
१७५	९	भूतचैतन्येऽनुपपत्तिः ।
२६	११	भूतपरिगणनम् ।
१६२	४	भूतमात्राच्छरीरारम्भे दूषणम् ।
२५६	४	मतानुज्ञालक्षणम् ।
२६३	७	मतानुज्ञालक्षणम् ।
१३५	१०	मनश्चैतन्यपूर्वपक्षः ।
१८५	४	मनस एकत्वम् ।
१७६	१४	मनसश्चैतन्यनिरासः ।
१८६	१०	मनसो ऽणुत्वम् ।
२८	१	मनोऽनुमापकनिरूपणम् ।
१६	३	मानसप्रत्यक्षनिरूपणम् ।

पृ॰	पं॰	विषयाः ।
१४१	१३	मानुषशरीरस्य पार्थिवत्वे प्रमाणान्तरम् ।
१४०	१७	मानुषशरीराणां पार्थिवत्वसाधनम् ।
८	१	मिथ्याज्ञानस्वरूपफले ।
१९३	६	मुक्तेरनन्तरं शरीराभावे हेतुः ।
२३८	१७	मोक्षदशायामपि ज्ञानापत्तिपूर्वपक्षः ।
२३०	११	मोक्षप्रतिपादकश्रुतिनिरूपणम् ।
२३९	१	मोक्षस्वरूपनिरूपणम् ।
२२३	१५	मोक्षे क्लेशसन्तत्युच्छेदः ।
२२२	१५	मोक्षे क्लेशानुबन्धविच्छेदउदाहरणम् ।
२१७	१५	मोक्षे पूर्वपक्षः ।
२१८	४	मोक्षे पूर्वपक्षनिरासः ।
१९१	४	मोक्षोपपत्तिः ।
३२	७	योगजधर्मस्य नित्यत्वनिरासः ।
१४४	१	रूपोपलब्धिहेतुनिरूपणम् ।
१२०	१५	वर्णविकारत्वोपगमे ऽनुपपत्त्यन्तरम् ।
११९	९	वर्णानां नित्यत्वे ऽनित्यत्वे च विकारत्वाभावे युक्तिः ।
११७	५	वर्णानां विकारत्वनिरासः ।
११८	१	वर्णानां विकारत्वहेतुनिरासः ।
११९	१	वर्णे विकारत्वादेशत्वसंशयः ।
८७	१८	वर्तमानकालसाधनम् ।
८९	११	वर्तमानकालसाधनोपसंहारः ।
८७	१३	वर्तमानकालाक्षेपः ।
८९	३	वर्तमानकालानभ्युपगमे सर्वप्रमाणविलोपापत्तिः ।
५५	१२	वाक्छललक्षणम् ।
४९	१	वादलक्षणम् ।
२९३	३	विक्षेपलक्षणम् ।
४	१	वितण्डायाः प्रयोजनविचारः ।
५१	१	वितण्डालक्षणम् ।
९९	१७	विधिलक्षणम् ।
९१	३	विप्रतिपत्तेः संशयाहेतुत्वम् ।
५२	९	विरुद्धलक्षणम् ।
१९२	१	वृत्तिनानात्वाभावपूर्वपक्षः ।
१९०	२०	वृत्तिवृत्तिमतोरभेदनिरासः ।
१९१	१०	वृत्तीनामन्तःकरणधर्मत्वनिरासः ।
९४	१३	वेदप्रामाण्याक्षेपः ।
९५	९	वेदप्रामाण्याक्षेपपरिहारः ।
९९	१५	वेदप्रामाण्यावगमोपायः ।
९९	१४	वेदस्य नित्यत्वेन प्रामाण्यनिरासः ।
४२	७	वैधर्म्योदाहरणलक्षणम् ।
१९७	३	व्यक्ताव्यक्तोत्पत्तिनिरासः ।
१२२	५	व्यक्तिमात्रस्य पदवाच्यत्वपूर्वपक्षः ।
१२५	११	व्यक्तिलक्षणम् ।
१२५	४	व्यक्त्याकृतिजातीनां पदवाच्यत्वम् ।
११०	९	शब्दनित्यत्वहेतोर्व्यभिचारः ।
११२	१	शब्दनित्यत्वहेत्वन्तरनिरासः ।
११३	४	शब्दनित्यत्वे ऽनुपपत्तिः ।
१११	२	शब्दनित्यत्वे हेत्वन्तरम् ।
२२	५	शब्दप्रमाणनिरूपणम् ।
२३	१०	शब्दविभागः ।
११४	७	शब्दसंतानोत्पत्तिप्रतिबन्धकनिरूपणम् ।
११५	७	शब्दस्याकाशगुणत्वम् ।
९२	५	शब्दस्यानुमानात्पार्थक्यम् ।
९१	९	शब्दस्यानुमानत्वाक्षेपः ।
९१	१४	शब्दस्यानुमानत्वे युक्तिः ।
१०४	१३	शब्दानित्यत्वसाधनम् ।
१०६	१४	शब्दानित्यत्वहेतोर्व्यभिचारशङ्का ।
१०७	९	शब्दानित्यत्वहेतोर्व्यभिचारनिरासः ।
९३	११	शब्दार्थव्यवस्थायाः समयकारित्वम् ।
९३	७	शब्दार्थसंबन्धसाधनम् ।
९२	१८	शब्दार्थसंबन्धाक्षेपः ।
१३०	८	शरीरचैतन्यनिरासः ।
१८३	९	शरीरचैतन्यनिरासः ।
१८२	७	शरीरचैतन्यपूर्वपक्षः ।
१८४	१०	शरीरचैतन्याभावे हेत्वन्तरम् ।
२५	११	शरीरलक्षणम् ।
१८८	१३	शरीराणां कर्मनिमित्तकत्वम् ।
१९०	९	शरीराणां कर्मनिमित्तकत्वे उपपत्तिः ।
१८९	१३	शरीराणां प्रत्यात्मनियतत्वे हेतुः ।
१८७	१०	शरीरोत्पत्तिविचारः ।
९	९	शास्त्रप्रवृत्तेस्त्रैविध्यम् ।
१९	२	शेषवदनुमानलक्षणोदाहरणे ।
२५५	८	षट्पदार्थनिरूपणम् ।
२१०	३	संख्यैकान्तनिरासः ।
२११	४	संख्यैकान्तनिरासहेताववाक्षेपः ।
६०	३	संशयपरीक्षा ।
६४	७	संशयपरीक्षोपसंहारः ।
३४	४	संशयलक्षणम् ।

पृ॰	पं॰	विषयाः ।
२४७	३	संशयसमनिराकरणम् ।
२४६	१३	संशयसमलक्षणम् ।
६१	१६	संशयाक्षेपपरिहारः ।
३	३	संशयादिनिरूपणोपयोगप्रदर्शनम् ।
६०	१२	संशयानुपपत्तिः ।
३७	८	सर्वतन्त्रसिद्धान्तलक्षणम् ।
२०३	११	सर्वनित्यत्वनिरासः ।
२०४	१	सर्वनित्यत्वनिरासे हेतुः ।
२०५	३	सर्वनित्यत्वनिरासे हेत्वन्तरम् ।
२०६	५	सर्वपृथक्त्वनिरासः ।
२०२	१४	सर्वानित्यत्वनिरासः ।
२०७	३	सर्वाभावत्वनिरासः ।
२०८	४	सर्वाभावत्वनिरासे युक्तिः ।
५१	१२	सव्यभिचारलक्षणम् ।
२४२	१३	साधर्म्यवैधर्म्यसमनिराकरणम् ।
२४१	११	साधर्म्यवैधर्म्यसमलक्षणे ।
५३	१३	साध्यसमलक्षणम् ।
५६	१४	सामान्यच्छललक्षणम् ।
३६	१४	सिद्धान्तलक्षणम् ।
३७	५	सिद्धान्तविभागः ।
१७६	१	स्मृतिहेतुनिरूपणम् ।
१७०	८	स्मृत्ययोगपद्यहेत्वन्तरनिरासः ।
१७२	१८	स्मृत्ययोगपद्यहेतुनिरूपणम् ।
१३४	१	स्मृत्या ऽऽत्मस्थैर्यैक्यसाधनम् ।
४०	११	हेतुलक्षणम् ।
२५६	१४	हेत्वन्तरलक्षणम् ।
५१	६	हेत्वाभासविभागः ।
२६४	१६	हेत्वाभासानां निग्रहस्थानत्वम् ।
२२६	५	हेयोपादेयभावनानिरूपणम् ।

न्यायभाष्यस्य शुद्धिपत्रम् ।

पृ॰	पं॰	अशुद्धम् ।	शुद्धम् ।
२	१२	निः श्रेयसा	निःश्रेयसा
८	१	जन्मा॰	जन्मो॰
८	७	च्चासत्येर्ष्या	च्चासूयेर्ष्येति पाठान्तरम् ।
११	१०	लक्षणमिति	लक्षणवचनमिति पाठान्तरम्
१४	२	दर्थज्ञानं विशिष्यते	दर्थज्ञानाच्च विशिष्यतइति पा॰ ।
१४	१६	शब्दार्थव्याध-	शब्दानुव्याध-
२२	१	माषपणी	माषपर्णी
२३	१३	वेदनायस्य	वेदनीयस्य
२४	१७	घटादिवद्रागा	घटादिवद् द्रागा
३८	१५	दिर्थः ।	दित्यर्थः
३४	२	विकल्यतइति	वकल्यतइति
३६	३८	सूमत्र	सूत्रम
३८	१	तन्त्वासिद्धः	तन्त्वसिद्धः
५१	१	हीनोवितण्डा	हीनो वितण्डा
५७	१६	सिद्ध	सिद्ध॰
६१	१३	नद्वय	नायम-पा॰
६३	५	जनितो ऽर्थ	जनितो र्थो पा॰
६३	१०	स्य समाख्या	स्य संप्रतिपत्ति॰ शब्दे समाख्या पा॰
६३	१५	प्रतिषेध्यते	प्रतिषिध्यते
७०	५	नमपि	ख्यानमपि
७२	१३	दृर्शनात्	दर्शनात्
८६	२६	ताता	तीता
६१	१	ङ्गात	ङ्गति
६१	३१	प्रत्यक्षे	प्रत्यक्षे
६६		भ्यासेने	भ्यासे ने
६७	३	मैवै	मेवै
११०	१५	नाणुर्नित्य	नाणुनित्य
११४	१६	३५ वृत आरभ्य ५३ पर्यन्तम्	३६ वृत्यादयः ५३ पर्यन्तम् ।
११५	१७	साच	सच्च
११८	३	चास्यार्थं	चास्यार्थं

पृ॰	पं॰	अशुद्धम् ।	शुद्धम् ।
१२८	८	वषय	विषय
१३५	२६	मन्त्रः	मन्तुः
१३८	३	कय ायु	कया यु
१३६	३१	नि दर्शन	निदर्शन
१४०	२६	विप्रतिपते	विप्रतिपत्ते
१४५	२८	नु ाह	सुयह
१४७	२७	द्रव्यस्य-	द्रव्यस्य
१४६	१६	व्याहत	व्याहन
१४६	२१	प्राप्य	प्राप्य
१५६	२६	गृह्यरन्	गृह्येरन्
१५८	११	तृतीस्या	तृतीयस्या
१६४	१६	साधेय	साधये
१६४	२४	मनोवर्धं	मनो वर्धं
१६७	२७	धम्य	धर्म्य
१७०	२८	वैशिषिक	वैशेषिक
१७६	१३	रसिभती	रसिप्रभती
१८२	२२	दित्येन	दित्यनेन
१८४	४	शरार	शरीर
१८४	१६	र्म ाश्चेतना	र्म्याच्चेतना
१६०	१७	त्पात्तः	त्पत्तिः
१६१	६	निमित्त	निमित्तं
१६२	६	त्पतौ	त्पत्तौ
१६४	८	प्रवर्तते	प्रवर्तन्ते
१६६	११	बहुस्यां	बहु स्यां
२२०	३५	वाच्या	वाच्या
२०१	२३	मुक्रम्या	मुक्रम्या
२०३	१७	यस्यत्पत्ति	तस्योत्पत्ति
२०७	१०	प्रतिज्ञाभावे	प्रतिज्ञा भावे
२०६	१३	ह्रीर्घ	ह्रीर्घ-
२१२	२८	पङ्क्ति	पङ्क्ति
२१३	१७	त्पत्तर्विद्य	त्पत्तेर्विद्य
२१४	२	रितिप्रागु	रिति प्रागु
२२२	१६	दुःखनु	दुःखानु
२२६	१३	संज्ञाप्रहा	संज्ञा प्रहा
२३३	२६	वेद्यास्य	वेद्यनस्य
२३४	२३	भेदोपि	भेदोपि
२३५	६	विषयायामि	विषयाभि
२३६	१७	नोत्पद्यन्त	नोत्पद्यन्ते

शुद्धिपत्रम् ।

पृ॰	पं॰	अशुद्धम् ।	शुद्धम् ।
२३८	६	अस्त्वत	अस्त्वेत
२५४	१७	का ं ा	कार्या
२५६	७	लाब्धः	लब्धः
२६०	६	टनात्	ष्टानात्
२६४	१	विपययात्	विपर्ययात्
२६४	३	सते	सतो
२६४	१२	माठ	मठि

पृ॰	पं॰	अशुद्धम् ।	शुद्धम् ।
		अङ्कपङ्क्तौ ।	
८१		सू॰ ३४	सू॰ ३३
१०३		आ॰ १	आ॰ २
११७		३८–४२	३९–४३
११९		४३–४८	४४–४९
१९३		७६	७५

॥ श्रीगणेशाय नमः ॥

श्रीसरस्वत्यै नमः ।

नमः श्रीगौतमाय ।

न्यायभाष्यम् ।

प्रमाणतो ऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्* ।

प्रमाणमन्तरेण नार्थप्रतिपत्तिः नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम् । प्रमाणेन खल्वयं ज्ञाता ऽर्थमुपलभ्य तमर्थमभीप्सति जिहासति वा । तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते । सामर्थ्यं पुनरस्याः फलेनाभिसंबन्धः समीहमानस्तमर्थमभीप्सन् जिहासन्वा तमर्थमाप्नोति जहाति वा । अर्थस्तु सुखं सुखहेतुश्च दुःखं दुःखहेतुश्च । सो ऽयं प्रमाणार्थो ऽपरिसंख्येयः प्राणभृद्भेदस्यापरिसंख्येयत्वात् । अर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति† । कस्मात् अन्यतमापाये ऽर्थस्यानुपपत्तेः । तच्च यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता स येनार्थं प्रमिणोति तत्प्रमाणं योऽर्थः प्रमीयते तत्प्रमेयं यदर्थविज्ञानं सा प्रमितिः चतसृषु चैवंविधास्वर्थतत्त्वं परिसमाप्यते‡ किं पुनस्तत्त्वम् ।

---

* प्रमाणं प्रत्यक्षादि अर्थवद् अर्थाव्यभिचारि प्रवृत्तिसामर्थ्यात् । संवादिप्रवृत्तिजनकत्वात् । प्रवृत्तिजनकतायामवान्तरव्यापारः प्रमाणजन्या ऽर्थप्रतीतिः । तथा च संवादिप्रवृत्तिजनकत्वेन प्रामाण्यमनुमीयतइति बोधयितुमिदं वाक्यम् । अतश्च विषयमात्रावभासकस्य ज्ञानस्य स्वग्राहकत्वस्याप्यभावेन स्वधर्मिकप्रमात्वग्राहकताया असंभवेन ज्ञानान्तरस्य चासिद्धप्रमाणभावस्य पूर्वज्ञानप्रामाण्यग्राहकत्वायोगात् प्रामाण्यमुभयथाऽपि दुर्ग्रहमिति शास्त्रं कथं पदार्थतत्त्वज्ञानं जनयेदिति तद्द्वारेण तस्य निःश्रेयसोपायता न संभवतीति शङ्का निराकृता भवति । न्या· वा· ता· टी· ।

प्रमाणत इति तसिल् हेतुत्वकरणत्वयोरुभयोरपि एकस्य द्वयोर्बहूनां च प्रमाणानां संग्रहार्थः । न्या· वा· ।

† प्रमाणेऽर्थवति विषयाव्यभिचारिणि सति प्रमाताऽर्थवान् प्राप्तविषयः प्रमेयं चार्थवज् ज्ञायमानरूपविशिष्टं प्रमितिश्चार्थवती तन्निष्ठविषयताका भवतीत्यर्थः । प्रमाणाभासेन विषयप्रदर्शने प्रदर्शितप्रकाराभावात् । अन्यथाख्यातिरूपनैयायिकसिद्धान्ते प्रमाणाभासजनितज्ञानविषयतायाः धर्म्यवृत्तिप्रकारवृत्तित्वात् ।

‡ तत्त्वपरिसमाप्तिश्च विनियोगयोग्यता उपेक्ष्यता वा । न्या· वा· सुखसाधनत्वेन दुःखसाधनत्वेन वा पूर्वं गृहीते वस्तुनि प्रमाणेनोपदर्शिते संवादिप्रवृत्त्यवधृतप्रमाणभा-

सतश्च सद्भावोऽसतश्चासद्भावः । सत्सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति* । असच्चासदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति । कथमुत्तरस्य प्रमाणेनोपलब्धिरिति ।

सत्युपलभ्यमाने तदनुपलब्धेः† प्रदीपवत् । यथा दर्शकेन दीपेन दृश्ये गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति यद्यभविष्यदिदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति (एवं प्रमाणेन सति गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति यद्यभविष्यदिदमिव व्यज्ञास्यत विज्ञानाभावान्नास्तीति) । तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयतीति । सच्च खलु षोडशधा‡ व्यूढमुपदेक्ष्यते । तासां खल्वासां सादृधानाम् ।

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निः श्रेयसाधिगमः ॥ १ ॥

§निर्देशे यथावचनं विग्रहः । चार्थे द्वन्द्वसमासः‖ । प्रमाणादीनां तत्त्वमिति शैषिकी षष्ठी । तत्त्वस्य ज्ञानं निःश्रेयसस्याधिगम इति कर्मणि षष्ठ्यौ । एतावन्तो विद्यमानार्थाः एषामविपरीतज्ञानार्थमिहोपदेशः । सोऽयमनवयवेन¶ तन्त्रार्थ उद्दिष्टो वेदितव्यः । आत्मादेः खलु प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसाधिगमः । तच्चैतदुत्तरसूत्रेणानूद्यत इति । हेयं तस्य निर्वर्तकं** हानमात्य-

---

वेन तेन तद्रूपवैशिष्ट्येन ग्राहिते तज्जातीये सुखसाधनत्वस्मरणेनोपादानं दुःखसाधनत्वस्मरणेन परिहार उभयवैलक्षण्यस्मरणेनोपेक्षा चेति फलं परिसमाप्तिरिति यावत् । क्व चित्प्रतिबन्धेनोपादानाद्यभावेपि तत्त्वसमाप्तिर्मा विघातीति योग्यताग्रहणम् । ता· टी· । अर्थतत्त्वमित्यत्रार्थेति ३ पु· नास्ति ।

* सद् भावरूपं वस्तु सदिति प्रतीयमानं भावरूपेण ज्ञायमानं यथाभूतं यद्रूपविशिष्टं वस्तुतस्ततोऽन्यरूपेणाज्ञातं तत्त्वमित्युच्यतइत्यर्थः । एवमग्रेऽपि ।

† तद्वदनुपलब्धेरिति ३ पु· पाठः ।

( ) एतच्चिह्नमध्यस्थपाठः २ । ४ पुस्तकयोर्नास्ति ।

‡ असतां प्रमाणविषयत्वेऽपि तेषां भावपरतन्त्रत्वाच्चतुर्वर्गानन्तर्भावाद्वा भावप्रपञ्चनेनेवाभावप्रपञ्चस्याप्युद्दिष्टप्रायत्वाद्वाऽसद्भेदा नोच्यन्ते । **व्यूहः संक्षेपः** । न्या· वा· ।

§ अत्र **त एते सद्भेदा इति सूत्र**मिति वार्तिके तात्पर्यटीकायां च दृश्यते ।

‖ **सर्वपदार्थप्रधानो द्वन्द्वः समास** इति वार्तिकतात्पर्यटीकयोः संमतः पाठः ।

¶ अनवयवेन साकल्येन ।

** **हेयं दुःखं तस्य निर्वर्तकमविद्यातृष्णे धर्माधर्मावि**ति । न्या· वा· ।

न्तिकं तस्योपायो ऽधिगन्तव्य इत्येतानि चत्वार्य्यर्थपदानि* सम्यग्बुद्ध्वा निःश्रेयसमधिगच्छति ।

तच्च संशयादीनां पृथग्वचनमनर्थकम् । संशयादयो यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्तइति । सत्यमेतत् । इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या । तस्याः पृथक्प्रस्थानाः† संशयादयः पदार्थाः तेषां पृथग्वचनमन्तरेणाध्या‡त्मविद्यामाचमियं स्यात् यथोपनिषदः । तस्मात्संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते । तच्च नानुपलब्धे न निर्णीते ऽर्थे न्यायः§ प्रतते किं तर्हि संशयिते ऽर्थे । यथोक्तं विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः‖ इति । विमर्शः संशयः पक्षप्रतिपक्षौ न्यायप्रवृत्तिः अर्थावधारणं निर्णयस्तत्त्वज्ञानमिति । स चायं किं स्विदिति वस्तुविमर्षमाचमनवधारणं ज्ञान् संशयः प्रमेये ऽन्तर्भवन्नेवमर्थं पृथगुच्यते । अथ प्रयोजनम् । येन प्रयुक्तः¶ प्रवर्त्ततेतत्प्रयोजनम् । यमर्थमभीप्सन् जिहासन्वा कर्मारभते तेनानेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्या व्याप्ताः तदाश्रयश्च** न्यायः प्रवर्त्तते । कः पुनरयं न्यायः । प्रमाणैरर्थपरीक्षणं न्यायः†† । प्रत्यक्षागमाश्रितमनुमानं साऽन्वीक्षा प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्त्ततइत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम् । यत्पुनरनुमानं प्रत्यक्षागमविरुद्धं‡‡ न्यायाभासः स

---

* अर्थपदानि शास्त्रप्रतिपाद्या विषयाः ।

† पृथक्प्रस्थानाः प्रतिपाद्यविषयवैलक्षण्यविशिष्टाः । अग्निहोत्रहवनादिप्रस्थाना त्रयी । हलशकटादिप्रस्थाना वार्ता । स्वाम्यमात्यभेदानुविधायिनी दण्डनीतिः । संशयादिभेदानुविधायिनी आन्वीक्षिकी । न्या· वा· ।

‡ आत्मेति ४ । २ पुस्तकयोः पाठः ।

§ पञ्चरूपश्चतूरूपो वा हेतुर्न्यायः । प्रतिज्ञाद्यवयवसमूहो वा न्यायः । नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति । ता· टी· ।

‖ न्या· सू· अ· १ आ· १ सू· ४१ ।

¶ यदिच्छाजनितकृतिमानित्यर्थः । यत्पदार्थो धर्मार्थकाममोक्षा इति के चित् । सुखाप्तिदुःखहाने इति न्या· वा· ।

** उपकारकत्वमाश्रयार्थः न्या · वा · उद्देश्यत्वमिति तदर्थः ।

†† प्रत्यक्षादिप्रमाणमूलाः प्रतिज्ञादयः पञ्चावयवाः प्रमाणानि तैरर्थस्य लिङ्गस्य परीक्षणम् । ता· टी· ।

‡‡ उपमानविरुद्धं च प्रत्यक्षागमविरुद्धेत्यैवोक्तमिति न पृथगुक्तम् । न्या· वा· ।

इति । तच्च वादजल्पौ सप्रयोजनौ वितण्डा तु परीक्ष्यते* । वितण्डया प्रवर्तमानो वैतण्डिकः । स प्रयोजनमनुयुक्तो यदि प्रतिपद्यते, सो ऽस्य पक्षः, सो ऽस्य सिद्धान्त इति वैतण्डिकत्वं जहाति । अथ न प्रतिपद्यते, नायं लौकिको न परीक्षक इत्यापद्यते । अथापि परपक्षप्रतिषेधज्ञापनं प्रयोजनं ब्रवीति, एतदपि तादृगेव । यो ज्ञापयति यो जानाति येन† ज्ञाप्यते यच्च‡ प्रतिपद्यते यदि तदा वैतण्डिकत्वं जहाति, अथ न प्रतिपद्यते परपक्षप्रतिषेधज्ञापनं प्रयोजनमित्येतदस्य वाक्यमनर्थकं भवति । वाक्यसमूहश्च स्थापनाहीनो वितण्डा तस्य यद्यभिधेयं प्रतिपद्यते सो ऽस्य पक्षः स्थापनीयो भवति अथ न प्रतिपद्यते प्रलापमात्रमनर्थकं भवति वितण्डात्वं निवर्तते इति । अथ दृष्टान्तः प्रत्यक्षविषयो ऽर्थः§ यच्च लौकिकपरीक्षकाणां दर्शनं न व्याहन्यते स च प्रमेयम् । तस्य पृथग्वचनं च तदाश्रयावनुमानागमौ तस्मिन्त्सति स्यातामनुमानागमाश्रयश्च न स्याताम् । तदाश्रया च न्यायप्रवृत्तिः । दृष्टान्तविरोधेन च परपक्षप्रतिषेधो वचनीयो भवति दृष्टान्तसमाधिना च स्वपक्षः साधनीयो भवति । नास्तिकश्च दृष्टान्तमभ्युपगच्छन्नास्तिकत्वं जहाति‖ । ¶अनभ्युपगच्छन्न साधनः परमुपाल**भेतेति । निरुक्तेन च दृष्टान्तेन शक्यमभिधातुं साध्यसाधर्म्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ।' तद्विपर्ययाद्विपरीत‡‡मिति । अस्त्येवमित्यनुज्ञायमानो§§ ऽर्थः सिद्धान्तः । स च प्रमेयं तस्य पृथग्वचनं सत्सु

---

* प्रयोजनस्य सकलकर्मविद्याव्यापकत्वात्तया वितण्डायां स्वपक्षस्थापनाभावेन प्रयोजनाभावकोटिः परपक्षप्रतिषेधमात्रेणापि प्रयोजनवत्ताकोटिश्चोपस्थापितेति संशयात् क्रमप्राप्तान् दृष्टान्तादीनुल्लङ्घ्य वितण्डापरीक्षावसर इति ता॰ टी॰ ।

† यच्च ज्ञाप्यते ५ । ४ । २ पा॰ । ‡ एतच्च प्रतिपद्यते ५ । ४ । २ पा॰ ।

§ अनुमानमात्रेणागममात्रेण वा गम्यस्यापि दृष्टान्ततया मन्त्रायुर्वेदप्रामाण्यवदणुश्यामतानित्यत्ववदेति च सूत्रकारेणैवोपादानाद् यथाश्रुतार्थकत्वे लक्षणासङ्गतिरिति व्याचष्टे यत्रेत्यादि । क्व चित्केवललौकिकानां क्व चित्केवलपरीक्षकाणां क्व चिल्लौकिकानां परीक्षकाणां चेति व्याख्येयम् । ता॰ टी॰ ।

‖ तस्य क्षणभङ्गवादित्वेन पूर्वदृष्टव्यक्तीनां तद्गतधर्माणां च साधनकाले प्रदर्शनासंभवादिति भावः ।

¶ अनुपगच्छन् ४ । २ पा॰ । ** उपालभेत ४ । २ पा॰ ।

†† साध्यसाधनसाधर्म्यादिति १ पु॰ पाठः । ‡‡ न्या॰ सू॰ अ॰ १ आ॰ १ सू॰ ३६ । ३७

§§ अभ्युपगम इदमित्यभूतं वेति । तस्य व्यवस्था मतविशेषाङ्गीकारेण इदं सांख्येष्विदं योगेष्विति । सर्वतन्त्रसिद्धान्तस्तर्हि न सिद्धान्तो ऽव्यवस्थानात् । तच्च न यो ऽयं सर्वैरभ्युपगम इयमेव व्यवस्था । न्या॰ वा॰ ।

सिद्धान्तभेदेषु वादजल्पवितण्डाः प्रवर्त्तन्ते नातो ऽन्यथेति । साधनीयार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य पञ्चावयवाः प्रतिज्ञादयः समूहमपेक्ष्यावयवा उच्यन्ते । तेषु प्रमाणसमवाय आगमः* प्रतिज्ञा हेतुरनुमानम । उदाहरणं प्रत्यक्षम्† । उपनय‡मनुपमानं§ सर्वेषामेकार्थसमवाये सामर्थ्यप्रद॥शनम्¶ निगमनमिति । सो ऽयं परमे** न्याय इति । एतेन वादजल्पवितण्डाः प्रवर्त्तन्ते नातो ऽन्यथेति । तदाश्रया चं तत्त्वव्यवस्था††। त्रे चैते ऽवयवाः शब्दविशेषाः सन्तः प्रमेये ऽन्तर्भूता एवमर्थं पृथगुच्यन्तइति । तर्कों न प्रमाणसंगृहीतो न प्रमाणान्तरं प्रमाणानामनुग्राहक‡‡स्तत्त्वज्ञानाय§§ कल्पते । तस्योदाहरणं किमिदं जन्म॥॥ कृतकेनम्¶ हेतुना निर्वर्त्यते आहो स्विदकृतकेन***। एवमविज्ञाते ऽर्थे कारणोपपत्त्या ऊहः प्रवर्त्तते यदि कृतकेन हेतुना निर्वर्त्यते हेतूच्छेदादुपपन्नो ऽयं जन्मोच्छेदः, अथाकृतकेन हेतुना ततो हेतूच्छेदस्याशक्यत्वादनुपपन्नो जन्मोच्छेदः । अथाकस्मिकमतो ऽकस्मान्निर्वर्त्यमानं न पुनर्निवर्त्स्यतीति निवृत्तिकारणं नोपपद्यते तेन जन्मानुच्छेद इति । एतस्मिं-

---

* तत्रागमः प्रतिज्ञेति न युक्तम् आगमस्य तत्त्वव्यवच्छेदकत्वात् प्रतिज्ञार्थस्य च प्रतिपाद्यत्वात् । आगमाधिगतार्थस्य प्रतिपाद्यत्वादागमः प्रतिज्ञेति न दोषः । य एवार्थं आगमेनाधिगतस्तमेव परस्मा आचष्टइत्यागमः प्रतिज्ञेत्युच्यते । एवं लिङ्गदर्शनमात्रे हेतूपचाराद्धेतुरनुमानमिति । न्या· वा· ।

† स्मृतिविषयस्य प्रत्यक्षतः पुनरुपदर्शनादुदाहरणं प्रत्यक्षं यस्मात्पूर्वानुभूतमर्थं स्मरति स्मृतं च विषयमुदाहरणत्वेनादत्ते । तेन पूर्वानुभवप्रसिद्धमनुविधीयमानं प्रत्यक्षमिव प्रत्यक्षमिति । न्या· वा· ।

‡ उपनय ५ । ४ । २ पु· पाठः ।

§ कः पुनरुपमानार्थः । अविप्रतिपत्तिः । यथा प्रत्यक्षे न विप्रतिपद्यते एवमुदाहरणेपीति । न्या· वा· ।

॥ दर्शनम् ५ । ४ । २ पु· पाठः ।

¶ एकवाक्यभावे इतरेतरसंप्रत्ययितार्थापेक्षित्वम् । न्या· वा· ।

** परमत्वं विप्रतिपन्नपुरुषप्रतिपादकत्वम् । एकैकशः प्रमाणानि प्रवृत्तानि न विप्रतिपन्नं पुरुषं प्रतिपादयन्ति वाक्यभावापन्नानि पुनर्विप्रतिपन्नमतोऽयं परम इति । न्या· वा· ।

†† विशेषनिश्चयः पञ्चावयववाक्याधीन इत्यर्थः ।

‡‡ प्रमाणयुक्तत्वायुक्तत्वसंभावकः । §§ कल्प्यते १ पु· पाठः ।

॥॥ निकायविशिष्टाभिरपूर्वाभिः शरीरेन्द्रियबुद्धिवेदनाभिरभिसंबन्धो जन्म । सा· टी· ।

¶¶ कृतेन ५ । ४ । २ । ३ पाठः ।

*** अथाकस्मिकमिति ५ । ४ । २ । ३ अधिकः पाठः ।

स्तर्कविषये कर्मनिमित्तं जन्मेति प्रमाणानि प्रवर्त्तमानानि तर्केणानुगृह्यन्ते तत्त्व-ज्ञानविषयस्य विभागात्तत्त्वज्ञानाय कल्पते तर्क इति । सोऽयमित्थम्भूतस्तर्कः प्रमाणसहितो वादे साधनायोपालम्भाय चार्थस्य भवतीत्येवमर्थं पृथगुच्यते प्रमेयान्तर्भूतोऽपीति । निर्णयस्तत्त्वज्ञानं प्रमाणानां फलं* तदवसानो वादः । तस्य पालनार्थं जल्पवितण्डे । तावेतौ तर्कनिर्णयौ लोकयात्रां वहत इति । सोऽयं निर्णयः प्रमेयान्तर्भूत एवमर्थं पृथगुद्दिष्ट इति । वादः खलु नानाप्रव-क्तृकः प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्णयावसानो† वाक्यसमूहः पृथगुद्दिष्ट उपलक्षणार्थम् । उपलक्षितेन व्यवहारस्तत्त्वज्ञानाय भवतीति । तद्विशेषौ‡ जल्पवितण्डे तत्त्वाध्यवसायसंरक्षणार्थमित्युक्तम् । निग्रहस्थानेभ्यः पृथगुद्दिष्टा हेत्वाभासा वादे चोदनीया भविष्यन्तीति॥ जल्पवितण्डयोस्तु

---

* यद्येवमिन्द्रियापातजन्म प्रत्यक्षज्ञानमपि तत्त्वज्ञानमिति निर्णयः स्याद-त आह । प्रमाणानामिति । अनेन पञ्चावयववाक्यमुपलक्षयति । तत्र सतर्काणां प्रमाणानां समवायात् । परमार्थतस्तु तर्कपूर्वकस्तत्त्वनिश्चयो विनिर्णय इति प्रत्यक्षादीनामपि तर्कसहायानां निर्णयफलत्वमिति । ता॰ टी॰ ।

† अधिक्रियतेऽत्यधिकरणं साध्यम् । तदधिकृत्य साधनप्रवृत्तेः । उभाभ्यां वादिप्रतिवादिभ्यां स्वस्वसाध्ये साधनं वक्तव्यम् । अन्यतरस्मिन् साध्ये निर्णयः । वादे हि तावद् ब्रूते यावदन्यतरस्मिन् निर्णयो न जातः तत्त्वबुभुत्सोर्वादिनोर्वादे-ऽधिकारात् । जल्पे तु पुरुषशक्तिपरीक्षालक्षणेऽप्रतिभादिनापि पराजयोपपत्तेर्नावश्यं तत्त्वनिर्णयः । तस्मादन्यतरनिर्णयावसानत्वेन जल्पाद्भेदो वादस्येति । ता॰ टी॰ ।

‡ विशेषोऽङ्गाधिक्यमङ्गहानिश्च । छलजातिनिग्रहस्थानप्रयोगादधिको जल्पः । स प्रतिपक्षस्थापनाहीनस्तु वितण्डा । विषयभेदाच्च भेदः । शिष्यादि-विषयो वादः शिष्यमाणविषये जल्पवितण्डे इति । न्या॰ वा॰ ।

§ समिति॰ ५ । ४ । २ । ३ नास्ति ।

॥ पृथगुपदिष्टानामपि संशयादीनां वादे ऽचोदनीयत्वाद् वादे चोदनीयानामपि न्यूना-दीनां पृथगनुपदेशाद् यथाश्रुतं भाष्यं दूषयित्वा विद्याप्रस्थानभेदज्ञापनार्थत्वात्पृथगुपदेश इति वार्तिकम् । निग्रहस्थानान्तर्गतत्वेनैव तन्निरूपणे प्रस्थानभेदसंभवादिदमप्ययुक्तमित्युक्त्वा वयं तु हेत्वाभासानां न निग्रहस्थानत्वं तथा सति सर्वत्र हेत्वाभाससत्त्वात् सर्वस्यैव निगृहीतत्वापत्तेः । तस्माद् हेत्वाभासप्रयोगो निग्रहस्थानं तद्विभाजकसूत्रस्थहेत्वा-भासपदं च तत्प्रयोगपरं तत्र च प्रयोगस्य न लक्षणमपेक्षणीयमपि तु हेत्वाभासा-नामित्यत उक्तं हेत्वाभासाश्च यथोक्ता इति न च हेत्वाभासस्यावच्छेदकप्रवेशाद्दैव पृथङ्निरूपणापेक्षेति वाच्यम् । तथा सति प्रमाणतर्कोपालम्भ इति वादाद्यवच्छे-दकप्रमाणादेरपि पृथङ्निरूपणापत्तेरिति युक्तमुत्पश्याम इति विश्वनाथपञ्चाननाः । गौ॰ सू॰ वृ॰ ।

(नियहस्थानानीति । छलजातिनिग्रहस्थानानां पृथगुपदेश उपलक्षणार्थ इति उपलक्षितानां स्ववाक्यपरिवर्जनं छलजाति) निग्रहस्थानानां परवाक्ये पर्य्यनुयोगः । जातेश्च परेण प्रयुज्यमानायाः सुलभः समाधिः स्वयं च सुकरः प्रयोग* इति । सेयमान्वीक्षिकी प्रमाणादिभिः पदार्थैर्विभज्यमाना ।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तिता† ॥

तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमार्थं यथाविद्यं‡ वेदितव्यम् । इह त्वध्यात्मविद्यायामात्मादितत्त्वज्ञानं निःश्रेयसाधिगमो ऽपवर्गप्राप्तिः ।

§तत्खलु निःश्रेयसं किं तत्त्वज्ञानानन्तरमेव भवति । नेत्युच्यते । किं तर्हि तत्त्वज्ञानात् ।

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरा‖भावादपवर्गः ॥ २ ॥

तच्चात्माद्यपवर्गपर्य¶न्तं प्रमेये मिथ्याज्ञानिमनकप्रकारक** वर्त्तते । आत्मनि तावत्†† नास्तीति‡‡ अन्यात्मेति, दुःखे सुखमिति अनित्ये नित्यमिति अचाणे त्राणमिति, सभये निर्भयमिति, जुगुप्सिते ऽभिमतमिति हातव्ये ऽप्रतिहातव्यमिति, प्रवृत्तौ नास्ति कर्म, नास्ति कर्मफलमिति दोषेषु नायं दोषनिमित्तः संसार, इति प्रेत्यभावे नास्ति जन्तुर्जीवो वा सत्त्व

( ) एतच्चिह्नमध्यस्थः पाठः ४ । २ पुस्तकयोर्नास्ति ।

* परेण जातौ प्रयुक्तायां प्राश्निकान् ब्रवीति जातिरनेन प्रयुक्तेति त एनं पर्यनुयुञ्जीरन् कथं जातिः कतमा जातिरतो जात्यभिज्ञः शक्नोति वक्तुमेवं जातिरियं च जातिरिति। एवं च सुकरः प्रयोगः स्ववाक्ये परिवर्जनं चेत्युभयमविरुद्धम् । न्या· वा· ।

† परीक्षितेति जयन्तवृत्तिधृतः पाठः । ‡ यथाविधम् २ । ३ पाठः ।

§ अपरीक्ष्य तत्त्वनिर्णयायोगान्न चानिर्णीतप्रयोजनसम्बन्धानां लक्षणपरीक्षयोरवकाशः न च प्रयोजनसम्बन्धनिर्णयः परीक्षां विनेति तत्परीक्षार्थं द्वितीयं सूत्रम् । ता· टी· ।

‖ अपायादिति ५ । ३ पाठः । ¶ अपवर्गान्ते । ५ । ३ पाठः ।

** प्रवर्तते ५ पाठः । †† आत्मनि नास्तीति ४ । ३ पाठः ।

‡‡ सदसतोः प्रमाणगम्यत्वं सारूप्यं क्रियागुणव्यपदेशस्तद्रहितता च विशेषः । अतश्च विशेषाग्रहात्सारूप्यग्रहाच्च विपर्ययः । आत्मानात्मनोः अहङ्कारविषयत्वं सारूप्यमिच्छाद्याधारानाधारता च विशेषः । न्या· वा· ।

आत्मा वा यः प्रेयात्प्रेत्य च भवेदिति अनिमित्तं जन्मानिमित्तो जन्मापरम इत्यादिमान् प्रेत्यभावो ऽनन्तश्चेति नैमित्तिकः सन्नकर्मनिमित्तः प्रेत्यभाव इति देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां निरात्मकः प्रेत्यभाव इति अपवर्गे भीष्मः * खल्वयं सर्वकार्य्योपरमः सर्वविप्रयोगे ऽपवर्गे बहु†भद्रकं लुप्यतइति, कथं बुद्धिमान्त्सर्वसुखोच्छेदमचैतन्यममु‡मपवर्गं रोचयेदिति । एतस्मान्मिथ्याज्ञानादनुकूलेषु रागः प्रतिकूलेषु द्वेषः । रागद्वेषाधिकाराच्चासत्येर्ष्यामायालोभादयो दोषा भवन्ति । दोषैः प्रयुक्तः शरीरेण प्रवर्त्तमानो हिंसास्तेयप्रतिषिद्धमैथुनान्याचरति । वाचा ऽनृतपरुषसूचनाऽसम्बद्धानि । मनसा परद्रोहं परद्रव्याभीप्सां नास्तिक्यं चेति । सेयं पापात्मिका प्रवृत्तिरधर्म्माय । अथ शुभा शरीरेण दानं परित्राणं परिचरणं च । वाचा सत्यं हितं प्रियं स्वाध्यायं चेति । मनसा दयामस्पृहां श्रद्धाञ्चेति । सेयं धर्म्माय । अत्र प्रवृत्तिसाधनौ धर्माधर्मौ प्रवृत्तिशब्देनोक्तौ । यथा ऽन्नसाधनाः प्राणाः अन्नं वै प्राणिनः प्राणा इति । सेयं प्रवृत्तिः कुत्सितस्याभिपूजितस्य च जन्मनः कारणम् § जन्म पुनः शरीरेन्द्रियबुद्धीनां निकायविशिष्टः प्रादुर्भावः तस्मिन्त्सति दुःखं तत्पुनः प्रतिकूलवेदनीयं बाधना पीडा ताप इति । तइमे मिथ्याज्ञानादयो दुःखान्ता§ धर्म्मो ऽपवर्गविच्छेदेनैव प्रवर्त्तमानाः संसार‖ इति । यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति तदा मिथ्याज्ञानापाये दोषा अपयन्ति दोषापाये प्रवृत्तिरपैति¶ प्रवृत्त्यपाये जन्मापैति जन्मापाये दुःखमपैति दुःखापाये च आत्यन्तिको ऽपवर्गो निःश्रेयसमिति । तत्त्वज्ञानं तु खलु मिथ्याज्ञानविपर्ययेण व्याख्यातम् । आत्मनि तावदस्तीति अनात्मन्यनात्मेति एवं दुःखे नित्ये चाणे सभये जुगुप्सिते हातव्ये च यथाविषयं वेदितव्यम् । प्रवृत्तौ अस्ति कर्म्मास्ति कर्म्मफलमिति । दोषेषु दोष-

---

* स खल्वयमिति ५ । ३ पाठः । † बहु च भद्रमिति ५ । ४ । २ पाठः ।
‡ अमुमिति २ । ३ नास्ति ।

§ सूत्रकारोक्तक्रमाद्विपरीतक्रमाभिधानं भाष्यकृतो दुःखादीनां मिथ्याज्ञानपूर्वकत्वेन मिथ्याज्ञानस्य दुःखादिपूर्वकत्वेनानादित्वं दर्शयितुम् । ता· टी· ।

‖ दुःखादीनां कार्यकारणभावः संसारः स चानादिः । न्या· वा· ।

¶ धर्माधर्मौ जन्मसाधनत्वात् प्रवृत्तिपदेन ग्राह्यौ न क्रिया तस्याः क्षणिकत्त्वात् । न्या· वा· ।

निमित्तो ऽयं संसार इति प्रेत्यभावे खल्वस्ति जन्तुर्जीवः सत्वः आत्मा वा यः प्रेत्य भवेदिति निमित्तवज्जन्म निमित्तवान् जन्मोपरम इत्यनादिः प्रेत्यभावो ऽपवर्गान्त इति नैमित्तिकः सन्प्रेत्यभावः प्रवृत्तिनिमित्त इति सात्मकः सन् देहेन्द्रियबुद्धिवेदनासन्तानोच्छेदप्रतिसन्धानाभ्यां प्रवर्त्ततइति अपवर्गे शान्तः खल्वयं सर्वविप्रयोगः सर्वोपरमो ऽपवर्गः बहु च कृच्छ्रं घोरं पापकं लभ्यतइति कथं बुद्धिमान्सर्वदुःखोच्छेदं सर्वदुःखासंवि*दमपवर्गं न रोचयेदिति । तद्यथा मधुविषसंपृक्तान्नमनादेयमिति एवं सुखं दुःखानुषक्त†मनादेयमिति ।

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षा चेति । तत्र नामधेयेन पदार्थमात्रस्याभिधानमुद्देशः तत्रोद्दिष्टस्य तत्त्वव्यवच्छेदको धर्मो लक्षणम् । लक्षितस्य यथालक्षणमुपपद्यते न वेति प्रमाणैरवधारणं परीक्षा । तत्रोद्दिष्टस्य प्रविभक्तस्य लक्षणमुच्यते यथा प्रमाणानां प्रमेयस्य च । उद्दिष्टस्य लक्षितस्य च विभागवचनं यथा छलस्य वचनविघातो ऽर्थाऽपपत्त्या छलं‖ तत्त्रिविधमिति । अथोद्दिष्टस्य विभागवचनम्¶ ॥

---

* संविदपवर्गम् ४ पाठः । † दुःखाक्तमिति १ पाठः ।

‡ अनुषङ्गो ऽविनाभावः यत्रैकं तत्रेतरदिति । समाननिमित्तता वा ऽनुषङ्गः । यान्येव सुखसाधनानि तान्येव दुःखसाधनानीति । समानाधारता वा ऽनुषङ्गः यत्र सुखं तत्र दुःखमिति । समानोपलभ्यता वा ऽनुषङ्गः येन सुखमुपलभ्यते तेन दुःखमपीति । न्या· वा· ।

§ अर्थविकल्पोपपत्त्या ५ । ४ । २ । ३ पाठः । ‖ न्या· सू· अ· १ आ· २ सू ५१

¶ विभागस्याप्युद्देशेऽवान्तर्भावात्त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरित्यनेन न विरोधः । विभागे ऽपि पदार्थमात्राभिधानेनोद्देशलक्षणसत्त्वात् । विभागकरणं च प्रमाणान्तरसत्त्वशङ्कानिवृत्तये । लक्षणेनेतरव्यावृत्तधर्मबोधने ऽपि प्रमाणान्तराभावबोधनस्याशक्यत्वात् । न्या· वा· । स्यादेतत् । विभागपरमेतत्सूत्रमिति वक्ष्यति । न च विभागो न्यूनाधिकसंख्याव्यवच्छेदार्थं एकं किं चिदुपसंग्राहकमन्तरेण । न च प्रमाणत्वादन्यत्तदुपसंग्राहकं न चेदमलक्षितमुपसंगृह्णाति । न चैतत्सूत्रमस्य लक्षणपरं विभागपरत्वादिति शङ्कानिराकरणपरं भाष्यमथोद्दिष्टस्येति । तस्यार्थः । यद्यपि विभागपरमेतत्सूत्रं तथापि प्रमाणपदसमभिव्याहृतं सत्सामर्थ्यात्प्रमाणत्वमपि लक्षयतीति । तथा हि प्रमीयते ऽनेनेत्यस्य वाक्यस्यार्थे प्रमाणपदप्रयोगः । प्रमा च स्मृतेरन्या ऽर्थाव्यभिचारी स्वतन्त्रः परिच्छेदः । तस्माद्विभागपरादपि सूत्रात् प्रतीयमानं प्रमाणसामान्यलक्षणमपेक्षितं गृहीतमिति प्रमाणत्वेोपगृहीतानां प्रत्यक्षादीनां युक्तो विभागः । ता· टी· ।

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ ३ ॥

अक्षस्याक्षस्य प्रतिविषयं* वृत्तिः प्रत्यक्षं वृत्तिस्तु सन्निकर्षो ज्ञानं वा। यदा सन्निकर्षस्तदा ज्ञानं प्रमितिः यदा ज्ञानं तदा हानोपादानोपेक्षाबुद्धयः† फलम्। अनुमानं मितेन लिङ्गेन‡ नार्थस्य पश्चान्मानमनुमानम्§। उपमानं‖ सामीप्यज्ञानं यथा गौरेवं गवय इति। सामीप्यं तु सामान्ययोगः। शब्दः शब्द्यते ऽनेनार्थ इत्यभिधीयते ज्ञाप्यते उपलब्धिसाधनानि प्रमाणानीति समाख्यानिर्वचनसामर्थ्याद्बोद्धव्यम्। प्रमीयते ऽनेनेति करणार्थाभिधानो हि प्रमाणशब्दस्तद्विशेषसमाख्याया अपि तथैव व्याख्यानम्। किं पुनः प्रमाणानि प्रमेयमभिसंप्लवन्ते अथ ¶प्रमेयं व्यवतिष्ठन्त**इति। उभयथा दर्शनम्। अस्त्यात्मेत्याप्तोपदेशात्प्रतीयते। तच्चानुमानमिच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्ग††मिति। प्रत्यक्षं युञ्जानस्य योगसमाधिजमात्ममनसोः संयोगविशेषादात्मा प्रत्यक्ष इति। अग्निराप्तोपदेशात्प्रतीयते ऽचाग्निरिति प्रत्यासीदता धूमदर्श-

---

* प्रतिगतमक्षं प्रत्यक्षमिति प्रादिसमासः। भाष्यं तु फलितार्थकथनपरम्। अन्यथा ऽव्ययीभावसमासाश्रयणे ऽक्षस्येति षष्ठीश्रवणानुपपत्तेः। न्या॰ वा॰। इदं च व्युत्पत्तिनिमित्तमात्रम्। प्रवृत्तिनिमित्तत्वे हीन्द्रियगतेषु गुणसामान्यादिषु व्यभिचारः। अर्थसाक्षात्कारिज्ञानजनकत्वं तु प्रवृत्तिनिमित्तम्। ता॰ टी॰।

† संनिकर्षस्य व्यापारत्वे प्रमितिः फलं ज्ञानस्य व्यापारत्वे हानादिबुद्धयः फलमिति विवेकः। उपादानबुद्धिरित्यस्योपादानविषयिणी बुद्धिरिति नार्थः। उपादेयमिदं सलिलमिति बुद्धिरनागतोपादानविशिष्टं सलिलमालम्बमाना न साक्षात्कारवती सलिलमात्रसाक्षात्कारस्तु स्यात् न च तन्मात्रमस्य फलमपि तूपादेयता सा च परोक्षा ऽनागतत्वात्तस्मादुपादीयते ऽनेनेत्युपादानमुपादानं चासौ बुद्धिश्चेत्युपादानबुद्धिः आदावालोचिते तोये तज्जातीये दृष्टचरपिपासोपशमनहेतुभावस्य स्मृतिबीजसंस्कारोद्बोधेन स्मरणे तज्जातीयमिदमिति लिङ्गपरामर्श एव साक्षात्कारफलम्। तस्योपादानकारणत्वात्। लिङ्गे विनश्यदवस्थव्याप्तिस्मरणसहकारिदृश्यमानस्य सलिलस्य पिपासोपशमनहेतुतया ऽनुमानमुखेनोपादानबुद्धिरित्युच्यते। एवं हानबुद्ध्यादिकमपि बोध्यम्। ता॰ टी॰।

‡ लिङ्गेन इति ५। ४। २। ३ पाठः।

§ अत्र यत इत्यध्याहारः। तेनानुमितिकारणीभूतलिङ्गपरामर्शाभिधानात्तस्य प्रमाणतोपपद्यते। अनुमित्यभिधाने तु प्रमाणता नोपपद्येत। हानादिबुद्धिकारणत्वादनुमितेरेव प्रमाणतेति यथाश्रुतमेव वा भाष्यं व्याख्येयम्। न्या॰ वा॰।

‖ उपमानम् उपमानम् ४। २। ३ पाठः।

¶ प्रतिप्रमेयमिति ५। ४। २। ३ पाठः।

** एकैकस्मिन् प्रमेये बहूनां प्रमाणानां व्यापार एकैकस्यैव वेत्यर्थः।

†† न्या॰ सू॰ अ॰ १ आ॰ १ सू॰ १०।

नेनानुमीयते प्रत्यासन्नेन च प्रत्यक्षत उपलभ्यते । व्यवस्था पुनरग्निरुष्ण इति विषय-
जुहुयात्स्वर्गकाम इति । लौकिकस्य स्वर्गे *न लिङ्गदर्शनं न प्रत्यक्षम् । स्ना-
नयित्नुशब्दे श्रूयमाणे शब्दहेतोरनुमानम् । तच्च न प्रत्यक्षं नागमः । पाणौ
प्रत्यक्षत उपलभ्यमाने नानुमानं नागम इति । सा चेयं प्रमितिः प्रत्यक्षपरा
जिज्ञासितमर्थमाप्तोपदेशात्प्रतिपद्यमानो लिङ्गदर्शनेनापि बुभुत्सते लिङ्गद-
र्शनानुमितं च प्रत्यक्षतो दिदृक्षते प्रत्यक्षत उपलब्धे ऽर्थे जिज्ञासा निवर्त्तते ।
पूर्वोक्तमुदाहरणम् । अग्निरिति प्रमातुः प्रमातव्ये ऽर्थे प्रमाणानां सम्भवो†
ऽभिसंप्लवः असम्भवो व्यवस्थेति ।

इति चिसूचीभाष्यम् ।

अथ विभक्तानां लक्षणमिति ।

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ ४ ॥

इन्द्रियस्यार्थेन सन्निकर्षादुत्पद्यते यज् ज्ञानं ‡तत् प्रत्यक्षम् । न तर्हीदानीमिदं allow भवति, आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेनेति । नेदं कारणावधारणमेतावत्प्रत्यक्षे कारणमिति किं तु विशिष्टकारणवचन-

---

* न लिङ्गदर्शनप्रत्यक्षमिति ४ । ३ पाठः ।

† सङ्करो ऽभिसंप्लवः असङ्करो व्यवस्थेति ५ । ४ । २ । ३ पाठः ।

‡ अत्र च यत इत्यध्याहृत्य यत्तदोर्नित्याभिसम्बन्धात्तत्प्रत्यक्षमिति प्रमाणवाचि प्रत्यक्षपदं योजनीयम् । वा· ता· टी· । सूत्रार्थः समानासमानजातीयविशेषक-
त्वम् । न्या· वा· समानजातीयमनुमानादि असमानजातीयं प्रत्यक्षाभासप्रमेयादि
तेभ्यो विशेषकत्वं विशेषस्तदस्य सूत्रस्य प्रयोजनम् । यः खलु कुतश्चिद् व्यामोहा-
त्समानासमानजातीयव्यावृत्तं तद्रूपं न शक्नोति ग्रहीतुं सो ऽनेन लक्षणेन बोध्यते
एवंलक्षणकं प्रत्यक्षमिति । तस्मात् सामान्यतः सिद्धविविक्तप्रत्यक्षमात्रानुवादेन
लक्षणविधानपरमिदं सूत्रम् । इतस्त्ववगतलक्षणस्तेनैव विविच्य प्रत्यक्षतत्त्वं गृह्णा-
तीति समानासमानजातीयव्यवच्छेदः सूत्रार्थ उक्त इति । ता· टी· । सन्निकर्षः पुमः-
बोढा भिद्यते संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषण-
विशेष्यभावश्चेति । द्रव्यप्रत्यक्षे संयोगः । द्रव्यगतरूपादिप्रत्यक्षे संयुक्तसमवायः । रूपादिगतसा-
मान्यप्रत्यक्षे संयुक्तसमवेतसमवायः । शब्दप्रत्यक्षे समवायः । तद्गतसामान्यप्रत्यक्षे समवेतसम-
वायः । समवायाभावयोर्विशेषणविशेष्यभावः ।

1* । यत्प्रत्यक्षज्ञानस्य विशिष्टकारणं तदुच्यते यत्तु समानमनुमानादिज्ञा-
न तान्नवर्त्ततइति । मनसस्तर्हीन्द्रियेण संयोगो वक्तव्यः । भिद्यमानस्य
प्रत्यक्षज्ञानस्य नायं भिद्यतइति समानत्वान्नोक्त इति । यावदर्थं वै नामधेय-
शब्दा‡स्तैरर्थसम्प्रत्ययः अर्थसम्प्रत्ययाच्च व्यवहारः । तचेदमिन्द्रियार्थसन्निकर्षो-

---

* कारणावधारणं कारणान्तरव्यवच्छेदः । विशिष्टकारणमसाधारणकारणम् । आत्ममनः-संयोगस्य ज्ञानमात्रं प्रति कारणत्वाल्लक्षणे ऽप्रवेश इति भावः । इन्द्रियमनःसंयोगस्य चेन्द्रियार्थ-सन्निकर्षकथनेनैवोक्तत्वान्मानसे सुखादिसाक्षात्कार इन्द्रियार्थसन्निकर्षसत्त्वे ऽपीन्द्रियमनःसन्निकर्षा-भावेनाव्यापकत्वाद्वा ऽनुक्तिः । अतएव विषयप्रकाशसंयोगस्य विषयगतानां रूपमहत्त्वानेकद्रव्य-त्वानामनुक्तिः । तेषामव्यापकत्वात् । संस्कारस्य चासाधारणत्वाभावात् ।

† समानत्वं चात्ममनःसंयोगेन । रूपज्ञानं रसज्ञानमिति विषयेणाभिलापवन्मनसा ऽभिला-पाभावात् । अतीन्द्रियवृत्तित्वाद्वा विषयावृत्तित्वाद्वा मनोवृत्तित्वाद्वा न्या· वा· । ननु इन्द्रिया-र्थसन्निकर्षः प्रत्यक्षे न कारणं चक्षुःश्रोत्रयोरप्राप्यकारित्वात् । तयोरप्राप्यकारित्वं च सान्तरग्रहणात् पृथुतरग्रहणाच्च । न हि गोलकेन विषयसंयोगः सम्भवति । वनादीनां पृथुतराणामप्युपलम्भाच्च च तावत्परिमाणकेनाल्पपरिमाणकस्य चक्षुषः संयोगः सम्भवति इति चेच्च । सान्तरग्रहणादित्यस्य हेतोः साध्याव्यतिरेकात् । संयोगमात्रेण पृथुतरस्यापि ग्रहणोपपत्तौ चक्षुषो गृह्यमाणसमानपरि-माणकत्वस्य प्रत्यक्षे ऽनपेक्षणीयत्वात् । चक्षुः प्राप्यकारि इन्द्रियत्वाद् घ्राणादिवदित्यनुमानात्प्रा-प्यकारित्वसिद्धिः । घ्राणादावपि विप्रतिपत्तौ तु इन्द्रियं प्राप्यकारि करणत्वाद्वास्यादिवदिति सा-धनीयम् । करणमात्रे ऽप्राप्यकारित्वं वदँस्तु तथा सति सर्वत्र कार्योत्पत्तिप्रसञ्जनेन बाधनीयः । अत्र वार्तिके तात्पर्यटीकायां च विस्तरः । सूत्रे इन्द्रियार्थसन्निकर्षात् सुखदुःखे अपि भव-तस्तद्व्युदासार्थमाह ज्ञानमिति न्या· वा· ।

‡ इह द्वयी प्रत्यक्षजातिरविकल्पिका सविकल्पिका चेति । तत्रोभयी इन्द्रि-यार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीति लक्षणेन संगृहीतापि न स्वशब्देनोपात्ता तत्र विप्रतिपत्तेस्तत्राविकल्पिकायाः पदमव्यपदेश्यमिति सविकल्पिकायाश्च व्यव-सायात्मकमिति । तत्र व्यपदेशो विशेषणमुपलक्षणं वा नामजात्यादि तत्कर्म व्यपदेश्यं विशेष्यमिति यावत् । सर्वं हि सविकल्पकं विशेषणविशेष्यभावेन वस्तुषु प्रवर्तते । अविद्यमानं व्यपदेश्यं यस्मिँस्तदव्यपदेश्यम् । जात्यादिस्वरूपावगाहि न तु जात्यादीनां मिथो विशेषणविशेष्यभावावगाहीति यावत् । तत्र नामरहितम-विकल्पकं नास्तीति ये विप्रतिपद्यन्ते तन्मतमपाचिकीर्षुरुपन्यस्यति यावदर्थं वै इत्यादि । ता· टी· अर्था हि सर्वदा सर्वथा सर्वत्र नामधेयेनान्विता नास्ति सो ऽर्थो यः कदा चिन्नामधेयेन वियुज्यते तदनेन नामधेयतादात्म्यमर्थानाम् । अत्र हेतुमाह तैरर्थप्रत्यय इति । अर्था हि प्रतीयमाना नामधेयैरुपेतास्तत्सामानाधिकरण्येना-वगम्यन्ते गौरित्यर्थो ऽश्व इत्यर्थ इति । न चोपायतया सामानाधिकरण्यं घटते न हि चक्षुरादिसामानाधिकरण्यं रूपाद्यनुभवति नापि ज्ञायमान उपाय उपेयसा-मानाधिकरण्यमनुभवति न हि भवति धूमो ऽयं वन्हिरिति । अपि चाशब्देापा-ये ऽनुमेयादौ न शब्दसम्भेदेनाधिगमो भवेदस्ति तु तस्मात्तैः शब्दैः सह समाना-

दुत्पन्नमर्थज्ञानं रूपमिति वा रस इत्येवं वा भवति रूपरसशब्दाश्च विषयनामधेयम् । तेन व्यपदिश्यते ज्ञानं रूपमिति जानीते रस इति जानीते नामधेयशब्देन व्यपदिश्यमानं सच् शाब्दं प्रसज्यते अत आह । अव्यपदेश्यमिति । यदिदमनुपयुक्ते शब्दार्थसम्बन्धे ऽर्थज्ञानं तन्नामधेयशब्देन व्यपदि-

---

धिकरणस्यार्थस्य प्रत्ययो ऽतो नामधेयात्मानो ऽर्थाः । किञ्च गवादिषु वृक्षादिषु च शब्दापकर्षे अर्थप्रत्ययापकर्षात्तदुत्कर्षे त्वर्थप्रत्ययोत्कर्षात्प्रत्ययस्य च प्रत्येतव्योत्कर्षाधीनोत्कर्षत्वाच्चामधेयोत्कर्षेणार्थोत्कर्षो ऽर्थस्य तादात्म्यं कथयति । तदिदं समः प्रयोजनं सम्प्रत्यय इति । अर्थसम्प्रत्ययाच्च व्यवहारः । ततश्चाविसंवादात्प्रमाणं सच्चामधेयतादात्म्यं साधयत्यर्थानामित्यर्थः । तथा चार्थानां नामधेयात्मकत्वात्तद्गोचरमालोचनमपि नामगोचरमित्यर्थवच्चामधेयेन व्यपदिश्यमानं शाब्दं प्रसज्यत इति । न शब्दप्रमाणकतया शाब्दमपि तु शब्दे जातं शाब्दं शब्दश्चास्य विषयत्वेन जनको ऽर्थतादात्म्यात् । तथा च नाविकल्पं शब्दरहितमस्तीति तात्पर्यार्थः । तदस्य निराकरणमव्यपदेश्यमिति । यदिदमनुपयुक्ते शब्दार्थसम्बन्धे ऽर्थज्ञानं तन्नामधेयेन न व्यपदिश्यते । अयमभिसन्धिः । सामानाधिकरण्येन शब्दात्मकत्वं रूपादीनामभिधीयमानं शब्दब्रह्मात्मकत्वं वोच्येत श्रूयमाणगौरित्यादिपदभेदात्मकत्वं वा । न तावदाद्यः कल्पः । न खल्वस्मदादिसमस्तदर्शनपथातिवृत्तेन शब्दब्रह्मणा रूपादीनामस्ति सामाधिकरण्यप्रतीतिर्लौकिकानां श्रूयमाणशब्दसामानाधिकरण्येन तु तादात्म्यप्रसाधने ऽनुपयुक्तशब्दसम्बन्धस्य बालमूकादेः रूपादिज्ञानेषु नास्ति श्रूयमाणशब्दगन्धो ऽपि प्रागेव तु तत्सामानाधिकरण्यम् । न तु तेषामपि प्राग्भवीयशब्दभावनाऽनुगमेन तत्सामानाधिकरण्यमिति सांप्रतम् । न खलु रूपाद्यात्मनः शब्दस्य रूपादिवैशद्येनावैशद्यं सम्भवति । युगपद्वैशद्यावैशद्यरूपविरुद्धधर्मयोगेन भेदप्रसङ्गात् । वैशद्ये तु व्युत्पन्नवदव्युत्पन्नो ऽपि शब्दैर्व्यवहरेत् । न तु सम्बन्धग्रहणमपेक्षेत । न च तादात्म्यादन्यद्वाचकत्वं शब्दानां यत्र सम्बन्धग्रहापेक्षा भवेत् । न च तादात्म्ये ऽपि कल्पितभेदानां वाच्यवाचकभावः तथा सति न सामानाधिकरण्यं स्यात् । न ह्यस्ति सम्भवो भेदकल्पना च सामानाधिकरण्यप्रथा चेति । तस्मादव्युत्पन्नानामस्ति शब्दरहितं रूपादिषु निर्विकल्पकं प्रत्यक्षमिति । न केवलमव्युत्पन्नानां व्युत्पन्नानामप्यस्तीत्याह । गृहीते ऽपि च शब्दार्थसम्बन्धे इति । अस्यार्थस्य सास्नादिमद्रूपस्यायं गकारादौकारो नामधेयमिति सम्बन्धग्रहणस्वरूपम् । न त्वयं पिण्डो डित्थशब्द इति प्रत्ययः । तस्माद्विषयोरेव शब्दार्थयोः सम्बन्धग्रहात्तन्मूलत्वाच्च शब्दार्थव्यवहारस्य न शब्दपुरःसरमपि ज्ञानं सामानाधिकरण्यमात्मनो ऽर्थस्यावगमयति ।

श्यते । गृहीते ऽपि च शब्दार्थसंबन्धे ऽस्यार्थस्यायं शब्दो नामधेयमिति । यदा तु सो ऽर्थो गृह्यते तदा तत्पूर्वस्मादर्थज्ञानं विशिष्यते तदर्थविज्ञानं तादृगेव भवति *। न चा ऽप्रतीयमानेन व्यवहारः। तस्या†ज्ञेयस्यार्थस्य संज्ञाशब्देनेतिकरणयुक्तेन निर्दिश्यते रूपमिति ज्ञानं, रस इति ज्ञानमिति। तदेवमर्थज्ञानकाले स न समाख्याशब्दो व्याप्रियते, व्यवहारकाले तु व्याप्रियते। तस्मादशाब्दमर्थज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नमिति। ग्रीष्मे मरीचयो भौमेनोष्मणा संसृष्टाः स्यन्दमाना दूरस्थस्य चक्षुषा सन्निकृष्यन्ते तच्चेन्द्रियार्थसन्निकर्षादुदकमिति ज्ञानमुत्पद्यते। तच्च प्रत्यक्षं प्रसज्यतइत्यत आह। अव्यभिचारीति‡। यदतस्मिँस्तदिति तद्व्यभिचारि यत्तस्मिँस्तदिति तदव्यभि-

---

यत्तु शब्दानुपायेपि ज्ञाने शब्दः पूर्वं सम्भवति तद्गृहीतसङ्केतस्य प्रथममिन्द्रियार्थसन्निकर्षादालोचनेन शब्दसंसर्गरहितेनालोचिते ऽर्थमात्रे तस्यार्थस्य शब्दभेदेन सम्बन्धाच्छब्दविषयः संस्कारः प्रबोध्यते। स प्रबुद्धः शब्दस्मृतिं जनयति। तेन व्युत्पन्नस्य निर्विकल्पात् पराञ्चः प्रत्ययाः शब्दानुपाया अपि शब्दपुरःसरा जायन्ते। तस्माद् व्युत्पन्नानामपि नामधेयस्मरणाय पूर्वमेषितव्यो विनैव नामधेयमर्थप्रत्ययः। तदेवमर्थज्ञानकाले न समाख्याशब्दो व्याप्रियते प्रतीयमानतया व्यवहारकाले परप्रत्यायनकाले तु व्याप्रियते कारणतया तदनेन गोपालाविपालादीनां संज्ञानिवेशनं तासु व्यक्तिषु व्यवहारोत्कर्षहेतुर्नार्थोत्कर्षहेतुरित्यपि सूचितं भवति। तस्मादविकल्पप्रत्यक्षविरोधेनाव्यपदेश्यपदेनास्यैवाविकल्पस्य शब्दार्थव्याधरहितता सूचितेत्याशयवानुपसंहरति तस्मादिति। ता॰ टी॰।

* तस्य त्वर्थज्ञानस्यान्यः समाख्याशब्दो नास्तीति येन प्रतीयमानं व्यवहाराय कल्पेतेति. ५। ४। २ पुस्तकेष्वधिकः पाठः।

† तस्मादिति ५। ४ । २। ३ पाठः।

‡ अर्थस्यैव व्यभिचारः स च प्रतीयमानरूपाभावरूपः। यथा मरीचिषु प्रतीयमानतोयत्वाभावः तद्विषयकत्वात्तु ज्ञानस्य व्यभिचारित्वमिति के चित्। विशेष्यावृत्तिधर्मावगाहित्वाज् ज्ञानमेव व्यभिचारीति। न्या॰ वा॰। यद्यपि सामान्यलक्षणेनैव व्यभिचारिणो निरस्ताः प्रत्ययास्तदपेक्षं च विशेषलक्षणम्। अन्यथा ऽनुमानादिपदेष्वप्यव्यभिचारिपदमुपादेयं स्यात्तथा ऽपि सिद्धे सत्यारम्भो नियमार्थः। द्वयी हि प्रमाणानां गतिः किं चित्सत्तामात्रेण प्रमासाधनं यथा प्रत्यक्षं न हि चक्षुरादीनां ग्रहणं प्रमायाम् युज्यते ऽपि तु सत्त्वेव। अनुमानादीनि तु स्वज्ञानेन प्रमासाधनानि। न खल्वगृहीतलिङ्गं वा शब्दो वा ऽऽगमसहितं सादृश्यं वा यथाविषयमादधाति प्रमाम्। तत्रा ऽनुमानस्य प्रमोपजननात्प्रागेवार्थाव्यभिचारग्रहणमपेक्ष्यते नान्यथा ततः प्रमा

चारि प्रत्यक्षमिति। दूराच्चक्षुषा ह्ययमर्थं पश्यन्नावधारयति धूम इति वा रेणुरिति वा, तदेतदिन्द्रियार्थसन्निकर्षोत्पन्नमनवधारणज्ञानं प्रत्यक्षं प्रसज्यतइत्यत आह। व्यवसायात्मकमिति*। न चैतन्मन्तव्यम्। आत्ममनःसन्निकर्षजमेवाऽनवधारणज्ञानमिति। चक्षुषा ह्ययमर्थं पश्यन्नावधारयति यथा चेन्द्रियेणोपलब्धमर्थं मनसोपलभते एवमिन्द्रियेणानवधारयन्मनसा नावधारयति।

सिध्यतीति। शब्दादौ तु यद्यपि प्रमोपजननं प्रति नार्थाव्यभिचारयहापेक्षा तथापि शक्यमतिरोहितार्थमन्त्रमध्यपतितस्य द्रागित्येव प्रतीयमानार्थस्यापि सृण्येव जर्फरीतुर्फरीतू इत्येवमादेर्मन्त्रस्याप्तप्रणेतृकतया सामान्यतो ऽर्थाव्यभिचारित्वं ग्रहीतुम्। औत्सर्गिकं हि शब्दानामर्थपरत्वमत एव निगमनिरुक्तसहायास्ततो ऽर्थमवधारयन्ति। एवं यथा मुद्गस्तथा मुद्गपर्णीति आप्तवाक्यश्रवणादेव मुद्गसादृश्यज्ञानस्यानुपजनितफलस्यापि शक्यं तदर्थाव्यभिचारित्वं निश्चेतुम्। प्रत्यक्षस्य तु प्रमाणस्यात्यन्तपरोक्षस्योपलम्भ एव प्रमोपजननात् प्राग् दुर्लभः प्रागेव तु तस्यार्थाव्यभिचारित्वम्। यद्यपि च संवेदनप्रामाण्यपक्षे ऽपि तत्संवेदनं मनसा सुलभं तथा ऽपि न तन्मात्रं प्रमाणमपि त्वसाधारणेन्द्रियार्थसन्निकर्षसहायमिति तत्सहायस्य तस्य परोक्षत्वमेव। तेन प्रत्यक्षस्य प्रमाणस्य फलाव्यभिचारेणैवाव्यभिचारज्ञानं न स्वरूपत इत्येतत्प्रमाणान्तरेभ्यो व्यावृत्तमसाधारणं प्रत्यक्षस्य रूपमापयितुमव्यभिचारिपदोपादानम्। अथ वा प्रत्यक्षाव्यभिचार एवानुमानाद्व्यभिचारे कारणम्। न ह्यस्ति सम्भवो ऽव्यभिचरितप्रत्यक्षगृहीतपक्षधर्मताकं तर्कसहायप्रत्यक्षगृहीताविनाभावं वा ऽनुमानं व्यभिचरतीति। यत्तु बाधितविषयं सत्प्रतिपक्षितं वा ऽनुमानं तदपि यद्यपि प्रथमं व्याप्तिग्रहणदोषेण न खण्डितं तथापि खण्डनोत्तरकालं सो ऽपि प्रतीयते। तथा च व्याप्तिग्राहि प्रत्यक्षं तत्रापि व्यभिचरतीति। एवमागमो ऽपि साक्षात् क्व चित्पारम्पर्येण प्रत्यक्षपूर्वकस्तद्व्यभिचारेणैव व्यभिचरति। आगमव्यभिचारेण चोपमानव्यभिचारो व्याख्यातः। तदेवं प्रत्यक्षाव्यभिचारेण प्रमाणानामव्यभिचारो ऽस्तीति प्रत्यक्षस्यैव विशेषणमव्यभिचारिपदं चकार नेतरेषां प्रमाणानाम्। न ह्यस्ति सम्भवस्तन्मूलं प्रत्यक्षमव्यभिचारि तानि च व्यभिचारीणीति। सो ऽयं विशेषः प्रमाणान्तरेभ्यः प्रत्यक्षस्य। तस्मात्सुष्ठूक्तं ग्रीष्मे मरीचय इति। ता. टी.

* अव्यभिचारिपदेनैव संशयज्ञानमपि परास्तम्। नो खलु संशयज्ञानं विकल्प्यमानवस्तुगोचरं तद्रूपं वस्तु प्रापयति। अप्रापयच्चोपदर्शितं कथं संवादकम्। असंवादकं च कथमव्यभिचारि। तस्मादव्यभिचारिपदेनैव संशयज्ञाने निरस्ते सविकल्पकप्रत्यक्षावरोधार्थमुपादीयमानं व्यवसायात्मकपदं संशयज्ञानप्रत्यक्षतापाकरणमन्वाचिनोति। व्यवसायात्मकपदं साक्षात्सविकल्पस्य वाचकम्। तथा

यच्चैतदिन्द्रियानवधारणपूर्वकं मनसा ऽनवधारणं तद्विशेषापेक्षं विमर्शमात्रं* संशयो न पूर्वमिति । सर्वच प्रत्यक्षविषये ज्ञातुरिन्द्रियेण व्यवसायः† उपहतेन्द्रियाणामनुव्यवसायाभावादिति । आत्मादिषु सुखादिषु च प्रत्यक्षलक्षणं वक्तव्यमनिन्द्रियार्थसन्निकर्षजं‡ हि तदिति । इन्द्रियस्य वै सतो मनस इन्द्रियेभ्यः पृथगुपदेशो धर्मभेदात् । भौतिकानीन्द्रियाणि नियतविषयाणि सगुणानां चैषामिन्द्रियभाव इति । मनस्त्वभौतिकं सर्वविषयं§ च नास्य सगुणस्येन्द्रियभाव इति । सति चेन्द्रियार्थसन्निकर्षे सन्निधिमसन्निधिं चास्य युगपज्ज्ञानानुत्पत्तिकारणं वक्ष्याम इति । मनसश्चेन्द्रियभावात्तन्न वाच्यं लक्षणान्तरमिति । तन्त्रान्तरसमाचाराच्च** तत्प्रत्येतव्यमिति । परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः । व्याख्यातं प्रत्यक्षम्†† ।

हि । व्यवसायो विनिश्चयो विकल्प इत्यनर्थान्तरं स एवात्मा रूपं यस्य तत्सविकल्पकं प्रत्यक्षम् । ता॰ टी॰ अत्रैव सविकल्पस्य प्रत्यक्षत्वाभावपूर्वपक्षस्तस्य प्रत्यक्षत्वसाधनं च विस्तरेण तात्पर्यटीकायाम् ।

* तद्विमर्शेति ५ । ४ । २ । ३ पाठः ।

† पश्चान्मनसानुव्यवसाय इति ५ । ४ । २ पुस्तकेष्वधिकः पाठः ।

‡ अनिन्द्रियजमिति ५ । ४ । २ पुस्तकपाठः ।

§ मनः सर्वविषयं स्मृतिकारणसंयोगाधारत्वात् आत्मवत् । सुखयाहकसंयोगाधिकरणत्वात् समस्तेन्द्रियाधिष्ठातृत्वाच्चात्मवदिति न्या॰ वा॰ । अत्र भौतिकाभौतिकत्वरूपमिन्द्रियमनसोर्वैधर्म्यं मनसो नित्यत्वेन तत्राप्रसिद्धस्य भौतिकत्वस्याभावस्याभ्युपगमासम्भवात्तयोर्जन्यमात्रधर्मत्वात्तथात्वे श्रोत्रस्य चाभौतिकस्य पाठानुपपत्तिप्रसङ्गाद् वार्तिके दूषितम् । घ्राणादीनि यथा स्वगुणेन गन्धादिना बाह्यं गन्धादि बोधयन्ति नैवं स्वगुणेन शब्देन श्रोत्रं बाह्यं शब्दं बोधयति तन्मनोवत् श्रोत्रमपि घ्राणादिसूत्रे न पठितव्यमित्यापत्त्या सगुणानां चैषामिन्द्रियभाव इत्यपि वार्तिके दूषितम् ।

‖ चेति ५ । ४ । २ । ३ पाठः ।

¶ भावाच्च वाच्यमिति ५ । ४ । २ । ३ पाठः ।

** शास्त्रान्तरे मनस इन्द्रियत्वमुक्तमत्र च न दूषितमतस्तस्य स्वमतेऽपीन्द्रियत्वमिष्टमित्यनुमीयतइति भावः ।

†† ज्ञानादीनां व्यस्तानामेवात्मलक्षणत्वेपि इच्छाप्रयत्नद्वेषसुखदुःखज्ञानान्यात्मनो लिङ्गमिति भूयसां सूत्रे पाठाद्वचनविघातो ऽर्थविकल्पापपत्त्या छलमिति समस्तस्य लक्षणत्वाच्चैतत्सूत्रपठितानां समस्तानां प्रत्यक्षलक्षणत्वमुत व्यस्तानामिति सन्देहे प्रत्येकं विशेषणानामनुमानसुखशाब्दविपर्ययसंशयव्यावर्तकत्वेन समस्तानामेव लक्षणत्वमिति वार्तिकम् ।

अत्रैव ततो ऽर्थाद्विज्ञानमिति कल्पनाऽपोढमिति सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमिति च तन्त्रान्तरीयलक्षणानि सर्वेषामेव विज्ञानानामर्थजत्वाद् व्यावृत्तेरनुपपत्त्या प्रत्यक्षादिपदैर्वाच्यस्य कल्पनाऽपोढत्वानुपपत्त्या च संशये ऽतिप्रसङ्गाच्च विस्तरेण दूषितानि वार्तिके तत एवानुसन्धेयानि ।

अथ* तत्पूर्वकं† त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च‡ ॥ ५ ॥

---

* अत्रानुमानमिति सिद्धवत् प्रमाणविशेषरूपलक्ष्यानुवादएव नाप्रत्यक्षं प्रमाणमित्यप्रामाण्यमनुमानस्य सुदूरं प्रतिक्षिपति। दृष्टप्रामाण्याप्रामाण्यविज्ञानव्यक्तिसाधर्म्येण हि कासां चिद् व्यक्तीनां प्रामाण्यमप्रामाण्यं वा विदधीत दृष्टसाधर्म्यं चानुमानमेवेति कथं तेनैव तस्याप्रामाण्यम् । अपि चानुमानमप्रमाणमिति वाक्यप्रयोगोऽज्ञं विप्रतिपन्नं सन्दिग्धं वा पुरुषं प्रत्यर्थवान् न च परपुरुषवर्तिनो देहधर्मा अपि संदेहाज्ञानविपर्यासा गौरत्वादिवत् प्रत्यक्षा वीक्ष्यन्ते । न च तद्वचनात् प्रतीयन्ते वचनस्यापि प्रत्यक्षादन्यस्याप्रामाण्योपगमात् । पुरुषविशेषमनधिकृत्य तु वचनमनर्थकं प्रयुञ्जानो नायं लौकिको न परीक्षक इत्युन्मत्तवदनवधेयवचनः स्यात् । तस्मादकामेनापि प्रमाणमनुमानमुपेतव्यमिति लक्ष्यं प्रमाणभेदमनुमानमनूद्य तत्पूर्वकमिति लक्षणं विधत्ते । अथेति । आनन्तर्ये । उक्तं प्रत्यक्षमनुमानस्य हेतुरिदानीमनुमानं हेतुमद् व्युत्पाद्यते इत्यर्थः । ता. टी. ।

† तानि ते तत्पूर्वं यस्य तदिदं तत्पूर्वकम् । यदा तानीति विग्रहस्तदा समस्तप्रमाणाभिसम्बन्धात्सर्वप्रमाणपूर्वकत्वमनुमानस्य वर्णितं भवति । पारम्पर्येण पुनस्तत् प्रत्यक्षएव व्यवतिष्ठतइति तत्पूर्वकत्वमुक्तं भवति । यदापि विवेकात् ते पूर्वं यस्येति ते द्वे प्रत्यक्षे पूर्वं यस्य प्रत्यक्षस्य तदिदं तत्पूर्वकं प्रत्यक्षमिति । ते च द्वे प्रत्यक्षे लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यं प्रत्यक्षं लिङ्गदर्शनं द्वितीयम् । बुभुत्सावतो द्वितीयाल्लिङ्गदर्शनात् संस्काराभिव्यक्त्युत्तरकालं स्मृतिः स्मृत्यनन्तरं च पुनर्लिङ्गदर्शनमयं धूम इति । तदिदमन्तिमं प्रत्यक्षं पूर्वाभ्यां प्रत्यक्षाभ्यां स्मृत्या चानुगृह्यमाणं परामर्शरूपमनुमानं भवति। यदा पुनस्तत् पूर्वं यस्य तदिदं तत्पूर्वकमिति तदा भेदस्याविवक्षितत्वाल्लिङ्गलिङ्गिसम्बन्धदर्शनानन्तरं लिङ्गदर्शनसम्बन्धस्मृतिभिर्लिङ्गपरामर्शो विशिष्यते । न्या. वा. ।

अत्र पूर्वसूत्रात् ज्ञानपदं सम्बध्नीयं तेन प्रत्यक्षपूर्वकं ज्ञानमनुमानमिति लक्षणं पर्यवस्यति । तेन प्रत्यक्षजन्ये संस्कारे नातिव्याप्तिरिति वार्तिकम् ।

‡ अत्र लिङ्गस्य प्रसिद्धसदसंदिग्धभेदेनानुमानस्य त्रैविध्यान्तरं वार्तिके प्रदर्शितम् । **प्रसिद्धमिति पक्षे व्यापकं सदिति सजातीयेऽस्ति असंदिग्धमिति सजातीयाविनाभावीति** तद्व्याख्यानं च तत्रैव । पूर्ववदादिपदेषु प्रदर्शिते कारणेन कार्यानुमानमित्यादि भाष्ये कारणस्याव्याप्यत्वेन तेनानुमानासम्भवमाशङ्क्य कारणज्ञानेन कार्यज्ञानमित्याशयो वार्तिके दर्शितः । एवं शेषवदित्यत्रापि ।

§ अत्रान्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति भाष्योक्तत्रैविध्यादन्यत् त्रैविध्यं सूत्रघटकसकलपदानामेकवाक्यतया **पूर्ववच्चाम साध्यव्यापकं शेषवदिति समानेऽस्ति सामान्यतश्चादृष्टं चशब्दात् प्रत्यक्षागमाविरुद्धं चेत्येवं चतुर्लक्षणं पञ्चलक्षणमनुमानमिति** सूत्रव्याख्यान्तरं च वार्तिककृतोक्तम् । **अबाधितविषयमसत्प्रतिपक्षं पूर्ववदिति ध्रुवं**

तत्पूर्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्यदर्शनं लिङ्गदर्शनं चाभिसम्बध्यते । लिङ्गलिङ्गिनोः संबद्धयोर्दर्शनेन लिङ्गस्मृतिरभिसम्बध्यते । स्मृत्या लिङ्गदर्शनेन चाऽप्रत्यक्षो ऽर्थो ऽनुमीयते । पूर्ववदिति यच कारणेन कार्यमनुमीयते* यथा मेघोन्नत्या भविष्यति वृष्टिरिति । शेषवत्तद् यच कार्येण कारणमनुमीयते । पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा स्रोतसो ऽनुमीयते भूता वृष्टिरिति । सामान्यतोदृष्टं व्रज्यापूर्वकमन्यच दृष्टस्याऽन्यच दर्शनमिति । तथा चादित्यस्य तस्मादस्त्यप्रत्यक्षाऽप्यादित्यस्य व्रज्येति† अथ वा पूर्वं कृत्वा शेषवदित्येका विधा । सामान्यतो ऽदृष्टमिति द्वितीया । शेषवत् सामान्यतोदृष्टमिति तृतीया । तदेवं त्रिविधमनुमानं तत्र चतुर्लक्षणं द्वयम् एकं पञ्चलक्षणमिति तात्पर्यटीका । प्रत्यक्षागमाविरुद्धं चेति चकारेणासत्प्रतिपक्षत्वमपि सूचितमिति तत्रैव । तेनाबाधितविषयमसत्प्रतिपक्षं साध्यव्यापकमिति विशेषणत्रयं लभ्यते । तत्र शेषवदिति सामान्यतो ऽदृष्टं चेत्यनयोः पृथग्योजने चतुर्लक्षणं द्वयम् । उभयोर्मेलनेन सम्बन्धे पञ्चलक्षणं तृतीयमिति बोध्यम् ।

* कारणज्ञानेन कार्यानुमानं कारणसामानाधिकरण्येन वा कार्यानुमानं न विवक्षितं कारणज्ञानमात्रेणाव्यापककार्यज्ञानासम्भवात्तयोर्व्यधिकरणत्वाच्च । किं तु कार्यं कारणविशेषणत्वेनोपयुक्तं गुणभूतमनुमीयते इति सूत्रार्थः । एवं शेषवदित्यत्रापि कार्यदर्शनेन कारणं कार्यस्याङ्गभूतमनुमीयत इति बोध्यम् । भाष्योक्तोदाहरणयोः प्रयोगाकारश्च वृष्टिमन्त एते मेघाः गम्भीरध्वानवत्त्वे सति बहुबलाकावत्त्वे सति अचिरप्रभावत्त्वे सति उन्नतिमत्वाद् वृष्टिमन्मेघवदिति । उपरिवृष्टिमद्देशसम्बन्धिनी नदी स्रोतःशीघ्रत्वे सति पूर्णफलकाष्ठादिवहनवत्त्वे सति पूर्णत्वात् पूर्णवृष्टिमन्नदीवदिति । भविष्यति भूता वेति कालस्याविवक्षितत्वाद्यः कश्चित्काल उपादेय इति न्या· वा·

† देशान्तरप्राप्तिमानादित्यः द्रव्यत्वे सति क्षयवृद्धिप्रत्ययाविषयत्वे च प्राङ्मुखोपलभ्यत्वे च तदभिमुखदेशसम्बन्धादनुत्पन्नपादविहारस्य परिवृत्त्य तत्प्रत्ययविषयत्वात् मण्यादिवदिति न्यायाकारः । न्या· वा· तत्प्रत्ययविषयत्वादित्युच्यमाने पुरःस्थितेन स्थाणुना व्यभिचारः सो ऽपि हि प्रत्यभिज्ञानविषयो भवति तत्रैव स्थितस्तन्निवृत्त्यर्थं परिवृत्येत्युक्तम् । तथा ऽपि गुणादिभिर्व्यभिचारस्तन्निवृत्त्यर्थं द्रव्यत्वे सतीति । तथापि प्रदीपप्रभाभिर्व्यभिचारस्तन्निवृत्त्यर्थं क्षयवृद्धिप्रत्ययाविषयत्वे सतीति । तथापि पृष्ठतो ऽवस्थितया स्थूणया व्यभिचारस्तन्निवृत्त्यर्थं प्राङ्मुखोपलभ्यत्वे सतीति । उपलभ्यता चोपलब्धिकर्मता सा चेहातीताविवक्षिता ऽन्यथा पूर्वापरजलधिवेलाऽवगाहिना तुहिनशैलेन व्यभिचारः । यद्यप्ययमपि परावृत्त्य तत्प्रत्ययवतो ऽतिपतितोपलब्धिकर्मभावस्तथा ऽपि तदा नरान्तरस्योपलभ्यो मार्तण्डमण्डलं त्वस्तचूडावलम्बि न प्राच्यां कस्य चिदुपलम्भगोचरे इति वैषम्यम् । तथापि यदि दृष्ट्वैव पुरो ऽवस्थितस्य पश्चिमाभिमुखस्य

वदिति यच्च यथापूर्वं* प्रत्यक्षभूतयोरन्यतरदर्शनेनान्यतरस्याप्रत्यक्षस्यानुमानं यथा धूमेनाग्निरिति । शेषवन्नाम परिशेषः स च प्रसक्तप्रतिषेधे ऽन्यचाप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः यथा सदनित्यमे†वमादिना‡ द्रव्यगुणकर्मणामविशेषेण सामान्यविशेषसमवायेभ्यो विभक्तस्य शब्दस्य, तस्मिन्द्रव्यकर्मगुणसंशये, न द्रव्यमेकद्रव्यत्वात् । न कर्म शब्दान्तरहेतुत्वात् । यस्तु शिष्यते सो ऽयमिति शब्दस्य गुणत्वप्रतिपत्तिः । सामान्यतोदृष्टं नाम यच्चाप्रत्यक्षे लिङ्गलिङ्गिनोः सम्बन्धे केन चिदर्थेन लिङ्गस्य सामान्यादप्रत्यक्षो लिङ्गी गम्यते यथेच्छादिभिरात्मा । इच्छादयो गुणाः गुणाश्च द्रव्यसंस्थानाः तद्व्देषां स्थानं स आत्मेति §। विभागवचनादेव त्रिविधमिति सिद्धे त्रिविधवचनं॥

प्रासादस्य स्वयमुपनिपत्य पृष्ठतो भवति तदोक्तलक्षणस्य हेतोरस्ति व्यभिचारस्तन्निवृत्त्यर्थमनुत्पन्नपादविहारस्येत्युक्तम् । तदभिमुखदेशसम्बन्धादिति ल्यब्लोपे पञ्चमी । स्वाभिमुखदेशमुद्दिश्यानुत्पन्नः पादविहारो यस्य स तथोक्तः । तमुद्दिश्य खल्वयं पद्भ्यां सञ्चरमाणः प्रासादस्य पृष्ठतो भवतीति भावः । ता· टी· ।

एतेन देशान्तरस्याकाशत्वे दिक्त्वे वा तयोरप्रत्यक्षत्वेन प्रत्यक्षाप्रत्यक्षसंयोगस्याप्रत्यक्षतया ताभ्यां सहादित्यसंयोगस्याप्रत्यक्षत्वेन देशान्तरप्राप्तेरसिद्धतया कथं तया गत्यनुमानमिति निरस्तम् । उक्तरीत्या अनुमितया प्राप्त्या गत्यनुमानादिति दिक् ।

* पूर्ववत्पदे वतिप्रत्ययो न तु मतुबिति भावः । साध्यतावच्छेदकहेतुतावच्छेदकरूपपुरस्कारेण यत्र व्याप्तिग्रहस्तत् पूर्ववदनुमानम् । पर्वते पक्षे धूमेन हेतुना वन्हौ साध्ये धूमत्ववन्हित्वपुरस्कारेणैव रसवत्यादौ व्याप्तेर्गृहीतत्वात् । साध्यतावच्छेदकहेतुतावच्छेदकरूपव्यापकधर्मपुरस्कारेण व्याप्तिग्रहे तु सामान्यतोदृष्टम् । यथेच्छादिभिरात्मनि साध्ये इच्छात्वात्मत्वव्यापकाभ्यां गुणत्वद्रव्यत्वाभ्यां व्याप्तिग्रहः । शेषवदनुमानं तु प्रसिद्धे पक्षे ऽसिद्धस्येतरभेदस्य साधकमनुमानमिति दिक् ।

† सदनित्यमेवमिति ५ । ४ । २ । ३ पाठः

‡ इदं तु परिशेषस्योदाहरणं नादरणीयम् । व्यतिरेकिणो हि नामान्तरमिदं परिशेष इति । एष पुनरन्वयव्यतिरेकी । द्रव्यकर्मान्यत्वे सति सदाद्यभेदस्य सपक्षे रूपादौ सत्त्वाद्विपक्षे सामान्यादावभावात् । तस्मादात्मतन्त्रतासाधनमिच्छादीनां परिशेषोदाहरणं द्रष्टव्यमिति । ता· टी· ।

§ इच्छादीनां गुणत्वेन पारतन्त्र्यसाधनं सामान्यतोदृष्टानुमानेन । आत्मपरतन्त्रता तु शेषवदनुमानादिति वार्तिकम् ।

॥ त्रिविधमिति नियमार्थमनेकधा भिन्नस्यानुमानस्य त्रिविधेन पूर्ववदादिना संग्रह इति नियमं दर्शयति । कथमनेकधा भिन्नमिति । अन्वयव्यतिरेकि द्विधा सजातीये सदेव सदसच्च । अन्वय्यपि द्विधैव । एवं व्यतिरेक्येकरूपं सपक्षाभावात् । तदिदं पञ्चधा भिन्नमनुमानं कालभेदेन पञ्चदशधा भवति । तदपि पुनः पुरुषभेदानुविधानात् षष्टिभेदं भवति तस्य त्वान्तर्गणिको ऽनन्तभेद

महतो महाविषयस्य न्यायस्य लघीयसा सूचेणोपदेशात्परं वाक्यलाघवं मन्यमानस्यान्यस्मिन् वाक्यलाघवे ऽनादरः । तथा चायमित्थंभूतेन वाक्यविकल्पेन प्रवृत्तः सिद्धान्ते छले शब्दादिषु च बहुलं समाचारः शास्त्रे इति। सद्विषयं* च प्रत्यक्षं सदसद्विषयं चानुमानम् । कस्मात् । तत्रैकाल्यग्रहणात् त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते भविष्यतीत्यनुमीयते भवतीति चाभूदिति च असच्च खल्वतीतमनागतं चेति ।

अथोपमानम् ।

प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम्† ॥ ६ ॥

इति वार्तिकम् । अनित्यः शब्दः कृतकत्वादिति सपक्षे सदेव । अनित्यः शब्दः अस्मदादिप्रयत्ननान्तरीयकत्वादिति सपक्षे ऽसदेव । यथा परमाणवादयः कस्य चित्प्रत्यक्षाः प्रमेयत्वाद् घटादिवदिति तथा सपक्षे सदसत् । तथा तत्रैव साध्ये सत्त्वाद् घटादिवदिति । कालभेदस्त्रैकाल्यम् । प्रतिपन्नो ऽप्रतिपन्नः सन्दिग्धो विपर्यस्तश्चेति पुरुषभेदः । ता· टी· ।

* सदिति वर्तमानम् । असदित्यतीतानागते । प्रत्यक्षं हि लौकिकं वर्तमानविषयमेव । अनुमानं तु त्रैकाल्यविषयम् । यद्यपि प्रत्यक्षमप्यतीतानागतयोः संप्रति निषेध्ययोर्निषेधे वर्तमानमसद्विषयं तथापि न निषेध्ययोः प्रवर्ततइत्येतावतैव सद्विषयत्वमुक्तम् । अनुमानं तु तयोरपि प्रवर्ततइत्येतावत ऽसद्विषयत्वमुक्तम् । ता· टी· ।

† अत्रापि यत इत्यध्याहार्यम् । सिद्धिः साधनम् । ता· टी· यतः प्रमाणात् साध्यस्य संज्ञासंज्ञिसम्बन्धस्य साधनं सिद्धिर्निश्चय इति यावत् । तदुपमानं प्रमाणम् । तत हेतुः प्रसिद्धसाधर्म्यादिति । प्रसिद्धस्य पूर्वदृष्टस्य गवादेः साधर्म्यस्य सादृश्यस्य ज्ञानादित्यर्थः प्रमाणविशेषलक्षणत्वसिद्धये यत इत्यध्याहारः ।

साध्यसाधनमित्युच्यमाने प्रत्यक्षादिसाधने सुखादिसाधने घटे प्रसङ्गः अत उक्तं प्रसिद्धसाधर्म्यादिति । यद्यपि प्रसिद्धसाधर्म्यमुपमानमित्युच्यमाने प्रमाणविशेषाभिधाय्युपमानपदस्यामानाधिकरण्यात् कारकत्वलाभस्तथापि तदाभासनिरकरणाय साध्यसाधनपदोपादानम् । ता· टी· ।

प्रसिद्धसाधर्म्यादित्यत्र प्रसिद्धिरुभयी श्रुतिमयी प्रत्यक्षमयी च । श्रुतिमयं यथा गौरेवं गवय इति । प्रत्यक्षमयी च यथा गोसादृश्यविशिष्टो ऽयमीदृशपिण्ड इति । तत्र प्रत्यक्षमयी प्रसिद्धिरागमाहितस्मृत्यपेक्षा समाख्यासम्बन्धप्रतिपत्तिहेतुः । यद्यपि यथा गौरेवं गवय इत्येतस्मादपि गोसदृशस्य गवयः समाख्येति शक्यमवगन्तुं न खलु प्रत्यक्ष एव समाख्याकर्म समानजातीयव्यवच्छेदे हि तद् भवति तच्च यदि मानान्तरेणापि तथा ऽवगम्यते कस्तत्र संज्ञाकर्म

प्रज्ञातेन सामान्यात्प्रज्ञापनीयस्य प्रज्ञापनमुपमानमिति । यथा गौरेवं गवय इति । किं पुनरत्रोपमानेन क्रियते । यदा खल्वयं गवा समानधर्मं प्रतिपद्यते तदा प्रत्यक्षतस्तमर्थं प्रतिपद्यतइति । समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थ इत्याह । यथा गौरेवं गवय इत्युपमाने प्रयुक्ते गवा समानधर्ममर्थमिन्द्रियार्थसन्निकर्षादुपलभमानो ऽस्य गवयशब्दः संज्ञेति संज्ञासंज्ञिसम्बन्धं

निवारयेत् । गोसादृश्येन चोपलक्षितः पिण्डो य इति सर्वनाम्ना परामृष्टः शक्यो घटादिभ्यो ऽसमानजातीयेभ्यो महिषादिभ्यश्च समानजातीयेभ्यो व्यवच्छेत्तो ऽवगन्तुं गवयस्तथापि यावदयमसौ गवय इति साक्षात् प्रतीते सम्बन्धिनि संज्ञां न निवेशयति तावदयं परिप्लुतमतिः प्रमाता कं चित् खलु द्रक्ष्यामि तादृशं पिण्डं यत्र गवयसंज्ञां प्रतिपत्स्यइति प्रमेात्सुक एवोदीक्षेत । न चासौ वाक्यमात्रसहायो ऽप्रत्यक्षीकृतगोसदृशपिण्डो ऽयमसौ गवयाख्य इति प्रतिपत्तुमर्हति । न च वाक्यं विना प्रत्यक्षमात्रात् । तस्मादागमप्रत्यक्षाभ्यामन्यदेवेदमागमस्मृतिसहितं सादृश्यज्ञानमुपमानाख्यं प्रमाणमास्येयम् । ननु यदेादीच्येन क्रमेलकं निन्दतोक्तं धिक्करभमतिदीर्घग्रीवं लम्बोष्ठं कठोरतीक्ष्णकण्टकाशिनं कुत्सिततरावयवसंनिवेशमपसदं पशूनामिति तदुपश्रुत्य दाक्षिणात्य उत्तरापथं गतस्तादृशं वस्तूपलभ्य नूनमसौ करभ इत्यवैति तत्कृतमदेतेषु प्रमाणं न तावदुपमानं साधर्म्याभावान्नापि पञ्चमं प्रमाणमुपगम्यते । यद्युच्येत निन्दापरं वाक्यं करभस्य तादृशत्वे न प्रमाणं न ह्यन्यपराच्छब्दादन्यस्यावगम इति यत्र तर्हि तादृक्त्वे पर्यवस्यति वाक्यं तत्र का गतिः । अथ तत्रापि तादृक्करभ आगमावगतः प्रत्यक्षेण प्रत्यभिज्ञायते करभशब्दवाच्यता च तस्य तत्पूर्वं तादृक्करभपरत्वे ऽप्यागमस्य प्रयोगमात्रादवगतानुमानात् । यो हि यत्र प्रयुज्यते शब्दो ऽसति वृत्त्यन्तरे स तस्य वाचको यथा गोशब्दो गोत्वे प्रयुक्तश्चायं तादृशे तस्मात्तस्य वाचक इति यदिदं प्रागेव प्रयोगानुमितवाचकत्वमस्य प्रत्यक्षसमये केवलं स्मर्यतइति समानमेतदुपमानवाक्ये ऽपि । तत्रापि वाक्यादवगतसाधर्म्यवान् पिण्डः प्रत्यक्षेण प्रत्यभिज्ञायते प्रयोगानुमितं च गवयशब्दवाच्यत्वं स्मर्यतइति न फलान्तरमवशिष्यते यत्रोपमानं प्रमाणान्तरमिति । अत्रोच्यते । न तावदाकाशादिशब्दवदेष गवयशब्दः साक्षात् पिण्डस्य वाचकः किं तु गवयत्वं निमित्तीकृत्य पिण्डे वर्ततइति परमार्थः । न च यथा गौरेवं गवय इति वाक्याद् गवयत्वमवगतं न ह्यनवगतसम्बन्धं गवयपदमवधारयति । ततस्तदवगमात् सम्बन्धवेदने परस्पराश्रयप्रसङ्गः । न च गोसादृश्येनोपलक्ष्यते । न खल्वनुपलब्धचरेण गवयत्वेन गोसादृश्यं संबद्धं दृष्टम् । न चादृष्टसम्बन्धमुपलक्षकम् । न हि पुरुषेणादृष्टसम्बन्धो दण्डः पुरुषमुपलक्षयति । तस्मात् संबन्धिनो गवयत्वस्य सर्वथा ऽनुपपत्तेः कुतो वाक्यादा ऽनुमानादा वाच्यवाचकसम्बन्धावगमः कुतस्तरां च सम्बन्धस्मृतिः ।

प्रतिपद्यतइति । यथा मुद्गस्तथा मुद्गपर्णी यथा माषस्तथा माषपर्णीत्युपमाने प्रयुक्ते उपमानात्संज्ञासंज्ञिसम्बन्धं प्रतिपद्यमानस्तामोषधीं भैषज्यायाहरति । एवमन्योऽप्युपमानस्य लोके विषयो बुभुत्सितव्य इति ।

अथ शब्दः ।

आप्तोपदेशः शब्दः ॥ ७ ॥

आप्तः खलु साक्षात्कृतधर्मा* यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा । साक्षात्करणमर्थस्याप्तिस्तया प्रवर्ततइत्याप्तः । ऋष्यार्यम्लेच्छानां समानं लक्षणम् । तथा च सर्वेषां व्यवहाराः प्रवर्तन्तइति । एवमेभिः प्रमाणैर्द्वैवमनुष्यतिरश्चां व्यवहाराः प्रकल्पन्ते नातोऽन्ययेति ।

स द्विविधो दृष्टादृष्टार्थत्वात् ॥ ८ ॥

गवयत्वसामान्यविशेषवति च पिण्डे प्रत्यक्षे युक्तः सम्बन्धावगमः सम्बन्धिनो गवयत्वस्य प्रत्यक्षत्वात् । तथापि किं गवयत्वजातिमान् पिण्डो वाच्य उत गोसादृश्यवानिति कुतो विनिगमनेति चेत् । वाक्यार्थस्मरणसहकारिगवयत्वजातिमतः पिण्डस्य गोसादृश्यदर्शनमेव तर्कसहायं गवयत्वाभिधाने प्रमाणं तर्कश्च गोसादृश्यविशिष्टपिण्डाभिधाने कल्पनागौरवप्रसङ्गः । तथा हि । सादृश्यविशिष्टपिण्डाभिधाने नाप्रतीतं सादृश्यं पिण्डं विशिनष्टीति तत्प्रतिपत्तव्यम् । न च शब्दादन्यतस्तदवगम इति शब्दस्य तत्र वाचकत्वं कल्पनीयम् । न चाविशिष्टं सादृश्यं पिण्डविशेषणव गवयपदमवस्थापयितुमर्हति यस्य कस्य चित् येन केन चित् सादृश्यादिति तदपि गवा विशेषणीयम् । न चान्यतो गोत्वस्यापि प्रतीतिरिति तदपि गवयपदेनाभिधातव्यमिति कल्पनागौरवम् । गवयत्वजातिमत्पिण्डाभिधाने तु लाघवमिति तदनुजानाति । साधर्म्यग्रहणं च धर्ममात्रोपलक्षणमिति करभसंज्ञाप्रतिपत्तिरप्युपमानफलमिति नाव्याप्तिर्नापि पञ्चमप्रमाणाभ्युपगमः । अत एव बहून्युदाहरणान्युक्त्वाऽप्याह स्म भगवान् भाष्यकार एव मन्योऽप्युपमानस्य लोके विषयो बुभुत्सितव्य इति तस्मात् सर्वं चतुरस्रम् । ता॰ टी॰ ।

* सुदृढेन प्रमाणेनावधारिता अर्था येन स साक्षात्कृतधर्मा । यथादृष्टस्येति मत्सरितया विपरीतोपदेशो निवारितः । चिख्यापयिषयेत्यकृपाऽलसकारिते इति । प्रयुक्त उत्पादितप्रयत्न इत्यलसत्वम् । तथापि स्थानकरणपाटवाभावेन वर्णनिष्पादनासामर्थ्येनाप्तः प्रसज्येतेत्यत आह । उपदेष्टा स्थानकरणपाटववानित्यर्थः । ता॰ टी॰ । शब्दादुत्पन्नज्ञानस्य पुरुषस्य प्रवृत्तौ सत्यामर्थोपलम्भे सत्यर्थतथात्वनिश्चयेन बोधयितुराप्तत्वनिश्चयस्तस्मिन् सति गृहीतप्रमाणभावपुरुषवचनजनितबुद्धौ प्रमात्वग्रहेण प्रवृत्तिरित्यन्योन्याश्रयो न शङ्क्यः वाक्यस्य वाक्यार्थज्ञानजननमात्रे सामर्थ्यात् । प्रमात्वग्रहस्य परतस्त्वेऽप्यविरोधादिति दिक् ।

यस्येह दृश्यते ऽर्थः स दृष्टार्थो यस्यामुच्च प्रतीयते सो ऽदृष्टार्थः एवमृषिलौकिकवाक्यानां विभाग इति*। किमर्थं पुनरिदमुच्यते। स न मन्येत दृष्टार्थ एवाप्तोपदेशः प्रमाणमर्थस्यावधारणादिति । अदृष्टार्थो ऽपि प्रमाणमर्थस्यानुमानादिति । इति प्रमाणभाष्यम् ॥

किं पुनरनेन प्रमाणेना†र्थजातं प्रमातव्यमिति तदुच्यते ।

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु‡ प्रमेयम् ॥ ९ ॥

तचात्मा सर्वस्य द्रष्टा सर्वस्य भोक्ता§ सर्वज्ञः सर्वानुभावी । तस्य भोगायतनं शरीरम् । भोगसाधनानीन्द्रियाणि । भोक्तव्या इन्द्रियार्थाः । भोगो बुद्धिः । सर्वार्थोपलब्धौ नेन्द्रियाणि प्रभवन्तीति सर्वविषयमन्तःकरणं मनः । शरीरेन्द्रियार्थबुद्धिसुखवेदनानां निर्वृत्तिकारणं प्रवृत्तिः दोषाश्च । नास्येदं शरीरमपूर्वमनुत्तरं च‖ । पूर्वशरीराणामादिर्नास्ति उत्तरेषामपवर्गान्त¶ इति प्रेत्यभावः ससाधनसुखदुःखोपभोगः फलम् । दुःखमिति नेदमनुकूलवेदनायस्य सुखस्य प्रतीतेः प्रत्याख्यानं किं तर्हि जन्मन एवेदं ससुखसाधनस्य दुःखानुषङ्गाद् दुःखेनाविप्रयोगाद्विविधबाधनायोगाद्दुःखमिति समाधिभावनमुपदि-

---

* वक्ता प्रत्यक्षीकृतस्यार्थस्य प्रतिपादकस्तेनानुमितस्य वा ऽर्थस्य प्रतिपादक इति द्विविध एवेत्यर्थः ।

† जात्यभिप्रायमेकवचनं प्रकृते प्रमेये यथायथं प्रमाणानामुपयोगात् । ता· टी· ।

‡ सूत्रे तुशब्द एवार्थक आत्माद्य एव प्रमेया आत्माद्यः प्रमेया एवेति वाऽर्थः । अत्र प्रमेयपदं न प्रमेयमात्रे वर्तते किं तु यत्तत्त्वतो ज्ञायमानमपवर्गसाधनं तस्मिन् तच्चात्मादावेवेति युक्तो ऽन्ययोगव्यवच्छेदः । अथ वा मुमुक्षुणा ऽत्मादि प्रमेयमेव बोध्यमेव तज्ज्ञानेनैव वैराग्योत्पादसम्भवादित्यर्थः ।

§ सर्वस्य द्रष्टा सर्वस्य भोक्तेत्यत्रोभयत्रापि सुखस्य दुःखस्य चेत्यादिः । अप्राप्तस्य ज्ञानाभावेन सर्वज्ञत्वानुपपत्तेराह सर्वानुभावी । अनुभवः प्राप्तिः । आत्मन्ययं विशेषो यदनेन रूपेण हेयः केवलेन चोपादेयः शरीरादीनि तु हेयान्येव । अपवर्ग उपादेय एवेति । इत्यर्थः । ता· टी· ।

‖ अविद्यमानं पूर्वं शरीरं यस्य तदपूर्वं शरीरं तन्निषेधति नास्येति । प्रमेयतत्त्वमविदुष आत्मनः । अविद्यमानमुत्तरं शरीरं यस्य तदनुत्तरं शरीरं तदपि निषिद्धं चेत्यनुकर्षणात् । ता· टी· ।

¶ अपवर्गो ऽन्तइति ५ पु· पाठः ।

श्यते समाहितो भावयति भावयन्निर्विद्यते निर्विण्णस्य वैराग्यं विरक्तस्यापवर्ग इति* जन्ममरणप्रबन्धोच्छेदः सर्वदुःखप्रहाणमपवर्ग इति। अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमेयम्। तद्भेदेन चापरिसंख्येयम्। अस्य तु तत्त्वज्ञानादपवर्गो। मिथ्याज्ञानात्संसार इत्यत एतदुपदिष्टं विशेषेणेति।

तच्चात्मा तावत्प्रत्यक्षतो न गृह्यते† स किमाप्तोपदेशमात्रादेव प्रतिपद्यते इति। नेत्युच्यते। अनुमानाच्च प्रतिपत्तव्य‡ इति। कथम्।

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति ॥ १० ॥

यज्जातीयस्या§र्थस्य सन्निकर्षात्सुखमात्मोपलब्धवान् तज्जातीयमेवार्थं पश्यन्नुपादातुमिच्छति सेयमादा॥तुमिच्छा एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानाद्भवन्ती लिङ्गमात्मनः। नियतविषये हि बुद्धिभेदमात्रे** न सम्भवति देहान्तरवदिति एवमेकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानात् दुःखहेतौ द्वेषः। यज्जातीयो ऽस्यार्थः सुखहेतुः प्रसिद्धस्तज्जातीयमर्थं पश्यन्नादातुं प्रयतते सो ऽयं प्रयत्न एकमनेकार्थदर्शिनं दर्शनप्रतिसन्धातारमन्तरेण न स्यात्। नियतविषये बुद्धिमात्रे न सम्भवति देहान्तरवदिति। एतेन दुःखहेतौ प्रयत्नो

---

* सूत्रे सुखानुक्तिर्न तदभावेनापि तु तस्य दुःखत्वेन भावनायामनभिरतिलक्षणवैराग्यसिद्धयइति भावः।

† अहमिति ज्ञानं गौराद्याकारशरीरावभासं न शक्यं घटादिवद्रागात्मनि प्रमाणयितुमिति भावः। परदेहवर्त्यात्माभिप्रायं वा। ता॰ टी॰।

‡ अनुमानेनावधारितस्यागमेन प्रतीतौ संवादज्ञानेनागमे ऽप्रामाण्यशङ्का निवर्ततइति भावः।

§ यज्जातीयस्येति व्याप्तिस्मृतिकथनं तज्जातीयं पश्यन्निति पक्षधर्मोपनयः। तस्मादद्य सुखहेतुरित्यनुमायादातुमिच्छति। सेयमिच्छेदृशी व्याप्तिग्रहणतत्स्मरणपक्षधर्मताग्रहणानुमानेच्छानामेककर्तृकत्वं सूचयति। भेदे प्रतिसन्धानाभावेन तदनुपपत्तेः। यश्चासावेको ऽनुभविता च स्मर्ता चानुमाता चेषिता स च आत्मा। न च शरीरमेवं भवितुमर्हति। तस्य बाल्यकौमारयौवनवार्धकभेदेनान्यत्वात्। नेन्द्रियमिन्द्रियान्तरगृहीते ऽन्द्रियान्तरेण प्रतिसन्धानप्रसङ्गात्। नापि मनः। तस्य करणत्वेनैवानुमानात्। ता॰ टी॰।

‖ सेयमुपादातुमिच्छा इति ५ पाठः।

¶ अनेकदर्शिनइति ५ पाठः।

** मात्रग्रहणेन च सन्तानं सन्तानिव्यतिरिक्तमपाकरोति। तदभ्युपगमे वा स एवात्मेति सिद्धं नः समीहितमिति। ता॰ टी॰। भेदमात्रेण सम्भवति इति ३ पु॰ पाठः।

व्याख्यातः । सुखदुःखस्मृत्या चायं तत्साधनमाददानः सुखमुपलभते दुःखमुपलभते सुखदुःखे वेदयते पूर्वोक्त एव हेतुः । बुभुत्समानः खल्वयं विमृशति किं स्विदिति विमृशश्च जानीते इदमिति । तदिदं ज्ञानं बुभुत्साविमर्शाभ्यामभिन्नकर्तृकं गृह्यमाणमात्मलिङ्गं पूर्वोक्त एव हेतुरिति । तच्च देहान्तरवदिति विभज्यते । यथा ऽनात्मवादिनो देहान्तरेषु नियतविषया बुद्धिभेदा न प्रतिसन्धीयन्ते तथैकदेहविषया अपि न प्रतिसन्धीयेरन् अविशेषात् । सो ऽयमेकसत्त्वस्य समाचारः स्वयं दृष्टस्य स्मरणं नान्यदृष्टस्य नादृष्टस्येति* । एवं खलु नानासत्त्वानां समाचारो ऽन्यदृष्टमन्यो न स्मरतीति । तदेतदुभयमशक्यमनात्मवादिना व्यवस्थापयितुमिति एवमुपपन्नमस्त्यात्मेति† ।

तस्य भोगाधिष्ठानम्‡ ।

चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ ११ ॥

कथं चेष्टाश्रयः । ईप्सितं जिहासितं वा ऽर्थमधिकृत्येप्साजिहासाप्रयुक्तस्य तदुपायानुष्ठानलक्षणा समीहा चेष्टा सा यच्च वर्त्तते तच्छरीरम् । कथमिन्द्रियाश्रयः । यस्यानुग्रहेणानुगृहीतानि उपघाते चोपहतानि स्वविषयेषु साध्वसाधुषु वर्तन्ते स एषामाश्रयः तच्छरीरम्§ । कथमर्थाश्रयः । यस्मि-

---

* नादृष्टस्येति ५ । ४ । ३ पु· नास्ति ।

† अथ वा ऽन्वयेनान्यः सूत्रार्थो ऽभिधीयतइति । रूपरसस्पर्शप्रत्ययाः एकानेकनिमित्तकाः स्मृत्या सह मयेति प्रतिसन्धानात् कृतसङ्केतानां वृद्धानामेकस्मिन् नर्तकीभ्रूक्षेपे युगपदनेकप्रत्ययवत् । यथा नानाकर्तृकाणां कृतसङ्केतानां नानाभूताः प्रत्यया निमित्तस्य भ्रूक्षेपस्यैकत्वात् प्रतीयन्ते तथेहापि नानाविषया निमित्तस्यैकत्वात् प्रतिसन्धास्यन्ते यन्निमित्तं स आत्मेति । अथ वा गुणा इच्छादयः गुणाः परतन्त्रा भवन्तीति न्यायः । गुणत्वं पारिशेष्यात् । न सामान्यविशेषसमवाया ऽनित्यत्वात् । न द्रव्यं कर्म वा व्यापकद्रव्यसमवायात् शब्दवदित्यादिसामान्यतोदृष्टमित्येतस्मिन्ननुमानं व्यवस्थितम् । एतेनानित्यत्वात् पारतन्त्र्यमिच्छादीनां कार्यत्वाच्च रूपादिवदित्युक्तम् । अयावद्द्रव्यभावित्वेन शरीरगुणत्वप्रतिषेधः तत्प्रतिषेधाच्चात्मगुणत्वमिति परिशेषात् सिद्ध आत्मेति । न्या· वा· ।

‡ आत्मनो दुःखनिदानानामिन्द्रियादीनां सर्वेषां साक्षात्पारम्पर्येण वा शरीरमाश्रित्य तन्निदानत्वमिति तदेवास्य दुःखमूलकारणमित्यनन्तरं शरीरं लक्षयितुं सूत्रं चेष्टेत्यादि । ता· टी· ।

§ कार्यभूतानां त्वगादीनां स्वावयवाश्रितत्वाच्छोत्रमनसोश्च नित्यत्वेनानाश्रितत्वादिन्द्रियाश्रयत्वं शरीरस्य कथमित्याशङ्क्य शरीरानुविधानमिन्द्रियाश्रयत्वं शरीरानुग्रहेणानुग्रहान्ते

न्नायतने* इन्द्रियार्थसन्निकर्षादुत्पन्नयोः सुखदुःखयोः प्रवर्तते स एषामाश्रयः प्रतिसंवेदनं तच्छरीरमिति ।

भोगसाधनानि पुनः ।

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः† ॥ १२ ॥

जिघ्रत्यनेन घ्राणं गन्धं गृह्णातीति । रसयत्यनेनेति रसनं रसं गृह्णातीति । चष्टे ऽनेनेति चक्षुः रूपं पश्यतीति । त्वक्स्थानमिन्द्रियं त्वक् तदुपचारः स्थानादिति । शृणोत्यनेनेति श्रोत्रं शब्दं गृह्णातीति । एवं समाख्यानिर्वचनसामर्थ्यादूोध्यं स्वविषयग्रहणलक्षणानीन्द्रियाणीति‡ । भूतेभ्य इति प्रकृतीनाऽमेषां सतां विषयनियमो नैकप्रकृतीनां सति च विषयनियमे स्वविषयग्रहणलक्षणत्वं भवतीति । कानि पुनरिन्द्रियकारणानि ।

पृथिव्यापस्तेजो वायुराकाशमिति भूतानि§ ॥ १३ ॥

संज्ञाशब्दैः पृथगुपदेशो भूतानां विभक्तानां सुवचं कार्यं भविष्यतीति ।

इमे तु खलु ।

इन्द्रियाणि तदुपघाते चोपहन्यन्तइति शरीराश्रितानीत्युच्यन्तइति वार्तिकम् । एवमेवार्थाश्रयत्वमप्युपपादनीयम् । गन्धाद्युपलम्भनिमित्तकसुखादेः शरीरे सति भावादसति चाभावात् । अत्र चेष्टायां हिताहितप्राप्तिपरिहारफलकत्वं मूर्तान्तराप्रयोज्यत्वं च विशेषणं देयं तेन वृक्षे दारुयन्त्रे च नातिव्याप्तिरिति । ता॰ टी॰ । अतश्च चेष्टादीनां व्यस्तानामेव लक्षणत्वमुपपद्यते । चेष्टायां विशेषणमनिवेश्य केवलाया अतिव्यापकत्वादिन्द्रियाश्रयत्वस्यैकस्मिन्नेव लक्षणे प्रवेशनेऽपि वृक्षादाविन्द्रियसंयोगित्वेनातिव्याप्तितादवस्थ्यादर्थाश्रयत्वनिवेशेपि रूपाद्याश्रयतायां वृक्षादौ प्रसिद्धत्वेनातिप्रसङ्गावारणात्पूर्वोक्तरीत्या चेष्टाश्रयत्वादेः परिष्कारे व्यस्तानामेव लक्षणत्वोपपत्तेः ।

* यस्मिन्नायतनेन्द्रियार्थसन्निकर्षादुत्पन्नयोरिति ३ पु॰ पाठः ।

† अत्र च कर्णशष्कुलीसंयोगोपाधिना श्रोत्रस्य नभसः कथं चिद्भेदं विवक्षित्वा भूतेभ्य इति पञ्चम्यर्थो व्याख्यातव्यः । ता॰ टी॰ । एतानि च घ्राणादिपदेषु योगार्थाश्रयणेन पञ्च लक्षणसूत्राणि एकसूत्रत्वेन पठितानि । भूतेभ्य इति च गन्धादिग्रहणनियमप्रदर्शनाय । घ्राणेन्द्रियं पार्थिवं रूपादिषु पञ्चसु मध्ये गन्धस्यैवाभिव्यञ्जकत्वादित्यादिश्चानुमानाकारः । तेन च सांख्याभिमतमाहङ्कारिकत्वं निराकृतं भवति । इन्द्रियप्रकृतित्वं तु भूतलक्षणं वेदितव्यमिति । ता॰ टी॰ ।

‡ स्वविषयलक्षणानीन्द्रियाणीति इति ३ पु॰ पाठः ।

§ नानाप्रकृतीनामिति ५ । ४ । ३ पु॰ पाठः ।

‖ कानि पुनरिन्द्रियकारणानि इति प्रश्नस्योत्तररूपं पृथिव्यापस्तेजोवायुराकाशमिति भूतानीति भाष्यमेव न सूत्रम् । प्रमाणादिष्वनुक्रान्तेषु प्रमाणलक्षणविभागतद्विशेषलक्षणसूत्राणि प्रणीय प्रमेयानात्मशरीरेन्द्रियार्थादीनभिधाय तत्रोद्दिष्टानामात्मशरीरेन्द्रियाणां लक्षणेऽभिहिते ऽर्थस्वरूपज्ञापनस्यैव क्रमप्राप्तत्वाद् वार्तिके तात्पर्यटीकायां वा पूर्वसूत्रेषु सूत्रमिदमित्यभिधानवदस्य सूत्रत्वेनानभिधानात् गन्धरसेत्यादेरेव वार्तिके सूत्रत्वेनोक्तेः । मुद्रितपुस्तकानुसारेण विश्वनाथपञ्चाननकृतगौतमसूत्रवृत्त्यनुसारेण च सूत्रत्वेन मुद्रितमिति केचित् । सूत्रमेवेत्यन्ये ।

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणा*स्तदर्थाः ॥ १४ ॥

पृथिव्यादीनां यथाविनियोगं गुणा इन्द्रियाणां यथाक्रममर्था विषया इति।

अचेतनस्य करणस्य बुद्धेर्ज्ञानं वृत्तिः चेतनस्याकर्तुरुपलब्धिरिति युक्तिविरुद्धमर्थं प्रत्याचक्षाणश्च इवेदमाह।

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्† ॥ १५ ॥

नाचेतनस्य करणस्य बुद्धेर्ज्ञानं भवितुमर्हति। तद्धि चेतनं स्यात् एकश्चायं चेतनो देहेन्द्रियसंघातव्यतिरिक्त इति। प्रमेयलक्षणार्थस्य वाक्यस्यान्यार्थप्रकाशनमुपपत्तिसामर्थ्यादिति‡।

स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छाद्यश्च मनसो लिङ्गानि। तेषु सत्स्वयमपि।

---

* अत्र पृथिव्यादयश्च गुणाश्चेति द्वन्द्वसमासः। तेन पृथिव्यादीनामपि चक्षुरादीन्द्रियविषयत्वरूपं तदर्थत्वं संगृहीतं भवति। षष्ठीतत्पुरुषाश्रयणे तु न संगृह्येत। विशेषणवैयर्थ्यं च गन्धादीनामन्यगुणत्वाभावेन व्यावर्त्यासम्भवात्। पृथिव्यादिग्रहणेन पृथिव्यप्तेजांसि बाह्यकरणग्राह्याण्यपदिश्यन्ते। गुणग्रहणेन च सर्वे आश्रितो गुण इति संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहवेगकर्मसामान्यविशेषा अनाश्रितश्च समवायस्तद्धर्मत्वाद् गुण इति। गन्धरसरूपस्पर्शशब्दानां पृथगभिधानमिन्द्रियविशेषनियमज्ञापनार्थम्। इन्द्रियाणि गन्धरसरूपस्पर्शशब्देषु तत्सामान्येषु नियतान्यन्यचानियतानि। तत्र पृथिव्यप्तेजांसि द्वीन्द्रियग्राह्याणि शेषश्च गुणराशिः सत्तागुणत्वे च सर्वेन्द्रियग्राह्ये समवायो ऽभावश्च। न्या. वा.। अत्र विशेषो रेखोपरेखादिर्न त्वन्त्यस्तस्यातीन्द्रियत्वात्। ता. टी.।

† पर्यायशब्दाभिधानाद् बुद्धिवृत्तेर्निराकरणम्। यत्राहुर्बुद्धेर्ज्ञानं वृत्तिरात्मन उपलब्धिर्वृत्तिरिति। तन्निराकरणार्थं समानार्था एते शब्दा इति बुद्धिवृत्तिः पृथङ् निराकृता भवति। का पुनरत्रोपपत्तिर्भवति। आत्मोपलभते बुद्धिर्जानीते इति ब्रुवाणस्तयोश्चैतन्यं प्रतिपद्यते। उभयचैतन्ये च प्रत्ययव्यवस्थाऽनुमानं स्यात्। यदि बुद्धिश्चेतना आत्मा च चेतनो न बुद्ध्यवसितानर्थानात्मोपलभेत। चेतनोपलब्धानां चेतनान्तरस्याप्रतिपत्तेः। अस्ति च प्रतिपत्तिस्तस्मादेकश्चेतन इति। न्या. वा.। चेतनमात्रोपलभ्यानामित्यर्थः। न तावद् बुद्धेरात्मच्छायापत्तिरिन्दाविव मार्तण्डतेजःसङ्क्रान्तिः पारमार्थिकी। चितेरपरिणामितया सङ्क्रमणायोगात्। तस्माद् भ्रान्तिः सा च न बुद्धेस्तस्या अचेतनत्वाच्चाप्यात्मनस्तस्यावृत्तिकत्वात् तथात्वे वा परिणामापत्तेः। तस्माद् बुद्धेः स्वाभाविकं चैतन्यमास्येयं तथा चोभयचैतन्ये दूषणमुक्तम्। ता. टी.।

‡ प्रमेयगणपठिताया अपि बुद्धेर्विषयत्वप्राप्तावपि विषयित्वमुपपत्त्या सिद्धमित्यर्थः।

युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गम्* ॥ १६ ॥

अनिन्द्रियनिमित्ताः स्मृत्यादयः करणान्तरनिमित्ता भवितुमर्हन्तीति। युगपच्च खलु घ्राणादीनां गन्धादीनां च सन्निकर्षेषु सत्सु युगपद्ज्ञानानि नोत्पद्यन्ते (†तेनानुमीयते अस्ति ततदिन्द्रियसंयोगि सहकारि निमित्तान्तरमव्यापि यस्यासन्निधेर्नोत्पद्यते ज्ञानं सन्निधेश्चोत्पद्यतइति)। मनःसंयोगानपेक्षस्य हीन्द्रियार्थसन्निकर्षस्य ज्ञानहेतुत्वे युगपदुत्पद्येरन् ज्ञानानीति।

क्रमप्राप्ता तु।

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति ॥ १७ ॥

मनोऽच बुद्धिरित्यभिप्रेतं बुध्यते ऽनेनेति बुद्धिः सोऽयमारम्भः शरीरेण वाचा मनसा च पुण्यः पापश्च दशविधः‡। तदेतत्कृतभाष्यं द्वितीयसूत्रइति।

प्रवर्त्तनालक्षणा दोषाः ॥ १८ ॥

प्रवर्त्तना प्रवृत्तिहेतुत्वं। ज्ञातारं हि रागादयः प्रवर्तयन्ति पुण्ये पापे

---

* युगपज् ज्ञानाऽनुत्पत्तिर्ज्ञानगता मनोऽधर्मत्वात् कथं मनसोऽनुमापिकेत्याशङ्क्य न्यायाकारो वार्तिके दर्शितः। रूपादिज्ञानानि चक्षुरादिव्यतिरेकेणाधिष्ठायकान्तरापेक्षाणि। अयुगपदुत्पत्तेः। तद्यथा ऽनेकशिल्पपर्यवदातस्यानेकं वास्यादि संनिधानेनोपस्थितं हस्ताधिष्ठायकापेक्षं न युगपदनेकरथादिक्रियां निर्वर्तयति तथा चक्षुरादि न युगपदनेकं ज्ञानं करोति तस्माच्चक्षुरप्यधिष्ठायकान्तरमपेक्षतइति। इन्द्रियाणि वा पक्षीकृत्य वक्तव्यम्। चक्षुरादीन्द्रियमात्मप्रवृत्तावधिष्ठायकान्तरापेक्षम् अयुगपत्प्रवृत्तेः। वास्यादिवदिति। नन्वेवमप्येकेन्द्रियग्राह्याणां नीलपीतादीनां कुतो न युगपज् ज्ञानद्वयं मनःसंनिधानस्य तुल्यं पश्चात्। न च सम्बन्धिभेदादेकदा विषयेन्द्रियसंनिकर्षरूपकारणाभावेन निर्वाहः। चक्षुःसंयुक्तगवादिगुणक्रिययोरेकदा ज्ञानद्वयापत्तेरवारणात्। फलबलेन ज्ञानेच्छायाः सहकारित्वमाश्रित्य तदभावाच्च ज्ञानद्वयं तत्सत्त्वे तु समूहालम्बनात्मकस्यैकस्यैव ज्ञानस्योत्पत्तेर्नेयमापत्तिरिति चेन्न। मनसोऽसिद्धिप्रसङ्गात्। बुभुत्साऽभावेनैव भिन्नेन्द्रियग्राह्याणामपि युगपज्ज्ञानद्वयापत्तेर्वारयितुं शक्यत्वादिति चेन्नैवम्। करणत्वेनैव हेतुना युगपदनेकक्रियाकारित्वाभावसिद्धेः। वास्यादौ युगपदनेकक्रियाकारित्वाभावस्य दृष्टत्वादिति। आत्मनोऽधिष्ठातृत्वेऽपि तस्य विभुतया सर्वेन्द्रियसम्बन्धस्य सर्वदा सत्त्वेन मनःस्वीकारं विना ऽनुपपत्तिपरिहारासम्भवादिति वार्तिकम्।

† ( ) एतच्चिन्हमध्यस्थः ४ पु॰ नास्ति।

‡ कायेन परित्राणं परिचरणं दानमिति। वाचा सत्यं हितं प्रियं स्वाध्यायश्च। मनसा दया ऽस्पृहा श्रद्धा चेति। विपर्ययेण पापा दशविधैव। न्या॰ वा॰। प्रवृत्तिजनितयोर्धर्माधर्मयोर्जन्महेतुत्वात्प्रवृत्तेर्जन्महेतुत्वमुपचर्यतइति भावः।

वा।यच्च मिथ्याज्ञानं* तच्च रागद्वेषाविति । प्रत्यात्मवेदनीया† हीमे दोषाः कस्माल्लक्षणतो निर्द्दिश्यन्तइति । कर्मलक्षणाः खलु रक्तद्विष्टमूढा रक्तो हि तत्कर्म कुरुते येन कर्मणा सुखं दुःखं वा लभते‡ तथा द्विष्टस्तथा मूढ इति रागद्वेषमोहा इत्युच्यमाने बहुनोक्तं भवतीति ।

पुनरुत्पत्तिः प्रेत्यभावः§ ॥ १९ ॥

उत्पन्नस्य क्व चित्सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः उत्पन्नस्य संबद्धस्य । सम्बन्धस्तु देहेन्द्रियमनोबुद्धिवेदनाभिः । पुनरुत्पत्तिः ‖पुनर्देहादिभिः संबन्धः । पुनरित्यभ्यासाभिधानं यच्च क्व चित्प्राणभृन्निकाये वर्त्तमानः पूर्वोपात्तान्देहादीन् जहाति तत्प्रेति । यत्तच्चान्यच्च वा देहादीनन्यानुपादत्ते तद्भवति । प्रेत्यभावो मृत्वा पुनर्जन्म । सो ऽयं जन्ममरणप्रबन्धाभ्यासो ऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्य इति ।

प्रवृत्तिदोषजनितो ऽर्थः फलम्¶ ॥ २० ॥

सुखदुःखसंवेदनं फलम् । सुखविपाकं कर्म दुःखविपाकं च । तत्पुनर्देहेन्द्रियविषयबुद्धिषु सतीषु भवतीति सह देहादिभिः फलमभिप्रेतम् । तथा हि प्रवृत्तिदोषजनितो ऽर्थः फलमेतत्सर्वं भवति तदेतत्फलमुपात्तमुपात्तं हेयं

---

* तच्च मिथ्याज्ञानमिति ३ पु. पाठः ।

† स्वशरीरावच्छिन्नात्मनि प्रत्यक्षाः परशरीरे तु प्रवृत्त्या ऽनुमेयाः । प्रवर्तना च मोहैकार्थसमवायः । तावद्ध्ययं रागादिवशः स्पन्दते यावदस्य मोहो वर्ततइति । ता. टी. ।

‡ भजतइति ५ । ४ । ३ पु. पाठः ।

§ पुनर्ग्रहणं संसारानादित्वज्ञापनार्थम् । न्या. वा. । दुःखादीनां मिथ्याज्ञानपर्यन्तानामविच्छेदेन कार्यकारणभावरूपः संसारो ह्यनादिः । न हि शरीरसम्बन्धेन विना दुःखं सम्भवति । न च शरीरसम्बन्धो धर्माधर्मौ विना । न च धर्माधर्मौ रागद्वेषौ विना । न च रागद्वेषौ मिथ्याज्ञानं विहाय । न चाज्ञानं शरीरं परित्यज्येति तत्रैव तदुपपादनं च । स चायं संसारः क्रियामधिकृत्य मनस उपभोगमधिकृत्यात्मनः । संसारकारणीभूताज्ञाने मनसो ऽसाधारणकारणत्वादात्मनश्च तज्जनितदुःखरूपफलोपभोक्तृत्वात् ।

‖ पुनर्नेति २ पु. पा. ।

¶ प्रवृत्तिजनित इति वक्तव्ये दोषग्रहणं न केवलं प्रवृत्तिं प्रति दोषाणां हेतुभावो ऽपि तु प्रवृत्तिकार्ये सुखदुःखे ऽपि प्रतीतिदर्शनार्थम् । दोषसलिलावसिक्तायां खल्वात्मभूमौ धर्माधर्मबीजे सुखदुःखे जनयतो नान्यथा न चास्ति सम्भवो न तत्र तुष्यति न च तद् द्वेष्टि तच्च तस्य सुखं दुःखमिति । अर्थग्रहणं गौणमुख्यफलाविरोधार्थम् । ता. टी. ।

त्यक्तं त्यक्तमुपादेयमिति (*नास्य हानोपादानयोर्निष्ठा† पर्यवसानं वास्ति स खल्वयं‡ फलस्य हानोपादानसन्ततिरुह्यते लोक इति । अथैतदेव) ।

बाधनालक्षणं दुःखं§ ॥ २१ ॥

बाधना पीड़ा ताप इति तया ऽनुविद्धमनुषक्तमविनिर्भागेन वर्तमानं दुःखयोगाद् दुःखमिति । सो ऽयं सर्वं दुःखेनानुविद्धं॥ मिति पश्यन् दुःखं जिहासुर्जन्मनि दुःखदर्शी निर्विद्यते निर्विण्णो विरज्यते विरक्तो विमुच्यते ।

यच्च तु निष्ठा यच्च तु पर्यवसानं सो ऽयम् ।

तदत्यन्तविमोक्षो ऽपवर्गः ॥ २२ ॥

तेन दुःखेन जन्मनाऽ ऽत्यन्त**विमुक्तिरपवर्गः कथमुपात्तस्य जन्मनो हानम् अन्यस्य चानुपादानम् । एतामवस्थामपर्यन्ता††मपवर्गं वेदयन्ते ऽपवर्गविदः । तदभयमजरममृत्युपदं‡‡ ब्रह्म क्षेमप्राप्तिरिति । नित्यं सुख-

---

* ( ) एतच्चिह्नमध्यस्थः पाठः ४ । २ पुस्तकयोर्नास्ति ।

† निष्ठा समाप्तिः सा च प्रलये ऽप्यस्तीत्यत उक्तं पर्यवसानमिति । अवसानमात्रमस्ति न पुनः परितः पुनरपि सर्गोपादनयोर्भावादित्यर्थः । ता॰ टी॰ ।

‡ न खल्वयमिति ३ । पु॰ पाठः ।

§ अत्र इतिशब्दसहितः क्वचित् सूत्रपाठः । वार्तिके तात्पर्यटीकायां चेतिशब्दरहित एव दृश्यते । इतिशब्दस्यात्रानुपयोगाच्च । मुद्रितपुस्तके तु भ्रमात्सूत्रे निवेशः । शरीरादेर्बाधनाऽनुषङ्गेण गौणं दुःखत्वं प्रतिकूलवेदनीये भावे तु मुख्यम् । शरीरे दुःखनिमित्तत्वादिन्द्रियविषयबुद्धीनां तत्साधनत्वात् सुखे च दुःखाविनाभावात् । न च सुखं दुःखाभावमात्रमेवेति शङ्क्यम् । प्रत्यक्षसिद्धस्य तस्यानपह्नवनीयत्वात् । प्रवृत्तिद्वैविध्यदर्शनाच्च । कश्चित्सुखार्थं प्रवर्तते कश्चिद् दुःखपरिहारार्थमेवेति । दुःखे ऽपि सुखाभावमात्रत्वस्यापि वक्तुं शक्यत्वेन विनिगमनाविरहादुभयसिद्धेश्चेति बोध्यम् ।

॥ अत्र कलिकाता मुद्रितपुस्तके विद्धं बहन्तमितीति पाठः ।

¶ तदित्यनन्तरं गौणमुख्यभेदभिन्नं दुःखं परामृशति । मुख्यमेव दुःखमिति भ्रमो मा भूदित्यत उक्तं जन्मनेति । अनेन जायमाना दुःखशब्देन सर्वे शरीरादय उच्यन्ते इत्युक्तं भवति । ता॰ टी॰ ।

** अत्यन्तग्रहणं प्रलयावस्थानिवृत्त्यर्थम् ।

†† अवधिशून्याम् ।

‡‡ अभयमिति पुनः संसारभयाभावमाह । अभयं वै ब्रह्मेत्यसकृदभयश्रुतेः । ये तु ब्रह्मैव नामरूपप्रपञ्चात्मना परिणमतइत्याहुस्तान् प्रत्याह । अजरमिति । सर्वात्मना परिणामे सर्वात्मना ब्रह्मणो ऽन्यथात्वाद्विनाशप्रसङ्गः । एकदेशपरिणामे तु सावयवत्वेन घटादिवदनित्यत्वप्रसङ्गः । वैनाशिकाः प्राहुः प्रदीपस्येव निर्वाणं मोक्षस्तस्य चेतस इति । तान्प्रत्याह । अमृत्युपदमिति । ता॰ टी॰ ।

मात्मनो महत्त्ववन्मोक्षे व्यज्यते तेनाभिव्यक्तेनात्यन्तं विमुक्तः* सुखी भवतीति के चिन्मन्यन्ते । तेषां प्रमाणाभावादनुपपत्तिः । न प्रत्यक्षं नानुमानं नागमो वा विद्यते नित्यं सुखमात्मनो महत्त्ववन्मोक्षे ऽभिव्यज्यतइति ।

नित्यस्याभिव्यक्तिः संवेदनं तस्य हेतुवचनम्। नित्यस्याभिव्यक्तिः संवेदनम् ज्ञानमिति तस्य हेतुर्वाच्यो यतस्तदुत्पद्यतइति ।

सुखवन्नित्यमिति चेत् संसारस्थस्य मुक्तेनाविशेषः । यथा मुक्तः सुखेन तत्संवेदनेन च सन्नित्येनोपपन्नः† स्तथा संसारस्थो ऽपि प्रसज्यतइति उभयस्य नित्यत्वात् ।

अभ्यनुज्ञाने च धर्माधर्मफलेन साहचर्यं यौगपद्यं गृह्येत । यदिदमुत्पत्तिस्थानेषु धर्माधर्मफलं सुखं दुःखं वा संवेद्यते पर्यायेण तस्य च नित्यं‡ स्वसंवेदनस्य च सहभावो यौगपद्यं गृह्येत न सुखाभावो नानभिव्यक्तिरस्ति§ उभयस्य नित्यत्वात्‖ ।

अनित्यत्वे¶ हेतुवचनम् । अथ मोक्षे नित्यस्य सुखस्य संवेदनमनित्यं यत उत्पद्यते स हेतुर्वाच्यः ।

आत्ममनःसंयोगस्य निमित्तान्तरसहितस्य हेतुत्वम् । आत्ममनःसंयोगो हेतुरिति चेद् एवमपि तस्य सहकारि निमित्तान्तरं वचनीयमिति ।

धर्मस्य कारणवचनम् । यदि धर्मो निमित्तान्तरं तस्य हेतुर्वाच्यो यत उत्पद्यतइति**।

---

* वियुक्त इति ४ । २ । ३ पाठः ।

† यच्चित्येनोपपच्च इति ३ । पाठः ।

‡ नित्यसंवेदनस्येति ५ । ४ । २ । ३पाठः ।

§ नाभिव्यक्तिरस्तीति ३ । पाठः ।

‖ सुखस्य तद्विषयकज्ञानस्य च नित्यत्वे संसारदशायामपि मोक्षादविशेषप्रसङ्गः । इष्टापत्तौ तु धर्माधर्माभ्यां जनितयोः सुखदुःखयोरुपलब्धिकाले ऽपि नित्यसुखस्य तज्ज्ञानस्य सर्वदातनत्वेन यौगपद्यप्रसङ्गः ।

¶ अनित्ये हेतु-चनमिति ५ । ४ । २ । ३ पाठः ।

** संसारावस्थायां तावदयमात्ममनःसंयोगो धर्मं निमित्तमपेक्षमाणः सुखज्ञानमकार्षीत् । यदि तु मुक्त्यवस्थायां तदनपेक्ष एव सुखज्ञानं करोति हन्त रूपादिज्ञानेष्विन्द्रियाण्यपि नापेक्षेतेति भावः । ता. टी. ।

योगसमाधिजस्य कार्यावसायविरोधात्प्रलये* संवेदननिवृत्तिः† । यदि योगसमाधिजो धर्मो हेतुस्तस्य कार्यावसायविरोधात्प्रलये संवेदनमत्यन्तं निवर्त्तयति‡ ।

असंवेदने चाविद्यमानेनाविशेषः । यदि धर्मक्षयात्संवेदनोपरमो नित्यं सुखं न संवेद्यतइति । किं विद्यमानं न संवेद्यते ऽथाविद्यमानमिति नानुमानं विशिष्टे ऽस्तीति ।

अप्रक्षयश्च धर्मस्य निरनुमानमुत्पत्तिधर्मकत्वात् । योगसमाधिजो धर्मो न क्षीयतइति नास्त्यनुमानमुत्पत्तिधर्मकमनित्यमिति । विपर्ययस्य त्वनुमानं यस्य तु संवेदनोपरमो नास्ति तेन संवेदनहेतुर्नित्य इत्यनुमेयम् । नित्ये च मुक्तसंसारस्थयोरविशेष इत्युक्तम् । यथा मुक्तस्य नित्यं सुखं तत्संवेदनहेतुश्च§ संवेदनस्य तूपरमो नास्ति कारणस्य नित्यत्वात् तथा संसारस्थस्यापीति । एवं च सति धर्माधर्मफलेन सुखदुःखसंवेदनेन साहचर्यं गृह्यतेति ।

शरीरादिसम्बन्धः प्रतिबन्धहेतुरिति चेद् न शरीरादीनामुपभोगार्थत्वाद् विपर्ययस्य चाननुमानात्। स्यान्मतं संसारावस्थस्य शरीरादिसंबन्धो नित्यसुखसंवेदनहेतोः प्रतिबन्धकस्तेनाविशेषो नास्तीति । एतच्चायुक्तम् । शरीरादय उपभोगार्थास्ते भोगप्रतिबन्धं करिष्यन्तीत्यनुपपन्नम्‖ । न चास्त्यनुमानमशरीरस्यात्मनो भोगः कश्चिदस्तीति ।

इष्टाधिगमार्था प्रवृत्तिरिति चेद् न अनिष्टोपरमार्थत्वात् । इदमनुमानम् इष्टाधिगमार्थो मोक्षोपदेशः प्रवृत्तिश्च मुमुक्षूणां नोभय-

---

* प्रलये इति ५ । ४ । २ । ३ पाठः ।

† योगसमाधिजस्य धर्मस्य कार्यत्वेन समाप्तौ नाशे सति तज्जनितायाः संवेदनायाः कारणाभावे कार्यस्थित्यङ्गीकारे ऽनुभवविरोधाद् निवृत्तिरभावः प्राप्नोति । तथा च मोक्षदशायां सर्वदा सुखानुभवाभ्युपगमो न सिध्यतीति भावः ।

‡ निवर्तेतेति ५ । ४ । २ । १ पाठः ।

§ अत्र हेतुपदं कारणस्य नित्यत्वादित्यत्र कारणपदं च प्रयोजकपरम् । नित्ययोः कार्यकारणभावासंभवात् । प्रयोज्यप्रयोजकभावस्य च धूमाभाववह्न्यभावयोरिवाभ्युपगमसम्भवात् ।

‖ उपभोगार्थमेवारब्धानां शरीरादीनामुपभोगप्रतिबन्धकत्वमुपपत्तिविरुद्धमित्यर्थः । सुखाद्युपभोगं प्रति शरीरादेः प्रयोजकत्वस्य लोके दृष्टत्वेन दृष्टानुसारित्वाच्च कल्पनाया मुक्तावपि शरीराद्यङ्गीकारे कैवल्यानुपपत्तिरनङ्गीकारे च सुखानुभवानुपपत्तिर्योगसमाधिजनितशरीरस्य नित्यत्वाभ्युपगमश्च यज्जन्यं तदनित्यमित्यनुमानविरुद्ध इति भावः ।

¶ इच्छाधिगमार्थेति १ पाठः ।

मनर्थकमिति । एतच्चायुक्तम् अनिष्टोपरमार्थो मोक्षोपदेशः प्रवृत्तिश्च मुमुक्षूणामिति । नेष्टमनिष्टेनाननुविद्धं संभवतीति इष्टमप्यनिष्टं संपद्यते अनिष्टहानाय घटमान इष्टमपि जहाति । विवेकहानस्याशक्यत्वादिति ।

दृष्टातिक्रमश्च देहादिषु तुल्यः । यथा दृष्टमनित्यं सुखं परित्यज्य नित्यसुखं कामयते एवं देहेन्द्रियबुद्धीरनित्या दृष्ट्वा अतिक्रम्य मुक्तस्य नित्या देहेन्द्रियबुद्धयः कल्पयितव्याः* साधीयश्चैवं मुक्तस्य चैकात्म्यं कल्पितं भवतीति ।

उपपत्तिविरुद्धमिति चेत् समानम् । देहादीनां नित्यत्वं प्रमाणविरुद्धं कल्पयितुमशक्यमिति समानं सुखस्यापि नित्यत्वं प्रमाणविरुद्धं कल्पयितुमशक्यमिति ।

आत्यन्तिके च संसारदुःखाभावे सुखवचनादागमेऽपि सत्यविरोधः† । यद्यपि कश्चिदागमः स्यात् मुक्तस्यात्यन्तिकं सुखमिति । सुखशब्द आत्यन्तिके दुःखाभावे प्रयुक्त इत्येवमुपपद्यते दृष्टो हि दुःखादेरभावे‡ सुखप्रयोगो§ बहुलं लोकइति‖ ।

नित्यसुखरागस्य प्रहाणे मोक्षाधिगमाभावो रागस्य बन्धनसमाज्ञानात् । यद्ययं मोक्षे नित्यं सुखमभिव्यज्यतइति नित्यसुखरागेण मोक्षाय घटमानो न मोक्षमधिगच्छेन्नाधिगन्तुमर्हतीति बन्धनसमाज्ञातो हि रागः न च बन्धने सत्यपि कश्चिन्मुक्त इति उपपद्यतइति¶ ।

प्रहीणनित्यसुखरागस्याप्रतिकूलत्वम् ।** अथास्य नित्यसुखरागः†† प्रहीयते तस्मिन्प्रहीणे नास्य नित्यसुखरागः प्रतिकूलो भवति‡‡ यद्येवं

---

* कल्पितव्या इति ५ । ४ । २ पाठः । † आगमेपि सत्यविशेष इति ३ । पु· ।

‡ दुःखाभावे इति ५ । ४ । २ । ३ पाठः । § सुखशब्दप्रयोग इति ५ । ४ । २ । ३ पाठः ।

‖ ज्वरादौ निवृत्ते सुखी संवृत्तोऽहमिति प्रसिद्धो हि लोकानुभव इति भावः ।

¶ नित्यसुखे रागान्मुमुक्षूणां तत्र प्रवृत्तौ रागस्यानिवृत्त्या हेत्वभावेन मोक्षानुपपत्तिप्रचेत्याह । अत्र मोक्षाय घटमान इत्यनन्तरं भवेदित्यध्याहृत्य वाक्यं समापनीयं न मोक्षमधिगच्छेदिति तत्र दूषणं तस्यैव विवरणमग्रे इति बोध्यम् ।

** प्रहाणेति ४ । २ । ३ पाठः । †† अथास्यानित्यसुखराग इति ३ पु· ।

‡‡ यद्यपि द्वेषात् प्रवर्तते दुःखं हास्यामीति तथाऽपि न मुच्येत द्वेषस्य बन्धनसमाज्ञानादिति रागद्वेषौ हि बन्धनमिति । नाप्रतिकूलत्वात् । अप्रतिकूलं दुःखहानं भवति न पुनरयं दुःखं द्वेष्टि अद्विषंश्चायं प्रवर्तमानोऽप्रतिकूलं दुःखहानमधिगच्छति । न्या· वा· ।

मुक्तस्य नित्यं सुखं भवति अथापि न भवति नास्योभयोः पक्षयोर्मोक्षाधिगमो विकल्पतइति ।

स्थानवत * एव तर्हि संशयस्य लक्षणं वाच्यमिति तदुच्यते ।

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः† संशयः ॥ २३ ॥

समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति । स्थाणुपुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन्पूर्वदृष्टं च तयोर्विशेषं बुभुत्समानः किं स्विदित्यन्यतरं नावधारयति तदनवधारणं ज्ञानं संशयः समानमनयोर्धर्ममुपलभे विशेषमन्यतरस्य नोपलभइत्येषा बुद्धिरपेक्षा संशयस्य प्रवर्त्तिका वर्त्तते तेन विशेषापेक्षो विमर्शः संशयः । अनेकधर्मोपपत्तेरिति समानजातीयमसमानजातीयं चानेकं तस्यानेकस्य धर्मोपपत्तेर्विशेषस्योभयथा दृष्टत्वात् समानजातीयेभ्यो ऽसमानजातीयेभ्यश्चार्था विशिष्यन्ते गन्धवत्त्वा‡त्पृथि-

---

* प्रमेयानन्तरमुद्दिष्टस्य प्रमेयलक्षणानन्तरं स्थानं क्रमो लक्षणस्य यस्येत्यर्थः। ता॰ टी॰ क्रमप्राप्तस्येति यावत् ।

† अत्र च विमर्शः संशय इति संशयसामान्यलक्षणम्। तत्र संशय इति लक्ष्यनिर्देशो विमर्श इति लक्षणपदम्। एकस्मिन् धर्मिणि विरोधिनानार्थावमर्शो विमर्शः। समानेत्यादीनि तु त्रीणि विशेषलक्षणानि। तेषु विमर्शः संशय इत्यनुवर्तनीयम्। अत्र विशिष्टो ऽवमर्शो विमर्शः। विशिष्टसंशयो लक्ष्यपदम्। समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेरिति त्रीणि प्रत्येकं शेषैः पदैरुपेतानि लक्षणानीति। एतेन ये पञ्चविधं संशयमाचक्षते ते निराकृताः। ता॰ टी॰। अयं भावः। समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशय इत्येकं लक्षणम्। अत्राद्यपदमात्रोपादाने वृक्षो ऽयमिति विशेषनिश्चये सत्यपि पुरुषगतसमानधर्मस्य महत्त्वादेरुपलब्धिरस्तीति संशयः स्यात्। अतः उपलब्ध्यनुपलब्ध्यव्यवस्थितेरिति वक्तव्यम्। एकतरधर्मप्रकारकनिश्चयहेत्वभावे धर्मान्तराभावप्रकारकनिश्चयहेत्वभावे च सतीति तस्यार्थः। ततश्च वृक्षत्वप्रकारकनिश्चयहेतोः पुरुषत्वाभावप्रकारकनिश्चयहेतोश्चाभावो ऽप्यपेक्षितः। पक्षते च स नास्तीति न संशयः। तावन्मात्रोक्तौ च अनुगतधर्मज्ञानाभावे ऽपि विशेषनिश्चयहेत्वभावमात्रेण संशयः स्यादत आद्यपदम्। एवमपि नौकया गच्छचारोहपरिणाहवन्तं पदार्थमात्रं पश्यन् वृक्ष इति निश्चायकं न गज इति निश्चायकं च हेतुमनुपलभमानो ऽपि अनुपादित्सिते ऽजिहासिते चोदासीने वस्तुनि न संदिग्धे बुभुत्साविरहात्। बुभुत्समानस्तु संदिग्धे तत्र बुभुत्साभावे ऽपि संशयो मा भूदिति विशेषापेक्ष इति निवेशनीयम्। विशेषं बुभुत्समानस्येति तस्यार्थः। तदेवं पदत्रयं मिलितं लक्षणं भवति। एवमनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति लक्षणद्वये ऽपि उपलब्ध्यनुपलब्ध्यव्यवस्थात इति विशेषापेक्ष इति च पदद्वयं निवेशनीयं तत्सार्थकं च पूर्ववद् बोध्यम्।

‡ गन्धवत्त्वादिति संशयस्य प्रत्युदाहरणम्। अस्ति चेत्याद्युदाहरणम्। शब्दे सत्तासम्बन्धेन सामान्यविशेषसमवायाभावेभ्यो भेदेन ज्ञाते विभागजत्वं द्रव्ये शब्दातिरिक्ते गुणे कर्मणि चादृष्टमुपलभ्यमानं द्रव्यत्वादिविशेषनिश्चायकहेत्वभावेन संशायकं भवतीति भावः। ननु

व्यवादिभ्यो विशिष्यते गुणकर्मभ्यश्च । अस्ति च शब्दे विभागजत्वं विशेषः । तस्मिन्द्रव्यं गुणः कर्म वेति संदेहः । विशेषस्योभयथा दृष्टत्वात् । किं द्रव्यस्य सतो गुणकर्मभ्यो विशेष आहो स्विद् गुणस्य सत इति अथ कर्मणः सत इति । विशेषापेक्षा अन्यतमस्य व्यवस्थापकं धर्मं नोपलभइति बुद्धिरिति । विप्रतिपत्तेरिति व्याहतमेकार्थदर्शनं विप्रतिपत्तिः व्याघातो विरोधो ऽसहभाव इति । अस्त्यात्मेत्येकं दर्शनं नास्त्यात्मेत्यपरम् । न च सद्भावासद्भावौ सहैकत्र संभवतः । न चान्यतरसाधको हेतुरुपलभ्यते । तच्च तत्त्वानवधारणं संशय इति । उपलब्ध्यव्यवस्थातः खल्वपि* सच्चोदकमुपलभ्यते तडागादिषु मरीचिषु चाविद्यमानमुदकमिति अतः क्व चिदुपलभ्यमाने तत्त्वव्यवस्थापकस्य प्रमाणस्यानुपलब्धेः किं सदुपलभ्यते ऽथासदिति संशयो भवति । अनुपलब्ध्यव्यवस्थातः सच्च नोपलभ्यते मूलकीलकोदकादि असच्चानुत्पन्नं निरुद्धं वा ततः (क्व चिदनुपलभ्यमाने संशयः किं सन्नोपलभ्यते उतासन्निति संशयो भवति । विशेषापेक्षा पूर्ववत् पूर्वः समानो ऽनेकश्च धर्मो ज्ञेयस्य) उपलब्ध्यनुपलब्धी पुनर्ज्ञातृगते एतावता विशेषेण पुनर्वचनम् । समानधर्माधिगमात्समानधर्मोपपत्तेर्विशेषस्मृत्यपेक्षो विमर्श इति ।

स्थानवतां लक्षणमिति समानम् ।

यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् ॥ २४ ॥

विभागे गुणे विभागजत्वं दृष्टं शब्दे प्रतीयमानं गुणत्वं निश्चापयिष्यति । शब्दो गुणः विभागजत्वाद्विभागवदिति । मैवम् । विभागजविभागानङ्गीकारात् । विभागजविभागासमवायिकारणकत्वस्य शब्दमात्रवृत्तेः संशयहेतुत्वाच्च । अत्र च समानधर्मोपलब्धेः संशयकारणत्वे दूरादारोहपरिणाहवद्वृक्षदर्शनमुदाहरणम् । तत्र ह्यारोहपरिणाहौ तरुनरसाधारणौ ज्ञायमानौ संशयहेतू । अनेकधर्मोपलब्धेस्तु शब्दे विभागजत्वमुपलभ्यमानं संशयकारणमित्युदाहरणम् । तत्र हि विभागजत्वं द्रव्यादित्रये नास्त्येव शब्दादन्यत्र दृष्टम् । ततश्च समानत्वाभावान्न पूर्वेण गतार्थता । अनेकधर्मोपलब्धेरित्यस्यासाधारणधर्मोपलब्धेरित्यर्थः । अनेकस्माद्विशेषको धर्मो ऽनेकधर्म इति तस्यार्थः । साधारणधर्मस्यासाधारणधर्मस्य वा गृह्यमाणव्यभिचारस्य ज्ञानं संशयकारणम् । गृह्यमाणाव्यभिचारस्य च तस्य ज्ञानं निर्णयहेतुः । समानधर्मोपपत्तेरित्यनेन विधीयमानव्यभिचार उपदिश्यते विभागजत्वादित्यनेन प्रतिषिध्यमानव्यभिचार इत्येतावता पृथगभिधानम् । एवं चेदं द्वयं ज्ञातृगतं संशयकारणम् । विप्रतिपत्तिस्तु वक्तृगता संशयकारणमिति पूर्वयोर्भेदः । एतत्सर्वं वार्तिके प्रपञ्चितम् ।

* उपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थायाश्च पृथक् संशयकारणत्वं वार्तिके दूषितम् । तत्र दोषः पूर्वोक्तलक्षणत्रये प्रवेशफलं च पूर्वमुक्तम् ।

( ) एतच्चिह्नमध्यस्थः पाठः ४ । २ । ३ नास्ति ।

यमर्थं*माप्तव्यं हातव्यं वा ऽध्यवसाय तदाप्तिहानोपायमनुतिष्ठति प्रयोजनं तद्वेदितव्यम् । प्रवृत्तिहेतुत्वादिममर्थमाप्स्यामि हास्यामि वेति व्यवसायो ऽर्थस्याधिकारः एवं व्यवसीयमानो ऽर्थो ऽधिक्रियतइति ॥

लौकिकपरीक्षकाणां† यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ २५ ॥

लोकसाम्य‡मनतीताः लौकिकाः नैसर्गिकं वैनयिकं बुद्ध्यतिशयमप्राप्ताः§ तद्विपरीताः परीक्षकास्तर्केण प्रमाणैरर्थं परीक्षितुमर्हन्तीति । यथा यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि सो ऽर्थो दृष्टान्तः । दृष्टान्तविरोधेन हि प्रतिपक्षाः प्रतिषेद्धव्या भवन्तीति दृष्टान्तसमाधिना च स्वपक्षाः स्थापनीया भवन्तीति । अवयवेषु चोदाहरणाय कल्पतइति‖ ।

अथ सिद्धान्तः¶ इदमित्थंभूतं चेत्यभ्युपगम्यानुज्ञायमानमर्थजातं सिद्धं सिद्धस्य संस्थितिः** सिद्धान्तः संस्थितिरित्थम्भावव्यवस्था धर्मनियमः । स खल्वयम् ।

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥ २६ ॥

---

* अत्रार्थशब्दो गौणमुख्यफलावरोधार्थः । तत्र मुख्यं सुखदुःखप्राप्तिपरिहारौ । गौणं तु तत्साधनम् । ता॰ टी॰ ।

† लौकिकानां परीक्षकाणां चेति पृथक्कोटी । तेनालौकिकस्याकाशादेरपि दृष्टान्तत्वसिद्धिरिति बोध्यम् ।

‡ लोकसामान्यमिति ५ । ४ । २ । ३ पाठः । § बुद्ध्यतिशयमप्राप्तत्वादिति ३ पु॰ ।

‖ सो ऽयं दृष्टान्तः सारूप्यव्युत्पत्त्यर्थो वा स्यादसिद्धसाधनार्थो वा । यदि तावत् सारूप्यव्युत्पत्त्यर्थस्तदा नोपमानाद्भिद्यते । अथासिद्धसाधनार्थो नोदाहरणाद् भिद्यते । यद्युपमानं प्रमाणे ऽन्तर्भाव्यः अथोदाहरणमवयव इति न पृथग् दृष्टान्तो ऽस्तीति । इदं तूत्तरमप्रतिसमाधेयमिति पश्यामः । कस्मात् । त्रयस्याप्यपरिज्ञानात् । सारूप्यव्युत्पत्त्यर्थं तावदुपमानं न भवतीति वर्णितम् । दृष्टान्तः सारूप्यव्युत्पत्त्यर्थः असिद्धसाधनार्थो वेति दृष्टान्तो न भवति । तदुदाहरणं वर्णयन्तो वक्ष्याम इति । न्या॰ वा॰ । न खल्वसिद्धः साध्येन साधनस्याविनाभावो दृष्टान्तेन साध्यतइत्यर्थः । ता॰ टी॰ ।

¶ अत्र भाष्यकारः सिद्धान्तसामान्यलक्षणसूत्रमपठित्वैव तात्पर्यं व्याचष्टे अथ सिद्धान्त इत्यादिनेति तात्पर्यटीकायां दृश्यते तेन सामान्यलक्षणसूत्रं किमप्यासीद्यदद्यत्वे न क्वाप्युपलभ्यते इति बोध्यम् ।

** सामान्योपक्रमस्याभ्युपगमस्य प्रमाणतो विशेषपर्यन्तता परिसमाप्तिः संस्थितिरित्यर्थः । ता॰ टी॰ ।

तन्त्रार्थसंस्थितिः तन्त्रसंस्थितिः तन्त्र*मितरेतराभिसंबद्धस्यार्थसमूहस्योपदेशः शास्त्रम् । अधिकरणानुषङ्गा†र्था संस्थितिरधिकरणसंस्थितिः अभ्युपगमसंस्थितिरनवधारितार्थपरिग्रहः तद्विशेषपरीक्षणाद्याभ्युपगमसिद्धान्तः । तन्त्रभेदात्तु खलु स चतुर्विधः‡ ।

सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ २७ ॥

तच्चैताश्चतस्रः संस्थितयो ऽर्थान्तरभूताः । तासाम् ।

सर्वतन्त्राविरुद्धस्तन्त्रे ऽधिकृतो ऽर्थः सर्वतन्त्रसिद्धान्तः ॥ २८ ॥

यथा घ्राणादीनीन्द्रियाणि§ गन्धादय इन्द्रियार्थाः पृथिव्यादीनि भूतानि प्रमाणैरर्थस्य ग्रहणमिति ।

---

* तन्त्रग्रहणेन च सर्वतन्त्रप्रतितन्त्रयोरुपादानमुभयोरपि तन्त्रत्वात् । ता. टी. ।

† अनुप्रक्तार्थसंस्थितिरिति. ५ । २ । ४ पाठः ।

‡ किं पुनरिदं सूत्रं लक्षणार्थमाहो विभागार्थमिति । किं चातः । यदि लक्षणार्थं तन्त्राधिकरणग्रहणं न कर्तव्यम् एतावदस्त्वभ्युपगमव्यवस्था सिद्धान्त इति । अथ विभागार्थं सर्वतन्त्रप्रतितन्त्रग्रहणं कर्तव्यं प्रतिज्ञादिवत् । लक्षणार्थं च सूत्रान्तरं वक्तव्यम् । सर्वतन्त्रप्रतितन्त्राभ्युपगमसंस्थित्यर्थान्तरभावादिति सूत्रस्यान्यो ऽर्थो वक्तव्यः । अथेदं विभागार्थं तथापि पूर्वसूत्रं परित्यज्यताम् । अथ विभक्तानां पुनर्विभागः । त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरिति व्याहन्येत । विभागश्च नियमार्थः । विभक्तानां विभागः किमर्थः । यदि नियमार्थः । आद्येन सूत्रेण कृतत्वाच्च प्रयोजनमस्तीति । तस्मात्पूर्वमुत्तरं वा सूत्रमनार्षमिति । नानार्षम् । आद्यस्य लक्षणार्थत्वादुत्तरस्य विभागार्थत्वादिति । विभागश्च नियमार्थ इत्युक्तम् । एतेनानेकधा भिन्नस्य सिद्धान्तस्य चतुर्धा संग्रह इति नियमं दर्शयति । अथाद्यं सूत्रं कथं लक्षणार्थमिति । तन्त्राधिकरणानामर्थानामभ्युपगम इति सूत्रार्थः । तन्त्रमधिकरणं येषामर्थानां भवति ते तन्त्राधिकरणाः । तेषामभ्युपगमसंस्थितिरित्थंभावव्यवस्था धर्मनियमः सिद्धान्तो भवतीति । किमुक्तं भवति । यो ऽर्थो न सूत्रितस्तस्याभ्युपगमो न सिद्धान्त इति । न्या. वा. ।

§ यद्यपि घ्राणादिषु भौतिकत्वादयो विप्रतिपत्तयस्तथापीन्द्रियत्वे नास्ति विप्रतिपत्तिरिति । ता. टी. । न दृष्टान्तात् सर्वतन्त्रसिद्धान्तो भिद्यते न चापि विप्रतिपत्तिरिहापीति । भिद्यतइत्याह । दृष्टान्तो हि वादिप्रतिवादिभ्यामेव

समान*तन्त्रासिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ॥ २९ ॥

यथा नासत आत्मलाभः न सत आत्महानं निरतिशयाश्चेतनाः देहेन्द्रियमनःसु विषयेषु† तत्तत्कारणे च विशेष इति सांख्यानां पुरुषकर्मादिनिमित्तो भूतसर्गः‡ कर्महेतवो दोषाः प्रवृत्तिश्च स्वगुणविशिष्टाश्चेतनाः असदुत्पद्यते उत्पन्नं निरुध्यतइति योगानाम् ।

यत्सिद्धावन्यप्रकरणसिद्धिः सो ऽधिकरणसिद्धान्तः ॥ ३० ॥

यस्यार्थस्य सिद्धाऽवन्ये ऽर्था अनुषज्यन्ते न तैर्विना सो ऽर्थः सिध्यति ते ऽर्था यदधिष्ठानाः सो ऽधिकरणसिद्धान्तः । यथा देहेन्द्रियव्यतिरिक्तो ज्ञाता दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिभिः । अचानुषङ्गिणो ऽर्था इन्द्रियनानात्वं नियतविषयाणीन्द्रियाणि स्वविषयग्रहणलिङ्गानि ज्ञातुर्ज्ञानसाधनानि गन्धादिगुणव्यतिरिक्तं द्रव्यं गुणाधिकरणमनियतविषयाश्चेतना इति पूर्वार्थसिद्धावेते ऽर्थाः सिध्यन्ति न तैर्विना सो ऽर्थः संभवतीति ।

निश्चितो न पुनरेवं सर्वतन्त्रसिद्धान्त इति । अनुमानागमयोराश्रयो दृष्टान्तो नैवं सर्वतन्त्रसिद्धान्त इति । न्या· वा· ।

* समानशब्द एकपर्यायः । निरतिशया अपरिणामिनो न केन चिद्धर्मेणोपजनापायधर्मणा युज्यन्ते । प्राकृतेषु च तत्कारणेषु महदहङ्कारपञ्चतन्मात्रभूतसूक्ष्मेषु विशेषो ऽतिशय इत्यर्थः । ता· टी· ।

† मनःस्वविषयेष्विति ३ पु· पाठः ।

‡ पुरुषनिमित्तभूतसंसर्ग इति ३ पु· पाठः ।

§ यस्यार्थस्य साध्यस्य हेतोर्वा सिद्धाविति विषयसप्तमी । न निमित्तसप्तमी । द्वयोर्ज्ञायमानयोर्निमित्तनैमित्तिकभावायोगात् । तेन यस्मिन्नर्थे ज्ञायमाने तदनुषङ्गिणो ऽर्थास्तदन्तर्भावेण गम्यन्ते सो ऽर्थः साक्षादधिक्रियमाणस्तदनुषङ्गिणां चाधारस्तदाश्रयत्वात् । तत्सिद्धः सपक्षो वा भवतु हेतुर्वा अनेन रूपेणाधिकरणसिद्धान्तः । पक्षस्तावद्विवादाध्यासितमुपलब्धिमत्कारणमुत्पत्तिमत्त्वादुस्त्रवदिति । अत्र हि पृथिव्यादिगतेनोत्पत्तिमत्त्वेनोपलब्धिमत्पूर्वकत्वं तद्गतं साध्यमानं स्वसिद्धयन्तर्गतानुषङ्गिसर्वज्ञत्वाद्युपेतमेव सिध्यति । नान्यथेहोपलब्धिमत्पूर्वकत्वस्य सिद्धिरिति । भाष्ये हेतुप्रतिसन्धानं सिध्यत् स्वानुषङ्गार्थान्तरान्वितं सिध्यतीत्युदाहृतम् । ता· टी· ।

अपरीक्षिता*भ्युपगमात्तद्विशेषपरीक्षणम-
भ्युपगमसिद्धान्तः ॥ ३१ ॥

यच्च किं चिदर्थजातमपरीक्षितमभ्युपगम्यते अस्तु द्रव्यं शब्दः स तु नित्यो ऽथानित्य इति द्रव्यस्य सतो नित्यता ऽनित्यता वा तद्विशेषः परीक्ष्यते सो ऽभ्युपगमसिद्धान्तः स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञानाच्च† प्रवर्तत इति ।

अथावयवाः ।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः‡ ॥ ३२ ॥

दशावयवानेके नैयायिका वाक्ये संचक्षते जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदास इति । ते कस्मान्नोच्यन्त इति । तच्चाप्रतीयमाने ऽर्थे प्रत्ययार्थस्य प्रवर्तिका जिज्ञासा अप्रतीयमानमर्थं कस्माज्जिज्ञासते तं तत्त्वतो ज्ञातं हास्यामि वोपादास्ये उपेक्षिष्ये वेति ता एता हानोपादानोपेक्षाबुद्धयस्तत्त्वज्ञानस्यार्थस्तदर्थमयं जिज्ञासते सा खल्वियमसाधनमस्येति जिज्ञासाधिष्ठानं संशयश्च व्याहतधर्मोपसंघातात् क्व ज्ञाने§ प्रत्यासन्नः व्याहतयोर्हि धर्मयोरन्यतरत्तत्त्वं भवितुमर्हतीति । स पृथगुपदिष्टो ऽप्यसाधनमर्थ-

---

* अपरीक्षितो ऽसूत्रितः । न्या. वा. । सूत्रितस्य प्रत्येण परीक्षासम्बन्धात् । मनसो हीन्द्रियत्वेनासूत्रितस्यापीन्द्रियत्वाभ्युपगमो यतः प्रमाणाधिकरणस्तस्मादयमभ्युपगमसिद्धान्त इति । सूत्रं त्वेवं योजनीयम् । असूत्रिताभ्युपगमाद्धेतोर्यत्तद्विशेषपरीक्षणं भवति तस्माद्विशेषपरीक्षणाज् ज्ञायते ऽसूत्रितमभ्युपगतं सूत्रकारेण सो ऽयमभ्युपगमसिद्धान्त इति । ता. टी. । भाष्ये त्वन्यथा व्याख्यातम् ।

† परबुद्ध्यवज्ञानायेति ३ पु. पाठः ।

‡ दशावयवा इति के चित्नैयायिकाः । त्रयो ऽवयवा इति मीमांसकाः । तन्निराकरणार्थं सूत्रम् । परप्रतिपादका ये वाक्ये समूहेतरेतरप्रत्ययितेनार्थेनार्थवन्तो वाक्याङ्गतामुपयान्ति ते ऽवयवाः । वाक्याङ्गत्वमवयवार्थः । वाक्याङ्गत्वमवयवत्वम् । किं पुनर्वाक्यम् । यस्य प्रतिज्ञादिभिरुपस्कृतस्य विशेषास्थापनमर्थः तद्वाक्यम् । वाक्यार्थं संहत्यते निष्पादयन्तीत्यवयवा इत्युच्यन्ते । न पुनर्जिज्ञासादयः परप्रतिपादका इत्यतो न वाक्यस्यावयवा इति । निश्चितत्वाच्च । निश्चितश्च साधयिता भवति न तस्य जिज्ञासासंशयौ स्तः । प्रयोजनमपि साधनादेव गम्यते शक्यप्राप्तिश्चेति । न ह्यशक्यमप्रयोजनं वा कश्चित्साधयति । तस्मात् प्रयोजनशक्यप्राप्ती अपि न वाक्यावयवौ । न्या. वा. ।

§ धर्मोपसंघातस्तत्त्वज्ञाने इति ३ पु. पाठः । संघातात् तत्त्वज्ञाने इति ४ । ५ पु. पा. ।

स्येति । प्रमातुः प्रमाणानि प्रमेयाधिगमार्थानि सा शक्यप्राप्तिर्न साधकस्य वाक्यस्य भागेन युज्यते प्रतिज्ञादिवदिति । प्रयोजनं तत्त्वावधारणमर्थसाधकस्य वाक्यस्य फलं नैकदेश इति । संशयव्युदासः प्रतिपक्षोपवर्णनं तत्प्रतिषेधे तत्त्वाभ्यनुज्ञानार्थं न त्वयं (*साधकवाक्यैकदेश इति प्रकरणे† तु जिज्ञासादयः समर्था अवधारणीयार्थोपकारात् तत्त्वसाधकभावात्तु प्रतिज्ञादयः) साधकवाक्यस्य भागा एकदेशा अवयवा इति ।

तेषां तु यथाविभक्तानाम् ।

साध्यनिर्देशः प्रतिज्ञा ॥ ३३ ॥

प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं प्रतिज्ञा‡ प्रतिज्ञा साध्यनिर्देशः अनित्यः शब्द इति ।

उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः§ ॥ ३४ ॥

---

* ( ) एतच्चिह्नाङ्कितः पाठः ४ । ३ नास्ति ।

† प्रकरणमेते तथोपकुर्वन्तीति । न हि जिज्ञासादीनन्तरेण प्रकरणस्योत्थानमस्तीति प्रकरणोत्थापका नावयवा जिज्ञासादय इति । परप्रतिपादकत्वात्तु प्रतिज्ञादीनामधिकार इति तउपदिश्यन्ते । अवयवमपि वाक्यं तथा न भवति तथोपनयनिगमनयोरर्थान्तरभावं वर्णयन्तो वक्ष्यामः । न्या· वा· ।

‡ परिगृह्यते ऽनेनेति परिग्रहः स च वचनं चेति परिग्रहवचनम् । ता· टी· । सिषाधयिषितस्यार्थस्य वचनमित्यर्थः ।

§ श्रुत्यर्थाभ्यामुभयलक्षणसूचनात्सूत्रम् । अत्र हेतुरिति लक्ष्यनिर्देशः स च विभागोद्देशे वाक्यावयव इति वचनरूपः । तस्य सामान्यलक्षणं साध्यसाधनं साध्यते ऽनेनेति व्युत्पत्त्या यद्यपि पारार्थ्यापत्तं कृतकत्वादिकमर्थमाह तथापि तस्य वचनात्मकहेतुसामानाधिकरण्यानुपपत्तेर्विषयि कृतकत्वादित्यादिकं वचनमुपलक्षयति । यदि तु वचनं हेतुरित्युच्यते तत्साध्येन समभिव्याहृतं प्रतिज्ञा स्यात् । अथ वचनमित्येतावदुच्येत तदा अतिव्याप्तिः । उपचारे तु न क्व चित्प्रसङ्गः । उपनयादपि साधनं न पराङ्गतया गम्यते । किं तु प्रातिपदिकार्थप्रधानतया स्वनिष्ठमिति न तत्रापि प्रसङ्गः । हेत्वाभासाश्च न साधनमिति साधनपदेनैव निराकृताः । न्यायवाक्यावयवत्वेन च नान्यशब्दे प्रसङ्गः । इदं चार्थं श्रौतं तु विशेषलक्षणं हेतुरिति यद्यपि सामान्यपदं तथापि प्रकरणादन्वयव्यतिरेकिहेतुविशेषपरं द्रष्टव्यम् । तेन हेतुरिति लक्ष्यनिर्देशः परिशिष्टं तु लक्षणम् । साधर्म्यपदव्याख्यानं सामान्यादिति । साध्यसाधनपदव्याख्यानं साध्यस्य धर्मस्येति । साध्यस्येति धर्ममात्रे बुद्धिर्मा भूदत उक्तं धर्मस्येति । धर्मसहितस्य धर्मिण इत्यर्थः । तदेव स्फुटयति प्रतिसन्धायेति । उदाहरणसाधर्म्यात् साध्यस्ये-

3790

उदाहरणेन सामान्यात्साध्यस्य धर्मस्य* साधनं प्रज्ञापनं† हेतुः साध्ये प्रतिसंधाय‡ धर्ममुदाहरणे च प्रतिसंधाय तस्य साधनतावचनं हेतुः उत्पत्तिधर्मकत्वादिति । उत्पत्तिधर्मकमनित्यं दृष्टमिति ।

किमेतावद्धेतुलक्षणमिति । नेत्युच्यते किं तर्हि ।

तथा वैधर्म्यात् ॥ ३५ ॥

उदाहरणवैधर्म्याच्च§ साध्यसाधनं हेतुः । कथम् अनित्यः शब्दः उत्पत्तिधर्मकं नित्यं यथा आत्मादिद्रव्यमिति‖ ।

साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्¶ ॥ ३६ ॥

साध्येन साधर्म्यं समानधर्मता साध्यसाधर्म्य**त्कारणात्तद्धर्मभावी दृष्टान्त इति । तस्य धर्मस्तद्धर्मः । तस्य साध्यस्य । साध्यं च द्विविधं धर्मिविशिष्टो वा धर्मः शब्दस्यानित्यत्वं धर्मविशिष्टो वा धर्मी अनित्यः शब्द इति । इहोत्तरं तद्ग्रहणेन गृह्यतइति कस्मात्पृथग्धर्मवचनात् । तस्य धर्मस्तद्धर्मस्तस्य†† भावस्तद्धर्मभावः स यस्मिन् दृष्टान्ते वर्तते स दृष्टान्तः साध्यसा-

---

त्यनेनान्वयपक्षधर्मत्वे अन्वयव्यतिरेकपक्षधर्मत्वानि च दर्शितानि । साध्यसाधर्म्यमित्यत्र च साध्यग्रहणेनाबाधितविषयत्वासत्प्रतिपक्षितत्वे तद्विपरीतस्य साधनानर्हत्वात् । ता· टी· ।

* धर्मस्येति ४ । ३ नास्ति । † प्रतिज्ञानमिति· ४ । ३ प्रज्ञानमिति २ । ५ पाठः ।

‡ प्रतिसंधीयेति ४ । २ । ३ पु· पाठः ।

§ अत्र यदि वैधर्म्यादित्युच्यते ततः सकलकेसरादिमत्पदार्थपक्षीकरणेनाश्वत्वं यदि विषाणेन साध्यते तदा ऽस्ति पक्षवैधर्म्यमिति हेतुः स्यादित्यत उदाहरणेन वैधर्म्यमिति । विपक्षेणेत्यर्थः । ता· टी· ।

‖ अत्रेदमुदाहरणं पूर्वोक्तोदाहरणाद्विलक्षणयाभावेन दूषयित्वा नेदं निरात्मकं जीवच्छरीरमप्राणादिमत्त्वप्रसङ्गादिति वार्तिके उदाहरणान्तरं दत्तम् । अन्वय्युदाहरणं च पूर्वसूत्रेकेवलव्यतिरेक्युदाहरणं चात्रेति विलक्षणयं च प्रदर्शितम् ।

¶ साध्येन धर्मेण शब्देन साधर्म्यं दृष्टान्तस्य स्याल्यादेः कृतकत्वं हेतुः तदनित्यत्वेन साध्ये शब्दे दृष्टान्ते च स्याल्यादौ समानम् । तस्मात्कारणात्प्रयोजकात्तद्धर्मभावी तस्यैव साध्यस्य शब्दस्य धर्मः धर्मान्तरं येन विशिष्टः शब्दः सिषाधयिषितो ऽनित्यत्वेन तदनित्यत्वं तद्धर्मः स एव भावस्तद्धर्मभावः सो ऽस्यास्तीति तद्धर्मभावी स्याल्यादिरनित्यत्वधर्मवानिति यावत् । तेन तादृशा दृष्टान्तेन उपलक्षितं सद्विषयं वचनमुदाहरणमिति । ता· टी· ।

** साध्येन साधर्म्यात् समानधर्मत्वादिति ५ । ४ । २ । ३ पाठः ।

†† तद्धर्मस्य भाव इति ५ । ४ । २ । ३ पाठः ।

धर्म्यात्तद्धर्मभावी भवति स चोदाहरणमिष्यते* तच्च यदुत्पद्यते तदुत्पत्तिधर्मकम् । तच्च भूत्वा न भवति आत्मानं जहाति †निरुध्यतइत्यनित्यम् । एवमुत्पत्तिधर्मकत्वं साधनमनित्यत्वं साध्यं सो ऽयमेकस्मिन्द्वयोर्धर्मयोः साध्यसाधनभावः साधर्म्याद्व्यवस्थित उपलभ्यते तं दृष्टान्ते उपलभमानः शब्दे ऽप्यनुमिनोति शब्दो ऽप्युत्पत्तिधर्मकत्वादनित्यः स्थाल्यादिवदित्युदाह्रियते तेन धर्मयोः साध्यसाधनभाव इत्युदाहरणम् ।

तद्विपर्ययाद्वा विपरीतम् ॥ ३७ ॥

दृष्टान्त उदाहरणमिति प्रकृतं साध्यवैधर्म्या‡दतद्धर्मभावी दृष्टान्त उदाहरणमिति । अनित्यः शब्द उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकं नित्यमात्मादि सो ऽयमात्मादिर्दृष्टान्तः साध्यवैधर्म्यादनुत्पत्तिधर्मकत्वादतद्धर्मभावी यो ऽसौ साध्यस्य धर्मो नित्यत्वं स तस्मिन्न भवतीति । अचात्मादौ दृष्टान्ते उत्पत्तिधर्मकत्वस्य भावादनित्यत्वं न भवतीति उपलभमानः

---

* अत्र साध्यसाधर्म्यग्रहणेन साधनविकलमनुदाहरणं भवतीत्युक्तं भवति । यथा नित्यः शब्दो ऽमूर्तत्वात्परमाणुवदिति । तद्धर्मभावीत्यनेन च साध्यविकलं परास्तम् । यथा नित्यः शब्दो ऽमूर्तत्वात् कर्मवदिति । एतेनोभयविकलमपि परास्तं यथा नित्यः शब्दो ऽमूर्तत्वाद् घटवदिति । पञ्चम्युपादानेन च यत्र वचने साध्यसाधर्म्यप्रयुक्तं तद्धर्मभावित्वं प्रदर्श्यते तदेवोदाहरणं नान्यदिति दर्शितं भवति । प्रयोज्यत्वं च साध्यसाधर्म्यस्य हेतोः स्वाभाविकः सम्बन्धो व्याप्यत्वमिति यावत् । प्रयोज्यत्वं च साध्यधर्मस्य व्यापकत्वमेव । तेनाप्रदर्शितान्वयविपरीतप्रदर्शितान्वययोरनुदाहरणत्वमुक्तं भवति । तद्यथा अनित्यः शब्द उत्पत्तिमत्त्वाद् घटवदिति । यो यो ऽनित्यः स स उत्पत्तिमान् यथा घट इति । समाख्यानिर्वचनसामर्थ्यात्सामान्यलक्षणमनेन सूचितमित्याशयवता भाष्यकृता समाख्यानिरुक्तिः कृता उदाह्रियते ऽनेनेति । ता॰ टी॰ ।

† विरुध्यतइति १ पाठः ।

‡ सात्मकतया साध्येन जीवच्छरीरेण वैधर्म्याद् घटादेर्दृष्टान्तस्य सात्मकत्वसाधर्म्यविरहादिति यावत् । तस्य साध्यस्य जीवच्छरीरस्य धर्मः प्राणादिमत्त्वं तद्धर्मः स एव भावस्तद्धर्मभावः सो ऽस्यास्तीति तद्धर्मभावी न तद्धर्मभावी अतद्धर्मभावी प्राणादिरहितो घटादिरिति यावत् । एतदुक्तं भवति । यत्र घटादौ साध्यधर्माभावप्रयुक्तसाधनधर्माभावः स घटादिर्वैधर्म्यदृष्टान्तः तद्विषयः शब्द उदाहरणमिति । सूत्रस्थश्च वाशब्दः समुच्चये वेदितव्यः । व्यतिरेकविषयत्वाद्वैधर्म्योदाहरणस्येति । ता॰ टी॰ । अत्रत्यं भाष्योदाहरणमन्वयव्यतिरेकिरूपतया पूर्वेणैव गतार्थमिति मत्वा केवलव्यतिरेकी हेतुस्तदुदाहरणं चास्य सूत्रस्येति वार्तिकम् ।

शब्दे विपर्ययमनुमिनोति उत्पत्तिधर्मकत्वस्य भावादनित्यः शब्द इति । साधर्म्योक्तस्य हेतोः साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् । वैधर्म्योक्तस्य हेतोः साध्यवैधर्म्यादतद्धर्मभावी दृष्टान्त* उदाहरणम् । पूर्वस्मिन् दृष्टान्ते यौ तौ धर्मौ† साध्यसाधनभूतौ पश्यति साध्ये ऽपि तयोः साध्यसाधनभावमनुमिनोति उत्तरस्मिन् दृष्टान्ते ययोर्धर्मयोरेकस्याभावादितरस्याभावं पश्यति तयोरेकस्याभावादितरस्याभावं साध्ये ऽनुमिनोतीति तदेतद्धेत्वाभासेषु न संभवतीत्यहेतवो हेत्वाभासाः । तदिदं हेतूदाहरणयोः सामर्थ्यं परमसूक्ष्मं दुःखबोधं पण्डितरूप‡वेदनीयमिति ।

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ ३८ ॥

उदाहरणापेक्षः उदाहरणतन्त्रः उदाहरणवशः । वशः सामर्थ्यम् । साध्यसाधर्म्ययुक्ते उदाहरणे स्थाल्यादि द्रव्यमुत्पत्तिधर्मकमनित्यं दृष्टं तथा शब्द उत्पत्तिधर्मक इति साध्यस्य शब्दस्योत्पत्तिधर्मकत्वमुपसंह्रियते साध्यवैधर्म्ययुक्ते पुनरुदाहरणे आत्मादि द्रव्यमनुत्पत्तिधर्मकं नित्यं दृष्टं न च तथा शब्द इति अनुत्पत्तिधर्मकत्वस्योपसंहारप्रतिषेधेनोत्पत्तिधर्मकत्वमुपसंह्रियते । तदिदमुपसंहारद्वैतमुदाहरणद्वैताद्भवति । उपसंह्रियते ऽनेनेति चोपसंहारो वेदितव्य इति । द्विविधस्य पुनर्हेतोर्द्विविधस्य चोदाहरणस्योपसंहारद्वैते‖ च समानम् ।

---

* साध्यवैधर्म्यादेस्तद्भावी दृष्टान्त इति ३ पु. पाठः ।

† धर्मीति २ । ३ पु. पाठः ।

‡ पण्डितरूपवेदनीयं प्रशस्तपण्डितवेदनीयमित्यर्थः । ता. टी. ।

§ ननु हेतोरुपसंहार उपनयो न साध्यस्य तथा चानुपपन्नः साध्यस्योपसंहार इत्यत उक्तं साध्यस्य शब्दस्योत्पत्तिधर्मकत्वमिति । उदाहरणसिद्धव्याप्तिकहेतुमत्तया साध्यमुपसंह्रियते न स्वरूपेणेत्यर्थः । अत्राप्युदाहरणापेक्ष उपसंहार उपनय इति सामान्यलक्षणं तथा न तथेति च सामान्यलक्षणापेक्षे विशेषलक्षणे इति बोध्यम् । ता. टी. ।

‖ द्वैतमिति ५ पाठः

***हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ ३९ ॥**

साधर्म्योक्ते वा वैधर्म्योक्ते वा यथोदाहरणमुपसंह्रियते तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति निगमनम् । निगम्यन्ते अनेनेति प्रतिज्ञाहेतूदाहरणोपनया एकचेति निगमनं निगम्यन्ते समर्थ्यन्ते संबध्यन्ते । तच्च साधर्म्योक्ते तावद्धेतौ वाक्यमनित्यः शब्द इति प्रतिज्ञा । उत्पत्तिधर्मकत्वादिति हेतुः । उत्पत्तिधर्मकं स्थाल्यादि द्रव्यमनित्यमित्युदाहरणम् । तथा चोत्पत्तिधर्मकः शब्द इत्युपनयः । तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति निगमनम् । वैधर्म्योक्तेऽपि अनित्यः शब्द उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकमात्मादि द्रव्यं नित्यं दृष्टं न च तथाऽनुत्पत्तिधर्मकः शब्दः तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति । अवयवसमुदाये च वाक्ये‡ संभूयेतरेतराभिसंबन्धात्प्रमाणान्यर्थं साधयन्तीति । संभवस्तावच्छब्दविषया प्रतिज्ञा आप्तोपदेशस्य प्रत्यक्षानुमानाभ्यां प्रतिसंधानादृषेश्च स्वातन्त्र्यानुपपत्तेः अनुमानं हेतुः उदाहरणे सादृश्यप्रतिपत्तेः §तच्चोदाहरणं भाष्ये व्याख्यातम् । प्रत्यक्षविषयमुदाहरणं दृष्टेनादृष्टसिद्धेः । उपमानमुपनयः तथेत्युपसंहारात् न च तथेति चोपमानधर्मप्रतिषेधे‖ विपरीतधर्मोपसंहारसिद्धेः । सर्वेषामेकार्थप्रतिपत्तौ सामर्थ्यप्रदर्शनं निगमनमिति । इतरेतराभिसंबन्धोऽप्यसत्यां प्रतिज्ञायामनाश्रया हेत्वादयो न प्रवर्तेरन् । असति हेतौ कस्य साधनभावः प्रदर्श्येत । उदाहरणे साध्ये च कस्योपसंहारः स्यात्कस्य चापदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनं स्यादिति । असत्युदाहरणे केन साधर्म्यं वैधर्म्यं वा साध्यसाधनमुपादीयेत कस्य वा साधर्म्यवशादुपसंहारः प्रवर्तेत । उपनयं चान्तरेण साध्येऽनुपसंहृतः साधको धर्मो नार्थं साधयेत् निगमनाभावे** नानभिव्यक्तसंबन्धानां प्रतिज्ञादीनामेकार्थेन प्रवर्तनं तथेति प्रतिपादनं कस्येति†† ।

---

* आप्तोपदेशादिति ४ पाठः ।

† यद्यपि च सिद्धनिर्देशो निगमनं साध्यनिर्देशश्च प्रतिज्ञा तथापि यस्यैव प्रतिज्ञायां साध्यत्वमासीत्तस्यैव निगमने सिद्धत्वमित्यवस्थावन्तमेकमाश्रित्य समानविषयतया निगमनं प्रतिज्ञेत्युपचर्यते तथा च पुनर्वचनमुपपन्नमिति । व्याप्तता० टी० ।

‡ समुदायेति ४ । २ । ३ पाठः ।

§ संदृश्येति ४ । २ । ३ पाठः ।

‖ न तथेति चोपमानप्रतिषेधे इति ३ पु० पाठः ।

¶ संबन्धे इति ५ पाठः ।

** निगमनाभावे चेति ५ । ४ । २ पाठः ।

†† एकार्थेन प्रतीयेतार्थप्रतिपादकत्वमिति इति ३ पु० पाठः ।

अथावयवार्थः । साध्यस्य धर्मस्य धर्मिणा संबन्धोपादानं प्रतिज्ञार्थः । उदाहरणेन समानस्य विपरीतस्य वा साध्यस्य धर्मस्य साधर्म्यभाववचनं हेत्वर्थः । धर्मयोः साध्यसाधनभावप्रदर्शनमेकचोदाहरणार्थः । साधनभूतस्य धर्मस्य साध्येन धर्मेण सामानाधिकरण्योपपादनमुपनयार्थः । उदाहरणस्थयोर्द्धर्मयोः साध्यसाधनभावोपपत्तौ साध्ये विपरीतप्रसङ्गप्रतिषेधार्थं * निगमनम् । न चैतस्यां हेतूदाहरणपरिशुद्धौ सत्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिनिग्रहस्थानबहुत्वं प्रक्रमते । अव्यवस्थाप्य खलु धर्मयोः साध्यसाधनभावमुदाहरणे जातिवादी प्रत्यवतिष्ठते । व्यवस्थिते तु खलु धर्मयोः साध्यसाधनभावे दृष्टान्तस्थे गृह्यमाणे साधनभूतस्य धर्मस्य हेतुत्वेनोपादानं न साधर्म्यमात्रस्य न वैधर्म्यमात्रस्य वे†ति ।

अत ऊर्ध्वं तर्कौ लक्षणीयस्तर्क‡ इति । अथेदमुच्यते ।

अविज्ञाततत्त्वे ऽर्थे§कारणोपपत्तित-
स्तत्त्वज्ञानार्थमूहस्तर्कः‖ ॥ ४० ॥

---

* साधने प्रतिपन्ने वा साध्यविपरीतप्रसङ्गः स्यादिति सोयं प्रतिज्ञाविषयस्यार्थस्याशेषप्रमाणमूलावयवोपपत्तौ सत्यां प्रतिज्ञेयार्थस्य सिद्धतया पुनर्वचनेन निगमनेन प्रतिबध्यते । न च प्रतिज्ञावचनादेव तत्सिद्धं तस्य साध्यपरत्वात् । न चान्यपरादप्यापेक्षात्सिद्धिः । हेत्वादिप्रयोगवैयर्थ्यप्रसङ्गात् । प्रतिज्ञात एव सर्वाक्षेपात् । तस्माद्रूपद्वयप्रतिपादनार्थं निगमनम् । एतेन निगमनं प्रतिज्ञायाः समानाभिधेयत्वेपि प्रतिज्ञात्वेन प्रत्युक्तम् । प्रतिज्ञायाः साध्यपरत्वात् निगमनस्य च विपरीतशङ्कानिवृत्तिपरत्वादिति । ता· टी· ।

† चेति ४ । २ । ३ पाठः ।

‡ अत्र भाष्यकारेणैकस्मिन्नन्वयव्यतिरेकिण्येव वीतावीतवाक्ये उदाहृते इति कदा चिद् भ्रान्तिः स्यादेकोदाहरणतया द्वे अपि वाक्ये परस्परापेक्षे एवेति तन्निराकरणावतारपरमत ऊर्ध्वमिति । ता· टी । अवयवनिरूपणोत्तरं क्रमप्राप्तत्वाच्च ।

§ कारणोपपत्तिस्तस्य तत्त्वज्ञानार्थमिति ४ पाठः ।

‖ यद्यूहस्तर्क इत्येतावदुच्यते यदि वा तत्त्वज्ञानार्थमूहस्तर्क इत्येतावन्मात्रं ततो विज्ञाततत्त्वे ऽपि यदोहः पूर्वानुभवपरिच्छेदात्मा जायते पुनस्तत्त्वज्ञानार्थं सोपि तर्कः स्यात्तस्माद्विज्ञाततत्त्व इति वक्तव्यमित्यर्थः । यद्यपि कारणोपपत्तित इत्येतस्मादप्ययमर्थो गम्यतएव तथापि कारणोपपत्तेरेवंरूपत्वं नाविज्ञाततत्त्वग्रहणमन्तरेण भवति । तथा हि । अधिगतपरिच्छेदात्मा ऽप्यूहः कारणस्योपपत्त्या सम्भवेन जायते । कारणासम्भवे कार्यस्यासम्भवात् न त्वसावविज्ञाततत्त्व इति

अविज्ञायमानतत्त्वे ऽर्थे जिज्ञासा तावज्जायते जानीयेम*मिति। अथ जिज्ञासितस्य वस्तुनो व्याहतौ धर्मौ विभागेन विमृशति† किं स्विदित्येवमाहो स्विन्नेदं‡मिति। विमृश्यमानयोर्धर्मयोरेकं कारणोपपत्त्या ऽनुजानाति सम्भवत्यस्मिन् कारणं प्रमाणं हेतुरिति। कारणोपपत्त्या§ स्यादेवमेतन्नेतरदिति‖ तच्च निदर्शनं यो ऽयं ज्ञाता ज्ञातव्यमर्थं जानीते तं च भोक्¶ जानीयेति जिज्ञासा। स किमुत्पत्तिधर्मको ऽनुत्पत्तिधर्मक इति विमर्शः। विमृश्यमाने ऽविज्ञाततत्त्वे ऽर्थे यस्य धर्मस्याभ्यनुज्ञाकारणमुपपद्यते तमनुजानाति। यद्ययमनुत्पत्तिधर्मकः ततः तस्य** कृतस्य कर्मणः फलमनुभवति ज्ञाता दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरमुत्तरं पूर्वस्य†† पूर्वस्य कारणमुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति स्यातां संसारापवर्गौ। उत्पत्तिधर्मके ज्ञातरि पुनर्न स्याताम्। उत्पन्नः खलु ज्ञाता देहेन्द्रियबुद्धिवेदनाभिः संबध्यतइति नास्येदं स्वकृतस्य कर्मणः फलमुत्पन्नश्च भूत्वा न भवतीति तस्याविद्यमानस्य निरुद्धस्य वा स्वकृतकर्मणः फलोपभोगो नास्ति तदेवमेकस्यानेकशरीरयोगः शरीरवियोग‡‡श्चात्यन्तं न स्यादिति यच्च कारणमनुप-

---

ततो व्यवच्छेदः। तथा च सति प्रमाणमपि तर्कः स्यादत उक्तं कारणोपपत्तित इति। उक्ते सति प्रयोजनानुसरणं न त्विह लाघवादरः सूत्रकारस्येति मन्तव्यम्। ता॰ टी॰।

* जानीये इममर्थमिति ५ पाठः।

† यद्यपि संशयस्य पश्चादेव जिज्ञासा भवति तथापि जिज्ञासायाः पश्चादपि संशयो भवति स चात्र विवक्षितः। तर्कप्रवृत्त्यङ्गत्वात्तर्केण हि प्रसङ्गापरनाम्ना द्वयोः पक्षयोरेकतरनिषेधेनैकतरः प्रमाणविषयतया ऽभ्यनुज्ञातव्य इति विषयप्रत्यासत्त्या तर्कप्रवृत्तिं प्रत्यङ्गता संशयस्येति। ता॰ टी॰।

‡ नैवमिति ५। २ पाठः।

§ कारणोपपत्तिः कारणसम्भवः। अनुज्ञाया आकार एवमेतन्नेतरदिति। एतदुक्तं भवति। यस्मिन्विषये प्रमाणं प्रवर्तितुमुद्यतं तद्विपर्ययाशङ्कायां न तत्प्रवर्तते यावदनिष्टापत्त्या विपर्ययाशङ्का नापनीयते। तदपनय एव च स्वविषये प्रमाणसम्भव इति चोपपत्तिरित्याख्यायते। तया प्रमाणस्योपपत्त्या इतिकर्तव्यतया प्रमाणस्याभ्यनुज्ञातस्य विशोधिते विषये प्रमाणमप्रत्यूहं प्रवर्तते। न चोत्पत्तिरेवास्तु निश्चयहेतुः कृतं प्रमाणेनेति वक्तव्यम्। उपपत्तेः स्वतन्त्राया आश्रयासिद्धतया स्वतो निश्चयायोगात्। ता॰ टी॰।

‖ आहो स्विन्नेदमिति ३ पु॰ पाठः।

¶ तत्त्वतो जानीयेममिति ४। २ पाठः।

** ततः स्वकृतस्येति ५। ४। २ पाठः।

†† पूर्वस्येत्येकमेव ४। २ पुस्तकयोः।

‡‡ शरीरवियोगश्चेति ४। २। ३ नास्ति।

पद्यमानं पश्यति तच्चानुजानाति सो ऽयमेवंलक्षण ऊहस्तर्क इत्युच्यते । कथं पुनरयं तत्त्वज्ञानार्थो न तत्त्वज्ञानमेवेति । अनवधारणात् अनुजानात्ययमेकतरं धर्मं कारणोपपत्त्या न * त्ववधारयति न व्यवस्यति न निश्चिनोति एवमेवेदमिति । कथं तत्त्वज्ञानार्थ इति तत्त्वज्ञानविषयाभ्यनुज्ञालक्षणानुग्†होद्भावितात्प्रसन्ना‡दनन्तरं प्रमाणसामर्थ्यात्तत्त्वज्ञानमुत्पद्यतइत्येवं तत्त्वज्ञानार्थ इति । सो ऽयं तर्कः प्रमाणानि प्रतिसंदधानः प्रमाणाभ्यनुज्ञानात् प्रमाणसहितो वादे प्रदिष्ट इति । अविज्ञा§तततत्त्वमनुजानाति यथा सो ऽर्थो भवति तस्य यथा भाव‖स्तत्त्वमविपर्ययो याथातथ्यम् । एतस्मिंश्च तर्कविषये ।

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ ४१ ॥

स्थापना साधनं प्रतिषेध उपालम्भः । तौ साधनोपालम्भौ पक्षप्रतिपक्षाश्रयौ¶ व्यतिषक्तावनुबन्धेन प्रवर्त्तमानौ पक्षप्रतिपक्षावित्युच्येते । तयोरन्यतरस्य निवृत्तिः एकतरस्यावस्थानमवश्यं **भावि तस्या††वस्थापनं तस्यावधारणं निर्णयः । नेदं पक्षप्रतिपक्षाभ्यामर्थावधारणं संभवतीति । ‡‡ एको हि प्रतिज्ञात§§मर्थं तं हेतुतः स्थापयति प्रतिषिद्धं चोद्धरतीति । द्वितीयस्य द्वितीयेन स्थापनाहेतुः प्रतिषिध्यते तस्यैव प्रतिषेधहेतुश्चोद्धियते स निवर्त्तते ।

---

* एकतरकारणोपपत्त्येति ३ पु. पाठः । † लक्षणादूहादिति ५ । ४ । २ पाठः ।

‡ भावितात् चिन्तितात् । प्रसन्नादबाधितादित्यर्थः । **प्रमाणसामर्थ्यादित्यनेन तर्कस्य स्वातन्त्र्यमपाकरोति** । ता. टी. ।

§ अविज्ञाततत्त्वेर्थइति यथा सोर्थो भवतीति २ अविज्ञाततत्त्वेर्थे यथासौ भवतीति ४ पाठः ।

‖ स तस्य तथा भाव इति ३ पु. पाठः ।

¶ प्रतिपक्षोद्देशेन प्रवृत्त उपालम्भः प्रतिपक्षाश्रय उच्यते ।

** एकस्मिन् वस्तुनि विरुद्धधर्मद्वयासम्भवादिति भावः ।

†† यस्यावस्थानमिति ५ । ४ । २ पाठः ।

‡‡ एको हीत्यादि निर्णय इत्यन्तं नेदं पक्षप्रतिपक्षाभ्यामर्थावधारणं सम्भवतीत्यस्योपपादनम् । वादी प्रतिज्ञातमर्थं हेतुतः स्थापयति द्वितीयस्य प्रतिवादिनः प्रतिषिद्धं प्रतिषेधं वाद्युक्तस्य हेतोर्दूषणमिति यावत् । उद्धरति दूषणाभासीकरोति । द्वितीयेन तु प्रतिवादिना वाद्युक्तस्य हेतोः स्थापनहेतुत्वं प्रतिषिध्यते । तस्यैव वादिनः प्रतिवाद्युक्तदूषणप्रतिषेधहेतुश्च प्रतिवादिनैवोद्धियते । स वादिनो वा प्रतिवादिनो वा हेतुश्चोपालम्भश्च निवर्तते । तस्मिन्निवृत्ते योवतिष्ठते एकस्तेनार्थनिर्णयो न द्वाभ्यां तस्मादयुक्तं पक्षप्रतिपक्षाभ्यामिति । न तावत् संशयविषये निर्णये वादिप्रतिवादिनौ स्तस्तयोर्निश्चितयोरेव प्रवृत्तेः । ता. टी. ।

§§ प्रतिज्ञानमिति ५ पाठः ।

तस्य निवृत्तौ यो ऽवतिष्ठते तेनार्थावधारणं निर्णयः। *उभाभ्यामेवार्थावधारणमित्याह। कया युक्त्या एकस्य संभवो द्वितीयस्यासंभवः। तावेतौ संभवासंभवौ विमर्शं सह निवर्त्तयतः उभयसंभवे। †उभयासंभवे त्वनिवृत्तो विमर्श इति। विमृश्येति विमर्शं कृत्वा। सो ऽयं विमर्शः पक्षप्रतिपक्षावद्योत्य‡न्यायं प्रवर्तयतीत्युपादीयतइति। यतश्च विरुद्धयोरेकधर्मिस्थयोर्बोद्धव्यम्। यच्च तु धर्मिसामान्यगतौ विरुद्धौ धर्मौ हेतुतः संभवतः तच्च समुच्चयः हेतुतो ऽर्थस्य तथाभावोपपत्तेः। यथा क्रियावद् द्रव्यमिति लक्षणवचने यस्य द्रव्यस्य क्रियायोगो हेतुतः संभवति तत् क्रियावत् यस्य न संभवति तदक्रियमिति। एकधर्मिस्थयोश्च विरुद्धयोर्द्धर्मयोरयुगपद्भाविनोः कालविकल्पः यथा तदेव द्रव्यं क्रियायुक्तं क्रियावत् अनुत्पन्नोपरतक्रियं पुनरक्रियमिति। न चायं निर्णये नियमः विमृश्यैव पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति। किं §त्विन्द्रियार्थसन्निकर्षेत्यत्र प्रत्यक्षे ऽर्थे ऽवधारणं निर्णय इति। परीक्षाविषये विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः शास्त्रे वादे च विमर्शवर्ज्जम्॥। इति वात्स्यायनीये न्यायभाष्ये प्रथमाध्यायस्य प्रथमाह्निकम्।

तिस्रः कथाः भवन्ति वादो जल्पो वितण्डा चेति। तासाम्।

---

* अभ्युपेत्य तु परिहरति। उभाभ्यामिति। वादिनः साधनस्य सम्भवः प्रतिवादिन उपालम्भस्यासम्भवः। एवं प्रतिवादिनः साधनस्य सम्भवो वादिन उपालम्भस्यासम्भव इति। विमृश्येति विमर्षं कृत्वेति। अनुपायो ऽपि विमर्षः कार्यत्वात् कृतिव्याप्य उक्तः। विमृश्येति पदोपादानस्य प्रयोजनमाह। सो ऽयमिति। अवद्योत्यानियमेन विषयीकृत्येत्यर्थः। ता॰ टी॰। एकस्मिन्विषये द्वयोरवधारणं प्रत्यहेतुत्वे ऽपि विषयभेदेन द्वयोरप्यवधारणहेतुत्वं नानुपपन्नमिति भावः।

† उभयसम्भवइति पूर्वान्वयि। उभयासम्भवे त्वनिवृत्तो विमर्श इति। साधनमात्रनिर्देशे प्रतिवाद्युक्तदूषणानुद्धरणे सत्प्रतिपक्षितत्वेन दूषणानुद्भावनेऽपि दूषणसम्भावनामात्रेणापि संशयावस्थितिसम्भवात्। परीक्षायाः संशयपूर्वकत्वेन संशयकारणतयोपस्थितकोटिद्वयमध्यैकतरकोटेरबाधने प्रतिज्ञामात्रेण संशयानिवृत्तेरसम्भवादिति भावः।

‡ पक्षप्रतिपक्षावद्योत्यमिति ५ पाठः। § खल्विन्द्रियार्थेति ४। २ पाठः।

‖ न हि ज्योतिष्टोमादीनां स्वर्गादिसम्बन्धनिर्णयस्यागमेन कर्तव्ये विमर्शो ऽस्ति नापि वादजल्पवितण्डासु विमर्शो निश्चिततयोरेव वादिप्रतिवादिनोस्तत्र प्रवृत्तेरित्यर्थः। ता॰ टी॰।

¶ नानाप्रवक्तृकत्वे सति तद्विचारवस्तुविषया वाक्यसंदृब्धिः कथा। तस्यां कथायामेष नियमस्तिस्र एवेति। इदं च पक्षप्रतिपक्षपरिग्रह इति सूत्रावयवेन सूचितम्। ता॰ टी॰। तत्र गुर्वादिभिः सह वादः। विजिगीषुणा सह जल्पवितण्डे। न्या॰ वा॰

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः* ॥ १ ॥

एकाधिकरणस्थौ विरुद्धौ धर्मौ पक्षप्रतिपक्षौ प्रत्यनीकभावादस्त्यात्मा नास्त्यात्मेति । नानाधिकरणौ† विरुद्धौ न पक्षप्रतिपक्षौ यथा नित्य आत्मा अनित्या बुद्धिरिति । परिग्रहो ऽभ्युपगमव्यवस्था । सो ऽयं पक्षप्रतिपक्षपरिग्रहो वादः । तस्य विशेषणं प्रमाणतर्कसाधनोपालम्भः‡ प्रमाणैस्तर्केण च साधनमुपालम्भश्चास्मिन् क्रियतइति§ । साधनं स्थापना उपालम्भः प्रतिषेधः । तौ साधनोपालम्भौ उभयोरपि पक्षयोर्व्यतिषक्तावनुबद्धौ यावदेको निवृत्त एकतरो व्यवस्थित इति निवृत्तस्योपालम्भो व्यवस्थितस्य साधनमिति । जल्पे निग्रहस्थानविनियोगाद्वादे तत्प्रतिषेधः । प्रतिषेधे कस्य चिदभ्यनुज्ञानार्थं सिद्धान्ताविरुद्ध इति वचनम् । सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध‖ इति हेत्वाभासस्य निग्रहस्थानस्याभ्यनुज्ञा वादे । पञ्चावयवोपपन्न इति हीनमन्यतमेनाप्यवयवेन न्यूनं¶ हेतूदाहरणाधिकमधिक**मिति चैतयोरभ्यनुज्ञानार्थमिति†† । अवयवेषु प्रमाणतर्कान्तर्भावे पृथक् प्रमाणतर्कग्रहणं साधनोपालम्भव्यतिषङ्गज्ञापनार्थम् । ‡‡अन्यथोभावपि पक्षौ स्थापनाहेतुना प्रवृत्तौ वाद इति स्यात् । अन्तरेणापि चावयवसंबद्धं§§ प्रमाणान्यर्थं साधयन्तीति दृष्टं तेनापि कल्पेन साधनोपालम्भौ वादे भवत इति ज्ञापयति‖‖ । छलजाति-

---

* पक्षपरिग्रहो वाद इति ३ पु· पाठः ।

† नानाधिकरणस्थाविति ५ । ४ । २ । ३ पाठः ।

‡ अस्याग्रे प्रमाणतर्कसाधनः प्रमाणतर्कोपालम्भ इति ५ । ४ । २ । ३ अधिकम् ।

§ अनेन विशेषणेन जल्पवितण्डयोर्न वादलक्षणातिव्याप्तिः । प्रमाणैरेव यत्र साधनं तर्केरेव च यत्रोपालम्भ इति तस्यार्थः । विजिगीषुकथायां तु जल्पे वितण्डायां च तत्त्वनिर्णयस्यानपेक्षितत्वेन छलादिना ऽपि स्वपक्षस्थापनं परपक्षप्रतिषेधो वा कर्तुं शक्यतइति न तत्रातिव्याप्तिः ।

‖ न्या· सू· अ· १ आ· २ सू ४७ ।

¶ न्या· सू· अ· ५ आ· २ सू· १२ ।

** न्या· सू· अ· ५ आ· २ सू· १३ ।

†† वादे निग्रहस्थानानां प्रतिषेधे ऽपि विरुद्धस्य हेत्वाभासस्य न्यूनाधिकयोश्चोद्भावनानुमतिप्रदर्शनार्थं सिद्धान्ताविरुद्ध इति पञ्चावयवोपपन्न इति च विशेषणे इत्यर्थः ।

‡‡ पञ्चावयवोपपन्न इत्यनेनैव प्रमाणतर्कसाधनोपालम्भत्वलाभे सिद्धे पुनरुपादानं प्रमाणैः साधनमेव कार्यं तर्केणोपालम्भ एव कार्य इति बोधनार्थम् ।

§§ संबन्धमिति ५ । ४ । २ । ३ पाठः ।

‖‖ पञ्चावयववाक्यप्रयोगाभावेऽपि प्रत्यक्षादिप्रमाणानामर्थसाधकत्वस्य दृष्टतया तथापि रीत्या वादे साधनं भवतीत्यर्थः ।

निग्रहस्थानसाधनोपालम्भो जल्प इति वचनाद्विनिग्रहो जल्प इति मा विज्ञायि च्छलजातिनिग्रहस्थानसाधनोपालम्भ एव जल्पः प्रमाणतर्कसाधनोपालम्भो वाद एवेति मा विज्ञायीत्येवमर्थं पृथक् प्रमाणतर्कग्रहणमिति* ।

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ २ ॥

यथोक्तोपपन्न इति प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः । छलजातिनिग्रहस्थानसाधनोपालम्भ इति छलजातिनिग्रहस्थानैः साधनमुपालम्भश्चास्मिन् क्रियतइति एवंविशेषणो जल्पः† । न खलु वै छलजातिनिग्रहस्थानैः साधनं कस्य चिदर्थस्य संभवति प्रतिषेधार्थतैवैषां सामान्यलक्षणे विशेषलक्षणे च श्रूयते । वचनविघातोऽर्थविकल्पोपपत्त्या छलमिति‡ साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः§ विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थान‖मिति विशेषलक्षणेष्वपि यथास्वमिति । न चैतद्विजानीयात्प्रतिषेधार्थतयैवार्थं साधयन्तीति छलजातिनिग्रहस्थानोपलम्भो जल्प इत्येवमप्युच्यमाने विज्ञायतएतदिति¶ । प्रमाणैः साधनोपालम्भयोश्छलजातीना**मङ्गभावो रक्षणार्थत्वात् न स्वतन्त्राणां साधनभावः । यत्तत्प्रमाणैरर्थस्य साधनं तच्च†† छलजातिनिग्रहस्थानानामङ्गभावो रक्षणार्थत्वात् तानि हि प्रयुज्यमानानि परपक्षविघातेन स्वपक्षं रक्षन्ति । तथा चोक्तं तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवदिति‡‡ । यश्चासौ प्रमाणैः प्रतिपक्षस्योपालम्भस्तस्य चैतानि प्रयुज्यमानानि निषे§§धविघातात्सहकारीणि भवन्ति तदेवमङ्गीभूतानां छलादीनामुपादानम् । जल्पे न स्वतन्त्राणां साधनभावः उपालम्भे तु स्वातन्त्र्यमप्यस्तीति‖‖‖ ।

---

* प्रमाणतर्कसाधनग्रहणमिति ३ पु॰ पाठः ।

† जल्पे प्रमाणादीनां प्रयोगे ऽपि प्रमाणेनैव साधनं तर्केणैवोपालम्भ इति नियमाभावान्नैतल्लक्षणस्य वादे ऽतिव्याप्तिरिति भावः ।

‡ न्या॰ सू॰ अ॰ १ आ॰ २ सू॰ ५१ ।

§ न्या॰ सू॰ अ॰ १ आ॰ २ सू॰ ५९ ।

‖ न्या॰ सू॰ अ॰ १ आ॰ २ सू॰ ६० ।

¶ तथा च सूत्रे साधनपदप्रयोगो ऽनुपपन्न इति भावः । न खलु वै इत्यारभ्य एतदितीत्येतत्पर्यन्तं शङ्का प्रमाणैरित्यादिः परिहारः । जल्पकथायां प्रवृत्तेन प्रमाणैः साधने क्रियमाणे परोदितसाधनानां छलादिना ऽपि निरासे स्वपक्षसिद्ध्या तदप्रयोगे च प्रतिवादिविजयानुपपत्तेरेतावन्मात्रेण तेषां साधनहेतुत्वमुच्यतइति भावः ।

** अङ्गभावः स्वपक्षरक्षणार्थत्वादिति ५ । ४ । २ । ३ पाठः ।

†† तत्रेति ४ । २ । ३ नास्ति ।

‡‡ न्या॰ सू॰ अ॰ ४ आ॰ २ सू॰ ५० ।

§§ प्रतिषेधेति ५ । ४ । २ पाठः ।

‖‖‖ साधननैरपेक्ष्येण परोदितसाधनविघातकत्वमित्यर्थः ।

स प्रतिपक्षस्थापनाहीनो वितण्डा ॥ ३ ॥

स जल्पो वितण्डा भवति किंविशेषण: प्रतिपक्षस्थापनया हीन: । यौ तौ समानाधिकरणौ विरुद्धौ धर्मौ* पक्षावित्युक्तं तयोरेकतरं वैतण्डिको न स्थापयतीति परपक्षप्रतिषेधेनैव प्रवर्ततइति । अस्तु तर्हि स प्रतिपक्षहीनो वितण्डा । यद्वै खलु तत्परप्रतिषेधलक्षणं वाक्यं स वैतण्डिकस्य पक्ष: न त्वसौ साध्यं† कं चिदर्थं प्रतिज्ञाय स्थापयतीति । तस्माद्यथान्यासमेवास्त्विति‡ ।

हेतुलक्षणाभावादहेतवो हेतुसामान्याऽ§ द्धेतुवदाभासमाना: । तइमे। **सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता॥ हेत्वाभासा: ॥ ४ ॥**

तेषाम् ।

अनैकान्तिक: सव्यभिचार: ॥ ५ ॥

व्यभिचार¶ एकचाव्यवस्था । ****सह व्यभिचारेण वर्त्तते इति सव्यभिचार: । निदर्शनं नित्य: शब्दो ऽस्पर्शत्वात् स्पर्शवान् कुम्भो ऽनित्यो दृष्टो न च तथा स्पर्शवान् शब्दस्तस्मादस्पर्शत्वान्नित्य: शब्द इति। दृष्टान्ते स्पर्शवत्त्वमनित्यत्वं च धर्मौ न साध्यसाधनभूतौ दृश्येते स्पर्शवांश्चाणुर्नित्यश्चे-**

---

* पक्षप्रतिपक्षावित्युक्तमिति ५ । ४ । २ पाठः ।

† साध्ये इति ४ । २ पाठः ।

‡ प्रतिपक्षस्य साधयितुः सत्त्वात्तथा न शक्यते वक्तुं साधनीयार्थाभावाच्च स्थापनाहीन इत्युक्तौ नाव्याप्तिरिति भावः ।

§ **प्रतिज्ञानन्तरं प्रयोगो ऽन्यतमलिङ्गधर्मानुविधानं वा सामान्यम्** । न्या· वा· । अन्वयित्वव्यतिरेकित्वान्वयव्यतिरेकित्वरूपधर्मत्रयमध्ये एकधर्मवत्ता ऽऽद्यधर्मद्वयमध्ये एकधर्मवत्ता वा । साधकासाधकत्वे तु विशेषः। अत्र हेत्वाभासानामवान्तरभेदा बहवो वार्तिके दर्शितास्ते प्रकृतानुपयोगात्सूत्रोक्तभेदपञ्चकेन संगृहीतत्वाच्च नोद्धृतास्तत एवावगन्तव्याः ।

‖ समातीतकाला इति ५ । ४ । २ । ३ पाठः ।

¶ **साध्यतज्जातीयान्यवृत्तित्वं व्यभिचारः । यत् खलु साध्यतज्जातीयवृत्तित्वे सत्यन्यत्र वर्तते तद्व्यभिचारि तद्वृत्तित्वं व्यभिचारः । सर्वो ऽयं पदार्थभेदो ऽन्तद्वये ऽवतिष्ठते । अन्यत्र प्रमेयात् नित्यश्चानित्यश्च व्यापकश्चाव्यापकश्चेत्येवमादि । तत्र यो हेतुरुपात्त उभावन्तावाश्रित्य प्रवर्तते सो ऽनैकान्तिक इति ।** न्या· वा· ।

** सह व्यवस्येति ४ । २ पुस्तकयोरधिकम् ।

ति*। आत्मादौ च दृष्टान्ते उदाहरणसाधर्म्यात्साध्यसाधनं †हेतुरिति अस्पर्शत्वादिति हेतुर्नित्यत्वं व्यभिचरति अस्पर्शा बुद्धिरनित्या चेति। एवं द्वि‡विधे ऽपि दृष्टान्ते व्यभिचारात्साध्यसाधनभावो नास्तीति लक्षणाभावादहेतुरिति। नित्यत्वमप्येको ऽन्तः अनित्यत्वमप्येको ऽन्तः एकस्मिन्नन्ते विद्यतइति ऐकान्तिकः§ उभयच‖ व्यापकत्वादिति।

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥ ६ ॥

तं विरुणद्धीति तद्विरोधी अभ्युपेतं सिद्धान्तं व्याहन्तीति¶। यथा सो ऽयं विकारो व्यक्तेरपैति** नित्यत्वप्रतिषेधात्। अपेतो ऽप्यस्ति विनाशप्रतिषेधात्। न नित्यो विकार उपपद्यते इत्येवं हेतुर्व्यक्तेरपेतो†† ऽपि विकारो ऽस्तीत्यनेन स्वसिद्धान्तेन विरुध्यते। कथम् व्यक्तिरात्मलाभः अपायः प्रच्युतिः यदा‡‡त्मलाभात्प्रच्युतो विकारो ऽस्ति नित्यत्वप्रतिषेधो नोपपद्यते यद्व्यक्तेरपेतस्यापि विकारस्यास्तित्वं तत्खलु नित्यत्वमिति। नित्यत्वप्रतिषेधो नाम विकारस्यात्मलाभात्प्रच्युतेरुपपत्तिः। यदात्मलाभात्प्रच्यवते तदनित्यं दृष्टं यदस्ति न तदात्मलाभात्प्रच्यवते। अस्तित्वं चात्मलाभात्प्रच्युतिरिति विरुद्धावेतौ धर्मौ न सह सम्भवत इति। सो ऽयं हेतुर्यं सिद्धान्तमाश्रित्य प्रवर्त्तते तमेव व्याहन्तीति।

---

* ननु मा भूदित्यत्वं साध्यमस्पर्शत्वमेवास्तु नित्यत्वस्य साध्यमित्यत आह स्पर्शवांश्चाणुर्नित्यश्चेति। न्या॰ वा॰।

† साध्यसाधनहेतुरिति ४। २ पाठः।

‡ एवंविधे ऽपीति ४। २ पाठः।

§ विपर्ययादनैकान्तिकइति ५। ४। २। ३ अधिकः पाठः।

‖ उभयान्तव्यापकत्वादिति ५। ४। २ पाठः।

¶ अभ्युपगतार्थविरोधी विरुद्धः। एवं च सर्वानुक्तविरुद्धसंग्रहः। नन्वेवमेको हेत्वाभासो विरुद्धः प्राप्नोति। सत्यमेक एव हेत्वाभासो विरुद्धः। तस्य तु सामान्येन विरुद्धत्वेन संगृहीतस्य पञ्चधा ऽपदेशो यथा प्रमेयमित्यनेन षोडश पदार्था इति। पृथगभिधानं तर्हि विरुद्धस्य न कर्तव्यम्। सामान्यतो ऽधिगतस्य विशेषज्ञापनार्थं यथा प्रमेयस्यैव। तत्रानैकान्तिकादिहेत्वाभासो द्विरूपो ऽनैकान्तिकादिर्विरुद्धः। एतस्मिंस्तु विरुद्धतैवेति तृणोपलादिन्यायेन निष्कृष्याभिधानम्। तस्मादनैकान्तिकादिषु निमित्तसमावेशात्सञ्ज्ञाद्वयसमावेशः। विवक्षिततज्जातीयान्यवृत्तित्वेनानैकान्तिकत्वं हेतुविषयस्वरूपबाधारूपेण तु विरुद्धः। न्या॰ वा॰।

** व्यक्तेरभ्युपैतीति ३ पु॰ पाठः। †† हेतुरुपपद्यते व्यक्तेरपेतइति ३ पु॰ पाठः।

‡‡ यथेति ५। ४। २ पाठः।

यस्मात्प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥७॥

विमर्शाधिष्ठानौ पक्षप्रतिपक्षावुभा*वनवसितौ प्रकरणम् । तस्य चिन्ता विमर्शात्प्रभृति प्राङ्निर्णयाद्यत्समीक्षणं सा जिज्ञासा यत्कृता स निर्णयार्थं प्रयुक्त उभयपक्षसाम्यात् प्रकरणमनतिवर्त्तमानः प्रकरणसमो निर्णयाय न प्रकल्पते† । प्रज्ञापनं त्वनित्यः शब्दो‡ नित्यधर्मानुपलब्धेरित्यनुपलभ्यमान-नित्यधर्मकमनित्यं दृष्टं स्थाल्यादि । यच्च समानो धर्मः संशयकारणं हेतुत्वे-नोपादीयते स संशयसमः सव्यभिचार एव । या तु विमर्शस्य विशेषापेक्षिता उभयपक्षविशेषानुपलब्धिश्च सा प्रकरणं प्रवर्तयति । यथा शब्दे नित्यधर्मो नोपलभ्यते एवमनित्यधर्मोऽपि सेयमुभयपक्षविशेषानुपलब्धिः प्रकरणचिन्तां प्रवर्तयति । कथम् । विपर्यये हि प्रकरणनिवृत्तेः यदि नित्यधर्मः शब्दे गृह्यते न स्यात्प्रकरणं यदि वा अनित्यधर्मो गृह्येत एवमपि निवर्त्तेत प्रकरणम् । सोऽयं हेतुरुभौ पक्षौ प्रवर्तयन्नन्यतरस्य निर्णयाय न प्रकल्पते§ ।

साध्याविशिष्टः साध्यत्वात्साध्यसमः ॥ ८ ॥

द्रव्यं छायेति साध्यं गतिमत्त्वादिति हेतुः साध्येनाविशिष्टः साध-नीयत्वात्साध्यसमः । ‖अयमप्यसिद्धत्वात्साध्यवत्प्रज्ञापयितव्यः¶‖ । साध्यं तावदेतत् किं पुरुषवच्छाया ऽपि गच्छति आहो स्विदावरकद्रव्ये संसर्पति आवरणसन्ताना**दसन्निधिसन्तानोऽयं तेजसो गृह्यतइति । सर्पता खलु द्रव्येण व्यानाद्†† यो यस्तेजोभाग आव्रियते तस्य तस्यासन्निधिरेवा‡‡वच्छिन्नो गृह्यतइति आवरणं तु प्राप्तिप्रतिषेधः ।

---

* प्रतिपक्षावनवसितावितिं ५ । ४ । २ पाठः ।

† संशयविषयीभूतकोटिद्वयमध्ये एकतरकोट्युपस्थापक एव यत्र साध्यसाधकत्वेनोपादी-यते स प्रकरणसम इत्यर्थः । योगार्थः प्रकरणमनतिक्रान्त इत्यनेन दर्शितः । प्रकरणान्तःपात्ये-वेति तदर्थः । अयमेव च सत्प्रतिपक्ष इत्युच्यते ।

‡ प्रज्ञापनं नित्यः शब्द इति ३ पु. पाठः ।

§ प्रवर्तयच्चान्यतरस्य प्रवर्तनाय कल्पते इति ३ पु. पाठः ।

‖ उभयमिति ४ पाठः ।

¶ हेतोरपि यत्र पक्षेण सम्बन्धोऽसिद्धत्वात्साधनीयः स साध्यसमः । अत्र हेतोः सम्बन्ध इत्युपलक्षणम् पक्षतावच्छेदकादेरपि । अयमेवासिद्ध इत्युच्यते । **सोऽयमसिद्धस्त्रेधा भवति । प्रज्ञापनीयधर्मसमान आश्रयासिद्धोऽन्यथासिद्धश्चेति ।** वार्तिकम् ।

** आवरकद्रव्येऽपसर्पति आवरणसन्निधानइति ३ पु. ।

†† व्यानादिति ५ । ४ । २ नास्ति ।

‡‡ सन्निधिरविच्छिन्न इति ५ । ४ । २ । ३ पाठः ।

कालात्ययापदिष्टः कालातीतः ॥ ९ ॥

कालात्ययेन युक्तो यस्यार्थस्यैकदेशो ऽपदिश्यमानस्य स कालात्ययापदिष्टः कालातीत इच्यते* । निदर्शनं नित्यः शब्दः संयोगव्यङ्ग्यत्वाद् रूपवत् । प्रागूर्द्धं च व्यक्तेरवस्थितं रूपं प्रदीपघटसंयोगेन व्यज्यते तथा च शब्दो ऽप्यवस्थितो भेरीदण्डसंयोगेन व्यज्यते दारुपरशुसंयोगेन वा । तस्मात्संयोगव्यङ्ग्यत्वान्नित्यः शब्द इत्ययमहेतुः कालात्ययापदेशात् । व्यञ्जकस्य संयोगस्य कालं न व्यङ्ग्यस्य रूपस्य व्यक्तिरत्येति । सति प्रदीपसंयोगे रूपस्य ग्रहणं भवति निवृत्ते संयोगे रूपं गृह्यते । निवृत्ते दारुपरशुसंयोगे दूरस्थेन शब्दः श्रूयते विभागकाले । सेयं शब्दस्य व्यक्तिः संयोगकालमत्येतीति न संयोगनिर्मिता भवति । कस्मात्कारणाभावाद्धि कार्याभाव इति । एवमुदाहरणसाधर्म्यस्याभावादसाधन† मयं हेतुर्हेत्वाभास इति । अवयवविपर्यासवचनं

---

* साध्यकाले हेत्वभावयोगान्नित्यर्थः । नित्यः शब्दः संयोगव्यङ्ग्यत्वादित्यत्र ह्युपलब्धेः पूर्वं संयोगो नोपलब्धिकाले । सो ऽयं संयोगो हेतुविशेषणत्वेनोपात्त उपलब्धिकालमत्येति । यदोपलभ्यते तदा संयोगो नास्ति दारुवृश्चने दारुपरशुसंयोगनिवृत्तौ शब्दोपलब्धिरिति । नन्वयमनैकान्तिक एव संयोगव्यङ्ग्यत्वादिति । अनित्यमपि संयोगेन व्यज्यमानं दृष्टं यथा घट इति । संयोगव्यङ्ग्यत्वेनावस्थानस्य साध्यत्वात् । न ब्रूमो नित्यः शब्द इति अपि त्ववतिष्ठते शब्द इति प्रतिज्ञार्थः । तथा च संयोगव्यङ्ग्यत्वादित्ययं हेतुर्नानैकान्तिकः । न ह्यनवस्थितं किं चित्संयोगेन व्यज्यमानं दृष्टमिति । न्या· वा· । हेतोरपदेशस्य हि साध्यसन्देहविशिष्टः कालः । यथाहुः नानुपलब्धे न निर्णीते ऽर्थे न्यायः प्रवर्तते किं तु सन्दिग्धइति । परे ऽप्याहुः । सन्दिग्धे हेतुवचनादिति । अत्र च प्रत्यक्षानुमानागमविरोधो यथा ऽनुष्णो ऽग्निर्द्रव्यत्वादिति अश्रावणः शब्दो गुणत्वादिति । शुचि नरशिरःकपालं प्राण्यङ्गत्वादिति च । स सर्वः प्रमाणतो विपरीतनिर्णयेन सन्देहविशिष्टकालमतिपततीति । सो ऽयङ्कालस्यात्ययेनापदिश्यमानः कालातीत इति । तथा चोदाहृतम् । एवं व्यवस्थिते भाष्यकारः सूत्रं स्वपरमतश्लिष्टं व्याचष्टे । यस्यार्थस्यैकदेशः धर्मविशिष्टो धर्मो हेतोरपदिश्यमानस्यार्थः स ह्यर्थ्यते हेतुना तस्यैकदेशः साध्यधर्मः स हि धर्मिणि बलवता प्रमाणेन तद्विपरीतधर्मनिर्णयं कुर्वता संशयकालमतिपातितस्तादृशो हेतुः कालात्ययापदिष्टः कालातीत इति स्वमतेनास्यार्थः । अत्र च पूर्वमेवोदाहृतमिति पौनरुक्त्यमुद्भावयन्नाह उदाहृतम् । परमते तु कालात्ययेन युक्तो यस्य हेतोरर्थरूप एकदेशो विशेषणमिति यावत् । स कालात्ययापदिष्ट इति योजना । परमतेनैव निदर्शनमाह निदर्शनमिति । ता· टी· ।

† साधर्म्यादिसाधनेति ३ पु· पाठः ।

न सूचार्थः । कस्मात् । यस्य येनार्थसम्बन्धो दूरस्थस्यापि तस्य सः । अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् । इत्येतद्वचनाद्विपर्यासेनोक्तो हेतुरुदाहरणसाधर्म्यात्तथा वैधर्म्यात्तत्साधनं* हेतुलक्षणं न जहाति । अजहद्धेतुलक्षणं न हेत्वाभासो भवतीति । अवयवविपर्यासवचनमप्राप्तकालमि†ति निग्रहस्थानमुक्तं तदेवेदं पुनरुच्यतइति । अतस्तन्न सूचार्थः‡ ।

अथ छलम् ।

वचनविघातो ऽर्थविकल्पोपपत्त्या छलम् ॥ १० ॥

न सामान्यलक्षणे छलं शक्यमुदाहर्तुं विभागे तूदाहरणानि । विभागश्च ।

तत्त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं चेति ॥ ११ ॥

तेषाम् ।

अविशेषाभिहिते ऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ १२ ॥

नवकम्बलो ऽयं माणवक इति प्रयोगः । अत्र नवः कम्बलो ऽस्येति वक्तुरभिप्रायः । विग्रहे तु विशेषो न समासे तत्रायं छलवादी वक्तुरभिप्रायादविवक्षितमन्यमर्थं नव कम्बला अस्येति तावदभिहितं भवतेति कल्पयति कल्पयित्वा चासम्भवेन प्रतिषेधति एको ऽस्य कम्बलः कुतो नव कम्बला इति । तदिदं सामान्यशब्दे वाचि छलं वाक्छलमिति । अस्य प्रत्यवस्थानं§ सामान्यशब्दस्यानेकार्थत्वे ऽन्यतराभिधानकल्पनायां विशेषवचनम्। नवकम्बल इत्यनेकार्थस्याभिधानं नवः कम्बलो ऽस्य नव कम्बला अस्येति। एतस्मिन्प्रयुक्ते येयं कल्पना नव कम्बला अस्येत्येतद्भवता ऽभिहितं तच्च न सम्भव-

---

* साध्यसाधनमिति· ५ । ४ । २ पु· पाठः साध्यसाधनहेतुलक्षणमिति ३ पु· ।

† न्या· सू· अ· १ आ· २ सू· ११ ।

‡ प्रतिज्ञानन्तरं हेतोरवसरे प्राप्ते तस्याकथनं पश्चात्तूदाहरणात्तत्कथनमिति न सूत्रार्थः । अनुक्तिसमये हेतोरेवाभावेन तत्राभासत्वानुपपत्तेः । कथिते च तस्मिन् हेतुलक्षणाक्रान्ते हेत्वाभासत्वासम्भवाल्लक्षणानाक्रान्ते चानैकान्तिकाद्यन्यतमत्वात्पृथक् कथनाऽनुपपत्तेः पौनरुक्त्यापाताच्चेत्यर्थः ।

§ तदेतच्छलं पराजयावस्थायां जल्पे प्रयोक्तव्यमित्युक्तम् । परवाक्ये पर्यनुयोगो ऽस्येति चोक्तम् । तदत्र यथा पर्यनुयोगस्तथा दर्शयति शिष्यहिततया भाष्यकारः अस्य प्रत्यवस्थानमिति । ता· टी· ।

तीति । एतस्यामन्यतराभिधानकल्पनायां विशेषो वक्तव्यः । यस्माद्विशेषो ऽर्थविशेषेषु* विज्ञायते ऽयमर्थो ऽनेनाभिहित इति । स च विशेषो नास्ति । तस्मान्मिथ्यानियोगमात्रमेतदिति । प्रसिद्धश्च लोके शब्दार्थसम्बन्धो ऽभिधानाभिधेयनियमनियोगः । अस्याभिधानस्यायमर्थो ऽभिधेय इति समानः । सामान्यशब्दस्य विशेषो विशिष्टशब्दस्य प्रयुक्तपूर्वाश्चेमे शब्दा अर्थे प्रयुज्यन्ते नाप्रयुक्तपूर्वाः । प्रयोगश्चार्थसम्प्रत्ययार्थः अर्थप्रत्ययाच्च व्यवहार इति† । तच्चैवमर्थगत्यर्थे शब्दप्रयोगे सामर्थ्यात्सामान्यशब्दस्य प्रयोगनियमः । अजां ग्रामं नय सर्पिराहर ब्राह्मणं भोजयेति । सामान्यशब्दाः सन्तो ऽर्थावयवेषु प्रयुज्यन्ते सामर्थ्यादाचार्यक्रियादेशना सम्भवति तच्च प्रवर्त्तन्ते नार्थसामान्ये क्रियादेशनाऽसम्भवात्‡ । एवमयं सामान्यशब्दो नवकम्बल इति यो ऽर्थः सम्भवति नवः कम्बलो ऽस्येति तच्च प्रवर्त्तते यस्तु न सम्भवति नव कम्बला अस्येति तच्च न प्रवर्त्तते । सो ऽयमनुपपद्यमानार्थकल्पनया परवाक्योपालम्भस्ते न कल्पतइति§ ।

सम्भवतो ऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् ॥ १३ ॥

अहो खल्वसौ ब्राह्मणो विद्याचरणसम्पन्न इत्युक्ते कश्चिदाह सम्भवति ब्राह्मणे विद्याचरणसम्पदिति । अस्य वचनस्य विघातो ऽर्थविकल्पोपपत्त्या ऽसम्भूतार्थकल्पनया क्रियते । यदि ब्राह्मणे विद्याचरणसम्पत्सम्भवति व्रात्येऽपि सम्भवेत् व्रात्यो ऽपि ब्राह्मणः सो ऽप्यस्तु विद्याचरणसम्पन्न इति । यद्विवक्षितमर्थमाप्नोति चात्येति च तदतिसामान्यम् । यथा ब्राह्मणत्वं विद्याचरणसम्पदं क्व चिदाप्नोति क्व चिदत्येति । सामान्यनिमित्तं छलं सामा-

---

* अर्थविशेषेष्विति· ४ । २ । ३ नास्ति ।

† एतदुक्तं भवति । न सङ्केतकरणावस्थायां वृद्धव्यवहारे वा कश्चिच्छब्दः कं चिदर्थं शङ्क्याहिकया बोधयति । अपि तु सामान्यद्वारेणार्थप्रकरणादिसहकारी विशेषे वर्तते । तस्माच्चैष प्रतिपादयितुरपराधो यदविशेषशब्दैर्विशेषान्तरं प्रतिपादयति । किं तु सङ्केतस्यापराधो यो विशेषमपहाय सामान्ये शब्दानां वर्तते । तस्माद्यथासङ्केतं बोधयन्नापराध्यः प्रयोक्तेति सिद्धम् । ता· टी· ।

‡ क्रियादेशना सम्भवेदिति ४ । २ । ३ पाठः ।

§ परवाक्योपालम्भो न कल्पतइति ३ पु· पाठः ।

न्यच्छलमिति । अस्य च प्रत्यवस्थानम् । अविवक्षितहेतुकस्य विषयानुवादः प्रशंसार्थत्वाद् वाक्यस्य* तदचासम्भूतार्थकल्पनानुपपत्तिः यथा सम्भवन्त्यस्मिन्तेचे शालय इति । अनिराकृतमविवक्षितं च बीजजन्म प्रवृत्तिविषयस्तु चेचं प्रशस्यते । सो ऽयं चेचानुवादो नास्मिन् शालयो विधीयन्त†इति बीजात्तु शालिनिवृत्तिः सती न विवक्षिता । एवं सम्भवति ब्राह्मणे विद्याचरणसम्पदिति सम्पद्विषयो ब्राह्मणत्वं न सम्पद्धेतुः । न चाच हेतुर्विवक्षितः विषयानुवादस्त्वयं प्रशंसार्थत्वाद् वाक्यस्य । सति ब्राह्मणत्वे सम्पद्धेतुः समर्थ इति विषयं च प्रशंसता वाक्येन यथाहेतुतः फलनिर्वृत्तिर्न प्रत्याख्यायते । तदेवं सति वचनविघातो ऽसम्भूतार्थकल्पनया नोपपद्यतइति ।

धर्मविकल्पनिर्देशे ऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ १४ ॥

अभिधानस्य धर्मो यथार्थप्रयोगः । धर्मविकल्पो ऽन्यच दृष्टस्यान्यच प्रयोगः । तस्य निर्देशे धर्मविकल्पनिर्देशे । यथा मञ्चाः क्रोशन्तीति अर्थसद्भावेन प्रतिषेधः । मञ्चस्थाः पुरुषाः क्रोशन्ति न तु मञ्चाः क्रोशन्ति । का पुनरचार्थविकल्पेोपपत्तिः । अन्यथा प्रयुक्तस्यान्यथा ऽर्थकल्पनं भक्त्या प्रयोगे प्राधान्येन कल्पनमुपचारविषयं छलमुपचारच्छलम् । उपचारो नीतार्थः सहचरणादिनिमित्तनातद्भावे तद्वदभिधानमुपचार इति । अच समाधिः । प्रसिद्धे‡ प्रयोगे वक्तुर्यथाभिप्रायं शब्दार्थयेारनुज्ञा प्रतिषेधो वा§ न च्छन्दतः‖ प्रधानभूतस्य शब्दस्य भाक्तस्य च¶ गुणभूतस्य प्रयोग** उभयेालेाकसिद्धः । सिद्धे प्रयोगे यथा वक्तुरभिप्रायस्तथा शब्दार्थायनुज्ञेयो प्रतिषेध्यो वा न च्छन्दतः । यदि वक्ता प्रधानशब्दं प्रयुङ्क्ते यथाभूतस्याभ्यनुज्ञा प्रतिषेधो वा न

---

* विषयानुवादकः प्रशंसार्थत्वाद्वाक्यस्येति ३ पु· ।

† विद्यन्ते इति ४ । २ । ३ पाठः ।

‡ सिद्धे इति मु· पु· पा· § वेति ४ । २ । ३ नास्ति ।

‖ छलत इति ४ । ३ पाठः ।

¶ भाक्तस्येत्येतावति वक्तव्ये प्रधानग्रहणं सिद्धान्ततया दृष्टान्तलाभाय । लेाकसिद्ध एवोपचारः कर्तव्या नापूर्वा विना प्रयोजनं लेाकसिद्धश्चायमुपचारो मञ्चाः क्रोशन्तीत्यर्थः । ता· टी· ।

** भाक्तस्य च प्रयेाग इति ३ पु· पाठः ।

च्छन्दतः* । अथ गुणभूतं तदा गुणभूतस्य । यच्च तु वक्ता गुणभूतं शब्दं प्रयुङ्क्ते प्रधानभूतमभिप्रेत्य परः प्रतिषेधति स्वमनीषया प्रतिषेधो ऽसौ भवति न परोपालम्भ इति ।

वाक्छलमेवोपचारच्छलं तदविशेषात् ॥ १५ ॥

न वाक्छलादुपचारच्छलं भिद्यते तस्याप्यर्थान्तरकल्पनाया अविशेषात् । इहापि स्यान्यर्थो गुणशब्दः प्रधानशब्दः स्यानार्थ इति कल्पयित्वा प्रतिषिध्यतइति ।

न †तदर्थान्तरभावात् ॥ १६ ॥

न ‡वाक्छलमेवोपचारच्छलं तस्यार्थसद्भावप्रतिषेधस्यार्थान्तरभावात् । कुतः । अर्थान्तरकल्पनात् । अन्या ह्यर्थान्तरकल्पना अन्यो ऽर्थसद्भावप्रतिषेध इति§ ।

अविशेषे वा किञ्चित्साधर्म्यादेकच्छल॥प्रसङ्गः ॥ १७ ॥

छलस्य द्वित्वमभ्यनुज्ञाय चित्वं प्रतिषिध्यते किञ्चित्साधर्म्यात् । यथा चायं हेतुस्त्रित्वं प्रतिषेधति तथा द्वित्वमप्यभ्यनुज्ञातं प्रतिषेधति । विद्यते हि किञ्चित्साधर्म्यं द्वयोरपीति । अथ द्वित्वं किञ्चित्साधर्म्यान्न निवर्त्तते चित्वमपि न निवर्त्स्यति ।

अत ऊर्द्ध्वम् ।

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ १८ ॥

प्रयुक्ते हि हेतौ यः प्रसङ्गो जायते स जातिः¶ । स च प्रसङ्गः साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमुपालम्भः प्रतिषेध इति । उदाहरणसाधर्म्यात्सा-

---

* छलत इति ४ । ३ पाठः । † नैतदर्थान्तरभावादिति ४ । २ । ३ पाठः । अत्र ४ पुस्तके द्वितीयाध्यायप्रथमान्हिके ६ सू॰ प॰ ५३ पं॰ १४ धर्मशब्देनेत्यारभ्य ५५ पं १३ यत्रयत्रेत्यन्तं प्रमादलिखितम् ।

‡ न वाक्छलं तस्येति २ । ३ पाठः ।

§ एकत्र वस्तुसद्भावः प्रतिषिध्यते नैव क्रोष्टारो मञ्चा इति । एकत्र वस्त्वभ्यनुज्ञाय कम्बलयोगमभ्युपगम्य कम्बलस्यानेकता धर्मः प्रतिषिध्यतइति । एकत्र धर्मः प्रतिषिध्यते ऽन्यत्र धर्मा सो ऽयमतिमहान् विशेषः । न्या॰ वा॰ ।

॥ छलत्वेति १ पाठः ।

¶ न च छले साधर्म्यवैधर्म्ये स्तः । न च सम्यग्दूषणं साधर्म्यवैधर्म्यमात्रात् । अपि तु प्रयोगादिति प्रयुक्ते हेतौ तदाभासे वा यः प्रसङ्गो जायते सा जातिरिति । जल्पे हि वेदप्रामाण्यविद्वांसं प्रति कुहेतुना यदा नास्तिकैरधिक्षि-

ध्यसाधनं हेतुरित्यस्योदाहरणवैधर्म्येण प्रत्यवस्थानम् । उदाहरणवैधर्म्यात्साध्यसाधनं हेतुरित्यस्योदाहरणसाधर्म्येण* प्रत्यवस्थानं प्रत्यनीकभावाज्जायमानो ऽर्थो जातिरिति ।

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ १९ ॥

विपरीता वा कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः । विप्रतिपद्यमानः पराजयं प्राप्नोति निग्रहस्थानं खलु पराजयप्राप्तिः । अप्रतिपत्तिस्त्वारम्भविषयेऽप्यप्रारम्भः । परेण स्थापितं वा न प्रतिषेधति प्रतिषेधं वा नोद्धरति । असमासाच्च नैते एव निग्रहस्थाने इति । किं पुनर्दृष्टान्तवज्जातिनिग्रहस्थानयोरभेदो ऽथ सिद्धान्तवद्भेद इत्यत आह ।

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ २० ॥

तस्य साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वं ‡तयोश्च विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वम् । नानाकल्पो विकल्पः विविधो वा कल्पो विकल्पः । तत्राननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणमित्यप्रतिपत्तिर्निग्रहस्थानम् । शेषस्तु विप्रतिपत्तिरिति ।

इमे प्रमाणादयः पदार्था उद्दिष्टा यथोद्देशं लक्षिता यथालक्षणं परीक्ष्यन्तइति विविधा ऽस्य शास्त्रस्य प्रवृत्तिर्वेदितव्येति ॥

इति वात्स्यायनीये न्यायभाष्ये प्रथमो ऽध्यायः ।

—o—

ष्यते सदुत्तरं चास्य यदा सहसा न स्फुरति तदेश्वराणां जनाधारणां मा भूदेवाप्रामाण्यबुद्धिरिति जात्यापि प्रत्यवस्थेयम् । क्व चित्पुनरबुद्ध्युपूर्वमेव हेतौ हेत्वाभासे वा जातिप्रयोगः सम्भवतीति । जायमानो ऽर्थ इति पदव्युत्पत्तिनिमित्तं दर्शितम् । ता. टी. ।

* उदाहरणवैधर्म्येणेति ३ पाठः ।

† यद्यपि साधर्म्यवैधर्म्याभ्यां दृष्टान्तस्यापि भेदस्तथापि लक्षणाभेदाभिप्रायेणाभेद उक्तः । ता. टी. ।

‡ जातिविकल्पाज्जातिबहुत्वमिति ३ पु. ।

अत ऊर्ध्वं प्रमाणादिपरीक्षा सा च विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इत्यये *विमर्श एव परीक्ष्यते ।

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः ॥ १ ॥

समानस्य धर्मस्याध्यवसायात्संशयो न धर्ममात्रात्† । अथ वा समानमनयोर्दुर्मनुपलभ‡ इति धर्मधर्मिग्रहणे संशयाभाव§ इति । अथ वा समान‖धर्माध्यवसायादर्थान्तरभूते धर्मिणि संशयो ऽनुपपन्नः न जातु रूपस्यार्थान्तरभूतस्याध्यवसायादर्थान्तरभूते स्पर्शे संशय इति । अथ वा नाध्यवसायादर्थावधारणाद्धनवधारणज्ञानं संशय उपपद्यते कार्यकारणयोः सारूप्याभावादिति । एतेनानेकधर्माध्यवसायादिति व्याख्यातम् । अन्यतरधर्माध्यवसायाच्च संशयो न भवति । ततो ह्यन्यतरावधारणमेवेति ।

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ ॥

न विप्रतिपत्तिमात्रादव्यवस्थामात्राद्वा संशयः किं तर्हि विप्रतिपत्तिमुपलभमानस्य¶ संशय एवमव्यवस्थायामपीति । अथ वा ऽस्त्या**त्मेत्येके नास्त्यात्मेत्यपरे मन्यन्तइत्युपलब्धः†† कथं संशयः स्यादिति । अथो‡‡पलब्धि-

---

* उद्देशलक्षणयोरनन्तरं परीक्षावसरे प्रमाणपरीक्षायाः पाठक्रमेण प्राप्तावसरत्वेपि प्रमाणानां निर्णयं प्रत्युपयोगित्वात्संशयस्य ततः पूर्वभावित्वादार्थक्रमेण पूर्वोपस्थितः संशय एव परीक्ष्यतइत्यर्थः । यद्यपि निर्णयमात्रस्य न संशयपूर्वकत्वमिति प्राक् प्रतिपादितं तथापि शास्त्रार्थनिर्णयस्य विचारपूर्वकत्वाद् विचारप्रवृत्तेश्च संशयपूर्वकत्वनियमादुक्तं संशयपरीक्षायाः प्राथम्यमिति वार्तिकम् ।

† अज्ञायमानस्य धर्ममात्रस्य संशयं प्रत्यहेतुत्वात्तदवधारणे निश्चयस्य संशयविरोधित्वस्वाभाव्येन संशयहेतुत्वानुपपत्तिरिति भावः ।

‡ उपलब्ध इति ४ । २ पाठः ।

§ धर्मस्योभयानुगतत्वेनाग्रहणे वस्तुत उभयानुगतधर्मग्रहणेपि संशयानुत्पत्तेरुभयानुगतत्वग्रहणे विशेषणतया धर्मिणोऽप्यवधृतत्वात्तद्विषये संशयो ऽनुपपन्न इति भावः ।

‖ समानधर्मस्य कृतकत्वस्य शब्दे ऽध्यवसाये ऽपि तत्समानाधिकरणघटत्वादिप्रकारकसंशयानुत्पत्तेः समानधर्मानध्यवसाये ऽपि प्रकरणसमे विरुद्धाव्यभिचारिधर्मसंनिपाते तत्त्वानुपलब्धेः संशयोत्पत्त्या ऽव्यापकत्वात्समानधर्मोपलब्धेः संशयं प्रति न हेतुत्वमिति वार्तिकम् ।

¶ स्वरूपतो विप्रतिपत्तेः संशयाहेतुत्वात्तदध्यवसायस्य च प्रागुक्तरीत्या संशयहेतुत्वासम्भव इति भावः ।

** अस्त्यात्मेत्येके परे नास्त्यात्मेति ५ । २ । ४ । ३ पाठः ।

†† उपलब्धेरिति ५ । २ पाठः ।

‡‡ तथेति ५ । २ । ४ पाठः ।

व्यवस्थिता अनुपलब्धिश्चाव्यवस्थितेति विभागेनाध्यवसिते* संशयो नोपपद्यतइति ।

विप्रतिपत्तौ च संप्रतिपत्तेः† ॥ ३ ॥

यां च विप्रतिपत्तिं भवान् संशयहेतुं मन्यते सा संप्रतिपत्तिः सा हि द्वयोः प्रत्यनीकधर्मविषया । तच्च यदि विप्रतिपत्तेः संशयः संप्रतिपत्तेरेव संशय इति ।

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः‡ ॥ ४ ॥

न संशयः । यदि तावदियमव्यवस्था§ आत्मन्येव व्यवस्थिता‖ व्यवस्थानादव्यवस्था न भवतीत्यनुपपन्नः संशयः अथ व्यवस्था ऽऽत्मनि न व्यवस्थिता एवमतादात्म्यादव्यवस्था न भवतीति संशयाभाव इति ।

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः¶ ॥ ५ ॥

येन कल्पेन भवान् समानधर्मोपपत्तेः संशय इति मन्यते** तेन खल्वत्यन्तसंशयः प्रसज्यते समानधर्मोपपत्तेरनुच्छेदात्संशयानुच्छेदः । न ह्ययमतद्धर्मा धर्मो विमृश्यमाणो गृह्यते†† सत्तं तु तद्धर्मा भवतीति। अस्य प्रतिषेधप्रपञ्चस्य संक्षेपेणोद्धारः ।

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा‡‡ ॥ ६ ॥

न संशयानुत्पत्तिः§§ संशयानुच्छेद एव‖‖ प्रसज्यते । कथं यत्तावत् समानधर्माध्यवसायः संशयहेतुः न समानधर्ममात्रमिति एवमेतत्कस्मा-

---

* विभागेनाध्यवसिते इति ३ पा· ।

† न विप्रतिपत्तिरस्तीति सूत्रार्थः । न्या· वा· । प्रत्येकं वादिनोः सिद्धान्तरूपत्वादिति भावः ।

‡ नाव्यवस्था विद्यतइति सूत्रार्थः । न्या· वा· ।

§ अव्यवस्थाऽऽत्मनि व्यवस्थानादव्यवस्था न भवतीति २ । ४ पा· ।

‖ आत्मनि व्यवस्थानादिति ५ पा· ।

¶ समानधर्मादीनां सातत्याच्चित्यसंशय इति सूत्रार्थः । न्या· वा· ।

** मन्यते तेन खल्वत्यन्तसंशयः तथात्यन्तसंशयः प्रसज्यतइति २ । ४ पा· ।

†† विमृश्यमानो गृह्यते इति ५ । ३ पा· ।

‡‡ न सूत्रार्थापरिज्ञानादिति सूत्रार्थः । न्या· वा· ।

§§ संशयानुपपत्तिरिति ५ पा· । ‖‖ चेति ५ । ४ । २ । ३ पा· ।

देवं नोच्यते इति विशेषापेक्ष इति वचनात्सिद्धेः । विशेषस्यापेक्षा ऽऽकाङ्क्षा सा चानुपलभ्यमाने विशेषे समर्था । न चोक्तं समानधर्मापेक्ष इति समाने च धर्मे कथमाकाङ्क्षा न भवेद् यद्ययं प्रत्यक्षः स्यात् । एतेन सामर्थ्येन विज्ञायते समानधर्माध्यवसायादिति ।

उपपत्तिवचनाद्वा । समानधर्मोपपत्तेरित्युच्यते न चान्या सद्भावसंवेदनादृते समानधर्मोपपत्तिरस्ति । अनुपलभ्यमानसद्भावो हि समानो धर्मो ऽविद्यमानवद्भवतीति । विषयशब्देन वा विषयिणः प्रत्ययस्याभिधानं यथा लोके धूमेनाग्निरनुमीयतइत्युक्ते धूमदर्शनेनाग्निरनुमीयतइति ज्ञायते कथं दृष्ट्वा हि धूममथाग्निमनुमिनोति नादृष्टे न च वाक्ये दर्शनशब्दः श्रूयते अनुजानाति च वाक्यस्यार्थप्रत्यायकत्वं तेन मन्यामहे विषयशब्देन विषयिणः प्रत्ययस्याभिधानं बोद्धा ऽनुजानात्येवमिहापि समानधर्मशब्देन समानधर्माध्यवसायमाहेति यथोहित्वा समानमनयो*र्धर्ममुपलभतइति । धर्मधर्मिग्रहणे संशयाभाव इति पूर्वदृष्टविषयमेतत् । यावद्धर्मौ पूर्वमद्राक्षं तयोः समानं धर्ममुपलभे विशेषं नोपलभइति कथं नु विशेषं पश्येयं येनान्यतरमवधारयेयमिति । न चैतत् समानधर्मोपलब्धौ धर्मधर्मिग्रहणमात्रेण निवर्ततइति । †यच्चोक्तं नार्थान्तराध्यवसायादन्यत्र संशय इति यो ह्यर्थान्तराध्यवसायमात्रं संशयहेतुमुपादद्दीत स एवं वाच्य‡ इति । यत्पुनरेतत्कार्यकारणयोः सारूप्याभावादिति कारणस्य भावाभावयोः कार्यस्य भावाभावौ कार्यकारणयोः §सारूप्यम् । यस्योत्पादाद्युत्पद्यते यस्य चानुत्पादाद्यन्नोत्पद्यते

---

* अन्ययोरिति ५ । २ पाठः । † यथोक्तमिति ५ । २ । ३ पाठः ।

‡ न ह्यर्थान्तरभावमात्रं मया संशयहेतुत्वेनोपादीयतइति किं त्वर्थान्तरविशेषः । कः पुनरयं विशेषः धर्मधर्मिभावः । धर्मउपलब्धे धर्मिणि संशय इति परिहारं मन्यन्ते न पुनारूपस्पर्शयोर्धर्मधर्मिभाव इति । अयं च परिहारो न युक्त इति पश्यामः । किं कारणम् । अर्थान्तरभावस्यानिवृत्तेः । यथैव रूपस्पर्शयोरर्थान्तरभावस्तथा धर्मधर्मिणोरिति न युक्तो ऽर्थान्तरदर्शनादर्थान्तरे संशयः । अत्रापि तदेवोत्तरं नानभ्युपगमादिति । न ब्रूमो ऽर्थान्तरदर्शनादर्थान्तरे धर्मिणि सन्देहः अपि तु समानधर्मादिविशिष्टधर्मिदर्शनाद्विशेषवति धर्मिण्येव संशय इति । न्या॰ वा॰ ।

§ विशेषानवधारणमुभयोः सारूप्यम् । यथैव समानधर्मिदर्शनेन विशेषो नावधार्यते तथा संशयेनापीति । कारणसद्भावात्कार्यसद्भाव इति न सारूप्यनिर्दे-

तत्कारणं कार्यमितरदित्येतत्सारूप्यमस्ति च संशयकारणे संशये चेतदिति। एतेनानेकधर्माध्यवसायादिति प्रतिषेधः परिहृत इति । यत्पुनरेतदुक्तं विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च न संशय इति । पृथक्प्रवादयोर्व्याहतमर्थमुपलभे विशेषं च न जानामि नोपलभे येनान्यतरमवधारयेयं तत्को ऽत्र विशेषः स्याद्येनैकतरमवधारयेयमिति संशयो विप्रतिपत्तिजनितो ऽयं न शक्यो विप्रतिपत्तिसंशयमात्रेण* निवर्तयितुमिति । एवमुपलब्ध्यनुपलब्ध्यव्यवस्थाकृते संशये वेदितव्यमिति । यत्पुनरेतद्विप्रतिपत्तौ† संप्रतिपत्तेरिति विप्रतिपत्तिशब्दस्यार्थः‡। तदध्यवसायो विशेषापेक्षः संशयहेतुस्तस्य च समाख्यान्तरेण न निवृतिः समाने ऽधिकरणे व्याहतार्थौ प्रवादौ विप्रतिपत्तिशब्दस्यार्थः तदध्यवसायो§ विशेषापेक्षः संशयहेतुः न चास्य समाख्यान्तरे योज्यमाने संशयहेतुत्वं निवर्तते तदिदमकृतबुद्धि‖संमोहनमिति¶ । यत्पुनरव्यवस्थात्मनि व्यवस्थितत्वाद्व्यवस्थाया** इति संशयहेतोरर्थस्याप्रतिषेधादव्यवस्थाभ्यनुज्ञानाच्च निमित्तान्तरेण शब्दान्तरकल्पना । व्यर्था शब्दान्तरकल्पना व्यवस्था खलु व्यवस्था†† न भवत्यव्यवस्थात्मनि व्यवस्थितत्वादिति। नानयोरुपलब्ध्यनुपलब्ध्योः सदसद्विषयत्वं विशेषापेक्षः‡‡ संशयहेतुर्न भवतीति प्रतिषेध्यते यावता चाव्यवस्थात्मनि व्यवस्थिता न तावता ऽऽत्मानं जहाति तावता ह्यनुज्ञाता व्यवस्था

शो ऽयमपि तु कार्यकारणधर्मनिर्देशः तथा च कार्यान्तरेष्वपि तदस्तीति । न हि किं चित्कार्यं कारणसद्भावमन्तरेण सम्भवतीति । न्या· वा· । यतु समानधर्मस्य कृतकत्वस्य शब्दे दर्शने ऽपि संशयानुत्पत्तेः हेतुत्वं तस्येति तत्र समानार्थापरिज्ञानात्र हि कृतकत्वं समानो धर्मो ऽन्यथा समानधर्मस्याभिधानात । समानो धर्म इति विवक्षिततज्जातीयान्यवृत्तिर्यः स समानो न पुनः कृतकत्वमेवम् । विरुद्धाव्यभिचारिधर्माध्यवसायस्य च संशयहेतुत्वानुपगमात्संशयहेतुतायाः समानधर्माध्यवसानमात्रे ऽनङ्गीकाराच्च न व्यभिचारशङ्का ।

* विप्रतिपत्तिसंप्रतिपत्तिमात्रेणेति । मु· ३ पा· ।

† तद्विप्रतिपत्तौ चेति ५ । २ । ३ पाठः ।

‡ शब्दस्य योर्थ इति ५ । २ । ३ पा· ।

§ तदध्यवसायश्चेति ५ । २ । ३ पा· ।

‖ अकृतबुद्धिमिति ५ । २ । ३ पाठः ।

¶ विप्रतिपत्तेः प्रत्येकं वादिदृष्ट्या संप्रतिपत्तिरूपत्वे ऽपि श्रोतुस्तटस्थस्योभयज्ञाने संशयोत्पत्तेः संप्रतिपत्तिशब्दवाच्यतामात्रेण दूषणोपन्यासस्यानौचित्यादिति भावः ।

** व्यवस्थितत्वाच्चाव्यवस्थाया इति ५ । २ । ३ पा· ।

†† व्यवस्थेति ५ । २ पुस्तकयोर्नास्ति ।

‡‡ विशेषापेक्षमिति ५ । २ । ३ पाठः ।

एवमियं क्रियमाणापि शब्दान्तरकल्पना नार्थान्तरं साधयतीति* । यत्पुनरे-तत्तथा ऽत्यन्तसंशयः तद्धर्मसातत्योपपत्तेरिति नायं समानधर्मादिभ्य एव संशयः किं तर्हि तद्विषयाध्यवसायाद् विशेषस्मृतिसहितादित्यतो नात्यन्त-संशय इति । अन्यतरधर्माध्यवसायाद्वा न संशय इति तन्न युक्तं विशेषापेक्षो विमर्शः संशय इति वचनात् । विशेषश्चान्यतरधर्मो न तस्मिन्नध्यवसीयमा-ने विशेषापेक्षा सम्भवतीति† ॥

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः‡ ॥ ७ ॥

यच्च यच्च संशयपूर्विका परीक्षा शास्त्रे कथायां वा तत्र§स्तत्रैवं संशये परेण प्रतिषिद्धे समाधिर्वाच्य इति । अतः सर्वपरीक्षाव्यापित्वात् प्रथमं संशयः परीक्षित इति । अथ प्रमाणपरीक्षा‖ ।

¶प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः* ॥ ८ ॥

प्रत्यक्षादीनां प्रमाणत्वं†† नास्ति त्रैकाल्यासिद्धेः पूर्वापरसहभावा-नुपपत्तेरिति । अस्य‡‡ सामान्यवचनस्यार्थविभागः ।

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्नि-कर्षात्प्रत्यक्षोत्पत्तिः ॥ ९ ॥

गन्धादिविषयं ज्ञानं प्रत्यक्षं तद्यदि पूर्वं पश्चाद्गन्धादीनां सिद्धिः नेदं गन्धादिसंनिकर्षादुत्पद्यत§§ इति ।

---

* अव्यवस्थाया आत्मनि व्यवस्थितत्वेन व्यवस्थितपदप्रतिपाद्यत्वेऽपि नाव्यवस्थात्वनि-वृत्तिः निमित्तान्तरसन्निपातेनार्थस्य संज्ञान्तरकरणेऽपि स्वरूपानपायात् ।

† अन्यतरधर्मज्ञानमात्रं संशयहेतुर्न तन्निश्चय इति भावः ।

‡ कोऽस्य सूत्रस्यार्थः । स्वयं न संशयः प्रतिषेद्धव्यः परेण तु संशये प्रतिषिद्धे एवमुत्तरं वाच्यमिति । न्या· प्रा· ।

§ तत्र तत्रेति ५ । २ । ३ पा· ।

‖ किं पुनरेषां परीक्षम् । आद्यौ तावत्सम्भवः किं प्रमाणानि सन्त्यथ न सन्तीति । सदसतोः सामान्यात्प्रमेयत्वाद्विशेषादर्शनाच्च संशयः । न्या· वा· ।

¶ व्युदस्य संशयं परः पक्षपरिग्रहेणावतिष्ठते । न्या· वा· ।

** अस्यार्थः त्रिष्वपि कालेषु प्रमाणानि नार्थं साधयन्तीति । न्या· वा· ।

†† प्रामाण्यमिति ५ । ४ । ३ पा· । ‡‡ अर्थेति ५ । ४ । २ । ३ पा· ।

§§ नेन्द्रियार्थसन्निकर्षोपेतं ज्ञानमिति सूत्रार्थे व्याघातो दोषः । यदि पूर्वं ज्ञानं नेन्द्रियार्थसन्निकर्षस्तस्य कारणमिति यदुक्तमिन्द्रियार्थसन्निकर्षोत्पन्नमिति तद् व्याहन्यते । न्या· वा· ।

पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः* ॥ १० ॥

असति प्रमाणे केन प्रमीयमाणोऽर्थः प्रमेयः स्यात् प्रमाणेन खलु प्रमीयमाणोऽर्थः प्रमेयमित्येतत्सिध्यति† ।

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ ११ ॥

यदि प्रमाणं प्रमेयं च युगपद्भवतः एवमपि गन्धादिष्विन्द्रियार्थेषु ज्ञानानि प्रत्यर्थनियतानि युगपत्सम्भवन्तीति ज्ञानानां प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावः । या इमा बुद्धयः क्रमेणार्थेषु वर्तन्ते तासां क्रमवृत्तित्वं न सम्भवतीति‡ । व्याघातश्च युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति । एतावांश्च प्रमाणप्रमेययोः सद्भावविषयः स चानुपपन्न इति तस्मात्प्रत्यक्षादीनां प्रमाणत्वं न सम्भवतीति ।

अस्य समाधिः । उपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद्यथादर्शनं विभागवचनम् । क्व चिदुपलब्धिहेतुः पूर्वं पश्चादुपलब्धिविषयः । यथा§ऽऽदित्यस्य प्रकाशः । उत्पद्यमानानां क्व चित्पूर्वमुपलब्धिविषयः पश्चादुपलब्धिहेतुः यथावस्थितानां प्रदीपः ।

---

* यद्यपि स्वरूपं न प्रमाणाधीनं तथाऽपि तस्य प्रमेयत्वं तदधीनं तदपि चेत्प्रमाणात्पूर्वं न प्रमाणयोगनिबन्धनं स्यादित्यर्थः । ता· टी· ।

† न प्रमाणनिमित्ता प्रमेयसंज्ञेति व्याघातः । प्रमाणमन्तरेण न प्रमेयमात्मानं लभतइति न प्रमाणायत्ता प्रमेयसिद्धिः । न्या· वा· ।

‡ इन्द्रियार्थानां बुद्धीनां च सन्निपाते सति युगपद्भाव इति क्रमवृत्तित्वं दृष्टं न स्यादिति व्याघातो दोषः । युगपज्ज्ञानानुत्पत्तिरित्युक्तं तद् व्याहन्यते । न्या· वा· ।

§ अस्य वाक्यस्यासिद्धतोद्भावनमर्थः । न्या· वा· । अर्थसाधकत्वस्वभावकानां प्रत्यक्षादीनामर्थसाधकत्वं नेति व्याघातः । प्रामाण्यमात्रप्रतिषेधे च धर्मिणोऽप्रतिषेधात् स्वरूपेण सिद्धिः प्रत्यक्षादीनाम् । यदि च प्रमाजननैकलब्धजीवितानां प्रत्यक्षादीनां प्रामाण्ये निषिद्धे कुतः स्वरूपसिद्धिरित्युच्यते तर्हि साधकस्यापि प्रमाणत्वानुपपत्तेरप्रमाणेनाप्रामाण्यसाधनासम्भवः । साधकस्य प्रामाण्याभ्युपगमे च बाधः । प्रत्यक्षादीनां चाप्रामाण्यप्रतिज्ञायामन्येषां प्रामाण्याभ्युपगमलाभात्तेषां वक्तव्यतापत्तौ तत्साधकप्रमाणविशेषोपन्यासे तेनाभ्युपगतप्रामाण्येनानुमानादिना बाधः । त्वदुक्तेनैव हेतुना त्वदुपन्यस्तस्यापि प्रामाण्यसाधनस्याप्यप्रमाणतापत्तावप्रमाणे साध्यासिद्धिश्च । प्रामाण्यस्य धर्मस्य धर्मिणोऽभेदाभ्युपगमेन धर्मप्रतिषेधे फलतो धर्मिणोऽपि प्रतिषेध इत्युक्तौ च प्रत्यक्षादीनामिति षष्ठ्यर्थानुपपत्तिः प्रामाण्यमिति भावप्रत्ययानुपपत्तिश्च । हेतुत्वेनोपन्यस्तायास्त्रैकाल्यासिद्धेस्त्रैकाल्यनिष्ठत्वेन साध्यवैयधिकरण्यादसाधकत्वम् । कालत्रये ऽप्यर्थसाधकत्वाभावस्य तदर्थत्वे साध्यादविशेष इति वार्तिकम् ।

‖ यथा आदित्यप्रकाशे ५ । ४ । २ पा· ।

क्व चिदुपलब्धिहेतुरुपलब्धिविषयश्च सह भवतः यथा धूमेनाग्नेर्ग्रहणमिति। उपलब्धिहेतुश्च प्रमाणं प्रमेयं तूपलब्धिविषयः। एवं प्रमाणप्रमेययोः पूर्वापरसहभावे ऽनियते यथा ऽर्थो दृश्यते तथा विभज्य वचनीय इति। तत्रैकान्तेन प्रतिषेधानुपपत्तिः। सामान्येन खलु विभज्य प्रतिषेध उक्त इति।

समाख्याहेतोस्त्रैकाल्ययोगात्तथाभूता समाख्या। यत्पुनरिदं पश्चात्सिद्धे* च सति प्रमाणे प्रमेयं न सिध्यति प्रमाणेन प्रमीयमाणो ऽर्थः प्रमेयमिति विज्ञायतइति प्रमाणमित्येतस्याः समाख्याया उपलब्धिहेतुत्वं निमित्तं तस्य चैकाल्ययोगः। उपलब्धिमकार्षीदुपलब्धिं करोति उपलब्धिं करिष्यतीति समाख्याहेतोस्त्रैकाल्ययोगात् समाख्या तथाभूता। प्रमितेा ऽनेनार्थः प्रमीयते प्रमास्यतइति प्रमाणम्। प्रमितं प्रमीयते प्रमास्यते इति च प्रमेयम्। एवं सति भविष्यत्यस्मिन् हेतुत उपलब्धिः। प्रमास्यते ऽयमर्थः प्रमेयमिदमित्येतत्सर्वं भवतीति।

त्रैकाल्यानभ्यनुज्ञाने च व्यवहारानुपपत्तिः। यश्चैवं नाभ्यनुजानीयात्तस्य पाचकमानय पक्ष्यति लावकमानय लविष्यतीति व्यवहारो नोपपद्यतइति। प्रत्यक्षादीनामप्रामाण्यं चैकाल्यासिद्धेरित्येवमादिवाक्यं प्रमाणप्रतिषेधः। तचायं प्रष्टव्यः अयानेन प्रतिषेधेन भवता किं क्रियतइति। किं सम्भवो निवर्त्यते अथासम्भवो ज्ञाप्यतइति। तद्यदि सम्भवो निवर्त्यते सति सम्भवे प्रत्यक्षादीनां प्रतिषेधानुपपत्तिः। अथासम्भवो ज्ञाप्यते प्रमाणलक्षण†प्राप्तस्तर्हि प्रतिषेधः प्रमाणासम्भवस्योपलब्धिहेतुत्वादिति‡। किं चातः॥

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः§ ॥ १२ ॥

अस्य तु विभागः पूर्वं हि प्रतिषेधसिद्धावसति प्रतिषेध्ये किं॥ प्रतिषिध्यते। पश्चात्सिद्धौ प्रतिषेध्यासिद्धिः प्रतिषेधाभावादिति युगपत्सिद्धौ

---

* सिद्धावसति प्रमाणे इति· ५। ४। २। ३ पा·। † लक्षणमिति ५। ४। २। ३ पा·।

‡ प्रमाणानि पक्षीकृत्यासत्ता शून्यत्वं वा ज्ञाप्यते। आद्ये पक्षतावच्छेदकरूपेण पक्षसिद्धावेव तत्र साध्यसाधनसम्भवात्तत्सद्भावाभ्युपगमे तेनैव बाधः। द्वितीये ऽपि पक्षतावच्छेदकस्य प्रमाणस्याभ्युपगमे तथैव बाधः। साधनस्य च प्रामाण्यानुपगमो ऽप्रमाणेन साधनासम्भवः प्रामाण्याभ्युपगमे तेनैव बाध इति भावः।

§ भवदुपन्यस्तहेतोः प्रतिषेधे ऽपि सत्त्वेन तेन साधनासम्भवाद् व्याघात इति भावः।

॥ किमनेनेति ५। ४। २। ३ पा·।

प्रतिषेध्य*सिद्धभ्यनुज्ञानादनर्थकः प्रतिषेध इति । प्रतिषेधलक्षणे च वाक्ये ऽनुपपद्यमाने सिद्धं प्रत्यक्षादीनां प्रमाणत्व†मिति ॥

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ॥ १३ ॥

कथं चैकाल्यासिद्धेरित्यस्य हेतोर्यदुदाहरणमुपादीयते हेत्वर्थस्य साधकत्वं दृष्टान्ते दर्शयितव्यमिति । न च तर्हि प्रत्यक्षादीनामप्रामाण्यम् । अथ प्रत्यक्षादीनामप्रामाण्य‡मुपादीयमानमप्युदाहरणं नार्थं साधयिष्यतीति । सोयं सर्वप्रमाणैर्व्याहतो हेतुरहेतुः सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध§ इति । वाक्यार्थो ह्यस्य सिद्धान्तः । स च वाक्यार्थः प्रत्यक्षादीनि नार्थं साधयन्तीति इदं चावयवानामुपादानमर्थस्य साधनायेति । अथ नोपादीयते अप्रदर्शितहेत्वर्थस्य दृष्टान्तेन साधकत्वमिति निषेधो‖ नोपपद्यते हेतुत्वासिद्धेश्चरिति ॥

**तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ॥ १४ ॥

प्रतिषेधलक्षणे स्ववाक्ये तेषामवयवाश्रितानां प्रत्यक्षादीनामप्रामाण्ये ऽभ्यनुज्ञायमाने परवाक्ये ऽप्यवयवाश्रितानां प्रामाण्यं प्रसज्यते अविशेषा-

---

* प्रतिषेधेति ४ । २ । ३ पा० ।

† प्रत्यक्षादीनामप्रामाण्यं चैकाल्यासिद्धेः प्रत्यक्षादीनां प्रामाण्यासिद्धेरिति च वाक्ययोरेकार्थत्वं भिन्नार्थत्वं वा । आद्ये प्रत्यक्षादीनां प्रामाण्यमित्येव कस्माच्चोच्यते । कुतश्च तयोरेकार्थताऽवगमः । यदि प्रमाणतस्तर्हि व्याघातः । अथ प्रमाणान्तरात्तर्हि संज्ञाभेदमात्रं साधकप्रमाणाभ्युपगमात् । भिन्नार्थत्वेपि तत्त्वे प्रमाणोपन्यासे तथैव व्याघातः । प्रत्यक्षादीनि न सन्तीति वाक्येन चान्यत्र प्रसिद्धे घटे गृहादिसम्बन्धस्याभाव इवान्यत्र प्रसिद्धेषु प्रमाणेषु सामर्थ्यप्रतिषेध एवोच्येत न तु प्रमाणस्वरूपाभावो ऽप्रसिद्धप्रतियोगिकस्याभावस्यानभ्युपगमात् । प्रमाणस्वरूपसत्त्वाभ्युपगमे तु व्याघातः । प्रमाणानां चासत्त्वं प्रतिपाद्यमानं केन कथं कं प्रति चेति वक्तव्यम् । तत्र प्रतिपाद्यस्य प्रतिपादयितुः प्रतिपादकहेतोश्च तेषां च भेदस्य प्रामाणिकत्वे तेनैव बाधः । अनभ्युपगमे प्रतिपादनानुपयोग इति दिक् ।

‡ अथ प्रत्यक्षादीनामप्रामाण्यमिति ४ । २ पुस्तकयोर्नास्ति ।

§ गौ. सू. अ. १ आ. १ सू. ४ ७ । ‖ प्रतिषेध इति ५ । ४ । २ पा. ।

¶ बुद्धिविवक्षाप्रयत्नवायूदीरणताल्वभिघातोष्ठस्पन्दादीन्यवर्जयन् बुद्ध्या वाक्यमुच्चारयसि स्थाणुकण्टकसर्पादीन् परिहरन् पादविहरणादीनि करोषि ते एते वाक्यप्रवृत्तौ प्रमाणप्रतिषेधाश्च सम्भवत इति न्या. वा.।

** यदि माध्यमिको ब्रूयात् प्रत्यक्षादीनामप्रामाण्यं चैकाल्यासिद्धेरिति स्ववाक्यावयवाश्रितानि यथालोकप्रतीतिसिद्धानि तैरविचारितसिद्धैरितरेषां प्रामाण्यं प्रतिषिध्यतइति तत्रेदमुच्यते । ता. टी. ।

दिति । एवं च न सर्वाणि प्रमाणानि प्रतिषिध्यन्तइति विप्रतिषेध इति वीत्ययमुपसर्गः सम्प्रतिपत्त्यर्थे न व्याघाते ऽर्थाभावादिति* ॥

त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्तत्सिद्धेः ॥ १५ ॥

किमर्थं पुनरिदमुच्यते पूर्वोक्तनिबन्धनार्थम्† । यतावत्पूर्वोक्तमुपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद् यथादर्शनं विभागवचनमिति तदितःसमुत्थानं यथा विज्ञायेत । अनियमदर्शी खल्वयमृषिर्नियमेन प्रतिषेधं प्रत्याचष्टे त्रैकाल्यस्य‡ चायुक्तः प्रतिषेध इति । तत्रैकां विधामुदाहरति शब्दादातोद्यसिद्धिवदिति । यथा पश्चात्सिद्धेन शब्देन पूर्वसिद्धमातोद्यमनुमीयते साध्यं चातोद्यं साधनं च शब्दः अन्तर्हिते ह्यातोद्ये स्वनतो ऽनुमानं भवतीति । वीणा वाद्यते वेणुः पूर्यते इति स्वनविशेषेण आतोद्यविशेषं प्रतिपद्यते । तथा पूर्वसिद्धमुपलब्धिविषयं पश्चात्सिद्धेनोपलब्धिहेतुना प्रतिपद्यते इति । निदर्शनार्थत्वाच्चास्य शेषयोर्विधयोर्यथोक्तमुदाहरणं वेदितव्यमिति§ । कस्मात्पुनरिह तन्नोच्यते पूर्वोक्तमुपपाद्यतइति । सर्वथा तावदयमर्थः प्रकाशयितव्यः स इह वा प्रकाश्येत तत्र वा न कश्चिद्विशेष इति । प्रमाणं प्रमेयमिति च समाख्या समावेशेन वर्तते समाख्यानिमित्तवशात् । समाख्यानिमित्तं तूपलब्धिसाधनं प्रमाणम् उपलब्धिविषयश्च प्रमेयमिति । यदा चोपलब्धिविषयः कस्य चिदुपलब्धिसाधनं भवति तदा प्रमाणं प्रमेयमिति चैको ऽर्थो ऽभिधीयते । अस्यार्थस्यावद्योतनार्थमिदमुच्यते ॥

प्रमेया च॥ तुलाप्रामाण्यवत्¶ ॥ १६ ॥

गुरुत्वपरिमाण**ज्ञानसाधनं तुला प्रमाणं ज्ञानंविषयो गुरुद्रव्यं सुवर्णादि प्रमेयम् । यदा सुवर्णादिना तुलान्तरं व्यवस्थाप्यते तदा तुलान्तरप्रतिपत्तौ

---

* किमुक्तं भवति कानि चित्प्रमाणानि प्रतिषिध्यन्ते कानि चिदभ्यनुज्ञायन्तइति यानि स्ववाक्याश्रितानि तान्यभ्यनुज्ञायन्ते परवाक्याश्रितानि प्रतिषिध्यन्ते इति । न्या॰ वा॰ ।

† न तदस्माभिरुत्सूत्रमुक्तमपि तु सूत्रार्थ एवेति ज्ञापनार्थं सूत्रपाठो ऽस्माकमित्यर्थः । ता॰ टी॰ । ‡ त्रैकाल्ये चेति ५ । ४ । २ । ३ पा॰

§ सहभावस्योदाहरणं धूमदर्शनादग्निं धूमविशेषणं प्रतिपद्यते । पूर्वसिद्धिरुपलब्धिहेतुरादित्यः पश्चात्सिद्धानां प्रकाशक इति । न्या॰ वा॰ ॥ प्रमेयता चेति १ पा॰ ।

¶ यथा प्रामाण्ये तुला प्रमेया च तथा ऽन्यदपि सर्वं प्रमाणे प्रमेयमित्यर्थः । ता॰ टी॰ ।

** प्रमाणेति ५ । ४ । २ । ३ पा॰ ।

सुवर्णादि प्रमाणं तुलान्तरं प्रमेयमिति । एवमनवयवेन तन्त्रार्थ उद्दिष्टो वेदितव्यः । आत्मा तावदुपलब्धिविषयत्वात् प्रमेये परिपठितः । उपलब्धौ स्वातन्त्र्यात् प्रमाता । बुद्धिरुपलब्धिसाधनत्वात् प्रमाणम् उपलब्धिविषयत्वात् प्रमेयम् उभयाभावात् प्रमितिः । एवमर्थविशेषे समाख्यासमावेशो योज्यः । तथा च कारकशब्दा निमित्तवशात्* समावेशेन वर्तन्तइति । वृत्तस्तिष्ठतीति स्वस्थितौ स्वातन्त्र्या†त्कर्ता । वृत्तं पश्यतीति दर्शनेनाप्तुमिष्यमाणतमत्वात् कर्म‡ । वृत्तेन चन्द्रमसं ज्ञापयतीति ज्ञापकस्य साधकतमत्वात् करणम्§ । वृत्तायोदकमासिञ्चतीति आसिच्यमानेनोदकेन वृत्तमभिप्रेतीति संप्रदानम्‖ । वृत्तात्पर्णं पततीति ध्रुवमपाये ऽपादानमित्यपादानम्¶ । वृत्ते वयांसि सन्तीत्याधारो ऽधिकरणमित्यधिकरणम्** । एवं च सति न

---

* कारकशब्दनिमित्तवशादिति । २ । पाठः ।

† कारकान्तरानपेक्षित्वं स्वातन्त्र्यम् । न हि वृक्षस्तिष्ठन् स्वस्थितौ कारकान्तरं प्रयुङ्क्तइति । यद्वा ऽयं स्थितिशब्दो गतिनिषेधवचनो भवति तदैवम् । यदाप्यस्तेरभिधायकस्तदाप्यस्तेर्व्यक्तिनिमित्तत्वेनावतिष्ठमानो ऽस्तिं व्यनक्तीति कर्तेत्युच्यते । यद्यपि गेहसम्बन्धाद्यभिधायको भवत्यस्तिशब्दो यथा गेहे देवदत्तस्तिष्ठतीति प्रतिनिर्दिष्टे ऽस्तीति गम्यते तदा न सत्तामाह न गतिप्रतिषेधमपि तु देवदत्तगेहसम्बन्धं तदापि देवदत्तगेहसम्बन्धानुभवक्रियास्तस्यामपि न कारकान्तराणि प्रयुङ्क्तइति स्वतन्त्रो भवति । यदा ऽप्ययमभग्नवचनः स्थितिशब्दस्तिष्ठति वृक्षो न भग्न इति तदापि स्वस्थितौ न कारकान्तराणि प्रयुङ्क्तइति स्वतन्त्रो भवति । समुदायैकदेशं वा स्वस्थितौ प्रयुङ्क्ते वृक्षो मूलैस्तिष्ठति प्रासादः स्तम्भैर्धार्यतइति । पूर्वापरप्रत्ययैकविषयता वा स्थितिः । यद्वस्तु प्राक् सिद्धं पुनर्निमित्तान्तरसन्निधाने सत्युपलभ्यते यत्तस्यानेकायुगपत्कालप्रत्ययविषयत्वं सा स्थितिः । तस्यां स्थितावस्य यत्सहकारिसाधनं चक्षुरादि तत्करणमिति । न्या· वा· ।

‡ कर्मणि कः कारकार्थः क्रियाविषयत्वं यत्खलु क्रियाया विषयभावेन व्यवतिष्ठतइत्येतत्कर्म । एतेन कर्मलक्षणेन तथायुक्तं चानीप्सितमिति संगृहीतम् । न्या· वा· ।

§ आनन्तर्यप्रतिपत्तिः करणस्य साधकतमत्वार्थः वृक्षेण चन्द्रमसं ज्ञापयतीति वृक्षं गृहीत्वा ऽनन्तरं चन्द्रमसं प्रतिपद्यतइति वृक्षः करणम् । न्या· वा ।

‖ कारकशब्दवाच्यकर्मणा ऽऽप्तुमभीष्टं संप्रदानम् । आसिच्यमानमुदकं कर्मणा वृक्षं प्राप्नोतीति वृक्षः संप्रदानं भवतीति । न्या· वा· ।

¶ अपगच्छत्यवतिष्ठते यत्तदपादानम् । यत्पतति तदपगच्छति तस्मिन्नपगच्छत्यवतिष्ठते वृक्ष इति । न्या· वा· ।

** धृतिहेतुरधिकरणम् । न्या· वा· ।

द्रव्यमात्रं कारकं न क्रियामात्रं किं तर्हि क्रियासाधनं क्रियाविशेषयुक्तं कारकम् । यत्क्रियासाधनं स्वतन्त्रः स कर्ता न द्रव्यमात्रं न क्रियामात्रं क्रियया* व्याप्तुमिष्यमाणतमं कर्म न द्रव्यमात्रं न क्रियामात्रम् । एवं साधकतमादिष्वपि । एवं च कारकान्वाख्यानं यथैव उपपत्तित एवं लक्षणतः कारकान्वानमपि न द्रव्यमात्रेण न क्रियया† वा किं तर्हि क्रियासाधने क्रियाविशेषयुक्तइति । कारकशब्दश्चायं प्रमाणं प्रमेयमिति स च कारकधर्मं न ह्यातुमर्हति। अस्ति भोः कारकशब्दानां निमित्तवशात् समावेशः । प्रत्यक्षादीनि च प्रमाणानि उपलब्धिहेतुत्वात् प्रमेयं चोपलब्धिविषयत्वात् । संवेद्यानि प्रत्यक्षादीनि‡ प्रत्यक्षेणोपलभे अनुमानेनोपलभे उपमानेनोपलभे आगमेनोपलभे प्रत्यक्षं मे ज्ञानमानुमानिकं मे ज्ञानमौपमानिकं मे ज्ञानमागमिकं मे ज्ञानमिति विशेषा गृह्यन्ते । लक्षणतश्च ज्ञाप्यमानानि ज्ञायन्ते विशेषेणेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्येवमादिना सेयमुपलब्धिः प्रत्यक्षादिविषया किं प्रमाणान्तरतो ऽथान्तरेण प्रमाणान्तरमसाधनेति । कश्चाच विशेषः ॥

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥ १७ ॥

यदि प्रत्यक्षादीनि प्रमाणेनोपलभ्यन्ते येन प्रमाणेनोपलभ्यन्ते तत्प्रमाणान्तरमस्तीति प्रमाणान्तरसद्भावः प्रसज्यतइति अनवस्थामाह तस्याप्यन्येन तस्याप्यन्येनेति । न चानवस्था शक्यानुज्ञातुमनुपपत्तेरिति । अस्तु तर्हि प्रमाणान्तरमन्तरेण निःसाधनेति ॥

तद्विनिवृत्तेर्वा §प्रमाणसिद्धिवत्प्रमेयसिद्धिः ॥ १८ ॥

यदि प्रत्यक्षाद्युपलब्धौ प्रमाणान्तरं निवर्तते आत्मेत्युपलब्धावपि प्रमाणान्तरं निवर्त्स्यत्यविशेषात् । एवं च सर्वप्रमाणविलोप इत्यत आह ॥

न प्रदीपप्रकाशसिद्धिवत्तत्सिद्धेः‖ ॥ १९ ॥

---

* क्रियया ख्यातुमिष्यमाणतमम् इति १ पा· ।

† वेति ५ । ४ । ३ पुस्तके नास्ति ।

‡ संवेद्यानि प्रत्यक्षादीनि प्रमाणानि चेति ५ । ४ । २ । १ पाठः ।

§ प्रमाणान्तरसिद्धिवदिति १, २ पा·। मूले तु वार्तिकानुसारी धृतः ।

‖ प्रदीपप्रकाशो घटाद्युपलब्धिसाधनस्याङ्गत्वात्प्रमाणं स च प्रत्यक्षादिभिरेवोपलभ्यते नासावात्मोपलब्धौ प्रत्यक्षादिव्यतिरेकि प्रमाणं प्रयोजयति तैरेवोपलभ्यते तथा प्रमाणान्यपि प्रत्यक्षादिभिरेवोपलभ्यन्तइति दृष्टान्तमात्रमेतत् । को

यथा प्रदीपप्रकाशः प्रत्यक्षाङ्गत्वात् दृश्यदर्शने प्रमाणं स च प्रत्यक्षान्तरेण चक्षुषः सन्निकर्षेण गृह्यते । प्रदीपभावाभावयोर्दर्शनस्य तथाभावाद्दर्शनहेतुरनुमीयते तमसि प्रदीपमुपाददीथा इत्याप्तोपदेशेनापि प्रतिपद्यते । एवं प्रत्यक्षादीनां यथादर्शनं प्रत्यक्षादिभिरेवोपलब्धिः । इन्द्रियाणि तावत् स्वविषयग्रहणेनैवानुमीयन्ते अर्थाः प्रत्यक्षतो गृह्यन्ते इन्द्रियार्थसन्निकर्षात्स्वाश्रयेण लिङ्गेनानुमीयन्ते इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमात्ममनसोः संयोगविशेषादात्मसमवायाच्च सुखादिवद्गृह्यते एवं प्रमाणविशेषो विभज्य वचनीयः । यथा च दृश्यः सन् प्रदीपप्रकाशो दृश्यान्तराणां दर्शनहेतुरिति दृश्यदर्शनव्यवस्थां लभते एवं प्रमेयं सत्किञ्चिदर्थजातमुपलब्धिहेतुत्वात् प्रमाणप्रमेयव्यवस्थां लभते । सेयं प्रत्यक्षादिभिरेव प्रत्यक्षादीनां *यथादर्शनमुपलब्धिर्न प्रमाणान्तरतो न च प्रमाणमन्तरेण† निःसाधनेति ॥

तेनैव तस्याग्रहणमिति चेद् नार्थभेदस्य लक्षणसामान्यात् । प्रत्यक्षादीनां प्रत्यक्षादिभिरेव ग्रहणमित्ययुक्तम्‡ अन्येन ह्यन्यस्य ग्रहणं दृष्टमिति नार्थभेदस्य लक्षणसामान्यात्§ । प्रत्यक्षलक्षणेनानेकोर्थः संगृहीतस्तच्च केन चित्कस्य चिद्ग्रहणमित्यदोषः । एवमनुमानादिष्वपीति यथोद्धृतेनोदकेनाशयस्थस्य¶ ग्रहणमिति ॥

** **ज्ञातृमनसोश्च दर्शनात् ।** अहं सुखी अहं दुःखी चेति तेनैव ज्ञाचा†† तस्यैव ग्रहणं दृश्यते । युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति च तेनैव मनसा तस्यैवानुमानं दृश्यते ज्ञातुर्ज्ञेयस्य चाभेदो ग्रहणस्य ग्राहकस्य चाभेद इति ॥

ऽत्र न्याय इति चेदयं न्याय उच्यते । प्रत्यक्षादीनि स्वोपलब्धौ प्रमाणान्तराप्रयोजकानि परिच्छेदसाधनत्वात् प्रदीपवत् सामान्यविशेषवत्त्वाच्च । यत्सामान्यविशेषवत्तत्स्वोपलब्धौ न प्रत्यक्षादिव्यतिरेकि प्रमाणं प्रयोजयति यथा प्रदीप इति । संवेद्यत्वादाश्रितत्वात्कारणवाद्वेत्येवमादि प्रदीपवदिन्द्रियादयोऽपि प्रत्यक्षाङ्गत्वात्प्रत्यक्षादिव्यतिरिक्तप्रमाणान्तराप्रयोजका इति । न्या. वा. ।

* यथादर्शनमिति ५ ३ । नास्ति । † न च प्रमाणान्तरमन्तरेणेति ५ । २ । ३ पाठः ।

‡ इत्युक्तमिति ५ ३ पा. । § त्वन्यस्येति ४ । ३ पा. ।

|| लक्षणाप्रामाण्यादिति ४ । ३ पा. । ¶ नाशयस्येति २ । ३ पा. । उद्धृतजलजातीयत्वं कूपादिस्थस्य जलस्योद्धृतादन्यस्यैव गृह्यते न तेनैव तस्य ग्रहणं तथेहापीत्यर्थः ।

** **न चायमेकान्तो न तेनैव तस्य ग्रहणं भवतीति । भवत्यपि कदा चिदन्यथा ।** न्या. वा. ।

†† ज्ञानादिति ४ । २ । ३ पा. ।

निमित्तभेदो ऽत्रेति चेत् समानम् । न निमित्तान्तरेण विना ज्ञाता ऽऽत्मानं जानीते न च निमित्तान्तरेण विना मनसा मनो गृह्यतइति समानमेतत् प्रत्यक्षादिभिः । प्रत्यक्षादीनां ग्रहणमित्यत्राप्यर्थभेदो न गृह्यतइति† ।

प्रत्यक्षादीनां चाविषयस्यानुपपत्तेः । यदि स्यात् किं चिदर्थजातं प्रत्यक्षादीनामविषयः यत्प्रत्यक्षादिभिर्न शक्यं ग्रहीतुं तस्य ग्रहणाय प्रमाणान्तरमुपादीयेत तत्तु न शक्यं केन चिदुपपादयितुमिति प्रत्यक्षादीनां यथादर्शनमेवेदं सच्चासच्च सर्वं विषय‡ इति ।

के चित्तु दृष्टान्तमपरिगृहीतं हेतुना विशेषहेतुमन्तरेण साध्यसाधनायोपाददते यथा प्रदीपप्रकाशः प्रदीपान्तरप्रकाशमन्तरेण गृह्यते तथा प्रमाणानि प्रमाणान्तरमन्तरेण§ गृह्यन्तइति स चायम् ।

क चिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क चिदनेकान्तः‖ । यथा ऽयं प्रसङ्गो निवृत्तिदर्शनात् प्रमाणसाधनायोपादीयते ¶एवं प्रमेयसाधनायाप्युपादेयो ऽविशेषहेतुत्वात् । यथा स्थाल्यादिरूपग्रहणे प्रदीपप्रकाशः प्रमेयसाधनायोपादीयते एवं प्रमाणसाधनायाप्युपादेयो विशेषहेत्वभावात्सोयं विशेषहेतुपरिग्रहमन्तरेण दृष्टान्त एकस्मिन्पक्षे उपादेयो न प्रतिपक्षइत्यनेकान्तः* । एकस्मिंश्च पक्षे दृष्टान्त इत्यनेकान्तो विशेषहेत्वभावा**दिति ।

विशेषहेतुपरिग्रहे सति उपसंहाराभ्यनुज्ञानादप्रतिषेधः । विशेषहेतु††परिगृहीतस्तु दृष्टान्त एकस्मिन्पक्षे उपसंह्रियमाणो न ‡‡शक्यो ज्ञातुम् । एवं च सत्यनेकान्त इत्ययं प्रतिषेधो न भवति ।

---

* यथैव ज्ञाता सुखादिसंबन्धापेतस्तद्विशेषणमात्मानं प्रतिपद्यते ऽहं सुख्यहं दुःखी चेति तथा प्रमाणमपि प्रमाणविषयत्वेनावतिष्ठमानं प्रमेयम् । न्या· वा· ।

† अर्थभेदो गम्यते इति ४ । २ । ३ पाठः । ‡ सर्वविषय इति ४ । २ । ३ पा· ।

§ प्रमान्तरेणान्तरेणेति ४ । ३ पाठः ।

‖ तात्पर्यटीकालेखशैल्या सूत्रमिदमिति प्रतीयते विश्वनाथपञ्चाननस्तत्तवृत्तौ भाष्यमित्युक्त्वा सूत्राङ्कं न निवेशितः ।

¶ एवमिति ४ । २ पुस्तकयोर्नास्ति ।

** अयं च प्रदीपप्रकाशदृष्टान्तः प्रमाणपक्षे भवतु मा भूत्प्रमेयपक्षइत्यत्रापि नियमहेतुर्वक्तव्यः । प्रदीपप्रकाशो दृष्टान्तो भवतु मा भूत् स्थाल्यादिदृष्टान्त इत्यत्रापि नियमहेतुर्वक्तव्यः । सो ऽयमुभयथा ऽनेकान्तो हेतुमन्तरेणादृष्टान्तः प्रसक्तः । न्या· वा· ।

†† प्रकाशत्वादिना संगृहीतः । न्या· वा· ।

‡‡ न शक्योननुज्ञातुमिति ५ । ४ । २ । ३ पाठः ।

प्रत्यक्षादीनां प्रत्यक्षादिभिरुपलब्धावनवस्थेति चेद्* न संविद्विषयनिमित्तानाम् उपलब्ध्या व्यवहारोपपत्तेः । प्रत्यक्षेणार्थमुपलभे अनुमानेनार्थमुपलभे †इति प्रत्यक्षं मे ज्ञानमानुमानिकं मे ज्ञान-‡मागमिकं मे ज्ञानमिति संविद्विषयं संवित्तिनिमित्तं§ चोपलभमानस्य धर्मार्थसुखापवर्गप्रयोजनस्तत्प्रत्यनीकपरिवर्जनप्रयोजनश्च व्यवहार उपपद्यते सोयं तावत्येव‖ निवर्त्ततेश्‌ न चास्ति व्यवहारान्तरमनवस्थासाधनीयं** येन प्रयुक्तो ऽनवस्था††मुपाददीतेति ।

सामान्येन प्रमाणानि परीक्ष्य विशेषेण परीक्ष्यन्ते तच्च ।

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥ २० ॥

आत्ममनःसन्निकर्षो हि कारणान्तरं नोक्तमिति । न चासंयुक्ते द्रव्ये संयोगजन्यस्य गुणस्योत्पत्तिरिति । ज्ञानोत्पत्तिदर्शनादात्ममनःसन्निकर्षः कारणं मनःसन्निकर्षानपेक्षस्य चेन्द्रियार्थसन्निकर्षस्य ज्ञानकारणत्वे युगपदुत्पद्येरन् बुद्धय इति मनःसन्निकर्षो ऽपि कारणम् । तदिदं सूत्रं पुरस्ता‡‡त्कृतभाष्यम् ।

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥ २१ ॥

आत्ममनसोः सन्निकर्षाभावे नोत्पद्यते प्रत्यक्षमिन्द्रियार्थसन्निकर्षाभावत्वादिति । सति चेन्द्रियार्थसन्निकर्षे ज्ञानोत्पत्तिदर्शनात् कारणभावं§§ ब्रुवते ।

---

* यदि प्रत्यक्षादीनि प्रत्यक्षादिभिरुपलभ्यन्ते तान्यप्यन्यैरित्यनवस्था । अनवस्थायां चाद्यप्रमाणाधिगमो न स्यात् । अथ व्यवस्यास्ति आद्यप्रमाणाधिगतिरप्रमाणा प्रसज्येत । न्या· वा· ।

† उपमानेनार्थमुपलभे आगमेनार्थमुपलभे इति ५ पुस्तके ऽधिकः पाठः ।

‡ औपमानिकं मे ज्ञानमिति ५ । ३ अधिकः पा· ।

§ संवित्तिविषयमिति संवित्तिनिमित्तं चेति ५ । ४ । २ । ३ पा· ।

‖ तावत्येवेति ५ । ३ पा· । ¶ निर्वर्ततइति ५ । २ । ३ पा· ।

** व्यवसायेन विषये प्रकाशिते ऽनुव्यवसायेन च तज्ज्ञानप्रकाशने तावन्मात्रेण सर्वव्यवहारोपपत्तेः पुनरनुव्यवसायप्रकाशनाय ज्ञानान्तरं नापेक्ष्यतइति नास्त्यनवस्थेति भावः ।

†† उपादीयेतेति ५ । ३ पा· ।

‡‡ आत्ममनःसंयोगस्य ज्ञानान्तरसाधारणत्वादिन्द्रियमनःसंयोगस्यासाधारणत्वेपि सूत्रस्य कारणान्तरनिषेधे ऽतात्पर्यादन्यतरेणैव लक्षणोपपत्तेः प्रत्यक्षस्य चाक्षुषं ज्ञानं रूपज्ञानमित्यादीन्द्रियार्थापरागेणैवाभिलापादेवमुक्तिरिति । §§ कारणाभावमिति ५ । ४ । ३ । २ पाठोऽसंगतः ।

दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः ॥ २२ ॥

दिगादिषु सत्सु *ज्ञानभावात्तान्यपि कारणानीति । अकारणभावेऽपि ज्ञानोत्पत्तिर्दिगादिसन्निधेरवर्ज्जनीयत्वात्। यदाप्यकारणं दिगादीनि ज्ञानोत्पत्तौ तदापि सत्सु दिगादिषु ज्ञानेन भवितव्यं न हि दिगादीनां सन्निधिः शक्यः परिवर्जयितुमिति । तच्च †कारणभावे हेतुवचनमेतस्माद्धेतोर्दिगादीनि ज्ञानकारणानीति । आत्ममनःसन्निकर्षस्तर्ह्युपसंख्येय इति । तचेदमुच्यते ।

ज्ञान‡लिङ्गत्वादा§त्मनो नानव॥रोधः ॥ २३ ॥

ज्ञानमात्मलिङ्गं तद्गुणत्वान्न चासंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरस्तीति ॥

¶तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ २४ ॥

अनवरोध इति वर्तते । युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्युच्यमाने सिद्धत्येव मनःसन्निकर्षापेक्ष इन्द्रियार्थसन्निकर्षो ज्ञानकारण**मिति ।

प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम् ॥ २५ ॥

---

* ज्ञानाभावादिति ५ । ४ । २ ।

† कतमेन पुनर्न्यायेन दिगाद्यकारणं सामर्थ्यानुपलब्धेः । न हि ज्ञानोत्पत्तौ दिगादीनां सामर्थ्यमुपलभ्यते तस्मादकारणम् । न्या· वा· । दिगादीनां नित्यत्वाद् व्यापकत्वाच्च तत्संनिधेरवर्जनीयतया संनिधिमात्रेण न कारणत्वमाशङ्कितुं युक्तम् । यथा रूपोपलब्धौ तेजसो रूपविशेषो हेतुर्न पुनस्तेजसः स्पर्शविशेषः संनिधिमात्रेण सामर्थ्यादर्शनात् । रूपस्य त्वन्वयव्यतिरेकाभ्यां सामर्थ्यं कृप्तं चन्द्रमस्तेजःस्पर्शेनोष्णेन विनापि तद्रूपोपलब्धेः । अपवरकादिस्थस्य चौष्ण्यस्य विना रूपं प्रकाशकत्वाभावात् ।

‡ आत्मलिङ्गत्वादिति ४ पाठः ।

§ ज्ञानमात्मलिङ्गमित्युक्तं तेनात्ममनःसंयोगो ऽनुक्तो ऽप्यनुमेयः । ज्ञानस्यात्मलिङ्गत्वं तद्गुणत्वात् । जन्यत्वे सति आत्मसमवेतत्वात्तस्यात्मगुणत्वं सुखादिवत् न हि द्रव्यं कर्म वा ऽऽत्मनि समवैति । न पृथिव्यादिगुणः स्वमात्रसंवेद्यत्वात् । उक्तं चात्र न यावत्प्रत्यक्षकारणं सर्वं तद् वक्तव्यमिति । न्या· वा· ।

॥ आत्मनो ऽनवरोध इति ५ । ४ । २ । ३ पा· ।

¶ अथेन्द्रियमनःसंयोगः कस्माच्चाभिधीयते । न्या· वा· । सूत्रे नेति ५ । ४ पु· नास्ति ।

** युगपदुत्पत्तिसूत्रस्य मनःसिद्धिपरत्वेन मनसो ज्ञानकारणत्वानभिधायकत्वेऽपि ज्ञानस्य तत्परतन्त्रत्वाभिधानमुखेन तद्धेतुकत्वावगमात् ।

प्रत्यक्षानुमानोपमानशब्दानां निमित्तमात्ममनःसन्निकर्षः प्रत्यक्षस्येन्द्रियार्थसन्निकर्ष इत्यसमानो ऽसमानत्वात्तस्य ग्रहणम्* ।

सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्† ॥ २६ ॥

इन्द्रियार्थसन्निकर्षस्य ग्रहणं नात्ममनसोः सन्निकर्षस्येति । एकदा खल्वयं ‡प्रबोधकालं प्रणिधाय सुप्तः प्रणिधानवशात् प्रबुध्यते । यदा तु तीव्रौ ध्वनिस्पर्शौ प्रबोधकारणं भवतः तदा प्रसुप्तस्येन्द्रियसन्निकर्षनिमित्तं प्रबोधज्ञानमुत्पद्यते तच्च न ज्ञातुर्मनसश्च सन्निकर्षस्य प्राधान्यं भवति किं तर्हि इन्द्रियार्थयोः सन्निकर्षस्य । न ह्यात्मा जिज्ञासमानः प्रयत्नेन मनस्तदा प्रेरयतीति । एकदा खल्वयं विषयान्तरासक्तमनाः संकल्पवशाद्विषयान्तरं जिज्ञासमानः प्रयत्नप्रेरितेन मनसा इन्द्रियं संयोज्य तद्विषयान्तरं जानीते । यदा तु खल्वस्य निःसंकल्पस्य निर्जिज्ञासस्य च व्यासक्तमनसो बाह्यविषयोपनिपातनाज् ज्ञानमुत्पद्यते तदेन्द्रियार्थसन्निकर्षस्य प्राधान्यं न ह्यचासौ जिज्ञासमानः प्रयत्नेन मनः प्रेरयतीति । प्राधान्याच्चेन्द्रियार्थसन्निकर्षस्य ग्रहणं कार्यं गुणत्वाद् नात्ममनसोः सन्निकर्षस्येति । प्राधान्ये च हेत्वन्तरम् ॥

तैश्चापदेशो ज्ञानविशेषाणाम्§ ॥ २७ ॥

तैरिन्द्रियैरर्थैश्च व्यपदिश्यन्ते ज्ञानविशेषाः । कथं घ्राणेन जिघ्रति चक्षुषा पश्यति रसनया रसयतीति घ्राणविज्ञानं चक्षुर्विज्ञानं‖ गन्धविज्ञानं रूप¶विज्ञानं रसविज्ञानमिति च । इन्द्रियविषय**विशेषाच्च पञ्चधा बुद्धिर्भवति अतः प्राधान्यमिन्द्रियार्थसन्निकर्षस्येति । यदुक्तमिन्द्रियार्थसन्निकर्षग्रहणं कार्यं

---

* ज्ञानान्तरसाधारणकारणत्वाच्च प्रत्यक्षलक्षणे तदुपादानमिति पूर्वसूत्राच्चेति पदं संबन्ध्य सूत्रं व्याख्येयम् । न यावदसाधारणं सर्वं तदुक्तव्यमपि तु न साधारणं वक्तव्यमित्ययं सूत्रार्थ इति वार्तिकदर्शनात् सूत्रमेवेदं भाष्यत्वेन मुद्रितपुस्तके निवेशस्तु प्रामादिकः ।

† इन्द्रियार्थसंनिकर्षप्राधान्यपरमिदं सूत्रम् । न्या. वा. । अत एवास्य भाष्यत्वेन लेखः प्रामादिकः ।

‡ प्रतिषेधकालमिति १ पा. ।

§ यस्मादिदं प्रत्यक्षज्ञानमुत्पद्यमानं विषयेण कारणेन वा व्यपदिश्यते यच्चासाधारणं तेन व्यपदेशो दृष्टो यथा शाल्यङ्कुर इति । न्या. वा. ।

‖ चक्षुर्विज्ञानमित्यस्यापे रसनविज्ञानमिति ५ । ३ अधिकः पाठः ।

¶ रूपविज्ञानमिति २ । ४ पुस्तकयोर्नास्ति । ** विषयेति ४ । ३ नास्ति ।

नात्ममनसोः सन्निकर्षस्येति कस्मात्सुप्रव्यासक्तमनसामिन्द्रियार्थयोः सन्निकर्षस्य ज्ञाननिमित्तत्वादिति सोयम् ॥

व्याहतत्वादहेतुः* ॥ २८ ॥

यदि तावत् क्व चिदात्ममनसोः सन्निकर्षस्य ज्ञानकारणत्वं नेष्यते तदा युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति व्याहन्येत। †तदानीं मनसः सन्निकर्षमिन्द्रियार्थसन्निकर्षो ऽपेक्षते मनःसंयोगानपेक्षायां च युगपज् ज्ञानोत्पत्तिप्रसङ्गः । अथ मा भूद् व्याघात इति सर्व‡विज्ञानानामात्ममनसोः सन्निकर्षः कारणमिष्यते तदवस्थमेवेदं भवति ज्ञानकारणत्वादात्ममनसोः सन्निकर्षस्य ग्रहणं कार्यमिति ॥

नार्थविशेषप्राबल्यात्§ ॥ २९ ॥

नास्ति व्याघातो न ह्यात्ममनःसन्निकर्षस्य ज्ञानकारणत्वं व्यभिचरति इन्द्रियार्थसन्निकर्षस्य प्राधान्यमुपादीयते अर्थविशेषप्राबल्याद्धि सुप्रव्यासक्तमनसां ज्ञानोत्पत्तिरेकदा भवति। अर्थविशेषः कश्चिदेवेन्द्रियार्थः तस्य प्राबल्यं तीव्रतापटुते न ‖चार्थविशेषप्राबल्यमिन्द्रियार्थसन्निकर्षविषयं नात्ममनसोः सन्निकर्षविषयं तस्मादिन्द्रियार्थसन्निकर्षः प्रधानमिति । असति प्रणिधाने संकल्पे चा¶सति सुप्रव्यासक्तमनसां यदिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानं तच्च मनःसंयोगो ऽपि कारणमिति मनसि क्रियाकारणं वाच्यमिति । यथैव ज्ञातुः खल्वयमिच्छाजनितः प्रयत्नो** मनसः प्रेरक आत्मगुण एवमात्मनि गुणान्तरं सर्वस्य साधकं प्रवृत्तिदोषजनितमस्ति येन प्रेरितं मन इन्द्रियेण संबध्यते । तेन ह्यप्रेर्यमाणे मनसि संयोगाभावाज् ज्ञानानुत्पत्तौ सर्वार्थता ऽस्य निवर्त्तते एषितव्यं चास्य गुणान्तरस्य द्रव्यगुणकर्मकारकत्वम् । अन्यथा हि चतुर्विधानामणूनां भूतसूक्ष्माणां मनसां च ततो ऽन्यस्य क्रियाहेतोरसंभवात् शरीरेन्द्रियविषयाणामनुत्पत्तिप्रसङ्गः ॥

---

* व्याहतत्वादित्यनेन त्रिसूत्रीं प्रत्याचष्टे । न्या॰ वा॰ ।

† नेदानीमिति ५ । ४ । २ । ३ पाठः ।

‡ सर्वज्ञानानामिति ५ । ४ । ३ । २ पा॰ ।

§ नान्यया त्रिसूत्र्या ऽऽत्ममनःसंयोगस्य कारणभावः प्रतिषिध्यते ऽपि तु प्राबल्यमिन्द्रियार्थसंनिकर्षस्य प्रतिपाद्यते । न्या॰ वा॰ ।

‖ तच्चेति ५ । ४ । २ । ३ पाठः ।

¶ वेति २ । ३ पाठः ।

** प्रयत्न इति ५ । ४ । २ । ३ । पाठः ।

***प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥ ३० ॥**

यदिदमिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानं वृक्ष इत्येतत् किल प्रत्यक्षं तत् खल्व†नुमानमेव कस्मादेकदेशग्रहणात्। वृक्षस्योपलब्धेरर्वाग्भागमयं गृहीत्वा वृक्षमुपलभते न चैकदेशो वृक्षः। तच्च यथा धूमं गृहीत्वा वह्निमनुमिनोति तादृगेव तद्भवति । किं पुनर्गृह्यमाणादेकदेशाद् अर्थान्तरमनुमेयं मन्यसे अवयवसमूहपक्षे अवयवान्तराणि द्रव्योत्पत्तिपक्षे तानि चावयवी चेति । अवयवसमूहपक्षे तावदेकदेशग्रहणाद् वृक्षबुद्धेरभावः नागृह्यमाणमेकदेशान्तरं वृक्षो गृह्यमाणैकदेश‡वदिति । अथैकदेशग्रहणादेकदेशान्तरानुमाने समुदायप्रतिसंधानात् तच्च वृक्षबुद्धिः§ न तर्हि वृक्षबुद्धिरनुमानमेवं सति भवितुमर्हतीति। द्रव्यान्तरोत्पत्तिपक्षे नावयव्यनुमेयो ऽस्यैकदेश‖संबन्धस्याग्रहणाद् ग्रहणे चाविशेषादनुमेयत्वाभावः । तस्माद्वृक्षबुद्धिरनुमानं¶ न भवति । एकदेशग्रहणमाश्रित्य प्रत्यक्षस्यानुमानत्वमुपपाद्यते तच्च ।

---

* एवं तावत्समधिगतं प्रत्यक्षलक्षणम् । अतः परमिदानीं प्रत्यक्षस्यानुमाने ऽन्तर्भावं कुर्वाण इदमाह । न्या. वा. ।

† किलेति ५ । ४ । २ । ३ । पाठः ।

‡ सेयमवयवसमूहपक्षे वृक्षबुद्धिरुत्पद्यमाना निर्विषया । अर्वाग्भागः परभागो मध्यभाग इत्येतच्च नास्ति अवयविप्रत्याख्याने ऽवयवत्वस्य दुर्निरूपत्वात् । एकदेश एवावयव इति चेन्न । अवयव्याधारस्यैवैकदेशपदार्थत्वादवयविनो ऽभावेऽकदेशस्याभावात् । अथाकार्यकारणभूतानां परस्परप्रत्यासत्त्युपपत्तेरेकदेशावस्थानमवयवशब्दार्थः । तदपि न । अकार्यकारणभूतानां परस्परोपकारविधुराणामवयवत्वानुपपत्तेः ।

§ एतस्मिन् पक्षे वृक्षबुद्धेरभाव एव । कथम् । अर्वाग्भागस्य परभागस्य चावृक्षत्वात् । न चैतत्पक्षे ऽवयवान्तरानुमानसंभवः । अवयवस्यावयवान्तराविनाभावविरहात् । अवयविनश्चानभ्युपगमादेव नानुमेयत्वसंभवः । अनुमाने ततः पूर्वं व्याप्तिदर्शनस्यापेक्षितत्वेनावयव्यनभ्युपगन्तुर्व्याप्तिदर्शनासंभवश्च । परभागस्यार्वाग्भागेन व्यवहितस्याग्रहणे तेन साकं संबन्धग्रहासंभवेन तस्यास्मृतस्यानुमेयत्वासंभवश्च । अवयविनो ऽनभ्युपगमेन पूर्वमननुभूतस्यावयविनो ऽस्मरणेनानुमानासंभवश्च । पूर्वापरभागयोश्चावृक्षभूतयोर्वृक्ष इत्याकारकप्रतीतिविषयत्वोपगमे तादृशप्रतीतेर्भ्रान्तिरूपतया तस्याः प्रमाणजन्यत्वानुपपत्तिश्च । भ्रान्तेरप्यन्यत्र दृष्टस्यान्यप्रकारेण प्रतीतिरूपतया वृक्षप्रत्ययस्य यथार्थस्यानभ्युपगमे भ्रमस्याप्यसंभवश्च ।

‖ संबन्धस्य ग्रहणादिति ४ । संबद्धस्य ग्रहणादिति २ । ३ । पाठः ।

¶ भागस्येवावयविनोपीन्द्रियसंबद्धतया प्रत्यक्षस्यैव संभवात् । अथावयवी न प्रत्यक्षयोग्यस्तर्हि तेन समं व्याप्तिग्रहणानुपपत्त्यानुमितेरसंभवः। परमाणूनामतीन्द्रियतया ऽवयविनां च प्रत्यक्षानभ्युपगमेन भागप्रत्यक्षस्याप्यसंभवेन भागप्रत्यक्षेणावयव्यनुमितेरनुपपत्तिश्च । प्रत्यक्षमात्रस्यानुमितित्वं वदतो ऽनुमितेरसंभव एव तस्याः प्रत्यक्षपूर्वकत्वनियमात् । सामान्यतोदृष्टानुमानेपि प्रत्यक्षविषयतावच्छेदकव्यापकरूपयोरेव व्याप्यव्यापकभावग्रहेणानुमितेरिष्टतया व्याप्यरूपपुरस्कारेण तत्रापि प्रत्यक्षस्य सत्त्वाच्चानुमितेः प्रत्यक्षपूर्वकत्वनियमे व्यभिचारः ।

*** न प्रत्यक्षेण यावत्तावदप्युपलम्भात् ॥ ३१ ॥**

न प्रत्यक्षमनुमानम् । कस्मात् प्रत्यक्षेणैवोपलम्भात् । यत् तदेकदेशग्रहणमाश्रीयते प्रत्यक्षेणासावुपलम्भः न चोपलम्भो निर्विषयोस्ति यावच्चार्थजातं तस्य विषयस्तावदभ्यनुज्ञायमानं प्रत्यक्षव्यवस्थापकं† भवति । किं पुनस्ततोऽन्यदर्थजातमवयवी समुदायो वा । न चैकदेशग्रहणमनुमानं भावयितुं शक्यं हेत्वभावादिति ।

अन्यथापि च प्रत्यक्षस्य नानुमानत्वप्रसङ्गस्तत्पूर्वकत्वात् । प्रत्यक्षपूर्वकमनुमानं संबद्धावग्निधूमौ प्रत्यक्षतो दृष्टवतो धूमप्रत्यक्षदर्शनादग्नावनुमानं भवति ‡यच्च संबद्धयोर्लिङ्गलिङ्गिनोः प्रत्यक्षं यच्च लिङ्गमात्रप्रत्यक्षग्रहणं नैतदन्तरेणानुमानस्य प्रवृत्तिरस्ति । न त्वेतदनुमानमिन्द्रियार्थसन्निकर्षजत्वात् । न चानुमेयस्येन्द्रियेण सन्निकर्षादनुमानं भवति । सोयं प्रत्यक्षानुमानयोर्लक्षणभेदो महानाश्रयितव्य इति ।

न चैकदेशोपलब्धिरवयविसद्भावात् ॥ ३२ ॥

न चैकदेशोपलब्धिमात्रं किं तर्ह्येकदेशोपलब्धिः तत्सहचरितावयव्युपलब्धिश्च कस्मादवयविसद्भावात्§ । अस्ति ह्ययमेकदेशव्यतिरिक्तोऽवयवी तस्यावयवस्थानस्योपलब्धिकारणप्राप्तस्य‖कदेशोपलब्धावनुपलब्धिरनुपपन्नेति¶ ।

अकृत्स्नग्रहणादिति चेद् न कारणतोऽन्यस्यैकदेशस्याभावात् । न चावयवाः कृत्स्ना गृह्यन्ते अवयवैरेवावयवान्तरव्यवधानाद् नावयवी कृत्स्नो गृह्यतइति । नायं गृह्यमाणेष्ववयवेषु परिसमाप्त इति सेयमेकदेशोपलब्धिरनिवृत्तेवे**ति । कृत्स्नमिति वै ††खल्वशेषतायां सत्यां भवति

---

* विरुद्धश्चायं हेतुरेकदेशग्रहणाद् वृत्तोपलब्धिरिति । कथम् । न्या॰ वा॰ ।

† एकदेशप्रत्यक्षस्वीकारेणापि प्रत्यक्षसत्त्वोपपत्तेः । सर्वस्य प्रत्यक्षविषयतायाः अप्रतिज्ञातत्वात् । प्रत्यक्षस्यैव निर्विकल्पकतया तत्र सप्रकारकत्वनियतानुमितित्वासंभवश्च । संनिकृष्टमात्रग्राहकतया प्रत्यक्षस्यासंनिकृष्टातीतानागतयोश्चानुमितित्वानुपपत्तिः । व्याप्तिग्रहादेरसत्त्वेऽपि प्रत्यक्षोत्पत्त्या तच्चियतानुमितित्वासंभवश्च ।

‡ तत्र यत्रेति ४ । तत्र यच्चेति । २ । ३ । पाठः ।

§ अवयविसंभवादिति ४ । २ । ३ । पाठः । ‖ कारणमात्रस्येति ४ । ३ । पाठः ।

¶ महदनेकद्रव्यरूपाण्युपलब्धिकारणानि तान्येकदेशवदेकदेशिन्यपि विद्यन्ते तस्मादेकदेश उपलभ्यते नैकदेशीत्ययुक्तम् । न्या॰ वा॰ ।

** अनिवृत्तौ वेति ४ । २ । ३ । पाठः । †† खलु शेषतायामिति ४ । ३ पाठः ।

अकृत्स्नमिति शेषे सति तच्चैतदवयवेषु बहुष्वस्ति अव्यवधाने ग्रहणाद् व्यवधाने चाग्रहणादिति । अङ्ग तु भवान् पृष्टो व्याचष्टां गृह्यमाणस्यावयविनः किमगृहीतं मन्यसे येनैकदेशोपलब्धिः स्यादिति । न ह्यस्य कारणेभ्योऽन्ये एकदेशा भवन्तीति तचावयववृत्तं नोपपद्यतइति । इदं तस्य वृत्तं येषामिन्द्रियसंनिकर्षा*द्ग्रहणमवयवानां तैः सह गृह्यते येषामवयवानां व्यवधानादग्रहणं तैः सह न गृह्यते । न चैतत्कृतोऽस्ति भेद† इति । समुदायोप्यशेषता वा ‡समुदायो वृत्तः स्यात् तत्प्राप्तिर्वा उभयथा ग्रहणाभावः मूलस्कन्धशाखापलाशादीनामशेषता वा समुदायो वृक्ष इति स्यात् प्राप्तिर्वा समुदायिनामिति उभयथा समुदायभूतस्य वृक्षस्य ग्रहणं नोपपद्यतइति । अवयवैस्तावदवयवान्तरस्य व्यवधानादशेषग्रहणं नोपपद्यते प्राप्तिग्रहणमपि नोपपद्यते प्राप्तिमतामग्रहणात् । सेयमेकदेशग्रहणसहचरिता वृक्षबुद्धिर्द्रव्यान्तरोत्पत्तौ कल्पते न समुदायमात्रे इति ।

साध्यत्वादवयविनि संदेहः§ ॥ ३३ ॥

---

* इन्द्रियार्थसन्निकर्षादिति ५ । ४ । २ । ३ पाठः ।

† नन्ववयवेषु वर्तमानो ऽवयवी किं प्रत्यवयवं साकल्येन वर्ततउतैकदेशेन । नाद्यः । अवयवान्तरवैयर्थ्यप्रसङ्गात् । एकावयवपर्याप्ते महत्त्वानेकद्रव्यत्वयोरभावेन तत्प्रत्यक्षानुपपत्तेश्च । एकावयवस्य विभागासंभवेन विभागहेतुकावयविनाशासंभवाच्च । न द्वितीयः । आरम्भकावयवव्यतिरिक्तावयवाभावेनावयवेष्वेकदेशेन वर्ततइत्युक्तेरसंभवात् । एकदेशेनोपलब्धिसंभवे ऽपि कात्स्न्र्येनानुपलम्भादवयवी नोपलभ्यतइत्याक्षेपप्रतिक्षेपासंभवाच्च । भागान्तरव्यवहितभागान्तरसंनिकर्षासंभवेन संनिकृष्टासंनिकृष्टसमवेतस्यावयविनः प्रत्यक्षानुपपत्तेरिति चेन्न । एकस्यावयविनो ऽवयवेष्वनेकेष्वपर्याप्त्या वृत्तेरङ्गीकारात् । प्रत्यवयवं पर्याप्तावयविनो ऽनेकत्वप्रसङ्गात् । एकदेशेन वर्तते ऽवयवीत्यभ्युपगमो ऽपि आरम्भकाणामवयवानां स्वस्मिन्वृत्तेरसंभवेन तद्व्यतिरिक्तावयवाभावेन न संभवति । तथा सति वृत्तीनामेकदेशानामनेकत्वेनैकमनेकत्रेत्युक्तेरसंभवात् । तस्मात् कृत्स्नैकदेशशब्दयोरनेकविषययोर्नैकस्मिन्नवयविनि विकल्पो युक्तः । वर्तमानश्चावयवी समवायेन प्रत्यवयवमपर्याप्त्या वर्ततइति युक्तम् । गृह्यमाणेभ्यो ऽवयवेभ्यो ऽगृह्यमाणानामवयवानां भेद इव गृह्यमाणाश्रितादवयविनो ऽगृह्यमाणाश्रितो ऽवयवी भिन्नस्तद्गतरूपादिवदिति चेन्न । एकावयवेन सह गृहीतस्यावयवान्तरेण साकमग्रहणेपि खड्गेन सह गृहीतस्य देवदत्तस्योष्णीषेण सहाग्रहणे ऽपि सोष्णीषस्य खड्गवता ऽभेदवदभेदोपपत्तेः । अवयविना सह संयोगसंनिकर्षस्य सत्त्वेन संयुक्तसमवायस्यानपेक्षितत्वेन तत्प्रत्यक्षानुपपत्तेरचोदनीयत्वात् । असंनिकृष्टावयवान्तराग्रहणे ऽपि तेषामवयविनो भिन्नत्वेन तदग्रहस्यावयव्यग्रहणं प्रत्यप्रयोजकत्वात् ।

‡ समुदायशेषता वेति ४ समुदाय्यशेषतावेति ५ । २ । ३ पा· ।

§ किमत्र साध्यम् । किमव्यतिरेको ऽथावयवीति । यद्यवयवी न लिङ्गमस्ति विप्रतिपत्तेः न हि धर्मिणि विप्रतिपद्यमानः कुतश्चिदनुज्ञां लब्धुमर्हति । न च धर्मिणि विप्रतिपत्तेर्बीजमस्ति सादृश्याभावात् । न हि सादृश्यमन्तरेण विप्रतिपत्तेर्बीजमस्ति । किं कारणम् । विप्रतिपत्तिर्नाम विपरीता प्रतिपत्तिः ।

*यदुक्तमवयविसद्भावात्प्राप्तिमतामयमहेतुः साध्यत्वात्साध्यं तावदे-

* अवयविसद्भावाधिकरणमयमहेतुरिति ५ । ४ । २ ३ पा० ।

तस्याश्च कारणं समानधर्मोपलब्धावनधिगतविशेषस्य तद्विपरीतधर्माध्यारोपः । न चानभ्युपगतावयविनो ऽवयविनि सादृश्यं किं चिदस्ति नापि विपरीतधर्माध्यारोपः । तस्मान्न विप्रतिपत्तिः । अथाव्यतिरेकः साध्यः । तत्राव्यतिरेकप्रतिपादकं प्रमाणं वक्तव्यं न ह्यत्र प्रामाणिकी का चित्प्रतिपत्तिरस्ति । इदं प्रमाणम् । अर्थान्तरानवयवत्वम् । अर्थान्तरमर्थान्तरस्यावयवो न भवति । यथा न गौरश्वावयवः । अवयवाश्च तन्तवो ऽवयवी च पटः । तस्मान्नासौ तेभ्यो ऽर्थान्तरमिति । न्या० वा० । नार्थान्तरं पटात्तन्तवस्तदवयवत्वादिति प्रयोग इति चेन्नैवम् । पटस्य व्यतिरेकसिद्धेः पूर्वं तन्तुषु तदवयवत्वासिद्धेः । अवयवत्वं ह्यवयव्यनिरूपितं नासत्यवयविनि संभवतीति । अवयवभूतानां तन्तूनां घटाद् व्यतिरेकस्योभयसंप्रतिपन्नतया ऽवयवत्वेन पटादपि व्यतिरेकस्य सिद्धा विरुद्धश्च । न च पटावयवत्वं पटाद्व्यतिरेके हेतुः पटानभ्युपगन्तुः पटावयवत्वासिद्धेः । हेतोस्तन्तुमात्रविश्रान्ततया ऽसाधारण्यं चात्र हेतुदोषः । पटं पर्णीकृत्याव्यतिरेकसाधने ऽवयवत्वस्य पक्षधर्मतानुपपत्तिः । अवयवत्वस्य समवायिकारणत्वविशेषरूपतया ऽसति कार्ये तच्चिरूपणाशक्यत्वेन हेत्वसिद्धिश्च । यत्तु पटो नाम नार्थान्तरं किं तु संस्थानविशेषावस्थितास्तन्तव एव पटाख्यां लभन्ते सत्कार्यवादाश्रयणाद् अत्र पक्षे कार्यकारणभावस्यानभ्युपगमादिति । तच्च । पटपदव्यवहारस्यान्यत्रासिद्धा ऽपटात्मकेषु तन्तुषु पटसादृश्यविरहेणारोपात्मकव्यवहारस्य दुर्वचत्वात् । आरोपे धर्मिभेदस्य सादृश्यस्य चावश्यमपेक्षितत्वात् संस्थानविशेषस्य च व्यतिरेकाव्यतिरेकविकल्पे ऽप्रसिद्धान्तवाक्यार्थाप्रसिद्धिदोषाच्च । अस्माकं तु संस्थानविशेषः संयोगः स चार्थान्तरम् । यत्तु नार्थान्तरं संयोगः संयोगत्वात् । यत्रार्थान्तरत्वं न तत्र संयोगत्वं यथा भवत्संप्रतिपन्नार्थान्तरभावे गवि न संयोगत्वमिति । तच्च । हेतोरसाधारण्यात् । अर्थान्तरं संयोगो विशेषणत्वादिति हेतुना संयोगस्यार्थान्तरत्वसिद्धेश्च । संयुक्तमाहरेत्युक्तस्य प्रयोज्यवृद्धस्यासंयुक्ताद् व्यावृत्तं संयोगमध्यक्षीकृतवत एव तद्विशेषणाकद्रव्याहरणादर्शनात् । ननु प्रतीघातावसायां प्रत्यासत्तौ संयोगव्यवहारो न तु संयोगो ऽर्थान्तरं द्रव्याणि हि तावत्यत्यासीदन्ति यावत्प्रतिहतानि न भवन्ति प्रतीघाते च संयोगव्यवहार इति । नैवम् । संयोगानभ्युपगमे प्रत्यासत्तिप्रतीघातयोर्दुर्वचत्वात् । संयुक्तसंयोगान्योन्यत्वं हि प्रत्यासत्तिः मूर्तस्पर्शवद्द्रव्यसंयोगश्च प्रतीघात इति । संयोगस्यार्थान्तरत्वाभावे च क्षेत्रोदकबीजाग्नीन्धनादीनां सर्वत्रावस्थितानां सर्वत्र पाकादिहेतुत्वप्रसङ्गः । तथा च क्षेत्रादीनि अङ्कुरादुत्पत्तौ सापेक्षाणि सर्वदा कर्यानारम्भात् । यश्चापेक्ष्यते स संयोग इति संयोगस्य तद्व्यतिरिक्तस्य सिद्धिः । एतेन सान्तरत्वेन प्रतीयमानत्वं विभक्तत्वं नैरन्तर्येण प्रत्ययविषयत्वं संयुक्तत्वमित्यपास्तम् । तावतैवेष्टसिद्धेः । विषयवैलक्षण्याभावे प्रतीतिवैलक्षण्यस्यानुपपत्त्या वैलक्षण्यनिर्वाहकत्वेनैव संयोगविभागाभ्युपगमस्यावश्यकत्वात् । असंयुक्ते संयुक्तव्यवहारस्यारोपात्मकतया ऽरोप्यमाणस्यान्यत्र सत्त्वनियमेन तत्सिद्धेश्च । इहप्रत्ययनिमित्ततया च संयोगसिद्धिः । यत्त्वसत्यपि संयोगे भवतीहप्रत्ययो यथेह वने तिलका इति सत्यपि संयोगे न भवति यथाङ्गुल्योरिति न संयोगस्येहप्रत्ययनिमित्ततेति । तच्च । संयोगस्यैव विभागादर्शनस्यापीहप्रत्ययनिमित्तत्वस्वीकारात् । तच्चिमित्तिकायाश्च गौणत्वात् । मुख्यप्रतीतिविषयस्य च दुरपन्हवत्वात् । संयोगस्येहप्रत्ययविषयताव्याप्यत्वस्यानभ्युपगमात् । वृक्षाणां वने स्वगतसंख्यारब्धबहुत्वसमवायस्य संबन्धस्य सत्त्वेन तादृशप्रतीतेः संबन्धविषयकत्वोपपादनसंभवेनेहप्रत्ययसाध्यतावच्छेदकसंबन्धत्वपुरस्कारेणैवेतरबाधसङ्कटतेनेह कुण्डे बदराणीति प्रत्ययनिमित्ततया संयोगसिद्धेः । न च संबन्धाभावे ऽपि भवतीहप्रत्ययो यथेह तन्तुषु पटसमवाय इति समवायस्य संबन्धान्तरानभ्युपगमादिति शङ्क्यम् तादृशप्रतीतेरप्रामाणिकत्वात् । समवेतसमवायिनोरिव समवायस्यापि भेदेनाग्रहणस्य तादृशभ्रमप्रयोजकत्वादिति दिक् । अस्तु तर्हि पटं पक्षीकृत्य तन्तुभ्यो ऽव्यतिरेकः साध्यः अवयवित्वं च हेतुरिति न हेतोः पक्षधर्मताऽनुपपत्तिरिति । नैवम् । पक्षाप्रसिद्धेः । तन्तूनामेव पक्षत्वे हेत्वसिद्धिः । अन्यस्य पक्षत्वे बाधश्च । यत्त्वेकत्वे ऽपि भवत्यवयवित्वव्यवहारो यथा

तत्कारणेभ्यो द्रव्यान्तरमुत्पद्यतइति । अनुपपादितमेतत् । एवं च सति विप्रतिपत्तिमात्रं भवति विप्रतिपत्तेश्चावयविनि संशय इति ।

ऽकाशस्य प्रदेशैः इति न हेत्वसिद्धिरिति । तच्च । अवयवित्वप्रदेशत्वयोर्भेदात् । कारणविशेषो ह्यवयव आधारविशेषश्च प्रदेशः । न त्वाकाशस्योभयमपीति अव्याप्यवृत्तिसंयोगवत्त्वं प्रदेशवद्द्रव्यसाम्यं निमित्तीकृत्य प्रवृत्ताया भवत्प्रदर्शितप्रतीतेर्गौणत्वात् । एतेन तत उत्पत्तेरभेदसिद्धिरित्यपि निरस्तम् । हेतोरसाधारणत्वात् । तुर्यादुत्पन्ने पटे तुर्यादिभेदस्योभयसंप्रतिपन्नत्वेन प्रत्युत भेदसाधकतया विरुद्धत्वाच्च । अर्थान्तरत्वे तन्तूनामन्यावयवत्वमपि स्याच्चक्रे रथावयवत्ववत् । न च तन्तवः पटादन्यस्यावयवा इति न ततो ऽर्थान्तरमित्यपि न । पूर्वोक्तदोषानतिवृत्तेः । रथादीनां चक्रादिभ्यो भेदस्याभ्युपगमे तेनैव दृष्टान्तेन तन्तुष्वपि पटभेदसिद्धेश्च । भेदानभ्युपगमे चावयवत्वस्य दुर्निरूपत्वात् । तस्य कारणविशेषरूपतया कार्यनिरूप्यत्वात् । ननु तद्देशोपलभ्यमानत्वं तद्देशोत्पत्तिकत्वं वा ऽभेदसाधकमस्तु भिन्नयोर्गवाश्वयोस्तददर्शनादिति चेन्न । आद्यस्यासाधारणत्वात् । तन्तूनां तन्त्ववयवदेशोत्पत्तिकत्वेन तन्तुदेशोत्पत्तेः पटएव सत्त्वेनोत्पत्तेश्चापूर्वात्मलाभरूपत्वेन पटस्यार्थान्तरत्वसिद्ध्या द्वितीयहेतोर्विरुद्धत्वात् । एवमेव तस्मिन् सत्यन्यारम्भकत्वाभावादर्थान्तरत्वाभावः । अर्थान्तरस्य हि कटात्तन्तोः कटे सति ततो ऽन्यपटारम्भकत्वं दृष्टं न च पटे सति तन्तूनां पटान्यारम्भकत्वं ततो नार्थान्तरमित्यपि निरसनीयम् । अन्यापि हेतोरसाधारणत्वान्न पटाभ्युपगमे विरुद्धत्वादनभ्युपगमे क्रियाया एवासंभवात् । तन्तुसंयोगव्यतिरेकेणानुत्पद्यमानत्वादित्यपि तथैव । ननु न द्रव्यान्तरगुणानां द्रव्यान्तरगुणेभ्य उत्पत्तिर्दृश्यते गोगुणेभ्यो ऽश्वगुणानुत्पत्तेः । दृश्यते तु तन्तुगुणेभ्यः पटगुणोत्पत्तिस्ततः पटस्तन्तुभ्यो नार्थान्तरमिति चेन्नैवम् । पटानभ्युपगमे पटगुणोत्पत्तेरसंभवेन तन्तुगुणेभ्यस्तन्तुगुणानामनुत्पादेनास्य हेतोर्विरुद्धत्वात् । यत्तु पटस्यार्थान्तरत्वे ऽप्रत्यक्षत्वप्रसङ्गः प्रत्यक्षा त्यक्षवृत्तित्वात् । यथा गर्भमातृसंयोगस्याप्रत्यक्षत्वं प्रत्यक्षश्च पटस्तस्माच्चार्थान्तरमिति । तच्च । भेदस्य प्रत्यक्षेणैव सिद्धेर्विरुद्धत्वात् । प्रत्यक्षाप्रत्यक्षवृत्तितायां अप्रत्यक्षप्रयोजकत्वे भावस्याप्रत्यक्षत्वप्रसङ्गात् । सत्तादेर्भावस्य प्रत्यक्षाप्रत्यक्षवृत्तित्वात् । प्रत्यक्षाप्रत्यक्षारब्धस्य तथात्वे हिमवत्परिमाणस्याप्रत्यक्षत्वापत्तेः । हिमवदवयवानां केषां चिदप्रत्यक्षत्वात् गृह्यमाणावयवैस्सह संनिकृष्टस्यावयविनः प्रत्यक्षतायाश्च उपपादितत्वाच्च । अवयवानामप्रत्यक्षत्वेनावयविनः प्रत्यक्षाभावे सर्वस्याप्यवयविनो ऽप्रत्यक्षत्वात् । सर्वावयवानां कदा ऽप्यप्रत्यक्षत्वात् । परमाणूनामप्रत्यक्षत्वेन ततो ऽर्थान्तरस्य पटस्यानभ्युपगमेन द्रव्यप्रत्यक्षमात्रस्योच्छेदापत्तेश्च । न च परमाणवो नातीन्द्रिया रूपादिमत्त्वाद् घटादिवदिति वाच्यम् । महत्त्वस्योपाधित्वात् । न च कार्यद्रव्यमात्रमेवेन्द्रियककार्यमेन्द्रियकत्वाद् घटादिवदिति वाच्यम् । त्रुटिकारणस्य प्रत्यक्षतो ऽनुपलम्भेन त्रुटौ प्रत्यक्षकार्यत्वस्य बाधितत्वात् । न हि वातायनच्छिद्रे दृश्यस्त्रुटिरेव परमाणुः सावयवत्वादमित्यत्वात्सामान्यवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वाच्च । तस्मात्तदवयवी निरवयवो वातीन्द्रियाः परमाणवः । न च परमाणवो ऽपि संहता एवेति वाच्यम् । संहतानां संहन्यमानतन्त्वतया तेषामपि संहतत्वे ऽनवस्थाप्रसङ्गेनासंहतत्वात् । ननु पटस्तन्तुभ्यो नार्थान्तरं तन्तुभिः कटाद्यसंयुक्तत्वादविभक्तत्वाच्च । अर्थान्तरे बदरे कुण्डसंयोगस्य शकुनौ वृत्तविभागस्य च दर्शनादिति चेन्नैवम् । द्रव्यादर्थान्तरे गुणे व्यभिचारात् । सांख्यमते ऽन्योन्यमर्थान्तरत्वेनाभिमतेषु सत्त्वादिगुणेषु हेतुसत्त्वाद्विरुद्धश्च । यत्तु नान्यो ऽवयव्यवयवेभ्यो गुरुत्वान्तरकार्याग्रहणात् । अर्थान्तरत्वे हि कारणगुरुत्वकार्यतुलावमत्यन्यत्कार्यगुरुत्वकार्यं तुलाभमं गृह्णेत न च गृह्यते इति तच्च । हेतोरपक्षधर्मत्वात् । यत्त्वनेन हेतुना कारणगुणानां कार्यगुणं प्रत्यहेतुत्वं साध्यं कारणगुणानामारम्भकत्वे ह्यविशेषाद्गुरुत्वमप्यारभ्येत तच्च कार्ये उपलभ्येत न चोपलभ्यते तस्माच्च कारणगुणानां कार्यगुणारम्भकत्वमिति तत्तुच्छम् । कार्यानुपगमे साध्याप्रसिद्धेः । अभ्युपगमे कार्यस्य निर्गुणस्यानुपलम्भेन कारणगुणानां च तदसमवेतत्वेन कार्यगुणानां कारणगुणपूर्वकत्वोपगमावश्यकत्वेन बाधः । गुरुत्वान्तरं तु कार्ये इष्यतएव । कारणगतस्य तस्य कार्ये ऽसमवेतत्वात् । न हि कार्यगुरुत्वं कारणगुरुत्वाधिकमेवेति क्व चिदावयोः संप्रतिपत्तिः । तथा सति कार्यगुरुत्वकारणगुरुत्वाभ्यां जायमाना तुलाऽवनतिर्विभक्तपिण्डद्वयगतगुरुत्वजन्यावनतिविलक्षणा स्यादिति चेन्न । गुरुत्वयद्द्रव्यासमवायिद्रव्यगतगुरुत्वस्येवावनतिविलक्षणप्रयोजकत्वात् कारणद्रव्यस्य च समवायि-

सर्वाग्रहणमवयव्यसिद्धेः* ॥ ३४ ॥

यद्यवयवी नास्ति सर्वस्य ग्रहणं नोपपद्यते । किं तत्सर्वं द्रव्यगुणकर्मसामान्यविशेषसमवायाः । कथं कृत्वा परमाणुसमवस्थानं† तावद् दर्शनविषयो न भवत्यतीन्द्रियत्वादणूनां द्रव्यान्तरावयविभूतं‡ दर्शनविषयो नास्ति दर्शनविषयस्याश्चेमे§ द्रव्यादयो गृह्यन्ते तेन‖ निरधिष्ठाना न गृह्येरन् । गृह्यन्ते तु¶ कुम्भोयं श्याम एको महान् संयुक्तः स्पन्दते अस्ति मृन्मयश्चेति सन्ति चेमे गुणादयो धर्मा इति । तेन सर्वस्य ग्रहणात्पश्यामोऽस्ति द्रव्यान्तरभूतोऽवयवीति ।

धारणाकर्षणोपपत्तेश्च** ॥ ३५ ॥

अवयव्यर्थान्तरभूत†† इति । संग्रहकारिते वै धारणाकर्षणे संग्रहो नाम

त्वात् । कार्यगुरुत्वेन कारणगुरुत्वस्य प्रतिबन्धो विनाशो वेति तु न युक्तम् । तथा सति कार्यपाते कारणस्य पाताभावप्रसङ्गात् । द्वितीयपक्षे कार्यनाशोत्तरमपि कारणपाताभावप्रसङ्गाच्च । संसारस्यानादित्वेन सर्वैरेव परमाणुभिः कदा चित्कार्यारम्भेण तद्गुरुत्वेन परमाणुगुरुत्वनाशे ऽगुरुभिः परमाणुभिरारब्धे कार्ये गुरुत्वानुत्पत्त्या कार्यमात्रस्यागुरुत्वप्रसङ्गाच्च । इत्थं चावयविनो ऽसत्त्वाव्यतिरेकयोर्हेत्वभावात्प्रत्युतावयवित्वे व्यतिरेके च प्रमाणस्य दर्शितत्वाच्च साध्यत्वादवयविनि संदेह इति न युक्तम् । साध्यत्वस्य संशयहेतुत्वाकीर्तनादिदमयुक्तमिति तु न । साध्यत्वोक्तेरपि विप्रतिपत्तेः संशयहेतुत्वे तात्पर्यात् । इत्यत्रत्यवार्तिकसारसंक्षेपः ।

* अथवा सर्वैः प्रमाणैरग्रहणम् । कथम् । प्रत्यक्षस्य वर्तमानमहद्विषयत्वात् । अवयविप्रत्याख्याने च न बाह्यकरणप्रत्यक्षविषयो ऽस्ति । तस्याभावादनुमानादेरप्यभावः सेयं सर्वप्रमाणनिवृत्तिः । उपलभ्यन्ते चार्थाः प्रत्यक्षादिभिः प्रमाणैः तैः सर्वैर्ग्रहणात्पश्यामोऽस्त्यवयवीति । तदिदं सूत्रमवयव्यनभ्युपगमे विरोधप्रदर्शनपरं सेयं सर्वप्रकारो विरोधो लोकपरिदृष्टप्रत्ययोच्छेद इति । न्या॰ वा॰ ।

† समावस्थानमिति ४ । २ । ३ पा॰ ‡ द्रव्यान्तरञ्चावयवीति ५ । ४ । २ । ३ पा॰ ।
§ दर्शनविषयाश्चेमे इति ५ । ४ । २ । ‖ ते इति ५ पा॰ । ¶ ते तु कुम्भो ऽयमिति ४ । २ । ३ पाठः ।

** अवयव्यर्थान्तरभूत इति चार्थः । एकदेशग्रहणमाहृत्य सत्यवयविनो देशान्तरप्राप्तिप्रतिषेधो धारणम् । तथा सत्यवयविनो देशान्तरापणमाकर्षणम् । न हि धारणाकर्षणे निरवयवे ऽवयवे च दृष्टे तस्मादवयविधर्मावितरेतरविरोधादिति । यत्त्वत्रोक्तं संग्रहकारिते धारणाकर्षणे नावयविकारिते पांशुराशिप्रभृतिष्वभावात् तृणोपलकाष्ठादिषु जतुसंगृहीतेषु दर्शनादिति । तत्र । अनवधारणात् । न ब्रूमः सर्वस्मिन्नवयविनि धारणाकर्षणे भवतः । अपि त्वन्यत्र न भवतः । तृणादयश्चावयविन एवैते । यदिदमुच्यते संग्रहकारिते ते इति । न विशेषहेत्वभावात् । पांशुराशिप्रभृतिषु य एव भवतः संग्रहाभावे हेतुः स एवावयविनो विद्यमानस्य धारणाकर्षणाभावेपीति । सो ऽयं व्यतिरेकी हेतुः । न्या॰ वा॰ ।

†† अर्थान्तरभूतः सङ्ग्रहकारिते इति ५ । ४ । ३ । २ पा॰ ।

संयोगसहचरितं गुणान्तरं स्नेहद्रवत्वकारितमपां संयोगादामे कुम्भे ऽग्निसंयोगात्पक्वे । यदि त्ववयविकारिते* अभविष्यतां पांशुराशिप्रभृतिष्व†प्यङ्गास्येताम् । द्रव्यान्तरानुत्पत्तौ च तृणोपलकाष्ठादिषु जतुसंगृहीतेष्वपि नाभविष्यतामिति । ‡अथावयविनं प्रत्याचक्षाणको मा भूत् प्रत्यक्षलोप इत्यणुसङ्घयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्य इति । एकमिदं द्रव्यमित्येकबुद्धेर्विषयं पर्यनुयोज्यः किमेकबुद्धिरभिन्नार्थविषया आहो भिन्नार्थविषयेति§ । अभिन्नार्थविषयेति चेद् । अर्थान्तरानुज्ञानादवयविसिद्धिः‖ । नानार्थविषयेति चेद् भिन्नेष्वेकदर्शनानुपपत्तिः अनेकस्मिन्नेक इति व्याहता बुद्धिर्न दृश्यतइति । ¶सेनावनवद् ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम्** ॥ ३६ ॥

यथा सेनाङ्गेषु वनाङ्गेषु च दूरादगृह्यमाणपृथक्त्वेष्वेकमिदमित्युत्पद्यते बुद्धिः एवमणुषु सङ्घितेष्वगृह्यमाणपृथक्त्वेष्वेकमिदमित्युपपद्यते बुद्धिरिति यथा गृह्यमाणपृथक्त्वानां सेनावनाङ्गानामारात्कारणान्तरतः पृथक्त्वस्याग्रहणं यथा ऽगृह्यमाणजातीनां पलाश इति वा खदिर इति वा नाराज्जातिग्रहणं भवति । यथा गृह्यमाणप्रस्पन्दानां नारात् स्पन्दग्रहणं गृह्यमाणे चार्थजाते पृथक्त्वस्याग्रहणादेकमिति भाक्तः प्रत्ययो भवति न त्वणूनां गृह्यमाणपृथक्त्वानां कारणतः पृथक्त्वस्याग्रहणाद्भाक्त एकप्रत्ययो ऽतीन्द्रियत्वा††दणूनामिति । इदमेव च परीक्ष्यते किमेकप्रत्ययो ऽणुसङ्घयविषय आहो स्विन्नेति । अणुसङ्घय एव सेनावनाङ्गानि न च परीक्ष्यमाणमुदाहरणमिति युक्तं साध्यत्वादिति ।

---

* अवयवकारिते इति ५ । ३ पा· । † प्रभृतीति ३ ५ । नास्ति ।

‡ अथान्वयिनो हेतोः प्रयोगमुपन्यसिष्यन्निदमाह । न्या· वा· ।

§ आहो नानार्थेति ५ । २ ४ । । ३ । पा· ॥

‖ एकानेकबुद्धी भिन्नविषये विशेषवत्त्वाद्रूपादिविषयवदिति । अथ वा एकानेकबुद्धी भिन्नविषये समुच्चितविषयत्वात् । इदमिति यथा चेदं चेदं चेति । न्या· वा· ॥

¶ आशङ्क्यात इतरसूत्रमिति । ता· टी· ॥

** इदं तावत्सूत्रं साधनपक्षे दृष्टान्तमात्रत्वादसंबद्धम् । अनैकान्तीकरणपक्षे तु न असिद्धत्वात् केन सेनावनयोरनर्थान्तरभावो ऽभ्युपगम्यते । अनेकस्मिन्नप्युपलभ्यमाने भेदस्यादर्शनादभेदप्रत्ययः । भेदस्यादर्शनमारान्निमित्तात् । न तु परमाणवः केन चिदुपलभ्यन्ते ऽतीन्द्रियत्वात् । न्या· वा· ।

†† इत्युपेति ५ । ४ । २ । ३ पा· ।

‡‡ परमाणूनामेव घटादिबुद्धिहेतुत्वमुपजातविशेषाणामनुपजातविशेषाणां वा । आद्ये ऽवयविसिद्धिः । उपजायमानस्य विशेषस्यावयविरूपत्वात् । न च संयोग एव विशेषः । अतीन्द्रियसंयोगस्यातीन्द्रियत्वात् । द्वितीये परमाणवो ऽतीन्द्रिया ऐन्द्रियकाश्चेति विरुद्धम् ।

दृष्टमिति चेन्न तद्विषयस्य परीक्ष्योपपत्तेः* । यदपि मन्येत दृष्टमिदं सेनावनाङ्गानां पृथक्त्वस्याग्रहणादभेदेनैकमिति ग्रहणं न च दृष्टं शक्यं प्रत्याख्यातुमिति तच्च नैवं तद्विषयस्य परीक्ष्योपपत्तेः । दर्शनविषय एवायं परीक्ष्यते यो ऽयमेकमिति प्रत्ययो दृश्यते स परीक्ष्यते किं द्रव्यान्तरविषयो वा अथाणुसञ्चयविषय इत्यत्र दर्शनमन्यतरस्य साधकं न भवति नानाभावे चाणूनां पृथक्त्वस्याग्रहणादभेदेनैकमिति ग्रहणम् । अतस्मिंस्तदिति प्रत्ययो यथा स्थाणौ पुरुष इति । ततः किमतस्मिंस्तदिति प्रत्ययस्य प्रधानापेक्षित्वात् प्रधानसिद्धिः । स्थाणौ पुरुष इति प्रत्ययस्य किं प्रधानं यो ऽसौ पुरुषे पुरुषप्रत्ययस्तस्मिन्सति पुरुषसामान्यग्रहणात् स्थाणौ पुरुषोयमिति । एवं नानाभूतेष्वेकमिति प्रामाण्यग्रहणात्† प्रधाने सति भवितुमर्हति प्रधानं च सर्वस्याग्रहणादिति नोपपद्यते तस्मादभिन्न एवायमभेदप्रत्यय एकमिति ।

इन्द्रियान्तरविषयेष्वभेदप्रत्ययः प्रधानमिति चेद् न विशेषहेत्वभावात् । दृष्टान्ताव्यवस्था श्रोत्रादिविषयेषु शब्दादिष्वभिन्नेष्वेकप्रत्ययः प्रधानमनेकस्मिन्नेकप्रत्ययस्येति । एवं च सति दृष्टान्तोपादानं न व्यवतिष्ठते विशेषहेत्वभावात् । अणुषु सङ्घातेष्वेकप्रत्ययः किमतस्मिंस्तदिति प्रत्ययः स्थाणौ पुरुषप्रत्ययवद् अथार्थस्य तथाभावात्तस्मिंस्तदिति प्रत्ययो यथा शब्दस्यैकत्वादेकः शब्द‡ इति । विशेषहेतुपरिग्रहमन्तरेण दृष्टान्तोसंशयमापादयत इति कुम्भवत्सञ्चयमात्रं गन्धादयोपीत्यनुदाहरणं गन्धादय इति । एवं परिमाणसंयोगस्पन्दजातिविशेषप्रत्ययानप्यनुयोक्तव्यस्तेषु चैवं प्रसङ्ग इति ।

एकत्वबुद्धिस्तस्मिंस्तदिति प्रत्यय इति विशेषहेतुर्महदिति प्रत्ययेन सामानाधिकरण्यात् । एकमिदं महच्चेति एकविषयो प्रत्ययो समानाधिकरणो भवतः तेन विज्ञायते यन्महत्तदेकमिति । अणुसमूहातिशय-

---

* परीक्षोपपत्तेरिति ५ । ४ । २ । ३ पाठः ।

† सामान्यग्रहणादिति ५ । ४ । २ । ३ पाठः ।

‡ यांश्च शब्दादीन् प्रधानप्रत्ययनिमित्तत्वेन भवान् प्रतिपद्यते तेपि संचिता एव संचितत्वात्तेष्वयमेकप्रत्ययो न युक्तः । शब्दादिषु चैकप्रत्ययः समुच्चयनिबन्धननिमित्त एकत्ववद्द्रव्यसामान्याद्वा युक्तः । न्या० वा० ।

ग्रहणं महत्प्रत्यय इति चेत्सोयममहत्सु अणुषु महत्प्रत्ययो ऽतस्मिंस्तदिति प्रत्ययो भवतीति । किं चातः । अतस्मिंस्तदिति प्रत्ययस्य प्रधानापेक्षितत्वात् प्रधानसिद्धिरिति भवितव्यं महत्येव महत्प्रत्ययेनेति ।

अणुः शब्दो महानिति च व्यवसायात् प्रधानसिद्धिरिति चेद् न मन्दतीव्रताग्रहणमियत्तानवधारणाद् यथा द्रव्ये । अणुः शब्दो ऽल्पो मन्द इत्येतस्य ग्रहणं महान् शब्दः पटुस्तीव्र इत्येतस्य ग्रहणं कस्मादियत्तानवधारणात् । न ह्ययं महान् शब्द इति व्यवस्यन्नियानयमित्यवधारयति । यथा बदरामलकबिल्वादीनि* । संयुक्ते इमे इति च द्वित्वसमानाश्रयप्राप्तिग्रहणम्† ।

द्वौ समुदायावाश्रयः संयोगस्येति चेत् । को ऽयं समुदायः प्राप्तिरनेकस्यानेका वा प्राप्तिरेकस्य समुदाय इति चेत् आसेरग्रहणम् । प्राप्याश्रिताया: संयुक्ते इमे वस्तुनी इति नात्र द्वे प्राप्ती संयुक्ते गृह्येते ।

अनेकसमूहः समुदाय इति चेद् न द्वित्वेन समानाधिकरणस्य ग्रहणात् । द्वाविमौ संयुक्तावर्थाविति ग्रहणे सति नानेकसमूहाश्रयः संयोगो गृह्यते न च द्वयोरणवोर्ग्रहणमस्ति तस्मान्महती द्वित्वाश्रयभूते द्रव्ये संयोगस्य स्थानमिति ।

प्रत्यासत्तिः प्रतीघातावसाना संयोगो नार्थान्तरमिति चेद् नार्थान्तरहेतुत्वात्संयोगस्य । शब्दरूपादिस्पन्दानां हेतुः संयोगो न च द्रव्ययोर्गुणान्तरोपजननमन्तरेण शब्दे रूपादिषु स्पन्दे च कारणत्वं गृह्यते तस्माद्गुणान्तरं प्रत्ययविषयश्चार्थान्तरं तत्प्रतिषेधो वा कुण्डली

---

* शब्देष्वपि पूर्वावधृतं शब्दमुपलभ्य तस्माच्छब्दादयं महानणुर्वेत्यवधार्यते नावधारणं प्रतिषिध्यते । इदं तु चिन्त्यते । यो ऽयं शब्दे महदणुप्रत्ययः स किं परिमाणयोगादुतान्यस्माच्चिमित्तात् । अन्यस्माच्चिमित्तादिति युक्तम् । गुणे गुणानङ्गीकारात् । महत्प्रत्ययविषयत्वाद्गुणवान् शब्दो द्रव्यवदिति चेन्न । अनेकान्ताद् यथा महत्परिमाणमिति । द्रव्ये तु महत्परिमाणयोगान्महत्प्रत्ययविषयत्वं न तु विपरीतम् । महत्परिमाणयोगस्तु द्रव्यस्य विशेषप्रत्ययानामनाकस्मिकत्वेन । शब्दे ऽप्येवं प्रसङ्ग इति चेन्न मन्दत्वतीव्रत्वहेतुकत्वात् । अणुद्रव्यसामान्यात्सामान्यप्रत्ययविषयत्वं मन्दता । महद्द्रव्यसामान्याच्चासामान्यप्रत्ययविषयत्वं तीव्रता ।

† संयुक्तमहत्प्रत्ययाश्चानेकविषया प्रतिसंधानाच्चीलोत्पलादिप्रत्ययवत् । यथा नीलमुत्पलं चेति प्रतिसंधीयमानौ प्रत्ययावेकविषयौ भवतः तथा संयुक्ते महती इति प्रतिसंधानमस्ति तस्मात्प्रतिसंधानाद्वैकविषयाविति । न्या. वा. ।

गुरुरकुण्डलश्छात्र इति । संयोगबुद्धेश्च यद्यर्थान्तरं न विषयः अर्थान्तर-प्रतिषेधस्तर्हि विषयः । **तत्र प्रतिषिध्यमानवचनम् ।** संयुक्ते द्रव्ये इति यदर्थान्तरमन्यच्च दृष्टमिह प्रतिषिध्यते तद्वक्तव्यमिति । द्वयोर्महतोराश्रितस्य ग्रहणान्नाणवाश्रय इति जातिविशेषस्य प्रत्ययानुवृत्तिलिङ्गस्याप्रत्याख्यानं प्रत्याख्याने वा प्रत्ययव्यवस्थानुपपत्तिः । **व्यधिकरणस्यानभिव्यक्तेरधिकरणवचनम् ।** अणुसमवस्थानं विषय इति चेत् **प्राप्ताप्राप्तसामर्थ्यवचनम् ।** किम्प्राप्ते अणुसमवस्थाने तदाश्रयो जातिविशेषो गृह्यते अथ प्राप्ते इति । अप्राप्ते ग्रहणमिति चेद् व्यवहितस्याणुसमवस्थानस्याप्युपलब्धिप्रसङ्गः व्यवहितेऽणुसमवस्थाने तदाश्रयो जातिविशेषो गृह्येत । प्राप्ते ग्रहणमिति चेद् मध्यपरभागयोरप्राप्तावनभिव्यक्तिः । यावत्प्राप्तं भवति तावत्यभिव्यक्तिरिति चेत् तावतोऽधिकरणत्वमणुसमवस्थानस्य । यावति प्राप्ते जातिविशेषो गृह्यते तावदस्याधिकरणमिति प्राप्तं भवति । **तत्रैकसमुदाये प्रतीयमानेऽर्थभेदः ।** एवं च सति योऽयमणुसमुदायो वृत्त इति प्रतीयते तच्च वृत्तबहुत्वं प्रतीयेत यच्च यच्च ह्यणुसमुदायस्य भागे वृत्तत्वं गृह्यते सस वृत्त इति । तस्मात्समुदिताऽणुसमवस्थानस्यार्थान्तरस्य* जातिविशेषाभिव्यक्तिविषयत्वाद्व्ययव्यर्थान्तरभूत† इति । परीक्षितं प्रत्यक्षम् । अनुमानमिदानीं परीक्ष्यते ।

§रोधोपघात‖सादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥ ३७ ॥

अप्रमाणमित्येकदाप्यर्थस्य न प्रतिपादकमिति । रोधादपि नदी पूर्णा गृह्यते तदा चोपरिष्टाद्वृष्टो देव इति मिथ्यानुमानम् । नीडोपघाताद्पि पि-

---

* समुदिता अणवः स्थानं यस्य तादृशस्यार्थान्तरस्य जातिविशेषाभिव्यक्तिहेतुत्वं नाणूनामिति सिध्यत्यवयवी ।

† जातिविशेषस्येति ४ । २ । ३ पा० ।

‡ अर्थान्तरस्यावयविनोऽनभ्युपगमे परमाणुशब्दार्थानुपपत्तिः । तस्य महदपेक्षत्वात् । सत्त्वरजस्तमसां सर्वापकृष्टः संघात इति तु न व्याघातात् । सर्वापकृष्टत्वसंघातत्वयोरेकत्रासमावेशात् । अर्थान्तरं पटात्तन्तवः तद्धेतुत्वात्तुर्यादिवत् । सामर्थ्यभेदाद्विषागदवत् । भिन्नप्रत्ययविषयत्वाद्रूपस्पर्शवत् । तन्तुपटरूपे भिन्नकारणे विशेषवत्त्वाद्रूपस्पर्शवदिति चार्थान्तरत्वे हेतवः ।

§ एतदुदाहरणव्यभिचारद्वारकं सूत्रम् । तत्र रोधो नामापां स्यन्दमानानां द्रवत्वप्रतिबन्धहेतुः । उपघातः पिपीलिकागृहाणामुपमर्दः । सादृश्यं मयूरपुरुषशब्दयोः समानप्रत्ययकर्तृत्वम् । न्या० वा० ।

‖ उपधानेति ४ २ । ३ पा० ।

पीलिकाण्डसञ्चारो भवति तदा च भविष्यति वृष्टिरिति मिथ्यानुमानमिति* । पुरुषोपि मयूरवाशितमनुकरोति तदापि शब्दसादृश्यान्मिथ्यानुमानं भवति† ।

***नैकदेशत्राससादृश्येभ्यो ऽर्थान्तरभावात्‡ ॥ ३८ ॥**

नायमनुमानव्यभिचारः अननुमाने तु खल्वयमनुमानाभिमानः । कथं नाविशिष्टो लिङ्गं भवितुमर्हति । पूर्वोदकविशिष्टं खलु वर्षोदकं शीघ्रतरत्वं स्रोतसो बहुतरफेनफलपर्णकाष्ठादिवहनं चोपलभमानः पूर्णत्वेन नद्या उपरि वृष्टो देव इत्यनुमिनोति नोदकवृद्धिमात्रेण । पिपीलिकाप्रायस्याण्डसञ्चारे भविष्यति वृष्टिरित्यनुमीयते न कासां चिदिति । नेदं मयूरवाशितं तत्सदृशो ऽयं शब्द इति विशेषापरिज्ञानान्मिथ्यानुमानमिति । §यस्तु विशिष्टाच्छब्दाद्विशिष्टमयूरवाशितं गृह्णाति तस्य विशिष्टोर्थो गृह्यमाणो लिङ्गं यथा सर्पादीनामिति । सोयमनुमातुरपराधो नानुमानस्य योऽर्थविशेषेणानुमेयमर्थमविशिष्टार्थदर्शनेन बुभुत्सतइति । त्रिकालविषयमनुमानं चैकाल्यग्रहणादित्युक्तमत्र च ।

वर्त्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः‖ ॥ ३९ ॥

वृन्तात्प्रच्युतस्य फलस्य भूमेः प्रत्यासीदतो यदूर्ध्वं स पतितो ऽध्वा तत्संयुक्तः पतितकालः । योऽधस्तात्स पतितव्यो ऽध्वा तत्संयुक्तः कालः पतितव्यकालः । नेदानीं तृतीयोध्वा विद्यते यत्र पततीति वर्त्तमानः कालो गृह्येत तस्माद्वर्तमानः कालो न विद्यतइति ।

तयोरप्यभावो वर्त्तमानाभावे तदपेक्षत्वात् ॥ ४० ॥

नाध्वव्यङ्ग्यः कालः किं तर्हि क्रियाव्यङ्ग्यः पततीति यदा पतनक्रिया व्युपरता भवति स कालः पतितकालः । यदोत्पत्स्यते स पतित-

---

* मिथ्यानुमानं भवतीति ५ । ४ । २ ।

† यत्तावदनुमानमप्रमाणमित्युक्तं तदयुक्तं प्रतिज्ञापदयोर्व्याघातात् । संबन्धस्यातीन्द्रियस्य साधकं ह्यनुमानं तच्चाप्रमाणमिति व्याहतम् । किं चानेन हेतुना ऽनुमानमात्रस्याप्रामाण्यं साध्यते ऽनुमानविशेषस्य वा । नाद्यः । हेतोः पक्षतावच्छेदकाव्यापकत्वात् । अप्रामाण्यसाधकत्वेनाभिमते व्यभिचारे व्यभिचाराभावात् । व्यभिचार्यनुमानस्य पक्षत्वे पक्षतावच्छेदकहेत्वोरेकत्वापत्तिः सिद्धसाधनं च ।

‡ **यान्येतान्युदाहरणानि व्यभिचारीण्युच्यन्ते तेष्वपि व्यभिचारो नास्तीत्यसिद्धत्वोद्भावनद्वारकं सूत्रम् ।** न्या· वा· । § यस्तु सदृशाद्विशिष्टादिति· ५ । ४ । २ । ३ पा· ।

‖ तत्र तावत्काल एव नास्तीति के चित् । तत्र । प्रमाणाभावात् । अनुपलब्धेरयोग्यत्वेनोपपत्तेः । परापरप्रत्ययनिमित्तत्वाच्च कालसिद्धिः । कालस्यैकत्वेन तथापि प्रत्ययभेदानुपपत्तिरिति चेन्न । निरूपकभेदेन तदुपपत्तेः । एवं कालोपपत्तौ वर्तमानकालप्रतिषेधार्थं सूत्रम् ।

व्यकालः । यदा द्रव्ये वर्तमाना क्रिया गृह्यते स वर्तमानः कालः । यदि चायं द्रव्ये वर्तमाने पतनं न गृह्णाति कस्योपरममुत्पत्स्यमानतां वा प्रतिपद्यते* । पतितः काल इति भूता क्रिया पतितव्यः काल इति चोत्पत्स्यमाना क्रिया । उभयोः कालयोः क्रियाहीने द्रव्यम् अधः पततीति क्रियासंबद्धं सोयं क्रियाद्रव्ययोः संबन्धं गृह्णाति वर्तमानः कालस्तदाश्रयौ चेतरौ कालौ तदभावे न स्यातामिति । अथापि ।

नातीतानागतयोरितरेतरापेक्षासिद्धिः† ॥ ४१ ॥

यद्यतीतानागतावितरेतरापेक्षौ सिद्ध्येतां प्रतिपद्येमहि वर्तमानविलोपे नातीताऽपेक्षा ऽनागतसिद्धिः । नाप्यनागतापेक्षा ऽतीतसिद्धिः । कया युक्त्या केन कल्पेनातीतः कथमतीतापेक्षा ऽनागतसिद्धिः केन च कल्पेनानागत इति नेतच्छक्यं निर्वक्तुमव्याकरणीयमेतद्वर्तमानलोप‡ इति । यच्च मन्येत ह्रस्वदीर्घयोः स्थलनिम्नयोश्छायातपयोश्च यथेतरेतरापेक्षया सिद्धिरेवमतीतानागतयोरिति तन्नोपपद्यते विशेषहेत्वभावात् । दृष्टान्तवत्प्रतिदृष्टान्तोपि प्रसज्यते यथा रूपस्पर्शौ गन्धरसौ नेतरेतरापेक्षौ सिध्यतः एवमतीतानागतावितिं नेऽतरेतरापेक्षा कस्य चित्सिद्धिरिति । यस्माद्धेकाभावे ऽन्यतराभावादुभयाभावः यद्येकस्याभ्यतरापेक्षा सिद्धिरन्यतरस्येदानीं किमपेक्षा यद्यन्यतरस्येकापेक्षा सिद्धिरेकस्येदानीं किमपेक्षा एवमेकस्याभावे अन्यतरन्न सिध्यतीत्युभयाभावः प्रसज्यते । अर्थसद्भावव्यङ्ग्यश्चायं वर्तमानः कालः विद्यते द्रव्यं विद्यते गुणः विद्यते कर्मेति । यस्य चायं नास्ति तस्य ।

वर्त्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥ ४२ ॥

प्रत्यक्षमिन्द्रियार्थसन्निकर्षजं न चाविद्यमानमसदिन्द्रियेण सन्निकृ-

---

* न कालो ऽतीतो न फलमतीतं कालस्य सर्वदा वर्तमानत्वात् । फलस्य चापतत्पतति पतिष्यतीति क्रियाविशेषणत्वेन प्रत्ययविषयत्वात् क्रियायां संभवो न फलस्य इति । तस्मात्क्रिया कालाभिव्यक्तिनिमित्तं नाध्वा । गन्तव्यस्य तादवस्थ्यात् । योसौ गन्तव्यो देशः स यथाभूत एवानुत्पत्तक्रिये फले तथाभूत एवोत्पत्तक्रिय इत्यभेदाच्चाध्वा कालव्यक्तिहेतुः । न्या॰ वा॰ ।

† परस्परापेक्षासिद्धेर्हि वर्तमानाभावः सैव तु नास्तीति सूत्रार्थः । ता॰ टी॰

‡ वर्तमानकालवृत्तिध्वंसप्रतियोगित्वस्यैवातीतपदार्थत्वाद् वर्तमानकालवृत्तिप्रागभावप्रतियोगित्वस्यैव चानागतपदार्थत्वाद्वर्तमानकालानभ्युपगमे तयोर्निरूपयितुमशक्यत्वादिति भावः ।

§ विततरेति ३ पु॰ पा॰ ।

ष्यते । न चायं विद्यमानं स*त्किं चिदनुजानाति प्रत्यक्षनिमित्तं प्रत्यक्ष-विषयः प्रत्यक्षज्ञानं सर्वं नोपपद्यते† प्रत्यक्षानुपपत्तौ तत्पूर्वकत्वाद् अनुमानागमयोरनुपपत्तिः । सर्वप्रमाणविलोपे सर्वग्रहणं न भवतीति । उभयथा च वर्तमानः कालो गृह्यते क्व चिदर्थसद्भावव्यङ्ग्यः यथा‡ द्रव्ये द्रव्यमिति । क्व चित् क्रियासन्तानव्यङ्ग्यः यथा पचति छिनत्तीति । नानाविधा चैकार्था क्रिया क्रियासन्तानः क्रियाभ्यासश्च । नानाविधा चैकार्था क्रिया पचतीति स्थाल्यधिश्रयणमुदकासेचनं तण्डुलावपनमेधोऽपसर्पणमग्न्यभिज्वालनं दर्वीघट्टनं मण्डस्रावणमधोवतारणमिति । छिनत्तीति क्रियाभ्यास उद्यम्योद्यम्य परशुं दारुणि निपातयन् छिनत्तीत्युच्यते । यच्चेदं पच्यमानं छिद्यमानं च तत्क्रियमाणं §तस्मिन् क्रियमाणे ।

कृततात्कर्त्तव्यतोपपत्तेस्तूभयथा ग्रहणम्‖ ॥ ४३ ॥

क्रियासन्तानो ऽनारब्धश्चिकीर्षितो ऽनागतः कालः पत्स्यतीति । प्रयोजनावसानः क्रियासन्तानोपरमः अतीतः कालो ऽपाचीद् इति । आरब्धक्रियासन्तानो वर्तमानः कालः पचतीति । तच्च या उपरता सा कृतता या चिकीर्षिता सा कर्त्तव्यता । या विद्यमाना सा क्रियमाणता । तदेवं क्रियासन्तानस्यस्त्रैकाल्यसमाहारः पचति पच्यतइति वर्त्तमानग्रहणेन गृह्यते क्रियासन्तानस्य ह्यचाविच्छेदो विधीयते नारम्भो नोपरम इति । सोयमुभयथा वर्तमानो गृह्यते अपवृक्तो व्यपवृक्तश्च । अतीतानागताभ्यां स्थितिव्यङ्ग्यो विद्यते द्रव्यमिति । क्रियासन्तानाऽविच्छेदाभिधायी च चैकाल्यान्वितः

---

* तदिति २ । ३ पा· ।

† सूत्रार्थो विरोधः । कथं पुनर्वर्तमानभावे प्रत्यक्षानुपपत्तिः । यस्मादिदं प्रत्यक्षं वर्तमानाधारं कार्यत्वाद्यत्कार्यं तद्वर्तमानाधारं दृष्टं यथा क्षीरं कार्यं च प्रत्यक्षं तस्माद्वर्तमानाधारमिति । वर्तमानकालानभ्युपगमादनाधारं प्रत्यक्षं प्राप्नोति । अनाधारं च कार्यं नास्तीति प्रत्यक्षानुपपत्तिः । न्या· वा· ।

‡ यथास्ति द्रव्यमिति ५ । ४ । २ । ३ पा· ।

§ तस्य च कारकस्य वर्तमानक्रियासंबन्धमतीतानागतानपेक्षामपेक्ष्यातीतानागतत्वे क्रियायाः कारकस्यापि व्यक्तिः तद्भावव्यक्तिः । तद्धेतुकं च द्वैविध्यमिति प्रतिपादनपरं सूत्रमवतारयति । ता· टी· ।

‖ कस्य वर्तमानस्य । न्या· वा· ।

पचति छिनत्तीति । अन्यश्च प्रत्यासत्तिप्रभृतेरर्थस्य विवक्षायां तदभिधायी बहुप्रकारो* लोकेषु उत्प्रेक्षितव्यः । तस्मादस्ति वर्तमानः काल इति ।

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥ ४४ ॥

अत्यन्तसाधर्म्यादुपमानं न सिध्यति । न चैवं भवति यथा गौरेवं गौरिति । प्रायः साधर्म्यादुपमानं न सिध्यति । न हि भवति यथा ऽनड्वानेवं महिष इति । एकदेशसाधर्म्यादुपमानं न सिध्यति न हि सर्वेण सर्वमुपमीयतइति ॥

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥ ४५ ॥

न साधर्म्यस्य† कृत्स्नप्रायाल्पभावमाश्रित्योपमानं प्रवर्तते किं तर्हि प्रसिद्धसाधर्म्यात्साध्यसाधनभावमाश्रित्य प्रवर्तते । यच्च चैतदस्ति न तच्चोपमानं प्रतिषेद्धुं शक्यं तस्माद्यथोक्तदोषो नोपपद्यत‡इति । अस्तु तर्ह्युपमानमनुमानम् ।

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४६ ॥

यथा धूमेन प्रत्यक्षेणाप्रत्यक्षस्य वह्नेर्ग्रहणमनुमानम् एवं गवा प्रत्यक्षेणाऽप्रत्यक्षस्य गवयस्य ग्रहणमिति नेदमनुमानाद्विशिष्यते । विशिष्यतइत्याह कया युक्त्या ॥

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः§ इति ॥ ४७ ॥

यदा ह्ययमुपयुक्तोपमानो गोदर्शी गवय‖समानमर्थं पश्यति तदा ऽयं गवय इत्यस्य संज्ञाशब्दस्य व्यवस्थां प्रतिपद्यते न चेवमनुमानमिति ।

---

* कदा चिदयं वर्तमानमतीते प्रयुङ्क्ते आगतः सन् ब्रवीत्येष आगच्छामीति । कदा चिदनागते प्रयुङ्क्ते स्थितः सन् ब्रवीत्येष गच्छामीति । न्या· वा·

† न साध्यस्येति १ पा· ।

‡ सर्वथा भावाच्चात्यन्तसाधर्म्यादुपमानं सिध्यति । यदि तत्क्रिययैव तत्क्रियोपमीयते यथा रामरावणयोर्युद्धं रामरावणयोरिवेति । भूयः साधर्म्येण भवति यदा गोर्बलप्रकर्षजिज्ञासा भवति तदा भूयः साधर्म्येणोपमानं यथा गौस्तथा महिष इति । यदा तु सन्मात्रं जिज्ञासितं भवति मेरोः सत्ता किंरूपेति तदा यथा सर्षपस्य तथा मेरोरिति तस्मादप्रतिषेध इति । न्या· वा· ।

§ अथ प्रत्यक्षे गवये क उपमानार्थः । संज्ञासंज्ञिसंबन्धप्रतिपत्तिः । एवं च नोपमानमागमो न प्रत्यक्षमिति । न ह्ययमागमात्प्रत्यक्षाद्वा ऽयं गवय इति प्रतिपद्यते न्या· वा· ।

‖ गवेति २ । ३ पा· ।

¶ न चेदमिति ५ । ४ । २ । ३ ।

परार्थं चोपमानं यस्य ह्युपमान*मप्रसिद्धं तदर्थं प्रसिद्धोभयेन† क्रियतइति । परार्थमुपमानमिति चेद् न स्वयमध्यवसायाद् । भवति च मेाः स्वयमध्यवसायः यथा गौरेवं गवय इति । नाध्यवसायः प्रतिषिध्यते उपमानं तु तन्न भवति प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् । न च यस्योभयं प्रसिद्धं तं प्रति साध्यसाधनभावो विद्यत‡इति । अथापि ।

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥ ४८ ॥

तथेति समानधर्मोपसंहारादुपमानं सिध्यति नानुमानम् । अयं चानयोर्विशेष इति ।

शब्दो §ऽनुमानमर्थस्यानुपलब्धेरनुमेय॥त्वात् ॥ ४९ ॥

शब्दो ऽनुमानं न प्रमाणान्तरं कस्माच् शब्दार्थस्यानुमेयत्वात् । कथमनुमेयत्वं प्रत्यक्षतो ऽनुपलब्धेः । यथा ऽनुपलभ्यमानो लिङ्गी मितेन लिङ्गेन पश्चान्मीयतइति अनुमानम् । एवं मितेन शब्देन पश्चान्मीयते ऽर्थो ऽनुपलभ्यमान इत्यनुमानं शब्दः । इतश्चानुमानं शब्दः ।

उपलब्धेरद्विप्रवृत्तित्वात् ॥ ५० ॥

प्रमाणान्तरभावे द्विप्रवृत्तिरुपलब्धिः अन्यथा ह्युपलब्धिरनुमाने अन्यथोपमाने तद्व्याख्यातम् । शब्दानुमानयोस्तूपलब्धिरद्विप्रवृत्तिः यथानुमाने प्रवर्त्तते तथा शब्दे ऽपि विशेषाभावादनुमानं शब्द इति ।

---

* उपमेयमिति २ । ३ पा· † प्रसिद्धोपमेयेनेति ४ । २ ।

‡ न हि यथा गौरेवं गवय इत्येतदागममन्तरेण सारूप्यमात्रपरिज्ञानमुपमानं न ह्यागममात्रं सारूप्यज्ञानमन्तरेणोपमानं भवति । न चैवमनुमानम् । तस्माद्यथा लिङ्गलिङ्गिसंबन्धस्मृत्यनुग्रहे सति लिङ्गपरामर्शो ऽनुमानं तच्च प्रत्यक्षं तथा ऽऽगमाहितसंस्कारस्मृत्यपेक्षं सारूप्यप्रत्यक्षमुपमानमिति । प्रतिपत्तिभेदाच्च । नानुमानमेवं भवति यथा धूमस्तथा ऽग्निरिति । अस्ति तूपमाने यथा गौरेवं गवय इति । यच्च च प्रतिपत्तिभेदस्तत्प्रमाणान्तरम् । यथा प्रत्यक्षादनुमानम् । न्या· वा· ।

§ ननु शब्दो न प्रमाणं विद्यमानस्याप्यश्रूयमाणस्य प्रमित्यजनकत्वात् । श्रूयमाणस्य प्रमितिजनकत्वेन कदा चित्प्रमितिजनने प्रमाणत्वोपपत्तेः । विषयाभावादिति चेन्न । प्रत्यक्षानुमानविविक्तविषयस्य प्रागुपपादितत्वात् । अविज्ञानात्मकत्वाद् घटादिवत् । बाह्यकरणप्रत्यक्षत्वाद् घटादिवत् । आत्मासमवेतत्वाद् घटादिवत् । आकाशगुणत्वाच्च संख्यावदप्रमाणमिति चेन्न । आद्यानां त्रयाणां प्रदीपे व्यभिचारात् । चतुर्थस्याप्याकाशमहत्त्वे स्वप्रत्यक्षहेतौ व्यभिचारात् । अस्तु तर्ह्यनुमानं शब्दः स्मृत्यपेक्षत्वात् । त्रिकालविषयत्वाच्च अन्वयव्यतिरेकोपपत्तेश्चेति वार्तिकम् ।

‖ प्रत्येक्षेणानुपलभ्यमानार्थत्वादिति सूत्रार्थः । न्या· वा·

संबन्धाच्च ॥ ५१ ॥

शब्दो ऽनुमानमिति वर्त्तते । संबद्धयोश्च शब्दार्थयोः संबन्धप्रसिद्धौ शब्दोपलब्ध्यर्थग्रहणं यथा संबद्धयोर्लिङ्गलिङ्गिनोः संबन्धप्रतीतौ लिङ्गोपलब्धौ लिङ्गिग्रहण*मिति । यत्तावदर्थस्यानुमेयत्वादिति †तच्च ।

‡आप्तोपदेशसामर्थ्याच्छब्दादर्थसंप्रत्ययः ॥ ५२ ॥

स्वर्गः अप्सरसः उत्तराः कुरवः सप्त द्वीपाः समुद्रो लोकसन्निवेश इत्येवमादेरप्रत्यक्षस्यार्थस्य न शब्दमात्रात्प्रत्ययः किं तर्हि आप्तेरयं§मुक्तः शब्द इत्यतः संप्रत्ययः विपर्ययेण संप्रत्ययाभावाद् न त्वेवमनुमानमिति । यत्पुनरुपलब्धेरद्विप्रवृत्तित्वादिति । अयमेव शब्दानुमानयोरुपलब्धेः प्रवृत्तिभेदः तच्च विशेषे सत्यहेतुर्विशेषाभावादिति । यत्पुनरिदं संबन्धाच्चेति अस्ति च शब्दार्थयोः संबन्धो ऽनुज्ञातः अस्ति च प्रतिषिद्धः । अस्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषो ऽनुज्ञातः प्राप्तिलक्षणस्तु शब्दार्थयोः संबन्धः प्रतिषिद्धः । कस्मात् । प्रमाणतो ऽनुपलब्धेः‖ ।

प्रत्यक्षतस्तावच्छब्दार्थप्राप्ते¶र्नोपलब्धिरतीन्द्रियत्वात् । येनेन्द्रियेण गृह्यते शब्दस्तस्य विषयभावमतिवृत्तो ऽर्थो न गृह्यते । अस्ति चातीन्द्रियविषयभूतो ऽप्यर्थः समानेन चेन्द्रियेण गृह्यमाणयोः प्राप्तिर्गृह्यतइति । प्राप्तिलक्षणे च गृह्यमाणे संबन्धे शब्दार्थयोः शब्दान्तिके **वार्थः स्यात् अर्थान्तिके वा शब्दः स्याद् उभयं वोभयच्च । अथ खल्वयम् ।

पूरणप्रदाहपाटनानुपलब्धेश्च संबन्धाभावः ॥ ५३ ॥

स्थानकरण††भावादिति चार्थः । न चायमनुमानतो ऽप्युपलभ्यते

---

* संबद्धार्थप्रतिपादकत्वाच्चेति सूत्रार्थः । न्या· वा· ।

† यत्तावत्स्मृत्यपेक्षत्वादनुमानं शब्द इति । तच्च । अनैकान्तात् । संशये तर्कउपमाने च स्मृत्यपेक्षत्वात् । अत एव त्रिकालविषयत्वमपि न हेतुः । अन्वयव्यतिरेकोपपत्तिस्तु प्रत्यक्षे व्यभिचरिता । पटपटज्ञानयोरन्वयव्यतिरेकोपपत्तेः । अनुपलभ्यमानार्थत्वं त्वस्ति न तु स्वर्गापूर्वदेवतादौ प्रत्यक्षानुमानावसर इति वार्त्तिकम् । तच्चेति २ । ३ पा· ।

‡ प्रत्यायनाङ्गान्वयव्यतिरेकज्ञानं त्वन्यादृशं शब्दे । अन्यादृशं त्वनुमाने । तद्धि पक्षधर्मतापेक्षमनुमाने शब्दे तु तदनपेक्षमित्यत्र सूत्रं भवति । ता· टी· ।

§ आप्तैः प्रयुक्त इति ४ । ३ । २ । ‖ अस्य मुद्रितपुस्तके सूत्रत्वेन लेखः प्रामादिकः ।
¶ प्राप्ते नोपलब्धिरिति ४ पा· । ** शब्दान्तिकमिति ९ पाठः ।
†† कारणादिति २ पा· ।

शब्दान्तिके ऽर्थ इति । एतस्मिन्पक्षे ऽप्य*स्य स्थानकरणोच्चारणीयः शब्दस्तदन्तिके ऽर्थ इति अन्नाग्न्यसिशब्दोच्चारणे पूरणप्रदाहपाटनानि गृह्येरन् न च प्रगृह्यन्ते† । अग्रहणान्नानुमेयः प्राप्तिलक्षणः‡ संबन्धः अर्थान्तिके§ शब्द इति । स्थानकरणासंभवाद् अनुच्चारणं‖ स्थानं कण्ठादयः करणं प्रयत्नविशेषः तस्यार्थान्तिके ऽनुपपत्तिरिति उभयप्रतिषेधाच्च नोभयम् । तस्मान्न शब्देनार्थः प्राप्त¶ इति ।

शब्दार्थव्यवस्थानादप्रतिषेधः॥ ५४ ॥

शब्दार्थप्रत्ययस्य** व्यवस्थादर्शनादनुमीयते ऽस्ति शब्दार्थसंबन्धो व्यवस्थाकारणम् । असंबन्धे हि शब्दमात्रादर्थमात्रे प्रत्ययप्रसङ्गः तस्मादप्रतिषेधः†† संबन्धस्येति । अत्र समाधिः ।

न सामयिकत्वाच्छब्दार्थसंप्रत्ययस्य ॥ ५५ ॥

न संबन्धकारितं‡‡ शब्दार्थव्यवस्थानं किं तर्हि समयकारितं यत्तदवोचामास्येदमिति षष्ठीविशिष्टस्य वाक्यस्यार्थविशेषो ऽनुज्ञातः शब्दार्थयोः संबन्ध इति समयन्तं§§दवोचामेति । कः पुनरयं समयः । अस्य

---

* प्यास्येति २ । ४ पा· । † गद्यन्तइति २ । ४ पु· ।

‡ नानुमेयप्राप्तिलक्षणा इति १ पु· ।

§ अथ शब्दो ऽर्थान्तिकमुपपद्यते तस्यानुपपत्तिर्व्याघातात् । नित्यः शब्दः सन्तानवृत्त्या गच्छतीति व्याहतम् । अथ नागच्छत्यर्थदेशएव भवति । नित्यश्च भवति चेति व्याहतम् । न्या· वा· । ‖ स्थानकरणसम्भवानुच्चारणमिति २ पु· ।

¶ अथ न गच्छति न भवति तत्र व्यज्यतएको वितत्यावस्थित इति चेन्न । सर्वार्थोपलब्धिप्रसङ्गात् । यदि सर्वएव शब्दा वितत्यावस्थिताः स्थानकरणादिसंनिधाने सति व्यज्यन्तइति मन्यसे सर्वार्थानुपलब्धिः प्राप्ता यदेकस्य शब्दस्य व्यञ्जकं तच्छब्दान्तराणामपीति । वितत्यावस्थितश्च शब्दो व्यक्त इति । स्वविषयप्राप्त्यवस्थाने सति यत्र क्व चनावस्थितानां गोशब्दादीनां व्यक्तौ ककुदादिमदर्थप्रत्यायनं स्यात् । सामान्यवदेतत्स्यात् । यथा सामान्यं सर्वत्रावस्थितं न सर्वत्रोपलभ्यते तथा शब्दोपीति चेन्न । सामान्यस्यार्थोपलब्धिर्व्यक्तिहेतुः न पुनः शब्दस्यार्थोपलब्धिरस्ति । न च वाच्ये वृत्तिः वाच्ये वृत्तित्वे वाच्योपलब्ध्यावकृतसमयेनापि प्रतिपद्येत यथा सामान्यम् । तस्माच्चानुमानादपि प्रतिपद्यते । इतश्च स्वार्थयादन्येनापि न संबन्धी शब्दः गुणत्वात् । अन्येन गवादिना शब्दं प्रति समवायो नास्ति शब्दस्याकाशवृत्तित्वात् । नापि शब्दार्थयोरेकार्थसमवायः ताभ्यामेकस्यानारम्भात् । उपमानस्य तु नायं विषयः । आगमात्प्रतिपत्स्यतइति चेत्स एवायं विचार्यते किं शब्दार्थौ संबद्धावुतासंबद्धाविति । न चानुमानं शब्दः स्वपरात्मप्रत्यायकत्वात्प्रदीपवत् ।

** शब्दादर्थप्रत्ययस्येति २ पु· ।

†† शब्दः संबद्धो ऽर्थं प्रत्याययति प्रत्ययनियमहेतुत्वात्प्रदीपवत् । अथ वा संबद्धाभ्यां शब्दार्थाभ्यां प्रत्ययो भवति नियमात् । न्या· वा· ।

‡‡ न संबन्धाकारितमिति २ पु· । §§ तमवोचाम इति २ पु· ।

शब्दस्येदमर्थजातमभिधेयमिति अभिधानाभिधे*यनियमनियोगः तस्मिन्नुपयुक्ते शब्दादर्थ†संप्रत्ययो भवति । विपर्यये हि शब्दश्रवणेपि प्रत्ययाभावः । संबन्धवादिनापि चायमवर्जनीय इति । प्रयुज्यमानग्रहणाच्च समयोपयोगो लौकिकानाम् । समयपालनार्थं चेदं पदलक्षणाया वाचो ऽन्वाख्यानं व्याकरणं वाक्यलक्षणाया वाचो ऽर्थो लक्षणम्‡ । पदसमूहो वाक्यमर्थपरिसमाप्ताविति । तदेवं प्राप्तिलक्षणस्य शब्दार्थसंबन्धस्यार्थजुषो ऽपि अनुमानहेतुर्भवतीति ।

जातिविशेषे चानियमात् ॥ ५६ ॥

सामयिकः शब्दा§दर्थसंप्रत्ययो न स्वाभाविकः । ऋ॥ष्यार्यम्लेच्छानां यथाकामं शब्दनियोगो¶ ऽर्थप्रत्यायनाय प्रवर्तते स्वाभाविके हि शब्दस्यार्थप्रत्यायकत्वे यथाकामं न स्याद् यथा तेजसस्य प्रकाशस्य रूपप्रत्ययहेतुत्वं न जातिविशेषे** व्यभिचरतीति†† ।

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः‡‡ ॥ ५७ ॥

पुचकामेष्टिहवनाभ्यासेषु । तस्येति शब्दविशेषमेवाधिकुरुते भगवान् ऋषिः । शब्दस्य प्रमाणत्वं न संभवति §§ कस्माद् अनृतदोषात् पुचकामेष्टौ । पुचकामः पुचेष्ट्या यजेतेति नेष्टौ संस्थितायां पुचजन्म दृश्यते । दृष्टार्थस्य

---

* अभिधानाभिधेयेति १ । २ । ३ । ४ पु· पा· । † शब्दार्थेति २ पु· ।

‡ लोकतश्च समयो बोद्धव्यः । मात्रादींस्तेषु तेष्वर्थेषु तांस्तान् शब्दान् प्रयुञ्जानानुपलभ्य सोपि तथैव शिक्षितस्तानेव शब्दांस्तेषु तेष्वर्थेषु प्रयुङ्क्ते न पुनरेवं कश्चिल्लिपिविशेषमिव शिक्षयतीति । न्या· वा· ।

§ अर्थे संप्रत्यय इति २ । ४ पु· पा· ।

¶ शब्दविनियोग इति ३ शब्दप्रयोग इति ४ पु· पाठः । || ऋषीति । २ पु· नास्ति ।

** विशेषमिति २ । ४ पु· ।

†† यदि स्वाभाविकः शब्दार्थसंबन्धो ऽभविष्यन्न जातिविशेषे शब्दार्थव्यवस्था ऽभविष्यत् । अस्ति तु जातिविशेषे प्रयोगः । जातिविशेषे यथाकामं प्रयोगो दृष्टः न तु स्वाभाविकेन संबन्धेन संबद्धानां जातिविशेषे व्यभिचारो दृष्टः । न हि प्रदीपो ऽस्माकमन्यथा प्रकाशयत्यन्यथा जातिविशेष इति । न्या· वा· ।

‡‡ तदित्यधिकारः । यस्मात्प्राप्तमपि प्रकरणेन शब्दं तच्छब्देन पुनरभिधत्ते तेन ज्ञापयति शब्दविशेषं प्रतीयं चिन्ता न शब्दमात्रं प्रति । अन्यथैवं वक्तव्यम्- प्रमाणं शब्दो ऽनृतव्याघातपुनरुक्तदोषेभ्य इति अप्रामाण्यमर्थस्याप्रत्यायकत्वम् । अनृतत्वमयथार्थाभिधानम् । व्याघातः पदयोर्वाक्ययोर्वा सहासंभवः पुनरुक्तं पूर्वाभिहितार्थाभिधानम् । न्या· वा· ।

§§ भवतीति २ । ४ ।

वाक्यस्याऽनृतत्वाद् अदृष्टार्थमपि वाक्यम् अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि अनृतमिति च्छायते । विहितव्याघातदोषाच्च । हवने* उदिते होतव्यम् अनुदिते होतव्यं समयाध्युषिते होतव्यमिति विधाय विहितं व्याहन्ति श्यावो ऽस्याहुतिमभ्यवहरति य उदिते जुहोति शबलो ऽस्याहुतिमभ्यवहरति यो ऽनुदिते जुहोति †श्यावशबलौ वास्याहुतिमभ्यवहरतो यः समयाध्युषिते जुहोति व्याघाताच्चान्यतरन्मिथ्येति । पुनरुक्तदोषाच्च अभ्यासे देश्यमाने । चिः प्रथमामन्वाह चिरुत्तमामिति पुनरुक्तदोषो भवति पुनरुक्तं च प्रमत्तवाक्यमिति । तस्मादप्रमाणं शब्द‡ इति । §अनृतव्याघातपुनरुक्तदोषेभ्य इति ।

न कर्मकर्तृसाधनवैगुण्यात् ॥ ५८ ॥

नानृतदोषः पुत्रकामेष्टौ कस्मात् कर्मकर्तृसाधनवैगुण्यात् । इष्ट्या पितरौ संयुज्यमानौ पुत्रं जनयत इति । इष्टिः करणं साधनं पितरौ कर्तारौ संयोगः कर्म चयाणां गुणयोगात् पुत्रजन्म । वैगुण्याद्विपर्ययः ‖इष्ट्याश्रयं तावत्कर्मवैगुण्यं समीहा भ्रेषः । कर्तृवैगुण्यम् अविद्वान् प्रयोक्ता ¶कूपयाचरणश्च । साधनवैगुण्यं हविरसंस्कृतमुपहतमिति मन्त्रा न्यूनाधिकाः स्वरवर्णहीना इति । दक्षिणा दुरागता** हीना निन्दिता चेति । ††अथोपजनाश्रयं कर्मवैगुण्यं मिथ्यासंप्रयोगः । कर्तृवैगुण्यं योनिव्यापादो बीजोपघातश्चेति । साधनवैगुण्यम् इष्टावभिहितम् । लोके चाग्निकामो दारुणी मथ्नीयादिति विधिवाक्यं तच्च कर्मवैगुण्यं मिथ्याभिमन्यनं कर्तृवैगुण्यं प्रज्ञाप्रयत्नगतः प्रमादः साधनवैगुण्यम् आर्द्रं सुषिरं दार्विति तच्च फलं न निष्पद्यत इति नानृतदोषः‡‡ । गुणयोगेन फलनिष्पत्तिदर्शनात् । न चेदं लौकिकाद्विद्यते पुत्रकामः पुत्रेष्ट्या यजेतेति ।

---

* हवने इति २ पु. नास्ति ॥ † श्यावः शबलश्चास्याहुतिमभ्यवहरतीति ३ पु. पा. ।

‡ दृष्टान्तत्वेनैतानि वाक्यान्युपन्यस्य एककर्तृकत्वेन शेषवाक्यानामप्रमाणत्वमिति । अग्निहोत्रादिवाक्यानां वा ऽप्रमाणत्वं तदन्यवाक्यवत् । न्या. वा. ।

§ शब्दोऽनृतेत्यादि १ । ३ । ४ पु. पाठः । ‖ इज्याश्रयमिति १ । २ पु. ।

¶ कुपूर्येति ४ पा. । ** दुरधिगतेति ३ । ४ पा. ।

†† अर्था यजनाश्रयमिति ४ । २ अथोपयजनाश्रयमिति ३ पु. पाठः ।

‡‡ यच्चेदं वाक्यं तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इति । एतदपि वेदस्य पक्षीकृतत्वादव्यापकम् । अथ यान्येवंधर्मकाणि वेदवाक्यानि तानि पक्षीक्रियन्ते तर्ह्यनृतत्वादीनां पक्षतावच्छेदकत्वाच्छेतुरन्यो वक्तव्यः । अनृतत्वादप्रमाणमिति चेत्किं तदनृतत्वं यद्ययथार्थाभिधानं नन्वयमेव प्रतिज्ञार्थो ऽप्रमाणमिति । अनृतत्वं चासिद्धमित्युक्तम् ।

***अभ्युपेत्य कालभेदे दोषवचनात् ॥ ५९ ॥**

न व्याघातो हवनइत्यनुवर्त्तते । योऽभ्युपगतं हवनकालं भिनत्ति ततोन्यच्च जुहोति तत्रायमभ्युपगतकालभेदे दोष उच्यते श्यावो †वास्याहुतिमभ्यवहरति य उदिते जुहोति तदिदं विधिभ्रंशे निन्दावचनमिति ।

अनुवादोपपत्तेश्च ॥ ६० ॥

पुनरुक्तदोषोऽभ्यासेनेति प्रकृतम् । अनर्थको ऽभ्यासः पुनरुक्तः अर्थवानभ्यासो ऽनुवादः‡ । योऽयमभ्यासस्त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यनुवाद उपपद्यते अर्थवत्त्वात् । त्रिर्वचनेन हि प्रथमोत्तमयोः पञ्चदशत्वं सामिधेनीनां भवति । तथा च मन्त्राभिवादः इदमहं भ्रातृव्यं पञ्चदशावरेण§ वाग्वज्रेण बाधे योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति पञ्चदशसामिधेनीर्वज्रमन्त्रोऽभिवदति तदभ्यासमन्तरेण न स्यादिति ।

वाक्यविभागस्य चार्थग्रहणात्‖ ॥ ६१ ॥

प्रमाणं शब्दो यथा लोके । विभागश्च ब्राह्मणवाक्यानां त्रिविधः ।

विध्यर्थवादानुवादवचनविनियोगात् ॥ ६२ ॥

त्रिधा खलु ब्राह्मणवाक्यानि विनियुक्तानि विधिवचनान्यर्थवादवचनान्यनुवादवचनानीति । तत्र ।

विधिर्विधायकः ॥ ६३ ॥

यद्वाक्यं विधायकं चोदकं स विधिः । विधिस्तु नियोगो¶ ऽनुज्ञा वा । यथाग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि ।

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥ ६४ ॥

---

* यत्पुनर्व्याघातदोषादिति तत्रोच्यते । न्या॰ वा॰ । † वेति १ पु॰ नास्ति ।

‡ पुनरुक्तं नाम तस्यैवार्थस्यानङ्गीकृतविशेषस्य यत्पुनर्वचनम् । अनुवादस्तु पुनःश्रुतिसामान्यादङ्गीकृतविशेषस्यार्थस्य वादः । एवं च सति यथोक्तो न दोषः । पुत्रकामेष्टिवाक्यानि प्रमाणं वेदैकदेशत्वाद् भूमिरावपनं महदिति वाक्यवत् । पदादिनियमाद् द्वादश मासाः संवत्सर इति वाक्यवत् । वक्तृविशेषाभिहितत्वात् अग्निर्हिमस्य भेषजमिति वाक्यवत् । न्या॰ वा॰ । § पञ्चदशारेणेति १ । ४ पु॰ पाठः ।

‖ समस्तानि वेदवाक्यानि पत्नीकृत्याभिधीयते । प्रमाणं वेदवाक्यान्यर्थविभागत्वान्मन्त्रादिवाक्यवत् । न्या॰ वा॰ । ¶ विनियोग इति ३ पा॰ ।

विधेः फलवादलक्षणा या प्रशंसा सा स्तुतिः संप्रत्ययार्थं* स्तूयमानं श्रद्दधीतेति । प्रवर्तिका च फलश्रवणात् प्रवर्तते सर्वजिता† वै देवाः सर्वमजयन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवै‡तेनाप्नोति सर्वं जयतीत्येवमादि । अनिष्टफलवादो निन्दा वर्जनार्थं§ निन्दितं न समाचरेदिति स ‖ एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाऽन्येन यजते गर्तं पतत्ययमेवैनर्ज्जीर्यते वा प्रमीयते वा इत्येवमादि । अन्यकर्तृकस्य व्याहृतस्य विधेर्वादः परकृतिः । हुत्वा वसामेवाग्ने ऽभिघारयन्ति अथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्ने ऽभिघारयन्ति अग्नेः प्राणाः पृषदाज्य¶स्तोममित्येवमभिदधतीत्येवमादि । येतिह्यसमाचरितो विधिः पुराकल्प इति तस्माद्ब्राह्मणेन ब्राह्मणा **बर्हिः पवमानं†† सामस्तोममस्तौषन् योने यज्ञं प्रतनवामहे इत्येवमादि । कथं परकृतिपुराकल्पावर्थवादाविति स्तुतिनिन्दावाक्येनाभिसंबन्धाद्विधाश्रयस्य कस्य‡‡चिदर्थस्य द्योतनादर्थवाद इति ।

विधिविहितस्यानुवचनमनुवादः ॥ ६५ ॥

विध्यनुवचनं चानुवादो विहितानुवचनं च । पूर्वः शब्दानुवादो ऽपरो ऽर्थानुवादः । यथा पुनरुक्तं द्विविधमेव§§मनुवादोपि । किमर्थं पुनर्विहितमनूद्यते । अधिकारार्थं विहितमधिकृत्य स्तुतिर्बोध्यते निन्दा वा विधिशेषो वा ऽभिधीयते । विहितानन्तरार्थो ऽपि चानुवादो भवति एवमन्यदप्युत्प्रेक्षणीयम् । लोके ऽपि च विधिरर्थवादो ऽनुवाद इति च त्रिविधं वाक्यम् । ओदनं पचेदिति विधिवाक्यम् । अर्थवादवाक्यमायुर्वर्चो बलं सुखं प्रतिभानं चान्ने प्रतिष्ठितम् । अनुवादः पचतु पचतु भवानित्यभ्यासः क्षिप्रं पच्यतामिति वा अङ्ग पच्यतामित्यध्येषणार्थम् । पच्यतामेवेति चा‖‖वधारणार्थम् । यथा लौकिके वाक्ये विभागेनार्थग्रहणात्प्रमाणत्वम् एवं ¶¶वेदवाक्यानामपि विभागेनार्थग्रहणात्प्रमाणत्वं भवितुमर्हतीति ।

---

* सम्प्रत्ययार्थं इति १ पु. सम्प्रत्ययार्था इति ४ पु. । † सर्वजितो वै देवा इति २ पु. ।
‡ सर्वमेव तेनाप्नोतीति ३ पु. § निन्दावर्जनार्था इति २ । ४ ।
‖ स एष वा प्रथम इति १ । ३ पु. पा. । ¶ पृषदाज्यमिति ३ । ४ पु. पा. ।
** पुरा ब्राह्मणा अबर्हिः २ । ४ बर्हिरिति ३ पु. पाठः । †† पवमानानामिति २ । ४ ।
‡‡ कस्य कस्येति २ ३ । एक कस्येति ४ पु. ।
§§ अनित्यो ऽनित्य इति शब्दपुनरुक्तमनित्यो निरंशधर्मक इत्यर्थपुनरुक्तम् ।
‖‖ वेति १ । २ । ३ । ४ । ¶¶ तथा वेदे ऽपि भवितुमर्हतीति २ । ४ पु. ।

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥ ६६ ॥

पुनरुक्तमसाधु साधुरनुवाद इति अयं विशेषो नोपपद्यते । कस्मादुभयञ्च हि प्रतीतार्थः शब्दो ऽभ्यस्यते चरितार्थस्य शब्दस्याभ्यासादुभयमसाध्विति* ।

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥ ६७ ॥

नानुवादपुनरुक्तयोरविशेषः । कस्माद् अर्थवतो ऽभ्यासस्यानुवादभावात् । समाने ऽभ्यासे पुनरुक्तमनर्थकम्‡ । अर्थवानभ्यासो ऽनुवादः शीघ्रतरगमनोपदेशवत्§ । शीघ्रं शीघ्रं॥ गम्यतामिति क्रियातिशयो ऽभ्यासेनोच्यते । उदाहरणार्थं चेदम् । एवमन्यो ऽप्यभ्यासः¶ पचति पचतीति क्रियानुपरमः । यामो यामो रमणीय इति व्याप्तिः । परि परि त्रिगर्तेभ्यो वृष्टो देव इति परिवर्जनम् । अध्यधिकुडं निषण्णमिति सामीप्यम् । तिक्तं तिक्तम् इति प्रकारः । एवमनुवादस्य स्तुतिनिन्दाशेषविधि**व्यधिकारार्थता विहितानन्तरार्थता चेति । किं पुनः प्रतिषेधहेतूद्धारादेव शब्दस्य प्रमाणत्वं सिध्यति††। अतश्च ।

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥ ६८ ॥

किं पुनरायुर्वेदस्य प्रामाण्यं यत्तदायुर्वेदेनोपदिश्यते इदं कृत्वेदमधिगच्छतीदं वर्जयित्वा ऽनिष्टं जहाति तस्यानुष्ठीयमानस्य तथाभावः सत्यार्थता ऽविपर्ययः । मन्त्रपदानां च विष‡‡भूताशनिप्रतिषेधार्थानां प्रयोगे ऽर्थस्य तथाभाव एतत्प्रामाण्यम् । किंकृतमेतद् आप्तप्रामाण्यकृतम् । किं पुनराप्तानां प्रामाण्यं साक्षात्कृतधर्मता भूत§§दया यथाभूतार्थचिख्यापयिषेति । आप्ताः खलु साक्षात्कृतधर्माण इदं हातव्यमिदमस्य हानिहेतुरिदमस्याधिगन्तव्य-

---

* प्रतीतार्थशब्दाभ्यासो ऽर्थवादपुनरुक्तयोः सामान्यमतः प्रतीतार्थशब्दाभ्यासादुभयमसाध्विति । न्या· वा· ।

† अभ्यासार्थं विशेषइति २ पु· । ‡ अनर्थमिति २ ४ ।

§ अर्थवाननुवादलक्षणो ऽभ्यासः प्रत्ययविशेषहेतुत्वाच्छीघ्रतरगमनोपदेशवत् । न्या· वा· ।

॥ शीघ्रं गम्यतामिति २ शीघ्रं शीघ्रं गम्यतां शीघ्रतरं गम्यतामिति १ । ३ । ४ पु· ।

¶ एवमन्ये ऽप्यभ्यासा इति ४ । ** विध्यधिकारार्थतेति २ । ४ ।

†† प्रमाणत्वं न सिद्ध्यति । ४ पु· । ‡‡ विषयभूतेति २ । ३ । ४ पु· ।

§§ भूतं तदभया यथाभूतार्थतार्थेति १ ।

मिदमस्याधिगमहेतुरिति भूतान्यनुकम्पन्ते । तेषां खलु वै प्राणभृतां स्वयमनवबुद्धमानानां नान्यदुपदेशादवबोधकारणमस्ति । न चानवबोधे समीहा वर्जनं वा न वा* ऽकृत्वा स्वस्तिभावो नाप्यस्यान्य उपकारको ऽप्यस्ति । हन्त वयमेभ्यो यथादर्शनं यथाभूतमुपदिशामस्तइमे श्रुत्वा प्रतिपद्यमाना हेयं हास्यन्त्यधिगन्तव्यमेवाधिगमिष्यन्तीति । एवमाप्तोपदेशः । एतेन विधिनाप्तप्रामाण्येन परिगृहीतो ऽनुष्ठीयमानो ऽर्थस्य साधको भवति एवमाप्तोपदेशः प्रमाणम् । एवमाप्ताः प्रमाणम् । दृष्टार्थेनाप्तोपदेशेनायुर्वेदेनाऽदृष्टार्थो वेदभागो ऽनुमातव्यः प्रमाणमिति । आप्तप्रामाण्यस्य हेतोः समानत्वादिति । अस्यापि चैकदेशो ग्रामकामो यजेतेत्येवमादिर्दृष्टार्थस्तेनानुमातव्यमिति लोके च भूयानुपदेशाश्रयो व्यवहारः । लौकिकस्याप्युपदेष्टुरुपदेष्टव्यार्थज्ञान†परानुग्रिघृक्षया यथाभूतार्थचिख्यापयिषया च प्रामाण्यं तत्परिग्रहादाप्तोपदेशः प्रमाणमिति । द्रष्टृप्रवक्तृसामान्याच्चानुमानं यथवाप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च तथवायुर्वेदप्रभृतीनाम् इत्यायुर्वेदप्रामाण्यवद्वेदप्रामाण्यमनुमातव्यमिति‡ । नित्यत्वाद् वेदवाक्यानां प्रमाणत्वे तत्प्रामाण्यमाप्तप्रामाण्यादित्ययुक्तम् । शब्दस्य वाचकत्वादर्थप्रतिपत्तौ प्रमाणत्वं न नित्यत्वात्§ । नित्यत्वे हि सर्वस्य सर्वेण वचनाच्छब्दार्थव्यवस्थानुपपत्तिः । नानित्यत्वे वाचकत्वमिति चेद् न लौकिकेष्व‖दर्शनात् । तेऽपि नित्या इति चेद् न । अनाप्तोपदेशादर्थविसंवादो ऽनुपपन्नः । नित्यत्वाद्धि शब्दः प्रमाणमिति । अनित्यः स इति चेद् अविशेषवचनम् । अनाप्तोपदेशो लौकिको न नित्य इति कारणं वाच्यमिति । यथा¶योगं चार्थस्य प्रत्यायनाद् नामधेयशब्दानां लोके प्रामाण्यं नित्यत्वात्प्रामाण्यानुपपत्तिः । यचार्थै

---

* न चाकृत्वेति २ । ४ । पु. पा. । † उपदेष्टव्यार्थज्ञानेन परेति ४ पु. पाठः ।

‡ अस्य प्रयोगः प्रमाणं वेदवाक्यानि वक्तृविशेषाभिहितत्वान्मन्त्रायुर्वेदवाक्यवत् । एककर्तृकत्वेन वा मन्त्रायुर्वेदवाक्यानि पक्षीकृत्यालौकिकार्थप्रतिपादकत्वेन वैधर्म्यहेतुर्वक्तव्यः । न्या. वा. ।

§ असिद्धं नित्यत्वम् । के चित्तु न किं चिच्चित्यं प्रमाणमस्तीत्याहुः । तच्च मनस आत्मनश्च नित्यस्यापि प्रमाणत्वात् । तस्मादर्थविभागवत्त्वादनित्यत्वं लौकिकवाक्यवत् । तान्यपि नित्यानीति चेन्न अर्थविभागानुपपत्तेः । वर्णवत्त्वात् सामान्यविशेषवत्त्वे सति श्रोत्रग्राह्यत्वात्पटादिमत्त्वाच्चानित्यत्वम् ।

‖ अर्थदर्शनादिति २ । ४ पु. । ¶ नियोगमिति । १ । २ । ३ । ४ । पु. पा.

नामधेयशब्दो नियुज्यते लोके तच्च*नियोगसामर्थ्यात्प्रत्यायको भवति न नित्यत्वात् । मन्वन्तरयुगान्तरेषु चातीतानागतेषु संप्रदायाभ्यासप्रयोगा†-विच्छेदो वेदानां नित्यत्वम् । आप्तप्रामाण्याच्च प्रामाण्यं लौकिकेषु शब्देषु चैतत्समानमिति ।

इति वात्स्यायनीये न्यायभाष्ये द्वितीयाध्यायस्याद्यमाह्निकम् ।

अथार्थः‡ प्रमाणोद्देश इति मत्वा ऽऽह ।

न चतुष्ट्वमैतिह्यार्थापत्तिसंभवाऽभावप्रामाण्यात्§ ॥ १ ॥

न चत्वार्येव प्रमाणानि किं तर्ह्यैतिह्यमर्थापत्तिः संभवो ऽभाव इत्येतान्यपि प्रमाणानि तानि‖ कस्मान्नोक्तानि । इति होच्चरित्यनिर्दिष्ट-प्रवक्तृकं प्रवादपारंपर्यमैतिह्यम् । अर्थादापत्तिरर्थापत्तिः । आपत्तिः प्राप्तिः प्रसङ्गः¶ यथा ऽभिधीयमाने ऽर्थे यो ऽन्यो ऽर्थः प्रसज्यते सो ऽर्थापत्तिः । यथा मेघेष्वसत्सु वृष्टिर्न भवतीति किमत्र प्रसज्यते सत्सु भवतीति । सम्भवो नामाविनाभाविनो ऽर्थस्य सत्ताग्रहणादन्यस्य सत्ताग्रहणम् । यथा द्रोणस्य सत्ताग्रहणादाढकस्य सत्ताग्रहणम् आढकस्य ग्रहणात्प्रस्थस्येति । अभावो विरोधी अभूतं भूतस्याविद्यमानं वर्षकर्म विद्यमानस्य वाय्वभ्रसंयोगस्य प्रतिपादकं विधारके हि वाय्वभ्रसंयोगे गुरुत्वादपां पतनकर्म न भवतीति । सत्यम् एतानि प्रमाणानि न तु प्रमाणान्तराणि** । प्रमाणान्तरं च मन्यमानेन प्रतिषेध उच्यते । सोयम् ।

---

* तस्येति । १ । २ । ३ । ४ । पु॰ पा॰

† तान्येव वेदवाक्यानि मन्वन्तरचतुर्युगान्तरेषु संप्रदायाभ्यासाविच्छेदेन प्रवर्तन्ते । तदपेक्षया लौकिकाः शब्दान् प्रयुञ्जते नित्या वेदा इति । नित्याः पर्वता इति यथा । यतश्च मन्वादिवाक्येषु समानम् । न पुनर्नित्यत्वादेव तथा प्रयोगः अनित्यत्वप्रमाणानामव्याहतत्वात् । उपबृंहितं तु नित्यत्वम् ।

‡ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रम् । तत्राक्षेपः । न चत्वार्येव प्रमाणानि ऐतिह्यादीनां प्रमाणान्तरत्वात् । संशयव्युदासार्थं वा प्रकरणं किमैतिह्यादयो विद्यमाना नोक्ता उताविद्यमाना इति । विधिन्यूनतापरिहारार्थं वा प्रकरणम् । विद्यमानानामैतिह्यादीनामनुक्तेः । यदि ते दुष्टा दोषो वक्तव्यः । अनभिधाने शास्त्रस्य न्यूनता । प्रत्यक्षादिष्वन्तर्भावप्रदर्शनार्थं वा प्रकरणम् । ननु चत्वार्येव प्रमाणानीति नियमबोधनादेवान्येषामुक्तेष्वन्तर्भावः प्रतीयते । सत्यम् । सामान्येन ज्ञानेपि कस्य कुत्रान्तर्भाव इति विशेषतो ज्ञानात् । अत इदं प्रकरणमारभ्यमेव । § **परैरभ्युपगतादस्माकं संशयादिति सूत्रार्थः** । ता॰ टी॰ ।

‖ तानि कस्माच्चोक्तानीति १ । ३ पु॰ नास्ति । ¶ यत्रेति १ । ३ । ४ ।

** तान्येतान्यैतिह्यादीनि लक्षणभेदादेष्ववान्तर्भवन्तीति न पृथगुच्यन्ते । प्रत्यक्षाद्यनधिगतविषयभावाच्च । अथ प्रयोजनभेदाद्भेदो ऽभ्युपगम्यते तर्हि प्रमाणानन्त्यापत्तावष्टत्वप्रतिज्ञा

***शब्दऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः ॥ २ ॥**

अनुपपन्नः प्रतिषेधः । कथम् आप्तोपदेशः शब्द इति न च शब्दलक्षणमैतिह्यादावर्तते सेयं भेदः सामान्यात्संगृह्यतइति । प्रत्यक्षेणाप्रत्यक्षस्य सम्बद्धस्य प्रतिपत्तिरनुमानम् । तथा चार्थापत्तिसम्भवाभावः† वाक्यार्थसंप्रत्ययेनानभिहितस्यार्थस्य प्रत्यनीकभावाद्ग्रहणमर्थापत्तिरनुमानमेव‡ । अविनाभाववृत्त्या च सम्बद्धयोः समुदायसमुदायिनोः समुदायेनेतरस्य ग्रहणं सम्भवः तदप्यनुमानमेव । अस्मिन्सतीदं नोपपद्यतइति विरोधित्वे प्रसिद्धे कार्यानुत्पत्त्या कारणस्य प्रतिबन्धकमनुमीयते । सोऽयं यथार्थएव प्रमाणोद्देश इति । सत्यमेतानि प्रमाणानि न तु प्रमाणान्तराणीत्युक्तम् अर्थापत्तेः प्रमाणभावाभ्यनुज्ञा नोपपद्यते तथा हीयम् ।

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥ ३ ॥

असत्सु मेघेषु वृष्टिर्न भवतीति सत्सु भवतीत्येतदर्थादापद्यते सत्स्वपि चैकदा न भवति सेयमर्थापत्तिरप्रमाणमिति§ । नानैकान्तिकत्वमर्थापत्तेः ।

अनर्थापत्तावर्थापत्त्यभिमानात् ॥ ४ ॥

असति कारणे कार्यं नोत्पद्यतइति वाक्यात्प्रत्यनीकभूतोऽर्थः सति कारणे कार्यमुत्पद्यते इत्यर्थादापद्यते । अभावस्य हि वाक्या‖त्प्रत्यनीक

बाध्येत । नीलपीतादिप्रत्यक्षरूपफलभेदेपीन्द्रियस्याभेदात्प्रयोजनभेदः प्रमाणभेदव्यभिचारी च । अथ तेषां प्रत्यक्षत्वेन प्रयोजनैकत्वं तर्हि ऐतिह्यादीनामपि प्रत्यक्षादावन्तर्भावो नानुपपन्नः ।

* अन्तर्भावप्रदर्शनार्थं सूत्रम् । न्या· वा· ।

† अर्थापत्तिसम्भवाभावः वाक्यार्थ इति २ ।

‡ द्वयोरेकतरप्रतिषेधस्य द्वितीयाभ्यनुज्ञाविषयत्वाद् यथा दिवा न भुङ्क्ते इत्यभिधानाद्रात्रौ भुङ्क्ते इति गम्यते । दिवा न भुङ्क्तएवेति तु न । अस्यासंभवेनैव निरस्तत्वात् । न हि भुञ्जानोऽपि भुङ्क्तएव क्रियान्तरपरिहारस्यासंभवात् । तस्माद्दिवैव न भुङ्क्तइति वक्तव्यम् । तथा च रात्रौ भुङ्क्तइति गंस्यते । सामान्यतो दृष्टं चानुमानमेषु बोध्यम् ।

§ अर्थापत्तिमात्रस्य पक्षीकरणे ऽनैकान्तिकत्वमव्यापकम् । अनैकान्तिकयाः पक्षीकरणे सिद्धसाधनम् । हेत्वभावश्च । त्वदुक्तहेतोः पक्षविशेषणात्वात् । अनैकान्तिक्या अप्रामाण्येतत्तरस्याः प्रामाण्याभ्युपगमलाभेन प्रतिज्ञाव्याघातश्च ।

‖ भावः प्रत्यनीक इति ४ । ३ पु· पा· ।

इति । सेयं कार्योत्पादः सति कारणे ऽर्थादापद्यमानो न कारणस्य सत्तां व्यभिचरति । न खल्वसति कारणे कार्यमुत्पद्यते तस्मान्नानैकान्तिकी* । यत्तु सति कारणे निमित्तप्रतिबन्धात्कार्यं नोत्पद्यते इति कारणधर्मो ऽसौ न त्वर्थापत्तेः प्रमेयम् । किं तर्ह्यस्याः प्रमेयं सति कारणे कार्यमुत्पद्यत इति यो ऽसौ कार्योत्पादः कारणसत्तां न व्यभिचरति तदस्याः प्रमेयम् । एवं तु सत्यनर्थापत्तावर्थापत्त्यभिमानं कृत्वा प्रतिषेध उच्यते इति । दृष्टश्च कारणधर्मो न शक्यः प्रत्याख्यातुमिति ।

प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् ॥ ५ ॥

अर्थापत्तिर्न प्रमाणम् अनैकान्तिकत्वादिति वाक्यं प्रतिषेधः । तेनानेनार्थापत्तेः प्रमाणत्वं प्रतिषिध्यते न सद्भावः‡ एवमनैकान्तिको भवति । अनैकान्तिकत्वादप्रमाणेनानेन न कश्चिदर्थः प्रतिषिध्यते इति । अथ मन्यसे नियतविषयेष्वर्थेषु स्वविषये व्यभिचारो भवति न च प्रतिषेधस्य सद्भावो विषयः§ एवं तर्हि ।

॥तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ ६ ॥

अर्थापत्तेरपि कार्योत्पादेन कारणसत्तायाः अव्यभिचारो विषयः । न च कारणधर्मो निमित्तप्रतिबन्धात् कार्यानुत्पादकत्वमिति ।

अभावस्य तर्हि प्रमाणभावाभ्यनुज्ञा नोपपद्यते कथमिति ।

---

* नानैकान्तिको ऽर्थमिति २ । नानैकान्तिकोयं किन्त्विति ४ पु॰ पा॰ ।

† न ह्यत्र सत्सु मेघेषु वृष्टिर्भवत्येवेति प्रमेयं किं तु सत्स्वेव भवतीति । तच्चाबाधितं कार्यस्य कारणाव्यभिचारात् ।

‡ कथं न सत्ताप्रतिषेधः । यस्मादर्थापत्तिविशेषः प्रतिषिध्यते न त्वर्थापत्तिमात्रं तेन सत्ताप्रतिषेधादनैकान्तिको भवति । न्या॰ वा॰ ।

§ अथ मन्यसे न प्रतिषेधस्य सत्त्वं विषयः किं तु प्रमाणत्वं सो ऽयं प्रतिषेधः स्वविषये वर्तमानो नानैकान्तिको भवितुमर्हति अनैकान्तिको हि नाम स ज्ञेयो यः स्वविषयतज्जातीयान्यवृत्तिः । न चानैकान्तिकं प्रमाणमस्ति तस्माच्चानैकान्तिकः प्रतिषेधः । न्या॰ वा॰ ।

॥ यदि स्वविषयतज्जातीयान्यवृत्तिरनैकान्तिक इति मन्यसे अर्थापत्तिरपि तर्ह्यनैकान्तिकी न भवति । न ह्यसति कारणे कार्यमुत्पद्यमानं दृष्टमिति । तदिदं सूत्रं व्याघातदेशनार्थम् । न्या॰ वा॰ ।

***नाभावप्रामाण्यं प्रमेयासिद्धेः ॥ ७ ॥**

अभावस्य भूयसि प्रमेये लोकसिद्धे वेयात्युदुच्यते नाभावप्रामाण्यं प्रमेयासिद्धेरिति । अथायमर्थबहुत्वाद्धर्मैकदेश उदाह्रियते ।

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः† ॥ ८ ॥

तस्याभावस्य सिध्यति प्रमेयम् । कथं लक्षितेषु वासःसु अनुपादेयेषु उपादेयानामलक्षितानामलक्षणलक्षितत्वाद् लक्षणाभावेन लक्षितत्वादिति । उभयसंनिधावलक्षितानि वासांस्यानयेति प्रयुक्तो येषु वाससु लक्षणानि न भवन्ति तानि लक्षणाभावेन प्रतिपद्यते‡ प्रतिपद्य चानयति प्रतिपत्तिहेतुश्च प्रमाणमिति ।

असत्यर्थे नाभाव इति चेद् नान्यलक्षणोपपत्तेः ॥ ९ ॥

यच्च भूत्वा किं चिन्न भवति तच्च तस्याभाव उपपद्यते अलक्षितेषु च वाससु लक्षणानि भूत्वा न भवन्ति । तस्मात्तेषु लक्षणाभावो ऽनुपपन्न इति । नान्यलक्षणोपपत्तेः यथा ऽयमन्येषु वाससु लक्षणानामुपपत्तिं पश्यति नेवमलक्षितेषु सोयं लक्षणाभावं पश्यन्नभावेनार्थं प्रतिपद्यते§ इति ।

तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥

तेषु वाससु लक्षितेषु सिद्धिर्विद्यमानता येषां भवति न तेषामभावो लक्षणानाम् । यानि च लक्षितेषु विद्यन्ते लक्षणानि तेषामलक्षितेष्वभाव इत्यहेतुः । यानि खलु भवन्ति तेषामभावो व्याहत इति ।

न लक्षणावस्थितापेक्षासिद्धेः ॥ ११ ॥

न ब्रूमो यानि लक्षणानि भवन्ति तेषामभाव इति किं तु केषु चिल्लक्षणान्यवस्थितानि अनवस्थितानि केषु चिदपेक्षमाणो येषु लक्षणानां भावं न पश्यति तानि लक्षणाभावेन प्रतिपद्यत इति ।

---

* नाभावः प्रमाणं विषयाभावात् । यदविषयं तदप्रमाणं यथा गोशब्दो ऽश्वप्रतिपादने तथा चाभावस्तस्मादप्रमाणमिति । कश्चैवमाहाभावः प्रमाणमपि त्वभावविषया प्रतिपत्तिः प्रमाणं तया प्रमीयत इति । न्या· वा· ।

† सिद्धिरिति ३ । ४ पु· पा· । ‡ प्रेषसंप्रतिपत्त्योरेकविषयत्वात् । न्या· वा· ।

§ अयथार्थो ऽयमुपालम्भ इत्यत उक्तार्थं नान्यलक्षणोपपत्तेरिति सूत्रम् । न्या· वा· ।

प्रागुत्पत्तेरभावोपपत्तेश्च ॥ १२ ॥

अभावद्वैतं खलु भवति प्राक् चोत्पत्तेरविद्यमानता उत्पन्नस्य चात्मनो हानादविद्यमानता । तच्चालक्षितेषु यावस्तु प्रागुत्पत्तेरविद्यमानतालक्षणो लक्षणानामभावो नेतर इति* ।

आप्तोपदेशः शब्द इति प्रमाणभावे विशेषणं ब्रुवता नानाप्रकारः शब्द इति ज्ञाप्यते तस्मिन् सामान्येन विचारः किं नित्यो ऽथानित्य इति । विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः† । आकाशगुणः शब्दो विभु‡र्नित्यो ऽभिव्यक्तिधर्मक इत्येके§ । गन्धादिसहवृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिवदवस्थितो ऽभिव्यक्तिधर्मक इत्यपरे‖ । आकाशगुणः शब्द उत्पत्तिनिरोधधर्मको बुद्धिवदित्यपरे¶ । महाभूतसंघाभजः शब्दो ऽनाश्रितः उत्पत्तिधर्मको निरोधधर्मक इत्यन्ये** । अतः संशयः किमत्र तत्त्वमिति । अनित्यः†† शब्द इत्युत्तरम् । कथम् ।

आदिमत्त्वादैन्द्रियकत्वात्कृतकवदुपचाराच्च ॥ १३ ॥

आदिर्योनिः कारणम् आदीयते अस्मादिति । कारणवदनित्यं‡‡ दृष्टम् । संयोगविभागजश्च शब्दः कारणवत्त्वादनित्य इति । का पुनरियमर्थदेशना कारणवत्त्वादिति उत्पत्तिधर्मकत्वादनित्यः शब्द इति भूत्वा न भवति विनाशधर्मक इति सांशयिकमेतत् किमुत्पत्तिकारणं संयोगविभागो शब्दस्य आहो स्विदभिव्यक्तिकारणमित्यत आह । ऐन्द्रियकत्वाद् इन्द्रियप्रत्यासत्ति-

---

* असत्यर्थे नाभावस्तत्सिद्धेरलक्षितेष्वहेतुरित्येते उभे छलसूत्रे छलस्योक्तमुत्तरं ज्ञात्वा ऽज्ञात्वा ऽसंबद्धत्वमज्ञानं चेति तस्मादप्रयोज्ये छलमिति । न्या॰ वा॰ ।

† मुद्रितपुस्तके ऽस्य सूत्रत्वेन लेखः प्रामादिकः ।

‡ विभुरचित्य इति क्व चित् । मन्येतासत्यामिति ३ । ४ पु॰ पा॰ ।

§ मीमांसकाः । ‖ सांख्याः ¶ वैशेषिकाः ** बौद्धाः ।

†† नित्यः शब्दः अविनश्यदाधारैकद्रव्यवृत्तित्वात् आकाशगतमहत्त्ववदिति प्रयोगः । सो ऽयं नित्यः सन्नभिव्यक्तिधर्मा तस्याभिव्यञ्जकाः संयोगविभागनादा इति ।

‡‡ उभयान्तपरिच्छिन्नवस्तुसत्ता ऽनित्यता । उभयान्तापरिच्छिन्ना वस्तुसत्ता च नित्यता । प्रागभावप्रध्वंसाभावसंबन्धित्वमनित्यत्वमिति तु न । भावाभावयोः संबन्धस्य दुर्निरूपत्वात् । उत्पत्तेरनन्तरं विनाशाच्च प्राक् प्रागभावप्रध्वंसयोरभावेन तदानींतनवस्तुनो ऽनित्यत्वव्यवहारानुपपत्तेश्च । अत एव विनाशहेतुमत्त्वमनित्यत्वमित्यपि निरस्तम् । यत्तूपलब्धिलक्षणप्राप्तस्यात्यन्तमनुपलभ्यता ऽनित्यत्वमिति तच्च । अनुपजातविशेषस्य वस्तुनास्तित्वेनाभावानुपपत्तेः ।

‡‡ निमित्तकारणभेदानुविधानं कारणवत्त्वम् । तदभिव्यङ्ग्येषु नास्ति । न हि किं चिदभिव्यज्यमानं निमित्तकारणभेदानुविधायि दृष्टमिति । न्या॰ वा॰ ।

ग्राह्य ऐन्द्रियकः किमयं व्यञ्जकेन समानदेशो ऽभिव्यज्यते रूपादिवद् अथ संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नो* गृह्यतइति ।

संयोगनिवृत्तौ शब्दग्रहणान्न व्यञ्जकेन समानदेशस्य ग्रहणम् । दारुवृश्चने दारुपरशुसंयोगनिवृत्तौ दूरस्थेन शब्दो गृह्यते । न च व्यञ्जकाभावे व्यङ्ग्यग्रहणं भवति तस्मान्न व्यञ्जकः संयोगः । उत्पादके तु संयोगे संयोगजाच्छब्दाच्छब्दसन्ताने सति श्रोत्रप्रत्यासन्नस्य ग्रहणम् इति युक्तं संयोगनिवृत्तौ शब्दस्य ग्रहणमिति । इतश्च शब्द उत्पद्यते नाभिव्यज्यते कृतकवदुपचारात् । तीव्रं मन्दमिति कृतकमुपचर्यते तीव्रं सुखं मन्दं सुखं तीव्रं दुःखं मन्दं दुःखमिति । उपचर्यते च तीव्रः शब्दो मन्दः शब्द† इति ।

व्यञ्जकस्य तथाभावाद् ग्रहणस्य तीव्रमन्दता रूपवदिति चेद् न अभिभवोपपत्तेः । संयोगस्य व्यञ्जकस्य तीव्रमन्दतया शब्दग्रहणस्य तीव्रमन्दता भवति न तु शब्दो भिद्यते यथा प्रकाशस्य तीव्रमन्दतया रूपग्रहणस्येति तच्च नैवम् अभिभवोपपत्तेः । तीव्रो भेरीशब्दो मन्दं तन्त्रीशब्दमभिभवति न मन्दः । न च शब्दग्रहणमभिभावकं शब्दश्च न

---

* ततः किम् । यद्यीन्द्रियप्रत्यासत्तियाह्य ऐन्द्रियकस्ततो न व्यज्यते। न हि व्यज्यमानस्येन्द्रियप्रत्यासत्तिर्युक्ता । कथमिति । न तावच्छ्रोत्रं शब्ददेशमुपगच्छति अमूर्तत्वात् । अमूर्तं हि निष्क्रियं रूपादिवत् क्रियाकारणगुणसमवायात् क्रियावत्त्वमिति तु न आत्मनि व्यभिचारात् । महत्परिमाणेन क्रियाप्रतिबन्धाच्च । तस्मात्क्रियाकारणगुणसमवाये सति मूर्तत्वं क्रियाहेतुस्तस्याकाशे ऽभावान्न क्रियावत्त्वम् । न चाप्राप्तस्य शब्दस्य ग्रहणं युक्तं सर्वदेशस्यशब्दोपलब्धिप्रसङ्गात् । परिशेषात्तु संतानसिद्धिः । तत्राद्यः शब्दः संयोगविभागहेतुकस्तस्माच्छब्दान्तराणि कदम्बगोलकन्यायेन सर्वदिक्कानि तेभ्यः प्रत्येकमेकैकः शब्दो मन्दतरतमादिभावेनाश्रयाप्रतिबन्धमनुविधीयमानः प्रादुरस्ति । ततो ऽन्त्यस्यातिमान्द्याच्छब्दान्तरोत्पत्तिशक्तिप्रतिबन्धो भवतीत्यतः शब्दसन्तानोच्छेदः । तत्र यः कर्णशष्कुलीमन्तमाकाशं प्राप्नोति स उपलभ्यते नेतर इति । तस्मादैन्द्रियकं तच्चान्यथा न युक्तमित्यतो ऽनित्य इति । न्या. वा. ।

† अस्य प्रयोगः । अनित्यः शब्दस्तीव्रमन्दशब्दविषयत्वात् सुखवदिति । कृतकवदुपचारादित्यनेन सर्वानित्यत्वसाधनधर्मसंग्रहः । कृतकवद्ग्रहणार्थत्वात् । यथा सामान्यविशेषवतो ऽस्मदादिबाह्यकरणप्रत्यक्षत्वात् । उपलभ्यस्यानुपलब्धिकारणाभावे सत्यनुपलब्धेर्गुणस्य सतो ऽस्मदादिप्रत्यक्षत्वादित्येवमादि । न्या. वा. ।

भिद्यते शब्दे तु भिद्यमाने युक्तो ऽभिभवः तस्मादुत्पद्यते शब्दो नाभिव्यज्यत*इति ।

अभिभवानुपपत्तिश्च व्यञ्जकसमानदेशस्याभिव्यक्तौ प्राप्त्यभावात् । व्यञ्जकेन समानदेशो ऽभिव्यज्यते शब्द इत्येतस्मिन्पक्षे नोपपद्यते ऽभिभवः । न हि भेरीशब्देन तन्त्रीस्वनः प्राप्त इति ।

अप्राप्ते ऽभिभव इति चेच् शब्दमात्राभिभवप्रसङ्गः । अथ मन्येतासत्यां प्राप्तावभिभवो भवतीति । एवं सति यथा भेरीशब्दः कंचित्तन्त्रीस्वनमभिभवति एवमन्तिकस्थोपादानमिव† दवीयःस्थोपादानानपि तन्त्रीस्वनानभिभवेद्‡ अप्राप्तेरविशेषात् । तच्च क्व चिदेव भेर्य्यां प्रणादितायां सर्वलोकेषु समानकालास्तन्त्रीस्वना न श्रूयेरन्§ इति । नानाभूतेषु शब्दसन्तानेषु सत्सु श्रोत्रप्रत्यासत्तिभावेन कस्य चिच्छब्दस्य तीव्रेण मन्दस्याभिभवो युक्त‖ इति । कः पुनरयमभिभवो नाम । ग्राह्यसमानजातीयग्रहणकृतमग्रहणम् अभिभवः । यथोल्काप्रकाशस्य ग्रहणार्हस्यादित्यप्रकाशेनेति ।

न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च¶ ॥ १४ ॥

---

* न च शब्दस्यैकत्वेपि निमित्तभेदाद्ग्रहणभेदो ग्रहणभेदाच्चाभिभव इति युक्तम् । ग्रहणभेदस्यैकत्रादृष्टत्वाद् अन्यथा नित्यं ग्रहणभेदापत्तेः । ततश्च भिन्नो ऽभिन्न इति भिन्नाभिन्नप्रत्ययौ न स्याताम् । अभिभवानुपपत्तिश्च ग्रहणयोर्युगपद्संभवात् । न चैकग्रहणमात्मन एवाभिभावकं न चायमभिभवो नास्ति तस्माद्भिद्यते शब्दः । न्या॰ वा॰ । † एवमन्तिकस्योपादानानिव दवीयस्योपादानानपि २ पु॰ ।

‡ स्वनं नाभिभवेदिति २ । ३ पु॰ पा॰ ।

§ शब्दानां विभुत्वेन नैष दोष इति चेन्न । तथा सत्येकव्यञ्जकसंनिपाते सर्वशब्दोपलब्धिप्रसङ्गः । तीव्रेण मन्दस्याभिभवाभ्युपगमे समानदेशत्वात् सर्वशब्दानां शङ्खशब्देन वीणाशब्दाभिभवाद्वीणाशब्दस्याश्रवणप्रसङ्गस्तस्माच्छब्दा एव भिद्यन्ते ।

‖ न च शब्दसन्तानाभ्युपगमे तेषु पूर्वेण शब्द उत्तरेण शब्द इति दिग्देशप्रत्ययानुपपत्तिः कर्णशष्कुलीप्रत्यासन्नस्यैव ग्रहणादिति वाच्यम् । तस्योपादाननिमित्तकत्वात् । उत्पत्तिदेशस्यशब्दग्रहणपक्षे युगपदनेकशब्दोपलब्धिप्रसङ्गात् । मम तु यानि निमित्तानि शब्दकारणस्य संयोगस्यानुग्रहकारीणि दिग्देशवन्ति तेषां निमित्तानां भेदाद्दिग्देशभेदप्रत्यय इति । अत एव तस्य ग्रहणएव पूर्वादिप्रत्ययो नान्यथेति सिध्यति । एके तु ब्रुवते नैव शब्देषु पूर्वादिप्रत्ययाः सन्ति । चक्षुर्वर्षयेष्वेव तदभ्युपगमात् । अत एव न जात्यन्धानां दिक्प्रत्ययाः । अपरे तु शब्देषु दिग्देशप्रत्ययादेव चक्षुःश्रोत्रे अप्राप्यकारिणी इत्याहुस्तत्तु प्रत्यक्षलक्षणसूत्रव्याख्यानावसरे दूषितम् ।

¶ सूत्रस्य पूर्वहेतूनामनैकान्तिकत्वज्ञापनमर्थः । न्या॰ वा॰ ।

न खलु आदिमत्त्वादनित्यः शब्दः । कस्माद् व्यभिचारात् । आदिमतः खलु घटाभावस्य दृष्टं नित्यत्वम् । कथमादिमान् कारणविभागेभ्यो हि घटो न भवति । कथमस्य नित्यत्वं* यो ऽसौ कारणविभागेभ्यो न भवति न तस्याभावो भावेन कदा चिन्निवर्त्यतइति । यदप्यैन्द्रियकत्वात् तदपि व्यभिचरति ऐन्द्रियकं च सामान्यं नित्यं चेति । यदपि कृतकवदुपचारादिति । एतदपि व्यभिचरति । नित्येष्वनित्यवदुपचारो दृष्टो यथा हि भवति वृत्तस्य प्रदेशः कम्बलस्य† प्रदेशः एवमाकाशस्य प्रदेशः आत्मनः प्रदेश इति भवतीति ।

‡तत्त्वभाक्तयोर्नानात्वविभागादव्यभिचारः ॥ १५ ॥

नित्यमित्यच किं तावत्तत्त्वम् §आत्मान्तरस्यानुत्पत्तिधर्मकस्यात्महानानुपपत्ति‖र्नित्यत्वं तच्चाभावे नोपपद्यते । भाक्तं तु भवति यत्तच्चात्मानमहासीद्भूत्वा न भवति न जातु तत्पुनर्भवति तच्चानित्य इव नित्यो¶ घटाभाव इत्ययं पदार्थ** इति तच्च यथाजातीयकः शब्दो न तथाजातीयकं कार्यं किं चिन्नित्यं दृश्यतइत्यव्यभिचारः । यदपि सामान्यनित्यत्वादिति इन्द्रियप्रत्यासत्तिग्राह्यमैन्द्रियकमिति ।

सन्तानानुमानविशेषणात् ॥ १६ ॥

नित्ये व्यभिचार इति प्रकृतम् । नेन्द्रियग्रहणसामर्थ्याच्छब्दस्यानित्यत्वं किं तर्हि इन्द्रियप्रत्यासत्तिग्राह्यत्वात् सन्तानानुमानं तेनानित्यत्व††मिति । यदपि नित्येष्वप्यनित्यत्ववदुपचाराद् इति । न ।

कारणद्रव्यस्य प्रदेशशब्देनाभिधानात्
नित्येष्वप्यव्यभिचार इति ॥ १७ ॥

---

* कथमस्यानित्यत्वमिति २ पु. पा. । † कम्बलस्य प्रदेश इति २ पुस्तके नास्ति ।

‡ तत्त्वभाक्तेति सन्तानानुमानेति कारणद्रव्येति च त्रयाणां सूत्रत्वं कस्मात्पुनः सूत्रकारस्यास्मिन्नर्थे इति वक्ष्यमाणभाष्यव्याख्यायां कतमस्मिन्नर्थे इति वार्तिकप्रतीकमुपादाय तात्पर्यटीकायां स्पष्टम् ।

§ अर्थान्तरस्येति इति २ । ४ । पु. ।

‖ अनुत्पत्तिरिति २ पु. । ¶ तत्र नित्य इव नित्य इति २ । ४ पु. पा. ।

** उभयान्तापरिच्छिन्नवस्तुसत्तासम्बन्धो हि नित्यत्वं तच्च न प्रागभावप्रध्वंसयोरतस्तयोरुत्पत्तिनाशाभावसामान्यमूलकं भाक्तं नित्यत्वम् ।

†† न वयमैन्द्रियकत्वेनानित्यत्वं प्रतिपादयामः । अपि तु शब्दस्याभिव्यक्तिं प्रतिषेधामः । न हि व्यज्यमानस्यैन्द्रियकत्वं युक्तमिति पुरस्तादुक्तम् । न्या. वा. ।

एवमाकाशप्रदेशः आत्मप्रदेश इति नाचाकाशात्मनोः कारणद्रव्यमभिधीयते यथा कृतकस्य। कथं ह्यविद्यमानमभिधीयते। अविद्यमानता च प्रमाणतोऽनुपलब्धेः। किं तर्हि तत्राभिधीयते संयोगस्याव्याप्यवृत्तित्वं परिच्छिन्नेन द्रव्येणाकाशस्य संयोगो नाकाशं व्याप्नोति अव्याप्य वर्त्ततइति तदस्य कृतकेन द्रव्येण सामान्यं न ह्यामलकयोः संयोग आश्रयं व्याप्नोति सामान्यकृता च भक्तिराकाशस्य प्रदेश इति* अनेनात्मप्रदेशो व्याख्यातः। संयोगवच्च शब्दबुद्ध्यादीनाम् अव्याप्यवृत्तित्वमिति। परीक्षिता च तीव्रमन्दता शब्दतत्त्वं न भक्तिकृतेति। कस्मात्पुनः सूचकारस्यास्मिन्नर्थे† सूत्रं न श्रूयते इति शीलमिदं भगवतः सूचकारस्य बहुष्वधिकरणेषु द्वौ पक्षौ न व्यवस्थापयति तच्च शास्त्रसिद्धान्तात्तत्त्वावधारणं प्रतिपत्तुमर्हतीति मन्यते। शास्त्रसिद्धान्तस्तु न्यायसमाख्यातमनुमतं बहुशाखमनुमानमिति। अथापि खल्विदमस्ति इदं नास्तीति कुत एतत्प्रतिपत्तव्यमिति‡ प्रमाणत उपलब्धेरनुपलब्धेश्चेति। अविद्यमानस्तर्हि शब्दः।

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च§ ॥ १८ ॥

प्रागुच्चारणान्नास्ति शब्दः। कस्मादनुपलब्धेः सतोऽनुपलब्धिरावरणादिभ्य एतन्नोपपद्यते। कस्माद् आवरणादीनामनुपलब्धिकारणानामग्रह-

---

* आकाशात्मनोर्विभुत्वेन नित्यत्वेन च तदाधारस्य तत्कारणस्य चासंभवादेतदन्यतरस्यैव प्रदेशपदार्थत्वात्तयोर्वस्तुतः प्रदेशासंभव इति संयोगाव्याप्यवृत्तित्वसामान्यमूलकस्तत्प्रदेशव्यपदेशः। ननु किमित्याकाशप्रदेशा भाक्ता इष्यन्ते न पुनस्तत्त्वत एव। मैवम्। वस्तुत इष्यमाणानां तेषामाकाशत्वे आकाशनानात्वप्रसङ्गः। अतदात्मकत्वे तत्स्वरूपं किम्। आधारत्वकारणत्वयोर्दूषितत्वादन्यस्य चाप्रसिद्धत्वात्। संयोगत्वं प्रदेशावच्छेदत्वव्याप्यमिति तु न परमाणुद्वयसंयोगे व्यभिचारात्। आकाशस्य निष्प्रदेशत्वे तद्गतशब्दस्य सर्वैरुपलब्धिप्रसङ्गस्तु शब्दस्याव्याप्यवृत्तित्वाच्चिरसनीयः।

† कतमस्मिन्नर्थे। निष्प्रदेशमाकाशं निष्प्रदेश आत्मेत्यर्थे। शब्दसन्तानप्रतिपादने वा न सूत्रम्। न्या॰ वा॰।

‡ अनुपलभ्यमानास्तित्वं ये शब्दं नित्यं कल्पयन्ति तइदं पर्यनुयोज्याः इदमस्ति इदं नास्तीत्येतद्ब्रुवन्तः कथं प्रतिपद्यन्ते। एवमनुयुक्ताः सन्तः प्रतिब्रुवते। न्या॰ वा॰।

§ यच्चोभयपक्षसंप्रतिपन्नं घटाद्यनित्यत्वेन तेन चानुयोज्याः। यदिदमनित्यं घटादि भवद्भिः प्रतिपद्यते तत्कथमनित्यमिति। एवमनुयुक्ता यदि घटाद्यनित्यत्वे न्यायं प्रतिपद्यन्ते स शब्देऽपीति सूत्रम्। न्या॰ वा॰।

णात् । अनेनावृतः शब्दो नोपलभ्यते असन्निकृष्टश्चेन्द्रियव्यवधानादित्येवमादि अनुपलब्धिकारणं न गृह्यतइति सोयमनुच्चारितो नास्तीति । उच्चारणमस्य व्यञ्जकं तदभावात्प्रागुच्चारणादनुपलब्धिरिति । किमिदमुच्चारणं नामेति । विवक्षाजनितेन प्रयत्नेन कोष्ठ्यस्य वायोः प्रेरितस्य कण्ठताल्वादिप्रतिघातः यथास्थानं प्रतिघाताद्वर्णाभिव्यक्तिरिति । संयोगविशेषो वै प्रतिघातः प्रतिषिद्धं च संयोगस्य व्यञ्जकत्वं तस्मान्न व्यञ्जकाभावादग्रहणम् । अपि त्वभावादेवेति। सोयमुच्चार्यमाणः श्रूयते श्रूयमाणश्च भूत्वा* भवतीति अनुमीयते । उर्द्धं चोच्चारणं† श्रूयते स भूत्वा न भवति अभावान्न श्रूयतइति कथम् । आवरणाद्यनुपलब्धेरित्युक्तं तस्मादुत्पत्तितिरोभावधर्मकः शब्द इति । एवं च सति तत्त्वं पांशुभिरिवाकिरन्निदमाह‡ ।

§तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥ १९ ॥

यद्यनुपलम्भादावरणं नास्ति आवरणानुपलब्धिरपि तर्ह्यनुपलम्भान्नास्तीति तस्या अभावादप्रतिषिद्धमावरणमिति। कथं पुनर्जानीते भवा‖न्नावरणानुपलब्धिरुपलभ्यतइति । किमत्र ज्ञेयं प्रत्यात्मवेदनीयत्वात् समानम् । अयं खल्वावरणम् अनुपलभमानः प्रत्यात्ममेव संवेदयते नावरणमुपलभइति यथा कुड्येनावृतस्यावरणमुपलभमानः प्रत्यात्ममेव संवेदयते सेयमावरणोपलब्धिवदावरणानुपलब्धिरपि संवेद्यैवेति । एवं च सत्यपह्नुतविषयमुत्तरवाक्यमस्तीति अभ्यनुज्ञावादेन तूच्यते जातिवादिना ।

अनुपलम्भादप्यनुपलब्धिसद्भावान्नावरणानुपपत्तिरनुपलम्भात्¶ ॥ २० ॥

यथा ऽनुपलभ्यमाना**प्यावरणानुपलब्धिरस्ति एवमनुपलभ्यमानमप्यावरणमस्तीति यद्यभ्यनुजानाति भवान् नानुपलभ्यमानावरणानुपलब्धि-

---

* श्रूयमाणश्चाभूत्वेति २ । ४ पु. पा. । † ऊर्ध्वं चोच्चारणाच्च श्रूयतइति २ । ४ पु. । ऊर्ध्वं चोच्चारणादिति १ ।

‡ तत्त्वे उक्ते जात्या प्रत्यवतिष्ठते । सा च जातिः । न्या. वा. ।

§ अत्र जातिवादिनः सूत्रद्वयं तदनुपलब्धेरित्यनुपलम्भादिति चेति तात्पर्यटीकायाम् ।

‖ जानीते ऽभावादिति ३ पुस्तके ।

¶ अस्य सूत्रस्यानुपलब्धेरनैकान्तिकत्वमर्थः । न्या. वा. ।

** अनुपलभ्यमानादिति १ ।

रस्तीति अभ्यनुज्ञाय च वदति नास्त्यावरणमनुपलम्भादित्येतद् एतस्मिन्नप्यभ्यनुज्ञावादे प्रतिपत्तिनियमो नोपपद्यतइति ।

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः* ॥ २१ ॥

यदुपलभ्यते तदस्ति यन्नोपलभ्यते तन्नास्ति इति अनुपलम्भात्मकमसदिति व्यवस्थितम् । उपलब्ध्यभावश्चानुपलब्धिरिति । सेयमभावत्वान्नोपलभ्यते सच्च खल्वावरणं तस्योपलब्ध्या भवितव्यं न चोपलभ्यते तस्मान्नास्तीति । तच्च† यदुक्तं नावरणानुपपत्तिरनुपलम्भादित्ययुक्तमिति । अथ शब्दस्य नित्यत्वं प्रतिजानानः कस्माद्धेतोः प्रतिजानीते‡ ।

अस्पर्शत्वात् ॥ २२ ॥

अस्पर्शमाकाशं नित्यं दृष्टमिति तथा च शब्द इति । सेयमुभयतः सव्यभिचारः स्पर्शवांश्चाणुर्नित्यः । अस्पर्शं च कर्मानित्यं दृष्टम् । अस्पर्शत्वादित्येतस्य साध्यसाधर्म्येणोदाहरणम् ।

न कर्मानित्यत्वात्§ ॥ २३ ॥

साध्यवैधर्म्येणोदाहरणम् ।

नाणुर्नित्यत्वात्‖ ॥ २४ ॥

---

* अतथाजातीयेन प्रत्यवस्थानादनुत्तरमिति सूत्रार्थः । यथाजातीयकः शब्दो नित्यस्तथाजातीयकं किं चिन्नित्यं न दृष्टमिति । उक्तं चात्रोभयान्तापरिच्छिन्नवस्तुसत्तासंबन्धो नित्यतेति । तस्मादयथार्थप्रत्यवस्थानान्न किं चिदेतत् । अनित्यः शब्दो गुणत्वे सत्यस्मदादीन्द्रियविषयत्वात् । अव्यापकस्य व्यापकद्रव्यसमवायित्वे सति प्रत्यक्षत्वात् सुखवत् । आकाशनिष्प्रदेशत्वे हेतुः निष्प्रदेशमाकाशं व्यापकत्वाद् द्रव्यस्य सतः सर्वदा ऽमूर्तत्वादात्मवत् । व्यापकत्वादेवाक्षतकत्वम् । व्यापकत्वं च द्रव्यस्य सतः सर्वदा ऽमूर्तत्वात् । एतेन दिक्कालौ व्याख्यातौ एतावत्स्वसाधनमनित्यः शब्द इति । न्या॰ वा॰ । † तत्रेति २ । ४ ।

‡ विप्रतिपत्तेः प्रमाणमूलत्वाद्धेतोः परिप्रश्नः । न्या॰ वा॰ ।

§ तस्या व्यभिचारप्रदर्शनार्थं सूत्रम् । न्या॰ वा॰ ।

‖ अस्पर्शेन कर्मणैवोभयतो व्यभिचारे लब्धे नित्येनाणुना व्यभिचारोद्भावनं कृतकत्वानित्यत्यवत्समव्याप्तिकत्वनिराकरणार्थं द्रष्टव्यम् । ता॰ टी॰ ।

उभयस्मिन्नुदाहरणे व्यभिचारान्न हेतुः । अयं तर्हि हेतुः ।

संप्रदानात्* ॥ २५ ॥

संप्रदीयमानमवस्थितं दृष्टं संप्रदीयते च शब्द आचार्येणान्तेवासिने तस्मादवस्थित इति ।

†तदन्तरालानुपलब्धेरहेतुः ॥ २६ ॥

येन संप्रदीयते यस्मै च तयोरन्तराले ऽवस्थानमस्य केन लिङ्गेनोपलभ्यते । संप्रदीयमानो ह्यवस्थितः संप्रदातुरपैति संप्रदानं च प्राप्नोति इत्यवर्जनीयमेतत् ।

अध्यापनादप्रतिषेधः‡ ॥ २७ ॥

अध्यापनं लिङ्गमसति संप्रदाने ऽध्यापनं न स्यादिति । उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः समानमध्यापनमुभयोः पक्षयोः संशयानतिवृत्तेः§ किमाचार्यस्थः शब्दो ऽन्तेवासिनमापद्यते तदध्यापनम् आहो ‖स्विन्नृत्योपदेशवद्गृहीतस्यानुकरणमध्यापनमिति । एवमध्यापनमलिङ्गं ¶ संप्रदानस्येति । अयं तर्हि हेतुः ।

अभ्यासात् ॥ २८ ॥

अभ्यस्यमानमवस्थितं दृष्टम् । पञ्चकृत्वः पश्यतीति रूपमवस्थितं पुनः पुनर्दृश्यते । भवति च शब्दे ऽभ्यासः दशकृत्वो ऽधीतो ऽनुवाको विंशतिकृत्वो ऽधीत इति तस्मादवस्थितस्य पुनः पुनरुच्चारणमभ्यास इति ।

---

* न हि किं चिच्चित्यं संप्रदीयमानं दृष्टमित्यन्वयिना दृष्टान्तस्याभावाद्विरुद्धः । न्या॰ वा॰ ।

† अथायं प्रतिज्ञार्थो ऽवतिष्ठते शब्दः संप्रदानाद् घटवदिति एवमपि नित्यत्वं न सिध्यति । विरोधः सूत्रार्थः । न्या॰ वा॰ ।

‡ न विरोधो ऽनुमानादुपलब्धेः न हि प्रत्यक्षतो ऽनुपलब्धस्यानुमानेनोपलब्धिः सत्तां बाधते । किमनुमानम् । अध्यापनम् । किमिदमध्यापनं नाम दीयमानस्य संप्रदानप्राप्तिः दातृप्रतिग्रहीत्रोरन्तराले शब्दोस्ति अध्यापनाद् गवादिवदिति । न्या॰ वा॰ ।

§ संशयानिवृत्तेरिति २ । ५ पु॰ पा॰ । ‖ उत स्विदिति २ । ५ पु॰ ।

¶ सिद्धसाधनमेतत् । वयमपि ब्रूमः दात्रोच्चारितः शब्दः संतानवृत्त्या संप्रदानमेतीत्यवस्थाने न हेतुः । न्या॰ वा॰ ।

नान्यत्वे ऽप्यभ्यासस्योपचारात् ॥ २९ ॥

अनवस्थाने ऽप्यभ्यासस्याभिधानं* भवति द्विर्नृत्यतु भवान् चिर्नृत्यतु भवानिति द्विरनृत्यत् चिरनृत्यद् द्विरग्निहोत्रं जुहोति द्विर्भुङ्क्ते एवं व्यभिचारात्† प्रतिषिद्धहेतावन्यशब्दस्य प्रयोगः प्रतिषिध्यते ।

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः‡ ॥ ३० ॥

यदिदमन्यदिति मन्यसे तत् स्वार्थेनानन्यत्वाऽदन्यन्न भवति एवमन्यताया अभावः तच्च यदुक्तमन्यत्वे ऽप्यभ्यासोपचारादित्येतदयुक्तमिति शब्दप्रयोगं प्रतिषेधतः शब्दान्तरप्रयोगः प्रतिषिध्यते ।

तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः‖ ॥ ३१ ॥

¶अन्यस्मादन्यतामुपपादयति भवान् उपपाद्य चान्यत् प्रत्याचष्टे अनन्यदिति च शब्दमनुजानाति प्रयुङ्क्ते चानन्यदिति । एतत् समासपदमन्यशब्दो ऽयं प्रतिषेधेन सह समस्यते यदि चाचोत्तरं पदं नास्ति कस्यायं प्रतिषेधेन सह समासः । तस्मात्तयो**रनन्यान्यशब्दयोरितरो ††ऽनन्यशब्द इतरमन्यशब्दमपेक्षमाणः सिद्ध्यतीति तच्च यदुक्तमन्यताया अभाव इत्येतदयुक्तमिति‡‡ । अस्तु तर्हीदानीं शब्दस्य नित्यत्वम् ।

विनाशकारणानुपलब्धेः ॥ ३२ ॥

---

* अन्यस्य चाप्यभ्यासाभिधानमिति २ । ५ ।

† अनित्येष्वेवाभ्यास इत्यनेकान्तः । अभ्यासस्वरूपानवधारणादसिद्धश्च अभ्यासो ह्येकविषयो ऽनेकज्ञानोत्पाद एकाकारविषयो वा । तत्रायमभ्यास एकविषय एकाकारविषयो वेति संदिग्धासिद्धावभ्यासोपचारविषयत्वेन साधनं तस्यानैकान्तिकत्वज्ञापनार्थम् । न्या· वा· ।

‡ एतत्सूत्रमन्यत्वप्रतिषेधार्थम् । न्या· वा· । § स्वात्मनो ऽनन्यत्वादिति २ । ५ ।

‖ तस्य परिहारसूत्रम् । ता· टी· । ¶ अन्यस्येति २ । ५ ।

** अन्यानन्यशब्दयोरिति २ । ५ । †† नान्यशब्दमपेक्षमाण इति । १ पु· ।

‡‡ ननु स एवायं गोशब्द इति प्रत्यभिज्ञानाच्छब्दे ऽनन्यत्वसिद्धिरिति चेन्नैवम् । तदेवौषधमित्यादावन्यत्वे ऽपि तत्प्रत्ययविषयत्वदर्शनेन तस्यानन्यत्वव्यभिचारात् । अथाव्यभिचरिततत्प्रत्ययविषयत्वं प्रत्यभिज्ञानं तदेवेदमौषधमित्यादौ विशेषदर्शिनस्तदभावात्प्रकृते च तत्सत्त्वादिति तच्च । नैयायिकं प्रत्यसिद्धेः । शब्दे किं विशेषादर्शनमूलकस्तत्प्रत्यय उत तदभेदमूलक इति संदेहाच्च ।

यदनित्यं तस्य विनाशः कारणाद्भवति यथा लोष्टस्य कारणद्रव्यविभागाच् शब्दश्चेदनित्यस्तस्य विनाशो यस्मात्कारणाद्भवति तदुपलभ्येत न चोपलभ्यते तस्मान्नित्य इति ।

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ ३३ ॥

यथा विनाशकारणानुपलब्धेरविनाशप्रसङ्गः एवमश्रवणकारणानुपलब्धेः सततं श्रवणप्रसङ्गः व्यञ्जकाभावादश्रवणमिति चेत् प्रतिषिद्धं व्यञ्जकम् । अथाविद्यमानस्य* निर्निमित्तं श्रवणमिति विद्यमानस्य निर्निमित्तो विनाश इति समानश्च दृष्टविरोधो निमित्तमन्तरेण विनाशे चाश्रवणे चेति ।

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ॥ ३४ ॥

अनुमानाच्चोपलभ्यमाने शब्दस्य विनाशकारणे विनाशकारणानुपलब्धेरसत्त्वादित्यनपदेशः† । यस्मा‡द्विषाणी तस्मादश्व इति । किमनुमानमिति चेत् सन्तानोपपत्तिः । उपपादितः शब्दसन्तानः संयोगविभागजाच्छब्दाच्छब्दान्तरं ततोऽप्यन्यत्ततोऽप्यन्यदिति । तच्च कार्यः शब्दः कारणशब्दमभिरुणद्धि§ प्रतिघातिद्रव्यसंयोगस्त्वन्त्यस्य शब्दस्य निरोधकः । दृष्टं हि तिरःप्रतिकुड्यमन्तिकस्थेनाप्यश्रवणं शब्दस्य श्रवणं दूरस्थेनाप्यसति व्यवधाने इति । घण्टायामभिहन्यमानायां तारस्तारतरो मन्दो मन्दतर इति श्रुतिभेदान्नानाशब्दसन्तानो ऽविच्छेदेन श्रूयते**

---

* अथ विद्यमानस्येति २ । ५ ।

† कर्मत्ववदिति चेन्न । आश्रयानित्यत्वात् । अथ मनुषे नित्यस्याप्युपलभ्यमानस्यात्यन्तमयहणं दृष्टं यथा कर्मत्वस्येति तच्च न आश्रयानित्यत्वात् । आश्रयस्य नित्यत्वादश्रवणानुपपत्तिरिति ब्रूमः । कर्मत्वस्य पुनरयहणकारणमाश्रयानित्यत्वमस्ति तस्मादप्रसङ्ग इति । न्या· वा· ।

‡ यथेत्यधिकम् । २ । ५

§ ५ पुस्त के ऽपिर्नास्ति। ततोन्यत्र ततो ऽप्यन्यदिति २ पु· पा· ।

‖ विरुणद्धीति १ पु· । ¶ नानेति १ । नास्ति ।

** तत्रेदं चिन्त्यते । शब्दस्य व्यज्यमानस्य यत्तद् व्यक्तिकारणं तत्किं घण्टास्थमाहोस्विदन्यवृत्तीति । पक्षद्वये ऽपि किमवस्थितमुत संतानवृत्तीति विकल्पः । यदि घण्टास्थमवस्थितं च तर्हि श्रुतिभेदो न प्राप्नोति। कारणस्यैकत्वात् । घण्टास्थं सन्तानवृत्ति चेति चेद्युगपदनेकशब्दोपलब्धिप्रसङ्गः । घण्टास्थस्य कारणस्यान्यत्र वर्तमानशब्दव्यञ्जकत्वानुपपत्तिश्च । अन्यगतस्यावस्थितस्य सन्तानवृत्तेर्वा कारणस्य शब्दाभिव्यक्तिहेतुत्वे ऽभिहतघण्टायामेव तदभिव्यक्तिर्न घण्टान्तरेष्विति नियमानुपपत्तिः। शब्दाभेदाच्छ्रुतिभेदानुपपत्तिश्च । तारत्वादेर्नादधर्मत्वमेव न शब्दधर्मत्वमिति तु न । तारः शब्द इति प्रतीतेः । भ्रान्तत्वं तु नास्या अबाधितत्वात् । अनित्यशब्द-

तन्न* नित्ये शब्दे घण्टास्यमन्यगतं वा ऽवस्थितं सन्ताननिवृत्तिरभिव्यक्तिकारणं वाच्यं येन श्रुतिसन्तानो भवतीति शब्दभेद† (श्चासति श्रुतिभेद) उपपादयितव्य इति । अनित्ये तु शब्दे घण्टास्यं सन्तानवृत्ति संयोगसहकारि निमित्तान्तरं संस्कारभूतं पटुमन्द‡मिति वर्तते तस्यानुवृत्त्या शब्दसन्तानानुवृत्तिः पटुमन्दभावाच्च तीव्रमन्दता शब्दस्य तत्कृतश्च श्रुतिभेद इति । न वै निर्निमित्तान्तरं संस्कार उपलभ्यते अनुपलब्ध्येर्नास्तीति ।

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥ ३५ ॥

पाणिकर्मणा पाणिघण्टाप्रश्लेषो भवति तस्मिंश्च सति शब्दसन्तानो नोपलभ्यते अतः श्रवणानुपपत्तिः । तच्च प्रतिघातिद्रव्यसंयोगः शब्दस्य निमित्तान्तरं§ संस्कारभूतं निरुणद्धीत्यनुमीयते तस्य च निरोधाच्छब्दसन्तानो नोत्पद्यते । अनुत्पत्तौ‖ श्रुतिविच्छेदः¶ यथा प्रतिघातिद्रव्यसंयोगादिषोः क्रियाहेतौ संस्कारे निरुद्धे गमनाभाव इति कम्पसन्तानस्य स्पर्शनेन्द्रियग्राह्यस्य** चोपरमः कांस्यपात्रादिषु पाणिसंश्लेषो लिङ्गं संस्कारसन्तानस्येति । तस्मान्निमित्तान्तरस्य संस्कारभूतस्य नानुपलब्धिरिति ।

††विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥३५॥

यदि यस्य विनाशकारणं नोपलभ्यते तदवतिष्ठते अवस्थानाच्च‡‡ तस्य नित्यत्वं प्रसज्यते एवं यानि खल्विमानि शब्दश्रवणानि शब्दाभिव्यक्तय इति

वादिनस्त्वयवोपचये दीर्घादिप्रतीत्या शब्दसंतानग्रहणे तत्सामान्याद्दीर्घादिप्रत्ययोपपत्तिः। सन्तानगतसंस्कारभेदाच्च मन्दमन्दतरमन्दतमादिशब्दश्रवणोपपत्तिश्च ।

* तत्रेति २ । ५ पु· । † शब्दभेदे चासतीति । २ । ५ पुस्तके ( ) १ पु· नास्ति ।
‡ मन्दमनुवर्ततइति २ । ५ पु· । § निर्निमित्तान्तरमिति १ पु· ।
‖ अनुत्पत्ते चेति २ । ५ पु· ।

¶ यदि संस्कारं शब्दोत्पत्तिनिमित्तं न प्रतिपद्यसे पाणिघण्टासंश्लेषाच्छब्दसन्तानोच्छेदो न प्राप्नोति । अथ घण्टास्थः संस्कारः पाणिसंश्लेषाविवर्तते तथापि कथं शब्दसन्तानोच्छेदः । न ब्रूमो घण्टासंश्लेषः शब्दानुच्छिनत्तीति । अपि तु पाणिघण्टासंश्लेषात्तद्वृत्तिसंस्कारः स्पर्शवद्द्रव्यसंयोगविरोधित्वाविवर्तते। निवृत्ते च कारणाभावात्कार्याभाव इति सन्तानोच्छेदः । न्या· वा· ।

** चेति १ । नास्ति । †† सिंहावलोकितन्यायेन पूर्वोक्तं हेतुं दूषयति । ता· टी· ।
‡‡ चेति १ नास्ति ।

मतं न तेषां विनाशकारणं भवतोपपाद्यते अनुपपादनादनवस्थान*मनवस्था-
नात् तेषां नित्यत्वं प्रसज्यतइति । अथ नैवं †तर्हि विनाशकारणानुपलब्धेः
शब्दस्यावस्थानान्नित्यत्वमिति । कम्पसमानाश्रयस्य च‡ नादस्य पार्श्वप्रश्लेषात्
कम्पवत् कारणोपरमादभावः । वेयधिकरण्ये हि प्रतिघातिद्रव्यप्रश्लेषात्
समानाधिकरणस्येवोपरमः स्यादिति ।

अस्पर्शत्वादप्रतिषेधः§ ॥ ३६ ॥

यदिद॥माकाशगुणः शब्द इति प्रतिषिद्ध्यते अयमनुपपन्नः प्रतिषेधः ।
अस्पर्शत्वाच्छब्दाश्रयस्य रूपादिसमानदेशस्याग्रहणे शब्दसन्तानोपपत्तेरस्पर्श-
व्यापिद्रव्याश्रयः शब्द इति ज्ञायते न (च)¶कम्पसमानाश्रय**इति । प्रतिद्रव्यं
रूपादिभिः सह सन्निविष्टः शब्दसमानदेशो व्यज्यतइति नोपपद्यते कथम् ।

विभक्त्यन्तरोपपत्तेश्च समासे ॥ ३७ ॥

सन्तानोपपत्तेश्चेति चार्थः । तच्चाख्यातम् । यदि रूपादयः शब्दाश्च
प्रतिद्रव्यं समस्ताः समुदितास्तस्मिन्समाससमुदाये ये यथाजातीयकः सान्न-
विष्टस्तस्य तथाजातीयस्येव ग्रहणेन भवितव्यं शब्द††रूपादिवत् । तच्च योऽयं
विभाग एकद्रव्ये नानारूपा भिन्नश्रुतयो विधर्माणः शब्दाः शब्दे अभिव्यज्यमा-
नाः श्रूयन्ते यच्च विभागानन्तरं ‡‡सरूपाः समानश्रुतयः सधर्माणः शब्दास्तीव्र-
मन्दधर्मतया भिन्नाः श्रूयन्ते तदुभयं नोपपद्यते नानाभूतानामुत्पद्यमानानामयं
धर्मो नैकस्य व्यज्यमानस्येति । अस्ति चायं विभागो विभागान्तरं च तेन विभा-
गोपपत्तेर्मन्यामहे न प्रतिद्रव्यं रूपादिभिः सह शब्दः सन्निविष्टो व्यज्यतइति ।
द्विविधश्चायं शब्दो वर्णात्मको ध्वनिमात्रश्च । तच्च वर्णात्मनि तावत् ।

---

* अवस्थानमवस्थानादिति २ । ५ । † तर्हीति २ । ५ पु. । नास्ति ।

‡ अनुनादस्येति २ । ५ पु. ।

§ अस्पर्शद्रव्याश्रयः शब्द इति सूत्रार्थः । न्या. वा. ।

॥ नाकाशगुण इति २ । ५ पु. । ¶ ( ) नास्ति २ । ५ पु. ।

** शब्दकारणत्वेनाभिमतः संस्कारश्च कार्यशब्दभेदादनेकः । संस्कारस्यैकत्वे बाणपाता-
नुपपत्तेः सद्यो वा पातापत्तेः बाणमात्रस्योत्तरदेशसंयोगकारणत्वे कदा चिदपि पातो न स्यात् ।

†† शब्दे रूपादिवदिति २ । ४ । ५ पु. ।

‡‡ विभागश्च विभागान्तरं च विभक्त्यन्तरम् । विधर्माणश्च शब्दाः सह-
पाश्चैकद्रव्याः श्रूयन्ते । समासः समुदायः । एतत् स्पर्शवद्द्रव्यवृत्तिषु शब्देषु न
प्राप्नोति गन्धादिवत् । यथा प्रतिद्रव्यमेको गन्ध एवं प्रतिद्रव्यमेकः शब्द इति ।
न्या. वा. ।

विकारादेशोपदेशात्संशयः* ॥ ३८ ॥

दध्यत्रेति के चिद् इकार इत्वं हित्वा यत्वमापद्यतइति विकारं मन्यन्ते। के चिदिकारस्य प्रयोगे विषयकृते यदिकारः स्थानं जहाति तत्र यकारस्य प्रयोगं ब्रुवते। संहितायां विषये इकारो न प्रयुज्यते तस्य स्थाने यकारः प्रयुज्यते स आदेश इति उभयमिदमुपदिश्यते। तत्र न ज्ञायते किं तत्त्वमिति। आदेशोपदेशस्तत्त्वम्।

विकारोपदेशे ह्यन्वयस्याग्रहणाद्विकारानुमानम्†। सत्यन्वये किं चिन्निवर्त्तते किं चिदुपजायतइति शक्येत विकारो ऽनुमातुम्। न चान्वयो गृह्यते। तस्माद्विकारो नास्तीति।

भिन्नकरणयोश्च वर्णयोरप्रयोगे प्रयोगोपपत्तिः। विवृतकरण इकार ईषत्स्पृष्टकरणो यकारः ताविमौ पृथक्करणाख्येन प्रयत्नेनोच्चारणीयौ तयोरेकस्याप्रयोगे ऽन्यतरस्य‡ प्रयोग उपपन्न इति।

अविकारे चाविशेषः। यत्रेमाविकारयकारौ न विकारभूतौ यतते यच्छति प्रायँस्त इति इकार इदꣳमिति§ च यत्र च विकारभूतौ इदं॥ व्याहरति उभयत्र प्रयोक्तुरविशेषो यत्नः श्रोतुश्च श्रुतिरित्यादेशोपपत्तिः।

प्रयुज्यमानाग्रहणाच्च। न खलु इकारः प्रयुज्यमानो यकारतामापद्यमानो गृह्यते किं तर्हीकारस्य प्रयोगे यकारः प्रयुज्यते। तस्मादविकार इति।

अविकारे च न शब्दान्वाख्यानलोपः। न विक्रियन्ते वर्णा इति। न चैतस्मिन्पक्षे शब्दान्वाख्यानस्यासम्भवो येन वर्णविकारं प्रतिपद्येमहीति। न खलु वर्णस्य वर्णान्तरं कार्यं न हि इकाराद्यकार उत्पद्यते यकाराद्वा इकारः। पृथक् स्थानप्रयत्नोत्पाद्या ह्येमे वर्णास्तेषामन्यो ऽन्यस्य स्थाने प्रयुज्यतइति युक्तम्। एतावच्चैतत्परिणामो विकारः स्यात् कार्यकारणभावो वा उभयं च नास्ति तस्मान्न सन्ति वर्णविकाराः।

---

* संशयकारणज्ञापनार्थं सूत्रम्। न्या॰ वा॰।

† विकारानुमानमिति २। ५।

‡ अन्यस्येति २। ५।

§ २ नास्ति।

॥ इत्या दध्याहरेति इति ५ इदꣳ इति २। पु॰ पाठः।

वर्णसमुदायविकारानुपपत्तिवच्च वर्णविकारानुपपत्तिः । अस्तेर्भूः ब्रुवो वचिरिति यथा वर्णसमुदायस्य धातुलक्षणस्य क्व चिद्विषये वर्णान्तरसमुदायो न परिणामो न कार्यं शब्दान्तरस्य स्थाने शब्दान्तरं प्रयुज्यते तथा वर्णस्य *वर्णान्तरमिति । इतश्च† न सन्ति विकाराः ।

प्रकृतिविवृद्धौ विकारवृद्धेः‡ ॥ ३९ ॥

प्रकृत्यनुविधानं विकारेषु दृष्टं यकारे ह्रस्वदीर्घानुविधानं नास्ति येन विकारत्वमनुमीयतइति ।

§न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः॥ ॥ ४० ॥

द्रव्यविकारा न्यूनाः समाः अधिकाश्च गृह्यन्ते । तद्वदयं विकारो न्यूनः स्यादिति । द्विविधस्यापि हेतोरभावादसाधनं दृष्टान्तः अथ नोदाहरणसाधर्म्याद्धेतुरस्ति न वैधर्म्यात् । अनुपसंहृतश्च हेतुना दृष्टान्तो न साधक इति ।

प्रतिदृष्टान्ते चाऽनियमः प्रसज्येत । यथा ऽनड्वाहः स्थाने ऽश्वो वोढुं नियुक्तो न तद्विकारो भवति एवमिवर्णस्य स्थाने यकारः प्रयुक्तो न विकार इति न चाय नियमहेतुरस्ति दृष्टान्तः साधको न प्रतिदृष्टान्त इति । द्रव्यविकारोदाहरणं च ।

****नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ४१ ॥**

अतुल्यानां द्रव्याणां प्रकृतिभावो ऽवकल्पते†† विकारश्च प्रकृतीरनुविधीयते‡‡ । न त्विवर्णमनुविधीयते यकारः तस्मादनुदाहरणं द्रव्यविकार इति ।

§§द्रव्यविकारे वैषम्यवद् वर्णविकारविकल्पः ॥ ४२ ॥

यथा द्रव्यभावेन तुल्यायाः प्रकृतेर्विकारवैषम्यम् एवं वर्णभावेन तुल्यायाः प्रकृतेर्विकारविकल्प इति ।

---

* वर्णान्तरसमुदायो न परिणामो न कार्यं शब्दान्तरस्य स्थाने शब्दान्तरं प्रयुज्यते तथा वर्णस्येति २ । ५ पुस्तकयोरधिकम् ।

† अतश्चेति २ । ५ पु. ।

‡ प्रकृत्यनुविधानादिति सूत्रार्थः । न्या. वा. ।

§ अस्याक्षेपसूत्रम् । ता. टी. ।

॥ साधनपक्षे दृष्टान्तमात्रादहेतुः । न्या. वा. ।

¶ क्षेति १ पु. ।

** दूषणपक्षे तु । न्या. वा. ।

†† विकल्पते १ । ४ ।

‡‡ अनुविधीयन्ते ५ ।

§§ अस्याक्षेपसूत्रम् । ता. टी. ।

*न विकारधर्मानुपपत्तेः ॥ ४३ ॥

अयं विकारधर्मो द्रव्यसामान्ये पदात्मकं द्रव्यं मृद्वा सुवर्णं वा तस्यात्मनोऽन्वये पूर्वो व्यूहो निवर्त्तते व्यूहान्तरं चोपजायते तं विकारमाचक्षते† न वर्णसामान्ये कश्चिच्छब्दात्मा ऽन्वयी य इत्वं जहाति यत्वं चापद्यते। तच्च यथा सति द्रव्यभावे विकारवैषम्ये नाऽनड्वान् श्वा विकारो विकारधर्मानुपपत्तेः एवमिवर्णस्य न यकारो विकारो विकारधर्मानुपपत्तेरिति। इतश्च न सन्ति वर्णविकाराः।

‡विकारप्राप्तानामपुनरापत्तेः ॥ ४४ ॥

अनुपपन्ना पुनरापत्तिः। कथं पुनरापत्तेरननुमानादिति। इकारो यकारत्वमापन्नः पुनरिकारो भवति न पुनरिकारस्य स्थाने यकारस्य प्रयोगोऽप्रयोगश्चेत्यचानुमानं नास्ति।

§सुवर्णादीनां पुनरापत्तेरहेतुः॥ ॥ ४५ ॥

अननुमानादिति न। इदं ह्यनुमानं सुवर्णं कुण्डलत्वं हित्वा रुचकत्वमापद्यते रुचकत्वं हित्वा पुनः कुण्डलत्वमापद्यते एवमिकारो यणि यकारत्वमापन्नः पुनरिकारो भवतीति व्यभिचारादननुमानम्। यथा पयो दधिभावमापन्नं पुनः पयो भवति किमेवं वर्णानां पुनरापत्तिः अथ सुवर्णवत् पुनरापत्तिरिति सुवर्णोदाहरणोपपत्तिश्च न।

तद्विकाराणां सुवर्णभावाव्यतिरेकात्। अवस्थितं सुवर्णं हीयमानेन धर्मेण¶ धर्मि भवति नैवं कश्चिच्छब्दात्मा हीयमानेन इत्वेनोपजायमानेन यत्वेन धर्मी गृह्यते तस्मात्सुवर्णोदाहरणं नोपपद्यते इति।

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः। वर्णविकारा अपि वर्णत्वं न व्यभिचरन्ति यथा सुवर्णविकारः सुवर्णत्वमिति।

---

* तत्र प्रत्याख्यानसूत्रम्। ता॰ टी॰।

† आचक्षते १। २। ४। ५ पु॰।

‡ इतश्च न सन्ति वर्णविकारा इत्याह। ता॰ टी॰।

§ अस्यायमेषः सुवर्णादीनामिति सूत्रम्। ता॰ टी॰।

‖ विकारप्राप्तानां पुनरापत्तिदर्शनादनेकान्त इति सूत्रार्थः। न्या॰ वा॰।

¶ उपजायमानेन चेति २। ५ अधिकम्।

सामान्यवतो धर्मयोगो न सामान्यस्य* । कुण्डलरुचको सुवर्णस्य धर्मो न सुवर्णत्वस्य एवमिकारयकारौ कस्य वर्णात्मनो धर्मौ वर्णत्वं† वर्णधर्मयोगो न सामान्यस्येमौ धर्मौ भवितुमर्हतः । न च निवर्तमानो धर्म उपजायमानस्य प्रकृतिस्तच्च निवर्तमान इकारो न यकारस्योपजायमानस्य प्रकृतिरिति । इतश्च वर्णोविकारानुपपत्तिः ।

नित्यत्वे ऽविकारादनित्यत्वे चानवस्थानात्‡ ॥ ४६ ॥

नित्या वर्णा इत्येतस्मिन्पक्षे इकारयकारौ वर्णौ इत्युभयोर्नित्यत्वाद्विकारानुपपत्तिः । §नित्यत्वे ऽविनाशित्वात् कः कस्य विकार इति । अथा-नित्या वर्णा इति पक्षः एवमप्यनवस्थानं वर्णानां किमिदमनवस्थानं वर्णानाम् । उत्पद्य निरोधः उत्पद्य निरुद्धे इकारे यकार उत्पद्यते यकारे चोत्पद्य निरुद्धे इकार उत्पद्यते कः कस्य विकारः । तदेतदवगृह्य संधाने संधाय चावग्रहे वेदितव्यमिति । नित्यपक्षे तु तावत्समाधिः ।

नित्यानामतीन्द्रियत्वात्तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः‖ ॥ ४७ ॥

नित्या वर्णा न विक्रियन्तइति विप्रतिषेधः । यथा नित्यत्वे सति किं चिदतीन्द्रियमिन्द्रियग्राह्यश्च वर्णा एवं नित्यत्वे सति किं चिन्न विक्रियते वर्णास्तु विक्रियन्तइति विरोधादहेतुस्तद्धर्मविकल्पः नित्यं नोपजायते नापैति अनुपजनापायधर्मकं नित्यमनित्यं पुनरुपजनापाययुक्तं न चान्तरेणोपजनापायौ विकारः सम्भवति । तद्यदि वर्णा विक्रियन्ते नित्यत्वमेषां निवर्त्तते अथ नित्या विकारधर्मत्वमेषां निवर्त्तते । सोयं विरुद्धो हेत्वाभासो धर्मविकल्प इति । अनित्यपक्षे समाधिः ।

अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः** ॥ ४८ ॥

---

* तद्विकाराणामिति वर्णत्वाव्यतिरेकादिति सामान्यवत इति च वाक्यानां मुद्रितपुस्तकावगते सूत्रत्वे प्रमाणं चिन्त्यम् । † वर्णत्वं सामान्यं न तस्येमाविति १ । २ । ४ । ५ ।

‡ नित्या वर्णा इति न युक्तो विकारः, व्याघातात् । अनित्या वर्णा इति न युक्तो विकारो ऽनवस्थितानां विकारादर्शनादिति । न्या· वा· ।

§ अनित्यत्वे विनाशित्वादिति १ । २ । ४ । ५ पु· ।

‖ विकल्पसमा जातिः । न्या· वा· । ¶ इन्द्रियग्राह्यमिति २ । ५ ।

** साधर्म्यसमा जातिः । न्या· वा· ।

यथा ऽनवस्थायिनां वर्णानां श्रवणं भवत्येवमेषां विकारो भवतीति असम्बन्धादसमर्था अर्थप्रतिपादिका वर्णोपलब्धिर्न विकारेण सम्बन्धादसमर्था या* गृह्यमाणा वर्णविकार†मनुत्पादयेदिति । तच्च यादृगिदं यथा गन्धगुणा पृथिव्येवं शब्दसुखादिगुणापीति तादृगेतद्भवतीति । न च वर्णोपलब्धिर्वर्णनिवृत्तौ वर्णान्तरं‡ प्रयोगस्य निवर्तिका योयमिवर्णनिवृत्तौ यकारस्य प्रयोगो यदयं वर्णोपलब्ध्या निवर्त्तते तदा तच्चोपलभ्यमान इवर्णो यत्वमापद्यते इति गृह्यते§ तस्माद्वर्णोपलब्धिरहेतुर्वर्णविकारस्येति ।

॥विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः¶ ॥ ४९ ॥

तद्धर्मविकल्पादिति न युक्तः प्रतिषेधः । न खलु विकारधर्मकं किंचिन्नित्यमुपलभ्यतइति वर्णोपलब्धिवदिति न युक्तः प्रतिषेधः** । अवयहे हि दधि अत्रेति प्रयुज्य चिरं स्थित्वा ततः संहितायां प्रयुङ्क्ते दध्यत्रेति चिरनिवृत्ते चायमिवर्णे यकारः प्रयुज्यमानः कस्य विकार इति प्रतीयते कारणाभावात् कार्याभाव इति अनुयोगः प्रसज्यत††इति । इतश्च वर्णविकारानुपपत्तिः ।

प्रकृत्यनियमाद्वर्णविकाराणाम् ॥ ५० ॥

इकारस्थाने यकारः श्रूयते यकारस्थाने खल्विकारो विधीयते विध्यति तद्यदि स्यात् प्रकृतिविकारभावो वर्णानां तस्य प्रकृतिनियमः स्यात्। दृष्टो विकारधर्मित्वे प्रकृतिनियम इति ।

अनियमे नियमान्नानियमः‡‡ ॥ ५१ ॥

योयं प्रकृतेरनियम उक्तः स नियतो यथाविषयं व्यवस्थितो नियतत्वान्नियम इति भवत्येवं सत्यनियमो नास्ति तच्च यदुक्तं प्रकृत्यनियमादित्येतदयुक्तमिति ।

---

* वेति २ पु· । † अर्थमनुमापयेदिति २ । ५ । अनुपपादयेदिति १ । ४ पु· पा· ।
‡ वर्णान्तरप्रयोगस्येति २ । ४ । ५ । पु· । § गृह्येत इति २ । ५ । पु· ।
॥ तदेवं जात्युत्तरमुत्थितमारितं कृत्वा भाष्यकारो ऽत्रैवार्थे सूत्रं पठति । ता· टी· ।
¶ उभयोरप्युत्तरम् ।
** नित्या विक्रियन्तइति व्याघातो दोषः । उपलभ्यमानस्य चेकारस्य यत्वानुपपत्तेर्वर्णोपलब्धिवदित्यसंबद्धम् । न्या· वा· ।
†† वियुज्येतेति २ । ५ पु· ।
‡‡ सूत्रार्थो ऽनियमो नास्तीति । न्या· वा· ।

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः* ॥ ५३ ॥

नियम इत्यचार्थाभ्यनुज्ञा अनियम इति तस्य प्रतिषेधः। अनुज्ञातनिषिद्धयोश्च व्याघातादनर्थान्तरत्वं न भवति अनियमश्च नियतत्वान्नियमो न भवतीति नाचार्थस्य तथाभावः प्रतिषिध्यते किं तर्हि तथाभूतस्यार्थस्य नियमशब्देनाभिधीयमानस्य नियतत्वान्नियमशब्द एवोपपद्यते । सेयं नियमादनियमे प्रतिषेधो न भवतीति ।† न चेयं वर्णविकारोपपत्तिः परिणामात् कार्यकारणभावाद्वा किं तर्हि ।

गुणान्तरापत्त्युपमर्दह्रासवृद्धिश्लेषश्लेषेभ्यस्तु विकारोपपत्तेः‡वर्णविकाराः§ ॥ ५४ ॥

स्थान्यादेशभावादप्रयोगे प्रयोगो विकारशब्दार्थः । स भिद्यते गुणान्तरापत्तिः उदात्तस्यानुदात्त इत्येवमादिः। उपमर्दो नाम एकरूपनिवृत्तौ रूपान्तरोपजनः। ह्रासो दीर्घस्य ह्रस्वः। वृद्धिर्ह्रस्वस्य दीर्घः तयोर्वा प्लुतः। लेशो लाघवं स्त इत्यस्तेर्विकारः । श्लेष आगमः प्रकृतेः प्रत्ययस्य वा। एतएव विशेषा विकारा इति एतएवादेशाः एते चेद्विकारा उपपद्यन्ते तर्हि वर्णविकारा इति ।

ते विभक्त्यन्ताः पदम् ॥ ५५ ॥

यथादर्शनं विकृता वर्णा विभक्त्यन्ताः पदसंज्ञा भवन्ति‖ । विभक्तिर्द्वयी नामिक्याख्यातिकी च ब्राह्मणः पचतीत्युदाहरणम् । उपसर्गनिपातास्तर्हि न पदसंज्ञाः लक्षणान्तरं वाच्यम् इति। शिष्यते च खलु नामिक्या विभक्तेरव्ययाल्लोपः तयोः पदसंज्ञार्थमिति । पदेनार्थसंप्रत्यय इति प्रयोजनम् । नामपदं चाधिकृत्य¶ परीक्षा गौरिति पदं खल्विदमुदाहरणम् ।

---

* विरोधः सूत्रार्थः । न्या. वा. । ११४ पृष्ठे ३५ सूत्राङ्कः प्रमादाद् द्विर्मुद्रितोऽतोऽत्र ५३ आरभ्य स्थापितः ।

† तदेवं प्रकृतिविकारभावं निराकृत्य विकारवचनव्यक्तिं शब्दानामादेशपक्षे समर्थयति । ता. टी. ।

‡ वर्णविकारोपपत्तेरिति २ । ३ पु. पा. ।

§ वर्णविकार इति ४ पु. । सन्तीति सूत्रार्थः । न्या. वा. ।

‖ अर्थप्रत्ययस्तर्हि न प्राप्नोति । न न प्राप्नोति । अन्त्यवर्णप्रत्ययात्पूर्ववर्णप्रतिसंधानप्रत्ययापेक्षादर्थप्रत्यय इति । न्या. वा. ।

¶ नाम्नश्चाधिकारो व्यापकत्वात् । न च पदोच्चारणमात्रेण विशेषार्थाप्रतीतेः पदमवाचकमिति वाच्यम् । पदेन सामान्याभिधानात् । न च सामान्यस्य व्यवहाराविषयत्वात्तत्प्रत्यायनवैयर्थ्यम् । विशेषबोधनार्थत्वात् । सामान्यतः पदेनोपस्थापिते वाक्येन विशेषबोधोपपत्तेः । अवाचकत्वे तु सामान्यस्यापि तेनानुपस्थितौ विशेषप्रत्यायनासंभवः ।

तदर्थे व्यक्त्याकृतिजातिसंनिधावुपचारात्संशयः ॥ ५६ ॥

अविनाभाववृत्तिः सन्निधिः । अविनाभावेन वर्त्तमानासु व्यक्त्याकृतिजातिषु गौरिति प्रयुज्यते तच्च न ज्ञायते किमन्यतमः पदार्थ उत सर्व इति शब्दस्य प्रयोगसामर्थ्यात् पदावधारणं* तस्मात् ।

†याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्युपचयवर्णसमानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः ॥ ५७ ॥

व्यक्तिः पदार्थः । कस्माद् याशब्दप्रभृतीनां व्यक्तावुपचारात् । उपचारः प्रयोगः या गौस्तिष्ठति या गौर्निषण्णेति नेदं वाक्यं जातेरभिधायकभेदात्। भेदात्तु द्रव्याभिधायकम्‡ । चैद्यायः§ गां ददातीति द्रव्यस्य त्यागो न जातेरमूर्त्तत्वात् प्रतिक्रमानुक्रमानुपपत्तेश्च । परिग्रहः स्वत्वेनाभिसंबन्धः कौण्डिन्यस्य गौर्ब्राह्मणस्य गौरिति द्रव्याभिधाने‖ द्रव्यभेदात् संबन्धभेद इति उपपन्नम्। अभिन्ना तु जातिरिति। संख्या दश गावो विंशतिर्गाव इति भिन्नं द्रव्यं संख्यायते न जातिरभेदादिति । वृद्धिः कारणवतो द्रव्यस्यावयवोपचयः अवर्द्धत गौरिति निरवयवा तु जातिरिति । एतेनापचयो व्याख्यातः । वर्णः शुक्ला गौः कपिला गौरिति । द्रव्यस्य गुणयोगो न सामान्यस्य । समासः गोहितं गोसुखमिति द्रव्यस्य सुखादियोगे न जातेरिति। अनुबन्धः सरूपप्रजननसन्तानो गौर्गां जनयतीति तदुत्पत्तिधर्मत्वाद् द्रव्ये युक्तं न जातौ विपर्ययादिति¶ । द्रव्यं व्यक्तिरिति हि नार्थान्तरम् । अस्य प्रतिषेधः ।

न तदनवस्थानात् ॥ ५८ ॥**

न व्यक्तिः पदार्थः कस्मादनवस्थानात् । याशब्दप्रभृतिभिर्यो विशे-

---

* पदार्थावधारणमिति २ । ४ । ५ ।

† प्रयोगप्रदर्शनार्थं याशब्दादिसूत्रम् । न्या· वा· ।

गवां समूह इति भेदाद् द्रव्याभिधानं न जातेरभेदादिति २ । ३ । ५ पुस्तकेष्वधिकं ४ नास्ति

§ वैद्यायेति २ । ४ । ५ ।

‖ द्रव्याभिधाने इति २ । ५ नास्ति ।

¶ आकृतेरप्यभिधायकमेतन्न भवति निष्क्रियत्वादाकृतेः । न हि निष्क्रिया तिष्ठति गच्छति वेति । एवं सर्वत्र । यस्य चानेन विशेषेण तिष्ठत्यादिना योगस्तं शब्दो ऽभिधातुमर्हति । कुतः विशेषणविशेष्यभावस्यैकविषयत्वात् । न्या· वा· ।

** नानेन गोशब्देन व्यक्तिमात्रं शुद्धमुच्यते । यद्ययं व्यक्तिमात्राभिधायको ऽभविष्यत्तेन यस्यां कस्यां चिद् व्यक्तौ प्रत्ययो ऽभविष्यदिति सूत्रार्थः । न्या· वा·

यते स गोशब्दार्थो या गौस्तिष्ठति या गौर्निषण्णेति न द्रव्यमात्रमविशिष्टं जात्या विना ऽभिधीयते। किं तर्हि जातिविशिष्टम्। तस्मान्न व्यक्तिः पदार्थः। एवं समूहादिषु द्रष्टव्यम्। यदि न व्यक्तिः पदार्थः कथं तर्हि व्यक्तावुपचार इति निमित्तादतद्भावेपि तदुपचारो दृश्यते खलु ।

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटका*-ञ्पुरुषेष्वतद्भावे ऽपि तदुपचारः ॥ ५९ ॥

अतद्भावे ऽपि तदुपचार इत्येतच्छब्दस्य† तेन शब्देनाभिधानइति‡। सहचरणाद्यष्टिकां भोजयेति यष्टिकासहचरितो ब्राह्मणो ऽभिधीयतइति§। स्थानाद् मञ्चाः क्रोशन्तीति मञ्चस्थाः पुरुषा अभिधीयन्ते। तादर्थ्यात् कटार्थेषु वीरणेषु व्यूह्यमानेषु कटं करोतीति भवति । वृत्ताद् यमो राजा कुबेरो राजेति तद्वद्वर्त्तते इति। मानाद् आढके निमिताः सक्तवः आढकसक्तव‖ इति। धारणात् तुलायां¶ धृतं चन्दनं तुलाचन्दनमिति। सामीप्याद् गङ्गायां गावश्चरन्तीति देशो ऽभिधीयते सन्निकृष्टः। योगात् कृष्णेन रागेण युक्तः शाटकः कृष्ण इत्यभिधीयते। साधनाद् अन्नं प्राणा इति। आधिपत्याद् अयं पुरुषः कुलम् अयं गोत्रमिति। तत्रायं सहचरणाद्योगाद्वा जातिशब्दो व्यक्तौ प्रयुज्यतइति। यदि गौरित्यस्य पदस्य न व्यक्तिरर्थो ऽस्तु तर्हि।

आकृतिस्तदपेक्षत्वात् सत्वव्यवस्थानसिद्धेः ॥ ६० ॥

आकृतिः पदार्थः। कस्मात् तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः**। सत्त्वावयवानां तदवयवानां च नियतो व्यूह आकृतिः तस्यां गृह्यमाणायां सत्त्वव्यवस्थानं सिध्यति अयं गौरयमश्व इति नागृह्यमाणायाम्। यस्य ग्रह-

---

* शकटेति मुद्रितपुस्तकपाठान्तरम्। † इत्यतच्छब्दस्येति २। ५।

‡ अभिधानमिति २। ४। ५।

§ साहचर्यात्संयुक्तसमवेतां जातिं ब्राह्मणे ऽध्यारोप्य ब्राह्मणं यष्टिकेत्याह। एवं शेषाण्युपचारबीजानि स्वयमुत्प्रेक्षितव्यानि। न्या॰ वा॰।

‖ आढकं सक्तव इति २ ५। ¶ तुलयेति २। ४।

** अत्रापि तदेवोपस्थितं न तदनवस्थानादिति। न्या॰ वा॰।

णात् सत्त्वव्यवस्थानं सिध्यति तं शब्दो ऽभिधातुमर्हति सो ऽस्यार्थ इति। नैतदुपपद्यते यस्य जात्या योगस्तदत्र जातिविशिष्टमभिधीयते गौरिति। न चावयवव्यूहस्य जात्या योगः कस्य तर्हि नियतावयवव्यूहस्य द्रव्यस्य। तस्मान्नाकृतिः पदार्थः। अस्तु तर्हि जातिः पदार्थः।

व्यक्त्याकृतियुक्ते ऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्भवके जातिः ॥ ६१ ॥

जातिः पदार्थः कस्माद्व्यक्त्याकृतियुक्ते ऽपि मृद्भवके प्रोक्षणादीनामप्रसङ्गादिति। गां प्रोक्षय गामानय गां देहीति नैतानि मृद्भवके प्रयुज्यन्ते कस्माज्जातेरभावात्*। अस्ति हि तत्र व्यक्तिः अस्त्याकृतिः यदभावात्तत्राप्रत्ययः स पदार्थ† इति।

नाकृतिव्यक्त्योः‡पेक्षत्वाज्जात्यभिव्यक्तेः ॥ ६२ ॥

---

* मच्चिर्मितगवकस्य गोभिन्नत्वेन गोत्वाभावात्तद्गताकृतिसामान्येन गोशब्दप्रयोगो भाक्त इति भावः। न च जातेः सर्वगतत्वाभ्युपगमाद् मृद्गवगतत्वमपीति वाच्यम्। तस्याः स्वविषयसर्वगतत्वमात्राभ्युपगमात्। यत्र गोत्वनिमित्तो ऽनुवृत्तप्रत्ययो भवति तत्रैव ककुदादिव्यङ्ग्यस्य गोत्वस्य स्वीकारान् मृद्गवे तदभावात्।

† यत्तु न पिण्डव्यतिरिक्तं गोत्वं पिण्डान्तरालेष्वदर्शनादिति। तच्च। अन्तरालपदेनाकाशस्याभावस्य द्रव्यान्तरस्य वा ग्रहणे तेषु गोत्वाभावे ऽपि गोपिण्डवृत्तिताया अबाधितत्वात्। नानाव्यक्तिषु गौरित्यनुवृत्तप्रत्ययनिमित्ततया च गोत्वसिद्धिः। अनुवृत्तधर्मानभ्युपगमे ऽनुवृत्तप्रत्ययोपपादनस्याशक्यत्वात्। न चाकृतिसामान्यादनुवृत्तप्रत्ययोपपत्तिः। अवयवसंयोगरूपाणामाकृतीनामपि परस्परव्यावृत्तत्वेनानुवृत्तप्रत्ययहेतुत्वानुपपत्तेः। तद्विलक्षणाया आकृतेरनुवृत्तत्वाभ्युपगमे तु सैव जातिः। न चानुवृत्तप्रत्ययानां सामान्यनिमित्तकत्वे सामान्यशून्यानां गोत्वाश्वत्वादीनां सामान्यं सामान्यमित्यनुवृत्तप्रत्ययविषयत्वानुपपत्तिः। तेषामप्यनेकार्थसमवायमनुगतं निमित्तीकृत्यैवानुवृत्तप्रत्ययविषयत्वोपगमात्। एतेन पाचकादिशब्दानां नानाक्रियाप्रवृत्तिनिमित्तकानामप्येकाकारप्रतीतिविषयत्वदर्शनाच्च तेन गोत्वसिद्धिरिति निरस्तम्। तत्रापि पाकक्रियां प्रति प्राधान्यस्यानुगतस्यैवानुवृत्तप्रत्ययहेतुत्वात्। जातेरेवानुवृत्तप्रत्ययनिमित्ततेति नियमानभ्युपगमात्। अथानेकासु गोषु वर्तमानं गोत्वं किं प्रतिव्यक्ति पर्याप्त्या वर्तते उतैकदेशेन। आद्ये एकव्यक्तिविश्रान्तत्वेन तस्य सामान्यत्वानुपपत्तिः। द्वितीये तदेकदेशानामेव तत्तद्व्यक्तिवृत्तित्वेन गोत्वस्यानेकानुगतत्वानुपपत्तिस्तदवस्था। एकदेशानां सामान्यात्मकत्वे ऽपि तेषां प्रतिव्यक्त्यसाधारणत्वेन सामान्यत्वानुपपत्तिरसामान्यात्मकत्वे त्वनुवृत्तप्रत्ययनिमित्तत्वासंभवः। मैवम्। सावयवेषु कृत्स्नैकदेशविकल्पसंभवे ऽपि निरवयवस्य सामान्यस्य तादृशविकल्पेन दूषणाभिधानानुपपत्तेः। गोत्वादेश्च समवायेन तदभिव्यञ्जकावयवसंस्थानवतीषु सर्वासु व्यक्तिष्वेकस्यैव विश्रान्तेः। यत्तु गवि चेद् गोत्वमुपेयते प्राग्गोत्वसंबन्धाद् गौरेवासाविति व्यर्थं गोत्वम्। अगवि चेदश्वादावपि तत्सङ्ग इति तन्न। गौरगौरित्यनयोर्विशिष्टप्रत्ययत्वेन विशेषणसंबन्धमन्तरा ऽनुपपत्तेर्दत्स्वोत्पत्तिकाले मृद्गवे नास्तीति सैव पदार्थः।

‡ व्यक्त्याकृती इति प्राप्ते प्राधान्यादाकृतेः पूर्वनिपातः। किं प्राधान्यम्।

जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षते नागृह्यमाणायामाकृतौ व्यक्तौ जातिमात्रं शुद्धं* गृह्यते तस्मान्न जातिः पदार्थ इति । न वै पदार्थेन न† भवितुं शक्यं कः खल्विदानीं पदार्थ इति ।

व्यक्त्याकृतिजातयस्तु पदार्थः ॥ ६३ ॥

तुशब्दो विशेषणार्थः‖ । किं विशिष्यते प्रधानाङ्गभावस्यानियमेन पदार्थत्वमिति । यदा हि भेदविवक्षा विशेषगति(श्च) ‡तदा व्यक्तिः प्रधानमङ्गं तु जात्याकृती । यदा तु भेदो ऽविवक्षितः सामान्यगति§स्तदा जातिः प्रधानमङ्गं तु व्यक्त्याकृती । तदेतद्बहुलं प्रयोगेषु । आकृतेस्तु प्रधानभाव उत्प्रेक्षितव्यः¶ । कथं पुनर्ज्ञायते नाना व्यक्त्याकृतिजातयश्च इति लक्षणभेदात् । तच्च तावत् ।

व्यक्तिर्गुणविशेषाश्रयो मूर्तिः ॥ ६४ ॥

व्यज्यतइति व्यक्तिरिन्द्रियग्राह्येति न सर्वं द्रव्यं व्यक्तिः । यो गुणविशेषाणां स्पर्शान्तानां गुरुत्वघनत्वद्रवत्वसंस्काराणा**मव्यापिनः परिमाणस्याश्रयो यथासम्भवं तद् द्रव्यं मूर्तिः मूर्छितावयवत्वा††दिति ।

आकृतिविशेषणत्वं व्यक्तेः यस्माद्व्यक्त्या विशेष्यमाणा ऽऽकृतिर्जातेर्लिङ्गं भवति तस्मात्प्रधानमाकृतिः । न्या· वा· ।

* व्यक्तमिति १ ।

† नेति नास्ति २ । ( ) ‡ नास्ति २ । § सामान्यगतिश्चेति २ । ५ ।

‖ क्व पुनराकृतेः प्राधान्यं यथा पिष्टकमय्यो गावः क्रियन्तामिति । न्या· वा· ।

¶ याशब्दादिसूत्रैरधिगतत्वात्प्रश्नानुपपत्तिरिति चेत्र निमित्तत्रैविध्ये सति तद्विशेषविषयज्ञानार्थत्वात्प्रश्नस्य । गोशब्द उच्चरन् प्रधानोपसर्जनभावेन निमित्तत्रयं प्रतिपादयतीति याशब्दादिसूत्राणामर्थः । एवं च सति तद्विशेषज्ञानार्थो युक्तः प्रश्नः । न्या· वा· ।

** यद्यपि गुरुत्वादयः सामान्यगुणास्तथापि गुणान्तरेभ्यो व्यावर्तमाना गुणविशेषा इत्युच्यन्ते । ता· टी· ।

†† किमिदमवयविद्रव्यलक्षणमाहो पदार्थत्वेन त्रयाणां प्रसक्तानां जात्याकृतिव्यवच्छेदकं लक्षणमिति । वयं तु ब्रूमो नात्रावयवी व्यवच्छेद्योऽपि तु जात्याकृतिपदव्यतिरिक्तस्य व्यक्तिपदस्यार्थो वक्तव्य इति । सा च व्यक्तिर्या न जातिर्नाकृतिस्तस्या अनेन सूत्रेण संग्रहः । गुणविशेषास्तदाश्रयश्चात्र तच्छब्दलोपाद्गुणविशेषाश्रयशब्देन द्रव्यमुच्यते । कर्मापि गुणविशेषशब्दाल्लभ्यते गुणेभ्यो विशेषो गुणविशेष इति । विशेषग्रहणं गुणपदार्थेन संगृहीताया आकृतेर्निराकरणार्थम् । आकृतेः संयोगविशेषत्वात् । गुणविशेष इति चात्र द्विरूपो विग्रहः गुणाश्च ते

आकृतिर्जातिलिङ्गाख्या ॥ ६५ ॥

यया जातिर्जातिलिङ्गानि च प्रख्यायन्ते तामाकृतिं विद्यात् । सा च नान्यसत्त्वावयवानां* तदवयवानां च नियताद् व्यूहादिति । नियतावयवव्यूहाः खलु सत्त्वावयवा जातिलिङ्गं शिरसा पादेन गामनुमिन्वन्ति । नियते च सत्त्वावयवानां व्यूहे सति गोत्वं प्रख्यायत† इति । अनाकृतिव्यङ्ग्यायां जातौ मृत्सुवर्णं रजतम् इत्येवमादिष्वाकृतिर्निवर्तते‡ जहाति पदार्थत्वमिति ।

समानप्रसवात्मिका जातिः ॥ ६६ ॥

या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु यया§ बहूनीतरेतरतो न व्यावर्तन्ते यो ऽर्थो ऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत्सामान्यम्‖ । यच्च केषां चिदभेदं कुतश्चिद्भेदं¶ करोति तत् सामान्यविशेषो जातिरिति ।

इति वात्स्यायनीये न्यायभाष्ये द्वितीयो ऽध्यायः ॥ २ ॥

विशेषा इति । मूर्तिशब्देन द्रव्यमुच्यते । एवं चैतल्लक्षणं रूपाद्याकाशाद्यनुगतं भवति । अथ वा गुणविशेषाणामाश्रय इति गुणाश्च विशेषाश्च तेषामाश्रयो द्रव्यं तत्र मूर्च्छते इति मूर्तिः । न्या॰ वा॰ ।

* नानासत्त्वावयवानामिति २ । ३ पु॰ पा॰ । † न ख्यायतइति ४ ।

‡ आकृतौ नियमो न जातौ सर्वा ऽऽकृतिर्जातिं लिङ्गयति न पुनः सर्वा जातिराकृत्या लिङ्ग्यते । न्या॰ वा॰ । § यया इति २ । ४ । ५ ।

‖ समानप्रत्ययोत्पत्तौ कारणं जातिरिति जातौ नियमो न समानप्रत्ययोत्पत्तौ पाचकादिषु जातिमन्तरेणापि दृष्टत्वात् । गवादिष्वनुवृत्तप्रत्ययः पिण्डव्यतिरिक्तालिङ्गाद्भवति विशेषवत्त्वान्नीलादिप्रत्ययवदिति । गोतो ऽर्थान्तरं गोत्वं भिन्नप्रत्ययविषयत्वाद्रूपस्पर्शप्रत्ययवदिति । न्या॰ वा॰ ।

¶ केषां चिद्भेदमिति १ । ४ ।

परीक्षितानि प्रमाणानि प्रमेयमिदानीं परीक्ष्यते* । तच्चात्मादीन्यात्मा विविच्यते किं देहेन्द्रियमनोबुद्धिवेदनासंघातमात्रमात्मा आहो स्वित्तद्व्यतिरिक्त इति । कुतः संशयः ।

व्यपदेशस्योभयथा सिद्धेः क्रियाकरणयोः कर्त्रा संबन्धस्याभिधानं व्यपदेशः । स द्विविधः अवयवेन समुदायस्य मूलैर्वृक्षस्तिष्ठति स्तम्भैः प्रासादो ध्रियतइति† अन्येनान्यस्य व्यपदेशः परशुना वृश्चति प्रदीपेन पश्यति । अस्ति चायं व्यपदेशः चक्षुषा पश्यति मनसा विजानाति बुद्ध्या विचारयति शरीरेण सुखदुःखमनुभवतीति । तत्र नावधार्यते किमवयवेन समुदायस्य देहादिसंघातस्य अथान्येनान्यस्य तद्व्यतिरिक्तस्येति । अन्येनायमन्यस्य‡ व्यपदेशः । कस्मात् ।

---

* अनेन प्रमाणप्रमेयपरीक्षयोर्हेतुफलभावः प्रदर्श्यते । परीक्षितैर्हि प्रमाणैः प्रमेयपरीक्षा युज्यतइति ।

† यद्यपि वृक्षप्रासादयोरन्ययोरेवान्येनावयवेन समुदायिना व्यपदेशस्तथाऽप्यवयवव्यभावं समुदायं च समुदाय्यनतिरिक्तं मन्वानस्य परस्योदाहरणं द्रष्टव्यम् । ता॰ टी॰

‡ अत्र सकलयादिप्रतियादिप्रत्यक्षसिद्धस्यात्मनो देहादिभेदाभेदविषयैव विप्रतिपत्तिर्न तु धर्मिणि । असति धर्मिणि वक्ष्यमाणहेतूनां साध्यस्य नास्तित्वस्य चाश्रयासिद्धेरभावकोट्युपस्थानासंभवात् । न चाप्रसिद्धप्रतियोगिको ऽभावः सुवचः । घटो नास्तीत्यादेरप्यन्यत्र देशे काले वा प्रसिद्धस्यैवात्र देशे काले वा ऽभावस्य वक्तव्यत्वात् स्वरूपतो घटाभावस्य क्व चित्कदा चिद्वा घटसत्त्वेन दुर्वचत्वात् । विभूनां चावृत्तितया देशविशेषनिरूपितस्य कालविशेषनिरूपितस्य वा वृत्तित्वस्यात्मन्यनभ्युपगमादेव तदभावसाधने सिद्धसाधनप्रसङ्गात् । आत्मा शरीरे नास्ति अन्यत्र नास्तीति प्रतीतिर्हि आत्मनि शरीरनिरूपितमन्यदेशकालनिरूपितं वा वृत्तित्वं प्रतिषेधति स चाभावो विभोरात्मनो ऽवृत्तित्वादेव सिद्ध इति न साध्यः । आत्मा ऽस्तीति बुद्धिस्तु आत्मनि सत्तासमवायं विषयीकुर्वन्ती प्राक्प्रदर्शितधिया ऽविरुद्धैव । ध्वंसप्रतियोगिनो ऽतीतत्वेन प्रत्ययात्प्रागप्यभावप्रतियोगिनश्च भविष्यत्त्वेन प्रत्ययादतीतप्रागभावाश्रयत्वे सत्यनागतप्रध्वंसविशिष्टस्य च वर्तमानत्वेन प्रत्ययाच्चित्यस्यात्मनः प्रागभावप्रध्वंसयोरप्रतियोगित्वादतीतानागततत्प्रतियोगित्वस्य चाप्यभावेन कालविशेषसम्बन्धस्योक्तदिशा नित्येषु दुर्वचत्वेन तत्प्रतिषेधस्यात्मनि सिद्धत्वादेव साधनासम्भवात् । आत्मनो नित्यत्वं च ९६ सूत्रे साधयिष्यते । आत्मनि सत्त्वाभावसाधनस्य च पक्षाभ्युपगमे बाधितत्वेनानभ्युपगमे स्वाश्रयासिद्ध्या ऽसंभवात् । आत्मनास्तित्ववादिना चात्मपदस्यार्थो वक्तव्यः । न हि पदमर्थशून्यं क्व चिद् दृष्टम् । अतश्चात्मपदं सार्थकं पदत्वाद् घटपदवदित्यनुमानेनात्मा सिध्यति । न च तत्पदं शरीरादिना ऽर्थेनेति सुवचं तथा सति आत्मा नास्तीत्युक्तेः शरीरादयो न सन्तीत्यत्र पर्यवसानेन प्रत्यक्षविरोधात् । अथात्मशब्दाभिधेयत्वेन नैयायिकादिभिः कल्पितं पक्षीकृत्य नास्तित्वं साध्यते तथापि पक्षतावच्छेदकं कल्पितत्वमतथाभूतस्य तथाप्रतीतिविषयत्वं तच्चासति धर्मिण्यनुपपन्नमिति पक्षाप्रसिद्धिः । सति तु तेनैव साध्यस्य बाधः । अतथाभूतायाः शुक्तेस्तथाभूतशुक्तिरूपतया प्रतीतौ साधर्म्यस्य प्रयोजकतायाः कृप्तत्वेनासतः सत्ता साधर्म्यस्य वक्तुमशक्यत्वेन कल्पितत्वरूपपक्षतावच्छेदकाप्रसिद्धिः । साधर्म्याधिकरणाभ्युपगमे तु बाधः । बौद्धमतप्रसिद्धेषु रूपादिषु पञ्चसु स्कन्धेषु प्रत्येकमात्मपदार्थतायां अभावाद्

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्* ॥ १ ॥

दर्शनेन कश्चित्†दर्थो गृहीतः ‡स्पर्शनेनापि सोर्थो गृह्यते यमहमद्राक्षं चक्षुषा तं स्पर्शनेनापि स्पृशामीति यं चास्पार्क्षं स्पर्शनेन तं चक्षुषा पश्यामीति । एकविषयौ§ चेमौ प्रत्ययावेककर्तृकौ प्रतिसन्धीयेते¶ न च संघातकर्तृकौ नेन्द्रियेणैककर्तृकौ । तद्योसौ चक्षुषा त्वगिन्द्रियेण चैकार्थस्य ग्रहीता भिन्ननिमित्तावनन्यकर्तृकौ¶ प्रत्ययौ समानविषयौ प्रतिसन्दधाति सोर्थान्तरभूत आत्मा । कथं पुनर्नेन्द्रियेणैककर्तृकौ इन्द्रियं खलु **स्वस्वविषयग्रहणमनन्यकर्तृकं प्रतिसन्धातुमर्हति नेन्द्रियान्तरस्य विषयान्तरग्रहणमिति । कथं न संघातकर्तृकौ एकः खल्वयं भिन्ननिमित्तौ स्वात्मकर्तृकौ प्रतिसंहितौ वेदयते न संघातः । कस्मात् अनिवृत्तं हि संघाते प्रत्येकं विषयन्तरग्रहणस्याप्रतिसंधानमिन्द्रियान्तरेणेति ।

मुख्यवृत्तेः प्रदर्शितदिशा ऽवश्यकत्वेनात्मा नास्तीति कथनानुपपत्तिः। एवं नास्तित्वे साध्ये ऽजातत्वादिति हेतुः पक्षस्यास्वीकारे ऽसिद्धः स्वीकारे च तेनैव व्यभिचरितः । वस्तुधर्मत्वाज्जननाभावस्य निराश्रयस्य तस्यानुपपत्तेः । असत्त्वरूपत्वे साध्याव्यतिरेकः । अकारणकत्वरूपत्वे सति धर्मिण्यकारणकताया नित्यत्वसाधकतया विरुद्धः । एवमन्येषु निर्हेतुकत्वादित्यादिषु धेतुषु दोषा अनुसंधेयाः। यत्तु पदत्वं नार्थवत्त्वव्याप्यं शून्यतमःशब्दादौ व्यभिचारादिति । तच्च । शून्यशब्देनाभावाश्रयस्य द्रव्यादेस्तमःशब्देन तेजःसंयोगाभाववद्द्रव्यस्याभिधानादव्यभिचारात् । शशविषाणवदिति दृष्टान्तो ऽप्यसिद्धः । शशविषाणयोः पृथक्प्रसिद्धत्वात्सामान्यतो विषाणमात्रे शशसम्बन्धस्यापि कस्य चित्सुवचत्वेन शशकार्यताया अन्यत्र दृष्टाया एव विषाणे प्रतिषेद्धव्यत्वेनात्यन्तासतः प्रतिषेधविषयत्वे दृष्टान्ताभावात् । अनुपलब्धेरिति हेतुरपि पूर्ववत्यक्षासत्त्वे ऽसिद्धः सत्त्वे च बाधितः प्रत्यक्षत्वाच्चात्मनो ऽहमिति ज्ञानेन बाधितः । यत्तु रूपादिविषयत्वमहंप्रत्ययस्येति तच्च । अहं रूपमिति प्रतीतेरभावात् । गौरो ऽहमिति प्रतीतेस्तद्विषयत्वादन्यथा मम रूपमिति प्रतीत्यनुपपत्तेः । रूपादिस्कन्धवाचकशब्दविषयव्यतिरिक्तवाचक आत्मशब्दो रूपादिभ्यो ऽन्यत्वे सत्येकशब्दत्वाद् घटशब्दवदित्यनुमानं चात्मास्तितायां साधकम् । यत्तु जीवच्छरीरं निरात्मकं सत्त्वाद् घटवदिति प्रत्यनुमानं तत्रात्मानुपकारकत्वं चेत्साध्यं दृष्टान्तविकलता । शरीरभेदः शरीरावृत्तित्वं वा चेत्सिद्धसाधनम् । शरीरसंबन्धसामान्याभावश्चेद् दृष्टान्तहानिः घटादावपि तत्संबन्धात् । अथात्मशब्दं पक्षीकृत्यानित्यवाचकत्वं वर्णात्मकत्वेन साधयेत्तर्हि नित्यशब्दादौ व्यभिचार इत्येवादिक् ।

* भावस्य भवित्रपेक्षत्वाच्चेति सूत्रार्थः । न्या॰ वा॰ । दर्शनस्पर्शनक्रिययोर्निराधारयोरनुपपत्तेरिति भावः । † यावदर्थ इति २ । ५ ।

‡ स्पर्शनेनापि तं स्पृशामि स्पर्शनेन यावदर्थो गृहीतः चक्षुषा तं पश्यामीति २ पु॰ ।

§ न च दर्शनादे रूपादिमात्रविषयकत्वेनैकविषयत्वमसिद्धं रूपाग्रहणे ऽपि तदाश्रयग्रहणस्य नीलाद्युपरिस्थितस्फटिकादौ रात्रौ बलाकागतरूपाग्रहणे ऽपि तत्प्रत्यक्षस्य जायमानत्वेन घटादे रूपादिभ्यो व्यतिरेकसिद्धेः ।

¶ अनुव्यवसायेनैककर्तृत्वेन दर्शनस्पर्शनयोर्विषयीकरणात्संघातस्य नानात्वेनैकत्वाभावादेकस्येन्द्रियस्य द्विविधविषयग्रहणासामर्थ्यात्सामर्थ्याभ्युपगमे चेन्द्रियान्तरवैयर्थ्यप्रसङ्गादिति भावः ।

¶ एककर्तृकाविति २ । ५ । ** स्वं स्वमिति १ । ४ ।

न विषयव्यवस्थानात् ॥ २ ॥

न देहादिसंघातादन्यश्चेतनः । कस्माद्विषयव्यवस्थानात् । व्यवस्थितविषयाणीन्द्रियाणि चक्षुष्यसति रूपं न गृह्यते सति च गृह्यते । यच्च यस्मिन्नसति न भवति सति भवति तस्य तदिति विज्ञायते । तस्माद्रूपग्रहणं चक्षुषः चक्षू रूपं पश्यति । एवं घ्राणादिष्वपीति* । तानीन्द्रियाणीमानि स्वस्वविषयग्रहणाच्चेतनानि इन्द्रियाणां भावाभावयोर्विषयग्रहणस्य तथाभावात्† । एवं सति किमन्येन चेतनेन ।

सन्दिग्धत्वादहेतुः‡ । यो ऽयमिन्द्रियाणां भावाभावयोर्विषयग्रहणस्य तथाभावः स किं (मयं) चेतनत्वादाहो स्विच्चेतनोपकरणानां ग्रहणनिमित्तत्वादिति सन्दिह्यते । चेतनोपकरणत्वे ऽपीन्द्रियाणां ग्रहणनिमित्तत्वाद्भवितुमर्हति । यच्चोक्तं विषयव्यवस्थानादिति ।

तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः ॥ ३ ॥

यदि खल्वयं§ कमिन्द्रियमव्यवस्थितविषयं सर्वज्ञं सर्वविषयग्राहि चेतनं स्यात् कथंचतो ऽन्यं चेतनमनुमातुं शक्नुयात् । यस्मात्तु व्यवस्थितविषयाणीन्द्रियाणि तस्मात्तेभ्यो ऽन्यश्चेतनः सर्वज्ञः सर्वविषयग्राही§ विषयव्यवस्थितिमतीतेनुमीयते‖ । तचेदं प्रत्यभिज्ञानमप्रत्याख्येयं चेतनवृत्तमुदाहियते । रूपदर्शी खल्वयं रसं गन्धं वा पूर्वगृहीतमनुमिनोति । गन्धप्रतिवेदी च रूपरसावनुमिनोति एवं विषयशेषेपि वाच्यम् । रूपं दृष्ट्वा गन्धं जिघ्रति घ्रात्वा च गन्धं रूपं पश्यति । तदेवमनियतपर्यायं¶ सर्वविषयग्रहणमेकचेतनाधिकरणमनन्य-

---

* घ्राणं जिघ्रतीति २ ।

† यद्भावाभावानुविधायिनौ ज्ञानभावाभावौ तच्चेतनमिन्द्रियभावाभावानुविधा[illegible] तावेतावितिं तदेव चेतनमित्यर्थः । ता· टी· ।

‡ सिद्धान्तभाष्यं संदिग्धत्वादहेतुः । अनन्यथासिद्धान्वयव्यतिरेकौ कारणत्वमात्रे प्रमाणं न तु न कर्ता चेतनश्चेतनं करणमित्यत्रेत्यर्थः । ता· टी· ।

( ) अयमिति नास्ति २ । ४ ।

§ सर्वेषामिन्द्रियान्तराणां च ये विषयास्तद्ग्राही । इन्द्रियान्तराणि च पुनर्व्यवस्थितविषयाणि । तेनार्वाग्दृगपि सर्वज्ञ इत्यादि सिद्धम् । ता· टी· ।

‖ अयं च व्यतिरेकी हेतुः । आत्मा चेतनः स्वतन्त्रत्वे सत्यव्यवस्थानात् । यो ह्यस्वतन्त्रः व्यवस्थितश्च न स चेतनो यथा घटादिस्तथा च चक्षुरादि तस्माच्च चेतनमिति।

¶ अनियतक्रममित्यर्थः । ता· टी· ।

कर्तृकं प्रतिसन्धत्ते प्रत्यक्षानुमानागमसंशयान् प्रत्ययांश्च नानाविषयान्*स्वात्मकर्तृकान् प्रतिसंदधाति प्रतिसन्धाय वेदयते। सर्वविषयं† च शास्त्रं प्रतिपद्यते अर्थमविषयभूतं श्रोत्रस्य क्रमभाविनो वर्णाञ्श्रुत्वा पदवाक्यभावेन‡ प्रतिसन्धाय शब्दार्थव्यवस्थां च बुध्यमानो ऽनेकविषयमर्थजातमग्रहणीयमेकैकेनेन्द्रियेण गृह्णाति। सेयं सर्वज्ञस्य ज्ञेयाव्यवस्था ऽनुपदं न शक्या परिक्रमितुम्। आकृतिमात्रं तूदाहृतम्। तच्च यदुक्तमिन्द्रियचैतन्ये सति किमन्येन चेतनेन तदयुक्तं भवति। इतश्च देहादिव्यतिरिक्त आत्मा न देहादिसंघातमात्रम्।

शरीरदाहे पातकाभावात्§ ॥ ४ ॥

शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासंघातः प्राणिभूतो गृह्यते। प्राणिभूतं शरीरं दहतः प्राणिहिंसाकृतपापं पातकमित्युच्यते। तस्याभावः तत्फलेन कर्तुरसंबन्धात्। अकर्तुश्च संबन्धात्॥ शरीरेन्द्रियबुद्धिवेदनाप्रबन्धेन¶ खल्वन्यः सङ्घात उत्पद्यते ऽन्यो निरुध्यते। उत्पादनिरोधसन्ततिभूतः प्रबन्धो नान्यत्वं बाधते देहादिसङ्घातस्यान्यत्वाधिष्ठानत्वात्।। न्यत्वाधिष्ठानो** ह्यसौ प्रख्यायतइति††। एवं सति यो देहादिसंघातः‡‡प्राणिभूतो हिंसां करोति नासौ हिंसाफलेन संबध्यते यश्च संबध्यते न तेन हिंसा कृता। तदेवं सत्त्वभेदे कृतहानमकृताभ्यागमः प्रसज्यते। सति च सत्त्वोत्पादे§§ सत्त्वनि-

---

* विषयादिति २। † सर्वार्थविषयमिति। ३। ४। ‡ पदवाक्यभावमिति २। ५।

§ प्राणातिपाते पातकाभावप्रसङ्गादित्यर्थः। अयं च भूतचैतनिकानां नानिष्टप्रसङ्गस्तथा ऽपि शाक्यान् प्रति द्रष्टव्यः। एवं च न बुद्धिरात्मेति वक्तव्ये देहादिग्रहणं विचित्राभिसंधित्वात्पुंसां यदि कश्चिद् भूतचैतनिकः प्राणातिपातकृतं पातकमिच्छेत्तं प्रति दूषणं भविष्यतीत्येवमर्थमिति मन्तव्यम्। ता॰ टी॰।

॥ शास्त्रचोदितं फलमनुष्ठातरीत्युत्सर्गो यत्र पुनः शास्त्रमन्यस्याह यथा श्राद्धे वैश्वानरीयेष्ट्यादौ च तत्र भवतु पुत्रकृतस्य श्राद्धस्य पितृगामि फलं पितृकृताया वा जातेष्टेः पुत्रगामि फलमिति भावः। ता॰ टी॰।

¶ प्रबन्धेनेति २। ५। ** अनन्यत्वाधिष्ठानइति २।

†† तदिदं सूत्रं यस्यात्मा नास्ति तस्यायं दोष इति प्रतिपादनार्थं न साधनार्थमिति। न्या॰ वा॰।

‡‡ देहादेरुपचयापचयाभ्यामन्यत्वस्य प्रत्यक्षसिद्धत्वेन तदघटितसमुदायस्य भेदात्।

§§ सत्त्वं चेतन आत्मा तस्योत्पादे नाशे वा देहचैतन्यपक्षे देहनाशादेव तद्गतधर्मादीनां नाशे स्थिरस्यात्मनो ऽभावाद्देहान्तरोत्पादो धर्मादिनिमित्तक इति वक्तुं न शक्यते। ततश्च मुक्त्यर्थो ब्रह्मचर्यादिर्नोपपद्यते। देहस्य सत्तादशायां मुक्तेरसंभवाद्देहे स्वत एव मुक्तत्वाद्देहान्तरोत्पादस्य चैतत्कृतकर्मानिमित्तकत्वादेतत्कृतकर्मणा तत्प्रतिबन्धासंभवादिति भावः।

रोधे चाकर्मनिमित्तः सत्त्वसर्गः प्राप्नोति तच्च मुक्त्यर्थो ब्रह्मचर्यवासो न स्यात्। तद्यदि देहादिसङ्घातमात्रं सत्त्वं स्याच् शरीरदाहे पातकं न भवेत्। अनिष्टं चैतत् तस्माद्देहादिसङ्घातव्यतिरिक्त आत्मा नित्य इति ।

तदभावः सात्मकप्रदाहेपि तन्नित्यत्वात् ॥ ५ ॥

यस्यापि नित्येनात्मना सात्मकं शरीरं दह्यते तस्यापि शरीरदाहे पातकं न भवेद्वृश्चुः । कस्मान्नित्यत्वादात्मनः । न जातु कश्चिन्नित्यं हिंसितुमर्हति अथ हिंस्यते नित्यत्वमस्य न भवति । सेयमेकस्मिन्पक्षे हिंसा निष्फला ऽन्यस्मिंस्त्वनुपपन्नेति ।

न कार्याश्रयकर्तृवधात्* ॥ ६ ॥

न ब्रूमो नित्यस्य सत्त्वस्य वधो हिंसा अपि त्वनुच्छित्तिधर्मकस्य सत्त्वस्य कार्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्तृणामिन्द्रियाणामुपघातः पीडा वैकल्यलक्षणः प्रबन्धोच्छेदो वा प्रमापणलक्षणो वा वधो हिंसेति । कार्यं तु सुखदुःखसंवेदनं तस्या†यतनमधिष्ठानमाश्रयः शरीरं कार्याश्रयस्य शरीरस्य स्वविषयोपलब्धेश्च कर्तृणामिन्द्रियाणां वधो हिंसा न नित्यस्यात्मनः । तच्च यदुक्तं तदभावः सात्मकप्रदाहेपि तन्नित्यत्वादित्येतदयुक्तम्। यस्य सत्त्वोच्छेदो हिंसा तस्य कृतहानमकृताभ्यागमश्चेति दोषः । एतावच्चैत‡त्स्यात् सत्त्वोच्छेदो वा हिंसानुच्छित्तिधर्मकस्य सत्त्वस्य कार्याश्रयकर्तृवधो वा न कल्पान्तरमस्ति । सत्त्वोच्छेदश्च प्रतिषिद्धः तच्च किमन्यच्छेषं यथाभूतमिति । अथ वा कार्याश्रयकर्तृवधादिति कार्याश्रयो देहेन्द्रियबुद्धिसङ्घातो नित्यस्यात्मनस्तच्च सुखदुःखप्रतिसंवेदनं तस्याधिष्ठानमाश्रयः तदायतनं तद्भवति न ततोन्यदिति स एव कर्ता । तन्निमित्ता हि सुखदुःखसंवेदनस्य निर्वृत्तिः न तमन्तरेणेति । तस्य वध उपघातः पीडा प्रमापणं वा हिंसा न नित्यत्वेनात्मोच्छेदः । तच्च यदुक्तं तदभावः सात्मकप्रदाहेपि§ तन्नित्यत्वादेतन्नेति । कृतश्च देहादिव्यतिरिक्त आत्मा ।

---

* तत्र कार्याश्रयशब्देन शरीरमुच्यते तच्चिमित्तत्वादुपभोगस्येति । कर्तृणीन्द्रियाणि तत्साधनत्वात् । अथ वा समानाधिकरणसमासाच्छरीरमेव कार्याश्रयकर्तृशब्दाभ्यामुच्यते । न्या. वा. । एवं च तदवच्छेदकशरीरतदुपकरणेन्द्रियादिविनाशजनितदुःखसमवायित्वादात्मनो नित्यत्वे ऽपि तच्छन्तुः प्रत्यवाय उपपद्यते अतिरिक्तचेतनानभ्युपगमे तु शरीरान्तरसमवेतदुःखोत्पादकशरीरान्तरविनाशे सर्वनिमित्तशरीरस्य तत्प्रत्यवायजनितफलोपभोक्तृत्वं कृतनाशाकृताभ्यागमप्रसङ्गादनुपपन्नमिति भावः। † स्याधिष्ठानमिति २।५। ‡ एतावच्च तत्स्यादिति २। § २ पुस्तके ऽपिर्नास्ति ।

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात्* ॥ ७ ॥

पूर्वपरयोर्विज्ञानयोरेकविषये प्रतिसन्धिज्ञानं प्रत्यभिज्ञानं तमेवैतर्हि पश्यामि यमज्ञासिषं स एवायमर्थ इति सव्येन चक्षुषा दृष्ट†मथेतरेणापि चक्षुषा प्रत्यभिज्ञानाद् यमद्राक्षं तमेवैतर्हि पश्यामीति । इन्द्रियचैतन्ये तु नान्यदृष्टमन्यः प्रत्यभिजानातीति प्रत्यभिज्ञानुपपत्तिः‡ । §अस्ति त्विदं प्रत्यभिज्ञानं तस्मादिन्द्रियव्यतिरिक्तश्चेतनः ।

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ॥ ८ ॥

‖एकमिदं चक्षुर्मध्ये नासास्थिव्यवहितं तस्यान्तौ गृह्यमाणौ द्वित्वाभिमानं प्रयोजयतो मध्यव्यवहितस्य दीर्घस्येव ।

एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥ ९ ॥

एकस्मिन्नुपहते चोद्धृते वा चक्षुषि द्वितीयमवतिष्ठते चक्षुर्विषयग्रहणलिङ्गं तस्मादेकस्य व्यवधानानुपपत्तिः ।

अवयवनाशे ऽप्यवयव्युपलब्धेरहेतुः ॥ १० ॥

एकविनाशे द्वितीयाविनाशादित्यहेतुः । कस्माद् वृक्षस्य हि कासु चिच्छाखासु छिन्नासूपलभ्यतएव वृक्षः ।

दृष्टान्तविरोधादप्रतिषेधः ॥ ११ ॥**

---

* पूर्वप्रकरणेन शरीराद्भेदे सिद्धे इन्द्रियभेदप्रतिपादनार्थमिदं प्रकरणमिति के चित् । पूर्वप्रकरणेनैव तस्यापि सिद्धत्वात्समुच्चयार्थमित्यन्ये । समुच्चीयमानहेतोः पूर्वहेत्वपेक्षया ऽभेदादिदमपि न युक्तमिति इन्द्रियगतद्वित्वनिराकरणार्थमित्यपरे । सव्येन चक्षुषा दृष्टं वस्तु नष्टे ऽपि तस्मिन्वामेन प्रत्यभिजानातीति चक्षुरेकम् । द्वित्वपक्षे ऽणोर्मनसो नेत्रद्वयेन संयोगस्य युगपदसंभवादुभयकरणकैककालिकप्रत्यक्षासंभवः । मनसा ऽसंयुक्तस्यैकस्य प्रत्यक्षे सामर्थ्यकल्पनायामपरस्यापि तथैवास्त्विति मनःकल्पनानुपयोगः । आत्मसंयोगस्य सदातनत्वेन मनःसंयोगस्यैवाव्यवहितप्राक्कालिकव्यापाररूपतया तद्ग्राहित्वे करणत्वानुपपत्तिश्च । इन्द्रियपञ्चत्वप्रतिपादकप्रकरणविरोधश्चेति । † दृष्टस्येतरेणाऽपीति २ ५ । ‡ प्रत्यभिज्ञानानुपपत्तिरिति २ । ५ ।

§ अस्त्वेदमिति क चित्पाठः ।

‖ एकमिदं द्रव्यं द्व्यधिष्ठानमभिन्नम् । को ऽधिष्ठानार्थः तैजसस्य चक्षुषः पार्थिवेन कृष्णसारेण उपकारंविकारभेदानुविधानम् । यस्मात् कृष्णसारे उपक्रियमाणे उपक्रियते विक्रियमाणे विक्रियते तस्मादस्य कृष्णसारमधिष्ठानमुच्यते । न्या॰ वा॰ ।

¶ विभक्तिरहितः सर्वत्र पाठः ।

** अत्र भाष्यमते चक्षुरिन्द्रिये द्वित्वम् । एकेन गृहीतस्यापरेण प्रत्यभिज्ञानाच्च ताभ्यां करणाभ्यां भिन्नः स्थिर आत्मा सिद्ध्यति । अत्रैकत्वं पूर्वपक्षिणः द्वित्वं तु काल्पनिकम् । कल्पनायां च व्यवधानं निमित्तम् । एकविनाशे ऽपीति सूत्रं भेदसाधकम् । तत्रावयवनाशेपीत्याक्षेपः । दृष्टान्तविरोधादिति तत्परिहारः । तस्माच्चक्षुरिन्द्रियं द्वित्ववदिति सिद्ध्यति । वार्तिकमते तु

न कारणद्रव्यविभागे कार्यद्रव्यमवतिष्ठते नित्यत्वप्रसङ्गात् । बहुष्ववयवेषु यस्य कारणानि विभक्तानि तस्य विनाशः येषां कारणान्यविभक्तानि तानि अवतिष्ठन्ते । अथ वा दृश्यमानार्थविरोधो दृष्टान्तविरोधः । मृतस्य हि शिरःकपाले द्वावघटौ नासास्थिव्यवहितौ चक्षुषः स्थाने भेदेन गृह्येते न चैतदेकस्मिन्नासास्थिव्यवहिते संभवति । अथ चैकविनाशस्याऽनियमाद् द्वावि-मावर्थौ तौ च पृथगावरणोपघातौ अनुमीयेते विभिन्नाविति । अवपीडनाच्चैकस्य चक्षुषो रश्मिविषयसन्निकर्षस्य भेदाद्दृश्यभेद इव गृह्यते तच्चैकत्वे विरुध्यते । अवपीडननिवृत्तौ चाभिन्नप्रतिसंधानमिति तस्मादेकस्य व्यवधानानुपपत्तिः । अनुमीयते* चायं देहादिसंघातव्यतिरिक्तश्चेतन इति ।

इन्द्रियान्तरविकारात्† ॥ १२ ॥

कस्य चिदम्लफलस्य गृहीततद्रससाहचर्ये रूपे गन्धे वा केन चिदिन्द्रियेण गृह्यमाणे रसनस्येन्द्रियान्तरस्य विकारः रसानुस्मृतौ रसगार्ध्यप्रवर्तितौ दन्तोदकसंप्लवभूतौ गृह्यते । तस्येन्द्रियचैतन्ये ऽनुपपत्तिः नान्यदृष्टमन्यः स्मरति ।

न स्मृतेः स्मर्त्तव्यविषयत्वात्§ ॥ १३ ॥

स्मृतिर्नाम धर्मो निमित्तादुत्पद्यते तस्याः स्मर्तव्यो विषयः तत्कृत इन्द्रियान्तरविकारो नात्मकृत इति ।

चक्षुरेकत्वं सिद्धान्तः । तत्रोपपत्तिर्वार्थिकैव । तस्यैव द्वित्वेनोपलम्भोपपादकं नैकस्मिंश्चेति सूत्रम् । अधिष्ठानं गोलकं भिन्नमिति प्रतिपादनाय एकविनाशे ऽपीत्यादि सूत्रम् । गोलकस्य तेन भिन्नत्वे सिद्धेपि नेन्द्रियभेदः इन्द्रियस्य गोलकादभेदात् । अवयवनाशे ऽपीत्यादि परिहारान्तरम् । ततश्च गोलकद्वयाधिष्ठितैकचक्षुरवयवनाशेप्यवयविनो ऽनाशाद्दर्शनोपपत्तेर्न द्वित्वसिद्धिरिति भावः । अस्योत्तरं दृष्टान्तविरोधादिति । ततश्च कारणद्रव्यनाशे कार्यद्रव्यनाशावश्यकत्वेन नावयविस्थितिः संभवतीति भावः । ततश्च गोलकमात्रं भिन्नमिन्द्रियं त्वेकमेव तच्चानष्टमेवेति ।

* तदेवं प्रतिसंधानद्वारेणात्मनि प्रत्यक्षं प्रमाणयित्वा ऽनुमानमिदानीं प्रमाणयति । ता॰ टी॰ ।

† इन्द्रियान्तरविकारेण तत्कारणीभूता ऽनुमीयमाना स्मृतिरात्मानमनुमापयतीति विकारस्यात्मावृत्तित्वे ऽपि नानुपपत्तिरिति बोध्यम् । ‡ रसगन्धप्रवर्तित इति २ ।

§ स्मृतिरात्मानं कारणत्वेन गमयेद्विषयत्वेन वा । न तावत्कारणत्वेन तस्याः संस्कारकारणकत्वाद् न विषयत्वेन तस्याः स्मर्तव्यविषयत्वात् स्मृताच्च तस्मादिन्द्रियविकारोत्पत्तेरित्यर्थः । ता॰ टी॰ ।

तदात्मगुणसद्भावादप्रतिषेधः* ॥ १४ ॥

तस्या आत्मगुणत्वे सति सद्भावादप्रतिषेध आत्मनः । यदि स्मृतिरात्मगुणः एवं सति स्मृतिरुपपद्यते नान्यदृष्टमन्यः स्मरतीति । इन्द्रियचैतन्ये† तु नानाकर्तृकाणां विषयग्रहणानामप्रतिसंधानं प्रतिसंधाने वा विषयव्यवस्थानुपपत्तिः । एकस्तु चेतनो ऽनेकार्थदर्शी भिन्ननिमित्तः । पूर्वदृष्टमर्थं स्मरतीति एकस्यानेकार्थदर्शिनो दर्शनप्रतिसंधानात् स्मृतेरात्मगुणत्वे सति सद्भावः विपर्यये चानुपपत्तिः । स्मृत्याश्रयाः प्राणभृतां सर्वे व्यवहाराः । आत्मलिङ्गमुदाहरणमात्रमिन्द्रियान्तरविकार इति ।

अपरिसंख्यानाच्च स्मृतिविषयस्य‡ ॥ १५ ॥

अपरिसंख्याय च स्मृतिविषयमिदमुच्यते न स्मृतेः स्मर्तव्यविषयत्वादिति । येयं स्मृतिरगृह्यमाणे ऽर्थे ऽज्ञासिषमहममुमर्थमिति यतस्या ज्ञातृज्ञानविशिष्टः पूर्वज्ञातोर्थो विषयो नार्थमात्रं ज्ञातवानहममुमर्थम् असावर्थो मया ज्ञातः अस्मिन्नर्थे मम ज्ञानमभूदिति । चतुर्विधमेतद्वाक्यं स्मृतिविषयज्ञापकं समानार्थम् । सर्वत्र खलु ज्ञाता ज्ञानं ज्ञेयं च गृह्यते । अथ प्रत्यक्षे ऽर्थे या स्मृतिस्तया चीर्णि ज्ञानानि एकस्मिन्नर्थे प्रतिसन्धीयन्ते समानकर्तृकाणि न नानाकर्तृकाणि नाकर्तृकाणि किं तर्ह्येककर्तृकाणि । अद्राक्षममुमर्थं यमेवैतर्हि पश्यामि अद्राक्षमिति दर्शनं दर्शनसंविच्च न खल्वसंविदिते स्वे दर्शने स्यादेतदद्राक्षमिति । ते खल्वेते द्वे ज्ञाने । यमेवैतर्हि पश्यामीति तृतीयं ज्ञानमेवमेको ऽर्थस्त्रिभिर्ज्ञानैर्युज्यमानो नाकर्तृको न नानाकर्तृकः किं तर्ह्येककर्तृक इति । सेयं स्मृतिविषयो ऽपरिसंख्यायमानो§ विद्यमानः प्रज्ञातोर्थः‖ प्रतिषिध्यते नास्त्यात्मा स्मृतेः स्मर्तव्यविषयत्वादिति । न चेदं स्मृतिमात्रं स्मर्तव्यमात्रविषयम्¶ इदं

---

* न स्मर्तव्यमात्रात् स्मृतिरुपपद्यते यदा ऽयमतीतमर्थं स्मरति तदा स्मृतिरनाधारा प्राप्नोति न चेयमनाधारा युक्ता गुणत्वात् । न चेयमिन्द्रिये संभवत्यननुभूतत्वात् । न विषये तस्यासत्त्वात् । न शरीरे शरीरगुणानां प्रत्यक्षाणामात्मपरात्मप्रत्यक्षत्वात् । न चेयं नास्ति न चात्मन्यसत्यस्याः सद्भावो युक्त इति । न्या· वा· ।

† २ । ५ । ४ पुस्तकेषु इन्द्रियचैतन्ये तु इति दृश्यते ।

‡ पूर्वपक्षिणो ऽवधारणं खण्डयति । ता· टी·

§ ऽपरिसंख्येयमान इति ५ पाठान्तरम् । ‖ प्रज्ञानो ऽर्थ इति २ ।

¶ स्मर्तव्यमात्रविषयं वेति २ । ४ । ५ ।

खलु ज्ञानप्रतिसन्धानवत्स्मृतिप्रतिसन्धानमेकस्य सर्वविषयत्वात्। एकोयं ज्ञाता सर्वविषयः स्वानि ज्ञानानि प्रतिसन्धत्ते अमुमर्थं ज्ञास्यामि अमुमर्थं विजानाम्यमुमर्थमज्ञासिषममुमर्थं जिज्ञासमानश्चिरमज्ञात्वा ऽध्यवस्यत्यज्ञासिषमिति। एवं स्मृतिमपि त्रिकालविशिष्टां सुस्मूर्षाविशिष्टां च प्रतिसन्धत्ते। संस्कारसन्ततिमात्रे तु सत्त्वे उत्पद्योत्पद्य संस्कारास्तिरोभवन्ति स नास्त्येकोपि संस्कारो यस्त्रिकालविशिष्टं ज्ञानं स्मृतिं चानुभवेत्। न चानुभवमन्तरेण ज्ञानस्य स्मृतेश्च प्रतिसन्धानमहं ममेति चोत्पद्यते देहान्तरवत्। अतोनुमीयते अस्त्येकः सर्वविषयः प्रतिदेहं स्वज्ञानप्रबन्धं स्मृतिप्रबन्धं च प्रतिसन्धत्ते इति। यस्य देहान्तरेषु वृत्तेरभावान्न प्रतिसन्धानं भवतीति।

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥ १६ ॥

न (देहादि*) संघातव्यतिरिक्त आत्मा। कस्माद् आत्मप्रतिपत्तिहेतूनां मनसि सम्भवात्। दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनामात्म†प्रतिपादकानां हेतूनां मनसि सम्भवो यतः मनो हि सर्वविषयमिति तस्मान्न शरीरेन्द्रियमनो (बुद्धि‡संघात) व्यतिरिक्त आत्मेति।

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥ १७ ॥

ज्ञातुः खलु ज्ञानसाधनान्युपपद्यन्ते चक्षुषा पश्यति घ्राणेन जिघ्रति स्पर्शनेन स्पृशति §(एवं मन्तुः सर्वविषयस्य मतिसाधनमन्तःकरणभूतं सर्वविषयं विद्यते येनायं मन्यतइति।) एवं सति ज्ञातर्यात्मसंज्ञा न मृष्यते मनःसंज्ञाभ्यनुज्ञायते। मनसि च मनःसंज्ञा न मृष्यते मतिसाधनं‖ त्वभ्यनुज्ञायते। तदिदं संज्ञाभेदमात्रं नार्थे¶ विवाद इति। प्रत्याख्याने वा सर्वेन्द्रियविलोपप्रस†ङ्गः। अथ मन्तुः सर्वविषयस्य मतिसाधनं** सर्वविषयं प्रत्याख्यायते नास्तीति एवं रूपादिविषयग्रहणसाधनान्यपि न सन्ति इति सर्वेन्द्रियविषयलोपः†† प्रसज्यतइति।

नियमश्च निरनुमानः ॥ १८ ॥

---

* ( ) इदं २ पु· नास्ति।
‡ ( ) २ पु· नास्ति। § ( ) एवं मन्तुः सर्वविषयं प्रतिसाधनं मनःकरणभूतमिति २।
‖ मतिसाधनसंज्ञा मृष्यते।
¶ नात्मनि विवाद इति २।
** प्रतिसाधनमिति २।
†† सर्वेन्द्रियविलोपइति १। ४। ५ इत्यधिकं २ पु·।
† आत्मप्रतिपादकानां मनसि सम्भवादिति १
† सर्वेन्द्रियविलोपइति १। ४। ५ इत्यधिकं २ पु·।

योयं नियम इष्यते रूपादिग्रहणसाधनान्यस्य सन्ति मतिसाधनं सर्वविषयं नास्तीति। अयं नियमो निरनुमानो नाचानुमानमस्ति येन नियमं प्रतिपद्यामहइति। रूपादिभ्यश्च विषयान्तरं सुखादयस्तदुपलब्धौ करणान्तरसद्भावः। यथा चक्षुषा गन्धो न गृह्यतइति करणान्तरं घ्राणमेवं चक्षुर्घ्राणाभ्यां रसो न गृह्यत इति करणान्तरं रसनम् एवं शेषेष्वपि। तथा चक्षुरादिभिः सुखादयो न गृह्यन्तइति करणान्तरेण भवितव्यं तच्च ज्ञानायौगपद्यलिङ्गम्। यच्च सुखाद्युपलब्धौ करणं तच्च ज्ञानायौगपद्यलिङ्गं तस्येन्द्रियमिन्द्रियं प्रति सन्निधेरसन्निधेः न युगपज्ज्ञानान्युत्पद्यन्ते इति तच्च यदुक्तमात्मप्रतिपत्तिहेतूनां मनसि संभवादिति तदयुक्तम्। *किं पुनरयं देहादिसंघातादन्यो नित्य उतानित्य इति। कुतः संशयः उभयथा दृष्टत्वात् संशयः। विद्यमानमुभयथा भवति नित्यमनित्यं च। प्रतिपादिते चात्मसद्भावे† संशयानिवृत्तेरिति। आत्मसद्भावहेतुभिरेवास्य प्राग् देहभेदादवस्थानं‡ सिद्धमूर्ध्वमपि देहभेदादवतिष्ठते कुतः।

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य §हर्षभयशोकसंप्रतिपत्तेः ॥ १९ ॥

जातः खल्वयं कुमारको ऽस्मिन् जन्मन्यगृहीतेषु हर्षभयशोकहेतुषु हर्षभयशोकान् प्रतिपद्यते लिङ्गानुमेयान्‖। ते च स्मृत्यनुबन्धादुत्पद्यन्ते

---

* शास्त्रानुभूताभ्युदयनिःश्रेयसोपयोगिनं परलोकं विवक्षुः परीक्षाहेतुभूतं संशयमाह। ता॰ टी॰।

† आत्मसंभवे इति २।

‡ देहभेदादिति ल्यब्लोपे पञ्चमी बाल्यकौमारयौवनवार्धकदेहभेदमभिसमीक्ष्य प्रतिसंधानादस्यावस्थानं सिद्धमित्यर्थः। ता॰ टी॰।

§ जन्म निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिः संबन्धः। अभिप्रेतविषयकप्रार्थनाप्राप्तौ सुखानुभवो हर्षः। अनिष्टविषयसाधनोपनिपाते तज्जिहासोर्हानाशक्यता भयम्। दृष्टविषयवियोगे सति तत्याप्त्यशक्यप्रार्थना शोकः। तदनुभवः संप्रतिपत्तिः। एकविषयानेकविज्ञानोत्पादो ऽभ्यासः। प्रत्यक्षबुद्धिनिरोधे तदनुसंधानविषयः प्रत्ययः स्मृतिः। तदनुगृहीतस्तदनुसंधानविषयः प्रत्ययस्तद्भावविषयः प्रत्यभिज्ञानम्। अनुबन्धो भावनास्मृतिहेतुः संस्कारः। न्या॰ वा॰।

‖ स्मितरुदिते तयोर्लिङ्गे। शोकादिमदात्मवती बाल्यावस्था स्मितरुदितादिमत्त्वात्। बाल्यावस्था वयोधर्मो यौवनावस्थावत्। ततश्च शोकादिमदात्मवत्त्वेन स्मृतिवदात्मवत्त्वं तेन संस्कारवदात्मवत्त्वं तेन पूर्वानुभववदात्मवत्त्वं तेन पूर्वशरीरसंबन्धवदात्मवत्त्वं साध्यं सर्वत्र यौवनावस्था दृष्टान्तः।

नान्यथा। स्मृत्यनुबन्धश्च पूर्वाभ्यासमन्तरेण न भवति पूर्वाभ्यासश्च पूर्वजन्मनि सति नान्यथेति सिद्ध्यत्येतदवतिष्ठते अयमूर्द्धं शरीरभेदादिति ।

पद्मादिषु प्रबोधसंमीलनविकारवत्तद्विकारः* ॥ २० ॥

यथा पद्मादिष्वनित्येषु प्रबोधः सम्मीलनं विकारो भवति एवमनित्यस्यात्मनो हर्षभयशोकसंप्रतिपत्ति(र्विकारः†) स्यात्। हेत्वभावादयुक्तम्। अनेन हेतुना पद्मादिषु प्रबोधसंमीलनविकारवदनित्यस्यात्मनो हर्षादिसंप्रतिपत्तिरिति नाचोदाहरणसाधर्म्यात्साध्यसाधनं हेतुर्न वैधर्म्यादस्ति हेत्वभावात्। असंबद्धार्थैकमपार्थैकमुच्यते इति । दृष्टान्ताच्च हर्षादिनिमित्तस्यानिवृत्तिः या चेयमासेवितेषु विषयेषु हर्षादिसंप्रतिपत्तिः स्मृत्यनुबन्धकृता प्रत्यात्म गृह्यते सेयं पद्मादिसंमीलनदृष्टान्तेन न निवर्त्यते । यथा चेयं न निवर्तते तथा जातस्यापीति । क्रियाजातश्च पर्णविभागः‡ संयोगप्रबोधसंमीलने क्रियाहेतुश्च क्रियानुमेयः । गवं च सति§ किं दृष्टान्तेन प्रतिषिध्यते । अथ निर्निमित्तः पद्मादिषु प्रबोधसंमीलनविकार इति मतमेवमात्मनोपि हर्षादिसंप्रतिपत्तिरिति । तच्च ।

नोष्णशीतवर्षकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ॥२१॥

उष्णादिषु सत्सु भावादसत्स्वभावात्तन्निमित्ताः पञ्चभूतानुग्रहेण निर्वृत्तानां पद्मादीनां प्रबोधसंमीलनविकारा इति न निर्निमित्ताः । एवं हर्षादयोपि विकारा निमित्तादुद्भवितुमर्हन्ति न निमित्तमन्तरेण । न चान्यत्पूर्वाभ्यस्तस्मृत्यनुबन्धान्निमित्तमस्तीति । न चोत्पत्तिनिरोधकारणानुमानमात्मनो दृष्टान्तात्‖ । न हर्षादीनां निमित्तमन्तरेणोत्पत्तिः नोष्णादिवन्निमित्तान्तरोपादानं हर्षादीनां तस्मादयुक्तमेतत् । इतश्च नित्य आत्मा ।

---

* अनित्येऽपि विकारदर्शनादनेकान्त इति सूत्रार्थः । पद्मपत्रावयवविभागो विनश्यत्कार्यः प्रबोधः । पद्मपत्रावयवानामारब्धकार्याणां यत्पुनः परस्परेण प्राप्तयस्तत् संमीलनम् । न्या. वा. ।

† ( ) २ पु. नास्ति ।

‡ पर्णसंयोगविभाग इति ४ ।

§ सतीति २ नास्ति ।

‖ द्रव्यत्वे सति सर्वदा अमूर्तत्वादकारणक आत्मा आकाशवदित्यनुमानेनात्मनित्यत्वसिद्धौ दृष्टान्तमात्रेणोत्पत्तिविनाशकारणकल्पनं न युक्तमित्यर्थः। घटादीनामपि प्रथमक्षणे अमूर्तत्वाद् व्यभिचारवारणाय सर्वदेति ।

***प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् ॥ २२ ॥**

जातमात्रस्य वत्सस्य प्रवृत्तिलिङ्गः स्तन्याभिलाषो गृह्यते । स च नान्तरेणाहाराभ्यासम् । कथ मयुक्त्या दृश्यते हि शरीरिणां क्षुधा पीड्यमानानामाहाराभ्यासकृतात्स्मरणानुबन्धादाहाराभिलाषः । †न च पूर्वशरीराभ्यासमन्तरेणासौ जातमात्रस्योपपद्यते । तेनानुमीयते भूतपूर्वं शरीरं यत्रानेनाहारोभ्यस्त इति । स खल्वयमात्मा पूर्वशरीरात्प्रेत्य शरीरान्तरमापन्नः क्षुत्पीडितः पूर्वाभ्यस्तमाहारमनुस्मरन् स्तन्यमभिलषति । तस्मान्न देहभेदादात्मा भिद्यते भवत्येवोर्द्धं देहभेदादिति ।

अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ‡ ॥ २३ ॥

यथ खल्वयोऽभ्यासमन्तरेणायस्कान्तमुपसर्पति एवमाहाराभ्यासमन्तरेण बालः स्तन्यमभिलषति । किमिदमयसोऽयस्कान्ताभिसर्पणं§ निर्निमित्तमथ निमित्तादिति । निर्निमित्तं तावत् ।

नान्यत्र प्रवृत्त्यभावात् ॥ २४ ॥

यदि निर्निमित्तं लोष्ठादयोप्ययस्कान्तमुपसर्पेयुर्न जातु नियमे कारणमस्तीति । अथ निमित्तात्तत्केनोपलभ्यतइति । क्रियालिङ्गः क्रियाहेतुः क्रियानियमलिङ्गश्च क्रियाहेतुनियमः‖ । तेनान्यच प्रवृत्त्यभावः बालस्यापि नियतमुपसर्पणक्रियोपलभ्यते¶ न च स्तन्याभिलाषलिङ्गमन्यदाहाराभ्यासकृतात्स्मरणानुबन्धात् । निमित्तं दृष्टान्तेनोपपाद्यते न चासति निमित्ते कस्य चिदुत्पत्तिः । न च दृष्टान्तो दृष्टमभिलाषहेतुं बाधते तस्मा(दयसोऽय)स्का**न्ताभिगमनमदृष्टान्त इति । अयसः खल्वपि नान्यच प्रवृत्तिर्भवति न जात्वयो लोष्ट-

---

* किमर्थं पुनरिदं सूत्रमारभ्यते यदाऽयमर्थः पूर्वाभ्यस्तसूत्रेऽवगतः । सामान्यतोऽधिगतस्य विशेषज्ञापनार्थं सूत्रमित्यदोषः । न्या· वा· ।

† न च पूर्वशरीरमन्तरेणेति १ । ४ ।

‡ प्रवृत्तिमात्रस्यानैकान्तिकत्वज्ञापनार्थं सूत्रमिदम् । न्या· वा· । न पूर्वाभ्यस्तस्मृत्यनुबन्ध एव प्रवृत्तिकारणमयसोऽयस्कान्तोपसर्पणे तदभावात् । यदि च बालकस्य स्मृत्यनुबन्धो भवेज्जात्यन्धबधिरादयस्तज्जन्मानुभूतानिव रसस्पर्शगन्धादीन् जात्यन्तरानुभूतान् रूपशब्दादीनपि व्याचक्षीरंश्चित्यभिप्रायः । ता· टी· ।

§ अभिगमनमिति २ । ५ ।

¶ उपसर्पणं क्रियेोपलभ्यत इति ४ ।

‖ क्रियानियमहेतुनियम इति २ ।

** (.) अयस इति २ नास्ति ।

मुपसर्पति किंकृतोस्य* नियम इति यदि कारणनियमात्स च क्रियानियम-लिङ्गः† एवं बालस्यापि नियतविषयोभिलाषः कारणनियमाद्भवितुमर्हति । तच्च कारणमभ्यस्तस्मरणमन्यद्वेति दृष्टेन विशिष्यते । दृष्टो हि शरीरिणामभ्यस्त-स्मरणादाहाराभिलाषः‡ इति । इतश्च नित्य आत्मा । कस्मात् ।

वीतरागजन्मादर्शनात्§ ॥ २५ ॥

सरागो जायतइत्यर्थाद्आपद्यते । अयं जायमानो रागानुबद्धो जायते रागस्य पूर्वानुभूतविषयानुचिन्तनं योनिः । पूर्वानुभवश्च विषयाणामन्यस्मिन्¶ जन्मनि शरीरमन्तरेण नोपपद्यते । सोयमात्मा पूर्वशरीरानुभूतान् विषयान् अनुस्मरन् तेषु तेषु रज्यते तथा चायं द्वयोर्जन्मनोः प्रतिसंधिः एवं पूर्वश-रीरस्य पूर्वतरेण पूर्वतरस्य** पूर्वतमेनेत्यादिना ऽनादिश्चेतनस्य शरीरयोगः । अनादिश्च रागानुबन्ध इति सिद्धं नित्यत्वमिति । कथं पुनर्ज्ञायते पूर्वविषया-नुचिन्तनजनितो जातस्य रागो न पुनः ।

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः†† ॥ २६ ॥

यथोत्पत्तिधर्मकस्य द्रव्यस्य गुणाः कारणत उत्पद्यन्ते तथोत्पत्तिधर्म-कस्यात्मनो रागः कुतश्चिदुत्पद्यते । अचायमुदिता‡‡नुवादो निदर्शनार्थः ।

---

* किंकृतोऽस्यानियम इति ४ ।

† यदि कारणानियमः सर्वक्रियानियमलिङ्गः । यदि कारणानियमाः सर्वक्रियानियमलिङ्गा इति २ पु. ।

‡ यौवनाद्यवस्थायां हि चेतनस्य प्रवृत्तिः बीरादौ पूर्वाभ्यस्तस्मृत्यनुबन्ध-हेतुका प्रतीतेति बाल्यावस्थायामपि चेतनस्य तद्धेतुकैव भवितुमर्हति तेन हेतुना चेतनप्रवृत्तेः स्वाभाविकसंबन्धाद्गमाद् वन्हिनेव धूमस्य । एवं व्यवस्थिते यत्र स्मृतेः कार्यं दृश्यते तन्मात्रविषयैव बालस्य स्मृतिरनुमीयते नान्यत्र । न च य एकस्य स्मरति तेनापरमपि स्मर्तव्यमिति नियमहेतुरस्ति येन जात्यन्धबधिरादयो रूपादीनाचक्षीरन् । अदृष्टपरिपाकाद्बोधितस्य संस्कारस्य तन्नियमेन नियमोपपत्तेः । अद्यत्वेपि चानुभूतेषु कस्य चिदेव स्मरति न सर्वस्येति । ता. टी. ।

§ न च रागस्यादृष्टहेतुकत्वाच्चानुपपत्तिः । तावता ऽप्यदृष्टाश्रयतया तत्कारणकर्मकल्प-नायां पूर्वशरीरसंबन्धकल्पनोपपत्तेः । सूत्रस्यात्रैव तात्पर्यात् । ¶ पूर्वस्मिन् जन्मनीति ५ । पूर्वतरशरीरस्येति २ । ५ । ** अनैकान्तिकत्वप्रतिपादनार्थं सूत्रम् ।

†† उदितमिदं चोद्यमयस्कान्तदृष्टान्तचोद्येन तथापि तस्यानुवादो निद-र्शनार्थः पूर्वमयस्कान्तो निदर्शनमिदानीं घटादीनामुत्पद्यमानानां रूपादयो नि दर्शनमिति तदर्थ इत्यर्थः । ता. टी. ।

न संकल्पनिमित्तत्वाद्रागादीनाम् ॥ २७ ॥

न खलु सगुणद्रव्योत्पत्तिवदुत्पत्तिरात्मनो रागस्य च । कस्मात्सङ्कल्पनिमित्तत्वाद्रागादीनाम् । अयं खलु प्राणिनां विषयानासेवमानानां संकल्पजनितो रागो गृह्यते संकल्पश्च पूर्वानुभूतविषयानुचिन्तनयोनिः । तेनानुमीयते जातस्यापि पूर्वानुभूतार्थचिन्तनकृतो राग इति । आत्मोत्पादाधिकरणात्तु *रागोत्पत्तिर्भवन्ती सङ्कल्पादन्यस्मिन् रागकारणे सति वाच्या कार्यद्रव्यगुणवत् । न चात्मोत्पादः† सिद्धो नापि संकल्पादन्यद्रागकारणमस्ति । तस्मादयुक्तं सगुणद्रव्योत्पत्तिवत्तयोरुत्पत्तिरिति । अथापि संकल्पादन्यद्रागकारणं धर्माधर्मलक्षणमदृष्टमुपादीयते तथापि पूर्वशरीरयोगो ‡प्रत्याख्येयः । तच्च हि तस्य निर्वृत्तिः नास्मिन् जन्मनि । तन्मयत्वाद्राग§ इति विषयाभ्यासः खल्वयं भावनाहेतुः तन्मयत्वमुच्यतइति जातिविशेषाच्च रागविशेष इति । कर्म खल्विदं जातिविशेषनिर्वर्तकं तादात्म्यानाच्छब्दं विज्ञायते । तस्मादनुपपन्नं संकल्पादन्यद्रागकारणमिति । अनादिश्चेतनस्य शरीरयोग इत्युक्तं स्वकृतकर्मनिमित्तं चास्य शरीरं सुखदुःखाधिष्ठानं तत्परीक्ष्यते¶ किं घ्राणादिवदेकप्रकृतिकमुत नानाप्रकृतीति‖ । कुतः संशयः । विप्रतिपत्तेः** संशयः । पृथिव्यादीनि भूतानि संख्याविकल्पेन शरीरप्रकृतिरिति प्रतिजानतइति । किं तच्च तत्त्वम् ।

पार्थिवं गुणान्तरोपलब्धेः ॥ २८ ॥

तच्च मानुषं शरीरं पार्थिवम् । कस्माद् गुणान्तरोपलब्धेः । गन्धवती

---

* यथा चोत्पत्तिरिति २ । ५ । † आत्मोत्पादाधिकरणानान्त्विति २ ।

‡ अभ्युपेत्यादृष्टकारणत्वं रागादीनां पूर्वं परिहृतं परमार्थस्तु तन्मयत्वाद्राग इत्यर्थः । स्यादेतत् । यदि पूर्वाभ्यस्तस्मृत्यनुबन्धाद्रागद्वेषादीनामुत्पादो हन्त मनुष्यजन्मानन्तरं प्राप्तकरभभावस्य मनुष्यजन्मोचितानां भावनानामानन्त्यात्तदनुरूपा एवास्य रागादयो भवेयुर्न करभानुरूपाः करभजातेरस्य विजातीयजन्मसहस्रव्यवायादत आह । जातिविशेषाच्चेति । कर्मणः संस्कारोद्बोधकत्वात् करभत्वजात्यनुबद्धेन कर्मणा जन्मसहस्रव्यवहितापि करभभावनोद्बोध्यते नानन्तरापि मनुष्यभावना प्रायणाभिभूतेति भावः । ता॰ टी॰ ।

§ आत्मपरीक्षानन्तरं शरीरपरीक्षाया अवसरप्राप्तत्वादात्मना ऽनादिसंबन्धाच्च शरीरपरीक्षेति वार्तिकम् ।

‖ प्रकृतिकमिति २ । ५ ।

¶ विप्रतिपत्तेश्चेति २ ।

पृथिवी गन्धवच्च शरीरम् । अबादीनामगन्धत्वात् तत्प्रकृत्यगन्धं स्यात्* । न त्विदमबादिभिरसंपृक्तया पृथिव्यारब्धं चेष्टेन्द्रियार्थाश्रयभावेन कल्पते† इत्यतः पञ्चानां भूतानां संयोगे सति शरीरं भवति । भूतसंयोगो हि मिथः पञ्चानां न निषिद्ध इति । आप्यतैजसवायव्यानि लोकान्तरे शरीराणि तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र इति । स्थाल्यादिद्रव्यनिष्पत्तावपि निःसंशया‡ नाबादिसंयोगमन्तरेण निष्पत्तिरिति । पार्थिवाप्यतैजसं तद्गुणोपलब्धेः निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकं गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकं तइमे संदिग्धा हेतव इत्युपेक्षितवान्सूत्रकारः । कथं संदिग्धाः§ सति च प्रकृतिभावे भूतानां धर्मोपलब्धिरसति च संयोगाप्रतिषेधात्‖ सन्निहितानामिति । यथा स्थाल्यामुदकतेजोवाय्वाकाशानामिति । तदिदमनेकभूतप्रकृति शरीरमगन्धमरसमरूपमस्पर्शं च प्रकृत्यनुविधानात्स्यात् । न त्विदमित्थंभूतं तस्मात्पार्थिवं गुणान्तरोपलब्धेः ।

श्रुतिप्रामाण्याच्च ॥ २९ ॥

सूर्यं ते चक्षुर्गच्छतादित्यच्च मन्त्रे पृथिवीं ते शरीरमिति श्रूयते । तदिदं प्रकृतौ विकारस्य प्रलयाभिधानमिति । सूर्यं ते चक्षुः¶स्पृणोमि इत्यच्च मन्त्रान्तरे पृथिवीं ते शरीरं स्पृणोमीति* श्रूयते । सेयं कारणाद्विकारस्य† स्पृ-

---

* मानुषशरीरमेकात्मकं गन्धवत्त्वात्पार्थिवपरमाणुवदिति न्यायाकारः । अयमभिसंधिः । पृथिव्याप्यपरमाणू तावच्चैकं द्व्यणुकमारब्धुमर्हतः तयो रूपस्पर्शवत्त्वेन तदारम्भसंभवे ऽपि गन्धवत्त्वाभावप्रसङ्गात् । एकपार्थिवाणुसमवेतस्य गन्धस्यैकत्वेनानारम्भकत्वात् । नापि पार्थिवपरमाणुद्वयमेकश्च पाथसीयः परमाणुरित्यणूनामारम्भकत्वे गन्धवत्त्वोपपत्तिरिति वाच्यम् । परमाणूनां बहूनामनारम्भकत्वात् । तथा हि । त्रयः परमाणवो न कार्यद्रव्यमारभन्ते परमाणुत्वे सति बहुत्वसंख्यायुक्तत्वात् । घटोपगृहीतपरमाणुप्रचयवत् । आरम्भकत्वे तेषां घटोपगृहीतानां कपालशर्करा-चूर्णक्रमो घटनाशे नोपलभ्येत । द्व्यणुके च विजातीयानारम्भकत्वं दृष्टं तेनैव दृष्टान्तेनान्यत्रापि विजातीयारम्भो निषेध्यः । एतेन पार्थिवावयवानां बहूनां सतां पाथसीयैरवयवैः शरीरारम्भः प्रत्युक्तः । विजातीयानामनारम्भकत्वस्य दृष्टान्तधर्मिणि विनिश्चयादिति । ता· टी· ।

† कल्पने इतः पञ्चानामिति ४ ।

‡ निःसंशय इति २ । ४ । ५ ।

§ सन्दिग्धा इति सतीति २ । ५ ।

‖ अनेकेषां प्रकृतित्वे इत्यानेकेषां संयोगमात्रे ऽपि सत्यनेकगुणोपलब्धिसंभवान्नानेकगुणोपलब्धिरनेककार्यत्वानुमापिकेति भावः । अत्रानेकेषां प्रकृतित्वमभ्युपगमवादेन न तु वस्तुत उक्तयुक्तेः । ¶ स्मृणामि २ । ५ । * स्मृणोमि २ । ५ । † स्मृतिरभिधीयतइति २ । ५ ।

तिरभिधीयते* इति । स्थाल्यादिषु च तुल्यजातीयानामेककार्यारम्भदर्शनाद् भिन्नजातीयानामेककार्यारम्भानुपपत्तिः । अथेदानीमिन्द्रियाणि प्रमेयक्रमेण विचार्यन्ते किमाव्यक्तिकान्याहो स्विद् भौतिकानीति† । कुतः संशयः ।

कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात्संशयः ॥ ३० ॥

कृष्णसारं भौतिकं तस्मिन्ननुपहते रूपोपलब्धिः उपहते चानुपलब्धि‡रिति । व्यतिरिच्य कृष्णसारमवस्थितस्य विषयस्य उपलम्भो न कृष्णसारप्राप्तस्य न चाप्राप्यकारित्वमिन्द्रियाणां तदिदमभौतिकत्वे विभुत्वात्सम्भवति । एवमुभयधर्मोपलब्धेः संशयः । अभौतिकानीत्याह । कस्मात् ।

§महदणुग्रहणात् ॥ ३१ ॥

महदिति महत्तरं महत्तमं चोपलभ्यते यथा न्यग्रोधपर्वतादि । अणितरमणुतमं च गृह्यते न्यग्रोधधानादि । तदुभयमुपलभ्यमानं चक्षुषो भौतिकत्वं बाधते । भौतिकं हि यावत्तावदेव व्याप्नोति अभौतिकं तु विभुत्वात्सर्वव्यापकमिति । न महदणु‖ग्रहणमात्राद्भौतिकत्वं विभुत्वं चेन्द्रियाणां शक्यं प्रतिपत्तुम् । इदं खलु ।

---

* अस्यापि मन्त्रस्यायमर्थो यद्यस्मादायातं तत्तस्मिन्नेव प्रलयं गच्छतीति प्रकृतौ विकारस्य प्रलयाभिधानं प्रकृतिशब्देन कार्यशून्यं कारणमुच्यते न पुनः कार्यस्य कारणे लयः । एवं चासदुत्पद्यते सच्चिरुध्यतइत्ययमर्थ उक्तो भवति । न्या· वा·।

† उपलक्षणं चैतत् । यद्यपि भौतिकानि तदापि कृष्णसारं यदेतदुपलभ्यते तदेवेन्द्रियमाहो तदधिष्ठानं तैजसमित्यपि संशयो द्रष्टव्यः । तत्र पूर्वः संशयः सांख्यनैयायिकयोर्विप्रतिपत्तेरुत्तरस्तु सौगतनैयायिकयोरिति । आव्यक्तिकत्वमाहंकारिकत्वं द्रष्टव्यम् । अहंकाराद्धि बुद्धिविकाराद्धैकारिकाद्येकादशेन्द्रियाणि जायन्तइति सांख्याः । आव्यक्तिकत्वं त्वव्यक्तस्य मूलकारणत्वादुक्तम् । ता· टी· ।

‡ कृष्णसारे सति रूपोपलब्धेरसत्यनुपलब्धेः कृष्णसारमेव चक्षुः । अत्र प्रदीपेन व्यभिचारो वार्तिके दर्शितः । तेनान्वयव्यतिरेकयोः सतोरपि तस्य चक्षुष्ट्वाभावात् । कृष्णसारस्य चक्षुष्ट्वे च संनिकृष्टविप्रकृष्टयोस्तुल्योपलब्धिप्रसङ्गः । कृष्णसारेण हि न विषयः संयुज्यते असंयोगे चाविशेषादुभयोस्तुल्योपलब्धिः प्राप्नोति । अथ संनिकृष्टस्यैव विषयता न विप्रकृष्टस्येति न विप्रकृष्टस्यापि विषयत्वात् ।

§ एवं कोट्यन्तरे व्यभिचारिते भौतिकानीति साध्ये हेतुप्रतिपादकं सूत्रम् ।

‖ **अणुग्रहणं संपातायातं न तु तदत्र विवक्षितमसाधकत्वादिति ।** ता· टी· । भौतिकानामपि दीपादीनां महदणुप्रकाशकत्वादयं हेतुर्व्यभिचरित इति वार्त्तिकम् । इन्द्रियाणामभूतात्मकत्वे व्यापकत्वे चाश्रीयमाणे व्यवहितस्यापि विषयस्य ग्रहणप्रसङ्गः । व्यापकत्वादेव कुड्यादेस्तदावरणसामर्थ्याभावात् । न च तद्वृत्तीनामावरणमिन्द्रियव्यतिरेकेण तद्वृत्तौ प्रमाणाभावात्।

रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम्* ॥ ३२ ॥

तयोर्महदणवोर्ग्रहणं चक्षुरश्मेरर्थस्य च सन्निकर्षविशेषाद्भवति यथा प्रदीपरश्मेरर्थस्य चेति । रश्म्यर्थसन्निकर्षश्चावरणालिङ्गः चाक्षुषो हि रश्मिः कुड्यादिभिरावृतमर्थं न प्रकाशयति यथा प्रदीपरश्मिरिति । आवरणानुमेयत्वे सतीदमाह ।

तदनुपलब्धेरहेतुः† ॥ ३३ ॥

रूपस्पर्शवद्द्रव्यं तेजो महत्त्वादनेकद्रव्यवत्त्वाद्रूपवत्त्वाच्चोपलब्धिरिति‡ प्रदीपवत् प्रत्यक्षत उपलभ्येत चाक्षुषो रश्मिर्यदि स्यादिति ।

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः § ॥ ३४ ॥

सन्निकर्षप्रतिषेधार्थेनावरणेन लिङ्गेनानुमीयमानस्य रश्मेर्य्या प्रत्यक्षतोऽनुपलब्धिर्न्नासावभावं प्रतिपादयति यथा चन्द्रमसः परभागस्य पृथिव्याश्चाधोभागस्य ।

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥ ३५ ॥

भिन्नः खल्वयं द्रव्यधर्मो गुणधर्मश्च महदनेकद्रव्यवत्त्व विषक्तावयवमाप्यं द्रव्यं प्रत्यक्षतो नोपलभ्यतेऽस्पर्शस्तु शीतो गृह्यते । तस्य द्रव्यस्यानुबन्धात् हेमन्तशिशिरौ कल्पेते । तथाविधमेव च तैजसं द्रव्यमनुद्भूतरूपं सह रूपेण नोपलभ्यते स्पर्शस्त्वस्योष्ण उपलभ्यते तस्य द्रव्यस्यानुबन्धाद् ग्रीष्मवसन्तौ कल्पेते यच्च त्वेषा भवति ।

---

* भूयोऽवयवसंनिकर्षानुग्रहः । यस्माद्ययं संनिकर्षो विशेषप्रतिपत्तिहेतुर्भूयोऽवयवसंयोगैरनुगृह्यते । सोयमवान्तरसंयोगापेक्षया ऽवयवीन्द्रियसंनिकर्षः संनिकर्षविशेष इत्युच्यते स च रश्म्यर्थसंनिकर्षविशेषो महदणवोस्तुल्यो भवतीत्यन्यथा महदणवोर्ग्रहणं सिध्यति । न्या. वा. ।

† न चाक्षुषो रश्मिर्विद्यतइति सूत्रार्थः । न्या. वा. ।

‡ महत्त्वं तावत्कारणमहत्त्वबहुत्वप्रचयेभ्यः । अनेकद्रव्यवत्त्वमपि कारणबहुत्वादेव । रूपस्पर्शवद्द्रव्यं तेज इति नारूपं तत् । एवमशेषोपलब्धिकारणसंनिधाने सति येन नोपलभ्यते तेन गम्यते नास्तीति । न्या. वा. ।

§ सत्यमुपलब्धिलक्षणप्राप्तमनुपलभ्यमानं न शक्यमनुमातुं न तु महत्त्वादेवोपलब्धिलक्षणप्राप्तिरपि तु रूपविशेषोऽपि न चासौ विशेष उद्भूतसमाख्यातः कृष्णसाराधिष्ठानस्य चक्षुषोऽस्तीत्यर्थः । ता. टी. ।

अनेकद्रव्य*समवायात् रूपविशेषाच्च रूपोपलब्धिः ॥ ३६ ॥

यच्च रूपं च द्रव्यं च तदाश्रयः प्रत्यक्षत उपलभ्यते रूपविशेषस्तु यद्भावात्क्व चिद्रूपोपलब्धिः यदभावाच्च द्रव्यस्य क्व चिदनुपलब्धिः †स रूपधर्मोऽयमुद्भवसमाख्यात इति । अनुद्भूतश्चायं‡ नायनो रश्मिः तस्मात्प्रत्यक्षतो नोपलभ्यतइति । दृष्टश्च तेजसो धर्मभेद उद्भूतरूपस्पर्शं प्रत्यक्षं तेजो यथा आदित्यरश्मयः । उद्भूतरूपमनुद्भूतस्पर्शं च प्रत्यक्षं यथा प्रदीपरश्मयः । उद्भूतस्पर्शमनुद्भूतरूपमप्रत्यक्षं यथाबादिसंयुक्तं तेजो ऽनुद्भूतरूपस्पर्शो ऽप्रत्यक्षः चाक्षुषो रश्मिरिति ।

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः§ ॥ ३७ ॥

यथा चेतनस्यार्थो विषयोपलब्धिभूतः सुखदुःखोपलब्धिभूतश्च कल्पते तथेन्द्रियाणि व्यूढानि विषयप्राप्त्यर्थश्च रश्मेश्चाक्षुषस्य व्यूहः रूपस्पर्शानभिव्यक्तिश्च व्यवहारप्रकृप्त्यर्थो द्रव्यविशेषे च प्रतीघाताद्यावरणोपपत्तिर्व्यवहारार्थो । सर्वद्रव्याणां विश्वरूपो व्यूह इन्द्रियवत् कर्मकारितः पुरुषार्थतन्त्रः । कर्म तु धर्माधर्मभूतं चेतनस्योपभोगार्थमिति ।

---

* अनेकद्रव्येण समवायादिति वार्त्तिकसंमतः पाठः । इदं सूत्रं वैशेषिकसूत्रेषु अ० ४ आ० १ सू० ८ दृश्यते । अत्र रूपविशेषग्रहणेन रूपविशेष उद्भवसमाख्यो ऽभिधीयते न रूपत्वं न रूपान्तराद्रूपं विशिनष्टि अपि तूद्भवो विशेषकत्वाद्विशेष इत्युच्यते । उद्भवश्च कार्यगम्यः यस्याभावाद्विपक्षावयवसमाप्यद्रव्यं हेमन्ते न दह्यते तेजसो यौष्म ऊष्मा । यस्य भावात्प्रदीपरश्मिरुपलभ्यते आदित्यरश्मिश्च स उद्भवो नाम विशेषः । न्या वा० ।

† स च रूपधर्म उद्भवसमाख्यात इति २।५। ‡ अनुद्भूतरूपस्पर्शेति छप्रकाशेनेति २।४।

§ रूपस्पर्शानभिव्यक्तिश्च व्यवहारप्रकृप्त्यर्था । यदि नायनो रश्मिरुद्भूतस्पर्शो भवेत्तेन दृश्यविशेषे ऽनेकरश्मिसंनिपाते सति द्रव्यं दह्येत । अनेकरश्मिसंनिपाते च सति व्यवहितत्वाद् द्रव्यस्यानुपलब्ध्या भवितव्यम् । अथ मन्यसे यथा ऽऽदित्यरश्मिसंबद्धे ऽर्थे नायनो रश्मिर्न व्यवधीयते एवं रश्म्यन्तरसंनिपातेपीति तच्च । व्यतिभिद्यानुग्राहकत्वात् । व्यतिभिद्यादित्यरश्मिस्तत्संबद्धेन द्रव्येण संबध्यते । उद्भूतरूपस्पर्शवत्त्वे च चक्षुषो यस्य पूर्वं संनिपतितं चक्षुस्तदितरेण व्यवहितमपि नार्थं गृह्णीयात् । अथानेकरश्मिसंनिपाते सति समानजातीयद्रव्येण द्रव्यान्तरं रश्मिरुत्पद्यतइति । एवं सति समयासमयचक्षुषोस्तुल्योपलम्भः प्राप्नोति न चैतद्दिष्टमनुपलब्धेरिति व्यवहारप्रकृप्त्यर्थं च नायनस्य रश्मेरनुद्भूतरूपस्पर्शवत्त्वमिति सर्वद्रव्याणां विश्वरूपो व्यूहः पुरुषार्थकारित इति । न्या० वा० ।

अव्यभिचाराच्च प्रतिघातो भौतिकधर्मः ॥ ३८ ॥

यश्चावरणोपलम्भादिन्द्रियस्य द्रव्यविशेषे प्रतिघातः स भौतिकधर्मो न भूतानि व्यभिचरति नाभौतिकं प्रतिघातधर्मकं दृष्टमिति । अप्रतिघातस्तु व्यभिचारी भौतिकाभौतिकयोः समानत्वादिति । यदपि मन्यते प्रतिघाताद्भौतिकानीन्द्रियाणि अप्रतिघाताद्भौतिकानीति प्राप्तम् । दृष्टश्चाप्रतिघातः काचाभ्रपटलस्फटिकान्तरितोपलब्धेः । तच्च युक्तम् । कस्माद् यस्माद्भौतिकमपि न प्रतिहन्यते काचाभ्रपटलस्फटिकान्तरितप्रकाशात् प्रदीपरश्मीनां स्थाल्यादिषु पाचकस्य तेजसो ऽप्रतिघातः । उपपद्यते चानुपलब्धिः कारणभेदात् ।

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥ ३९ ॥

यथा ऽनेकद्रव्येण समवायाद्रूपविशेषाच्चोपलब्धिरिति सत्युपलब्धिकारणे मध्यन्दिनोल्काप्रकाशो नोपलभ्यते आदित्यप्रकाशेनाभिभूतः । एवं महदनेकद्रव्यत्वाद्रूपविशेषाच्चोपलब्धिरिति सत्युपलब्धिकारणे चाक्षुषो रश्मिर्नोपलभ्यते निमित्तान्तरतः । तच्च व्याख्यातम* नुद्भूतरूपस्पर्शस्य द्रव्यस्य प्रत्यक्षतो ऽनुपलब्धिरिति । अत्यन्तानुपलब्धिश्चाभावकारणं यो हि ब्रवीति लोष्टप्रकाशो मध्यंदिने आदित्यप्रकाशाभिभवाच्चोपलभ्यते इति तस्यैतत्स्यात् ।

न रात्रावप्यनुपलब्धेः† ॥ ४० ॥

अप्यनुमानतो ऽनुपलब्धेरिति । एवमत्यन्तानुपलब्धेर्लोष्टप्रकाशो नास्ति न त्वेवं चक्षुषो रश्मिरिति ‡ । उपपन्नरूपा चेयम् ।

बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितो ऽनुपलब्धिः‡ ॥ ४१ ॥

---

* अनुद्भूतरूपस्पर्शेति ३. पु. पा. ।

† मध्यंदिनोल्काप्रकाशो नोपलभ्यते आदित्यप्रकाशादित्ययुक्तं सर्वरश्मित्वप्रसङ्गात् । एवं सति लोष्टं रश्मिवत् प्राप्नोति । अथ लोष्टरश्मयः कस्माच्चोपलभ्यन्तरत्यभियुक्तो ब्रूयादादित्यरश्म्यभिभवादित्ययुक्तं तदेतदुत्तरद्वारकं सूत्रम् । अनुमानतश्च नोपलभ्यते लोष्टरश्मिरित्यपिशब्दाद् गम्यते । न्या. वा. ।

‡ दृष्टान्तस्थाने एतत् सूत्रम् । किमुक्तं भवति । यत् खलु बाह्यप्रकाशमपेक्षते तस्यानुपलब्धौ रूपानभिव्यक्तित एत्यनुद्भूतेर्यथा विषक्तावयवस्याप्यद्रव्यस्य रूपानुद्भूतेरग्रहणम् । तथा चाक्षुषो रश्मिर्बाह्यप्रकाशानुग्रहमपेक्षते तस्मादस्यापि रूपस्यानुद्भूतेरग्रहणमिति । न्या. वा. ।

बाह्येन§ प्रकाशेनानुगृहीतं चक्षुर्विषयग्राहकं तदभावे ऽनुपलब्धिः। सति च प्रकाशानुग्रहे शीतस्पर्शोपलब्धौ च सत्यां तदाश्रयस्य द्रव्यस्य चक्षुषा ग्रहणं रूपस्यानुद्भूतत्वात्सेयं रूपानभिव्यक्तितो रूपाश्रयस्य द्रव्यस्यानुपलब्धिर्दृष्टा तच्च यदुक्तं तदनुपलब्धेरहेतुरित्येतदयुक्तम्। कस्मात्पुनरभिभवो ऽनुपलब्धिकारणं चाक्षुषस्य रश्मेर्नोच्यतइति।

अभिव्यक्तौ चाभिभवात् ॥ ४२ ॥

बाह्यप्रकाशानुग्रहनिरपेक्षतायां चेति चार्थः। यद्रूपमभिव्यक्तमुद्भूतं बाह्यप्रकाशानुग्रहं च नापेक्षते तद्विषयो ऽभिभवो विपर्यये ऽभिभवाभावात्। अनुद्भूतरूपत्वाच्चानुपलभ्यमानं बाह्यप्रकाशानुग्रहाच्चोपलभ्यमानं नाभिभूयतइति एवमुपपन्नमस्ति चाक्षुषो रश्मि*रिति।

नक्तंचरनयनरश्मिदर्शनाच्च ॥ ४३ ॥

दृश्यन्ते हि नक्तं नयनरश्मयो नक्तंचराणां वृषदंशप्रभृतीनां तेन शेषस्यानुमानमिति†। जातिभेदवदिन्द्रियभेद इति चेद् ‡धर्मभेदमात्रं§ चानुपपन्नमावरणस्य प्राप्तिप्रतिषेधार्थस्य‖ दर्शनादिति। इन्द्रियार्थसन्निकर्षस्य ज्ञानकरणत्वानुपपत्तिः। कस्मात्।

अप्राप्य ग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥ ४४ ॥

---

* बाह्यप्रकाशेनेति ४।

† विप्रतिपत्तिविषयः कृष्णसारं रश्मिवद् द्रव्यत्वे सति रूपोपलब्धौ नियतस्य साधनस्य निमित्तत्वात् प्रदीपवदिति। अथ वा रश्मिवच्चक्षुः द्रव्यत्वे सति नियतत्वे सति स्फटिकादिव्यवहितार्थप्रकाशकत्वात्प्रदीपवदिति। न्या॰ वा॰

‡ मानुषं चक्षुः रश्मिवत् अप्राप्तिस्वभावत्वे रूपाद्युपलब्धिनिमित्तत्वाद्नक्तंचरचक्षुर्वदिति। न्या॰ वा॰। § धर्मभेदमात्रञ्चेति १ धर्ममात्रभेदे चेति २।५।

‖ यथा बिडालत्वजातिर्वृषदंशे वर्तते न मनुष्ये एवं रश्मिवद्बिडालस्यैव चक्षुर्भविष्यति न मानुषस्येति चेन्न आवरणसामर्थ्यात्। सत्येतस्मिन् जातिभेदे यथा वृषदंशप्रभृतीनां कुड्यादिभी रश्मय आव्रियन्ते तथा मनुष्याणामपीति समानमेवेति। इतश्च भौतिकानीन्द्रियाणि प्रतिघातित्वाद् घटादिवदिति। भूतं श्रोत्रं द्रव्यत्वे सति बाह्यार्थप्रकाशकत्वाद् घ्राणवदिति। न्या॰ वा॰।

¶ वृषदंशनयनस्य रश्मिवत्त्वं धर्मो मनुष्यनयनस्य तु न तत्त्वमिति यो ऽयं धर्मभेदः स एव धर्मभेदमात्रं तच्चानुपपन्नं चो ऽवधारणे भिन्नक्रमः अनुपपन्नमेवेति योजना। ता॰ टी॰।

तृणादिसर्पद् द्रव्यं काचे ऽभ्रपटले वा प्रतिहतं दूरमव्यवहितेन सन्निकृष्यते व्याहन्यते वै प्राप्तिर्व्यवधानेनेति । यदि च रश्म्यर्थसन्निकर्षो ग्रहणहेतुः स्याद् न व्यवहितस्य सन्निकर्ष इत्यग्रहणं स्यात् । अस्ति चेयं काचाभ्रपटलस्फटिकान्तरितोपलब्धिः सा *ज्ञापयत्यप्राप्यकारीणीन्द्रियाणि । अत एवाभौतिकानि प्राप्यकारित्वं हि भौतिकधर्म इति न ।

कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥ ४५ ॥

अप्राप्यकारित्वे सतीन्द्रियाणां कुड्यान्तरितस्यानुपलब्धिर्न स्यात् । प्राप्यकारित्वे ऽपि तु काचाभ्रपटलस्फटिकान्तरितोपलब्धिर्न स्यात् ।

अप्रतीघातात्सन्निकर्षोपपत्तिः ॥ ४६ ॥

न च काचे।भ्रपटलं वा नयनरश्मिं विष्टभ्नाति सो ऽप्रतिहन्यमानः सन्निकृष्यत इति यश्च मन्यते न भौतिकस्याप्रतिघात इति तन्न† ।

आदित्यरश्मेः स्फटिकान्तरितेपि§ दाह्ये ऽविघातात् ॥ ४७ ॥

‖नादित्यरश्मेरविघातात् स्फटिकान्तरिते ऽप्यविघातात् दाह्ये ऽविघातात् । अविघातादिति च पदाभिसंबन्धभेदाद्वाक्यभेद इति ॥ ¶यथावाक्यं चार्थभेद इति । आदित्यरश्मिः कुम्भादिषु न प्रतिहन्यते ऽविघातात् । कुम्भस्थमुदकं तपति प्राप्तौ हि द्रव्यान्तरगुणस्य उष्णस्य स्पर्शस्य ग्रहणं तेन च शीतस्पर्शाभिभव इति । स्फटिकान्तरिते ऽपि प्रकाशनीये प्रदीपरश्मीनामप्रतिघातः अप्रतिघातात्प्राप्तस्य ग्रहणमिति । भर्जनकपालादिस्थं च द्रव्यमाग्नेयेन तेजसा दह्यते तचाविघातात्प्राप्तिः प्राप्तौ तु दाहो नाप्राप्यकारि तेज इति । अविघातादिति च केवलं पदमुपादीयते को ऽयमविघातो नाम । अव्यूह्यमानावयवेन व्यवधायकेन द्रव्येण सर्वतो द्रव्यस्याविष्टम्भः क्रियाहेतोरप्रतिबन्धः प्राप्तेरप्रतिषे**ध इति । दृष्टं हि कलशनिषक्तानामपां बहिः शीतस्पर्श-

---

* तस्माज्ज्ञापयतीति ३ । † काचाभ्रपटमिति ४ ।
‡ अप्रतिघात इति न इति २ । § स्फटिकान्तरेणेति ४ । ‖ आदित्यरश्मेरिति ४ ।
¶ प्रतिवाक्यं वाक्यभेद इति ४ पुस्तके ऽधिकम् ।
** यस्य द्रव्यस्यावयवा न व्यूह्यन्ते तस्यान्तरवयवैरव्यूह्यमानस्य यो ऽभिसंबन्धः सो ऽविघात इति । अन्तर्व्यवस्थितस्य वा द्रव्यस्याव्यूह्यमानावयवद्रव्यस्य-बहिरवस्थितद्रव्यप्राप्तिः । न्या. वा. ।

ग्रहणम् । न चेन्द्रियेणासन्निकृष्टस्य द्रव्यस्य स्पर्शोपलब्धिः दृष्टौ च प्रस्नन्दपरिस्रवौ । तच्च काचाभ्रपटलादिभिर्नायनरश्मेरप्रतिघाताद्विभिद्यार्थेन सह सन्निकर्षादुपपन्नं ग्रहणमिति ।

नेतरेतरधर्मप्रसङ्गात् ॥ ४८ ॥

काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतीघातः कुड्यादिवद्वा काचाभ्रपटलादिभिः प्रतीघात इति प्रसज्यते नियमे कारणं वाच्यमिति ।

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः ॥ ४९ ॥

आदर्शोदकयोः प्रसादो रूपविशेषः* स्वो धर्मो नियमदर्शनात् प्रसादस्य वा स्वो धर्मो रूपोपलम्भनम् । यथा ऽऽदर्शप्रतिहतस्य परावृत्तस्य नयनरश्मेः स्वेन मुखेन सन्निकर्षे सति स्वमुखोपलम्भनं प्रतिबिम्बग्रहणाख्यमादर्शरूपानुग्रहात्तन्निमित्तं भवति । आदर्शरूपोपघाते तदभावात् कुड्यादिषु च प्रतिबिम्बग्रहणं न भवति । एवं काचाभ्रपटलादिभिरविघातश्चक्षूरश्मेः कुड्यादिभिश्च प्रतिघातो द्रव्यस्वभावनियमादिति ।

दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिः ॥ ५० ॥

प्रमाणस्य तत्त्वविषयत्वात् । न खलु भोः परीक्ष्यमाणेन दृष्टानुमिता अर्थाः शक्या नियोक्तुमेवं भवतेति । नापि प्रतिषेद्धुमेवं न भवतेति । न ह्यदमुपपद्यते रूपवद्गन्धोऽपि चाक्षुषो भवत्विति गन्धवद्वा रूपं चाक्षुषं मा भूदिति अग्निप्रतिपत्तिवद्धूमेनोदकप्रतिपत्तिरपि भवत्विति उदकाप्रतिपत्तिवद्वा धूमेनाग्निप्रतिपत्ति(रपि) माभूदिति । किं कारणं यथा खल्वर्था भवन्ति य एषां स्वो भावः स्वो धर्म इति तथाभूताः प्रमाणेन प्रतिपद्यन्तइति । तथाभूतविषयकं हि प्रमाणमिति । इमौ खलु नियोगप्रतिषेधौ भवता दर्शितौ काचाभ्रपटलादिवद्वा कुड्यादिभिरप्रतिघातो भवतु कुड्यादिवद्वा काचाभ्रपटलादिभिरप्रतीघातो मा भूदिति । न दृष्टानुमिताः खल्विमे द्रव्यधर्माः प्रतिघाताप्रतीघातयोर्ह्युपलब्ध्यनुपलब्धी व्यवस्थापिके । व्यवहितानुपलब्ध्या ऽनुमीयते कुड्या-

---

* द्रव्यान्तरासंयुक्तद्रव्यसमवायः । तस्य वा रूपोपलम्भसामर्थ्यं धर्मः । न्या० वा० ।

( ) नास्ति । ५ । २ ।

दिभिः प्रतिघातो व्यवहितोपलब्ध्या ऽनुमीयते काचाभ्रपटलादिभिरप्रतिघात* इति । अथापि खल्वेकमिदमिन्द्रियं बहूनीन्द्रियाणि वा । कुतः संशयः ।

स्थानान्यत्वे नानात्वा†दवयविनाना-
स्थानत्वाच्च संशयः ॥ ५१ ॥

बहूनि द्रव्याणि नानास्थानानि दृश्यन्ते नानास्थानश्च सन्नेको ऽवयवी चेति । तेनेन्द्रियेषु भिन्नस्थानेषु संशय‡ इति । एकमिन्द्रियम् ।

त्वगव्यतिरेकात् ॥ ५२ ॥

त्वगेकमिन्द्रियमित्याह कस्माद् अव्यतिरेकात् । न त्वचा किं चिदिन्द्रियाधिष्ठानं न प्राप्तं न चासत्यां त्वचि किं चिद्विषयग्रहणं भवति यया सर्वेन्द्रियस्थानानि व्याप्तानि यस्यां च सत्यां विषयग्रहणं भवति सा त्वगेकमिन्द्रियमिति ।

नेन्द्रियान्तरार्थानुपलब्धेः§ ॥ स्पर्शोपलब्धिलक्षणायां सत्यां त्वचि गृह्यमाणे त्वगिन्द्रियेण स्पर्शे इन्द्रियान्तरार्था रूपादयो न गृह्यन्ते अन्धादिभिः । न स्पर्शग्राहका(॥दिन्द्रिया)दिन्द्रियान्तरमस्तीति स्पर्शवदन्धादिभिर्गृह्येरन् रूपादयो न च गृह्यन्ते तस्मान्नैकमिन्द्रियं त्वगिति ।

त्वगवयवविशेषेण धूमोपलब्धिवत्तदुपलब्धिः ॥ यथा त्वचो ऽवयवविशेषः कश्चिच्चक्षुषि सन्निकृष्टो धूमस्पर्शं गृह्णाति नान्य एवं त्वचो ऽवयविशेषा रूपादिग्राहकास्तेषामुपघातादन्धादिभिर्न गृह्यन्ते रूपादय इति ।

व्याहतत्वादहेतुः ॥ त्वगव्यतिरेकादेकमिन्द्रियमित्युक्त्वा त्वगवयवविशेषेण धूमोपलब्धिवद्रूपाद्युपलब्धिरित्युच्यते । एवं च सति नानाभू-

---

* अथेन्द्रियस्य प्राप्यकारित्वे ऽञ्जनशलाकादि कस्माच्चोपलभ्यते । इन्द्रियेणासंबन्धात् । अधिष्ठानस्यानिन्द्रियत्वात् । रश्मिरिन्द्रियं नाधिष्ठानं न च रश्मिना ऽञ्जनशलाका संबद्धेति न्या. वा. ।

† अवयविनानात्वादिति अधिकम् ४ ।

‡ शरीरव्यतिरिक्तं सच्चोभयथा दृष्टमेकमनेकं चेति तदपि संशयबीजमिति वार्तिकम् ।

§ नेन्द्रियान्तरार्थानुपलब्धेः त्वगवयवविशेषेण धूमोपलब्धिवत्तदुपलब्धिः व्याहतत्वादहेतुरिति भाष्यमेव न सूत्रत्रयं सिद्धान्तभाष्यं नेन्द्रियेति इत्युपक्रम्य एवं भाष्यकारीयं सिद्धान्तमुक्त्वा सौत्रं सिद्धान्तमाह सूत्रेण चाभिसंबन्धः सिद्धान्तस्येत्युपसंहृत्य न युगपदर्थानुपलब्धेरिति तात्पर्यटीकायामुक्तत्वात् । कलिकातामुद्रितपुस्तके तु भ्रमात्सूत्रत्वेन लेखः ।

( ) इन्द्रियादिति ४ पुस्तके नास्ति । ॥ ग्राहक इति ४ ।

तानि विषयग्राहकाणि विषयव्यवस्थानात् तद्भावे विषयग्रहणस्य भावात् तदुपघाते चाभावात् तथा च पूर्वो वाद उत्तरेण वादेन व्याहन्यतइति*।

संदिग्धश्चाव्यतिरेकः। पृथिव्यादिभिरपि भूतेरिन्द्रियाधिष्ठानानि व्याप्तानि न च तेष्वसत्सु विषयग्रहणं भवतीति। तस्मान्न त्वगन्यद्वा सर्वविषयमेकमिन्द्रियमिति।

†न युगपदर्थानुपलब्धेः ॥ ५३ ॥

आत्मा मनसा संबध्यते मन इन्द्रियेण इन्द्रियं सर्वार्थैः सन्निकृष्यमिति आत्मेन्द्रियमनोर्थसन्निकर्षेभ्यो युगपद्ग्रहणानि स्युः। न च युगपदुपादयो गृह्यन्ते तस्मान्नैकमिन्द्रियं सर्वविषयमस्तीति‡। असाहचर्याच्च§ विषयग्रहणानां नैकमिन्द्रियं सर्वविषयकं साहचर्ये हि विषयग्रहणानामन्ध्यादयनुपपत्तिरिति।

विप्रतिषेधाच्च न त्वगेका ॥ ५४ ॥

न खलु त्वगेकमिन्द्रियं व्याघातात्। त्वचा रूपाण्यप्राप्तानि गृह्यन्त इति। अप्राप्यकारित्वे स्पर्शादिष्वप्येवं प्रसङ्गः स्पर्शादीनां च प्राप्तानां ग्रहणादूपादीनां प्राप्तानामग्रहणमिति‖ प्राप्तम्। ¶सामिकारित्वमिति चेद् आवरणा-

---

* प्रागेकमिन्द्रियं त्वगित्युपगम्येदानीं त्वगवयवविशेषा रूपादिग्राहका इति ब्रुवाणः प्रतिषेध्यमभ्यनुजानाति। न ह्यवयव्यनतिरिक्तो अवयवा इति। यांश्चावयवान् रूपादिग्राहकांस्त्वचो मन्यन्ते ते किमिन्द्रियात्मका उत नेति। किं चातः यदीन्द्रियात्मका नैकमिन्द्रियम्। अथेन्द्रियात्मका न भवन्ति न तर्हीन्द्रियग्राह्या रूपादय इति। न्या॰ वा॰।

† न युगपदर्थानुपलब्धेः २।

‡ अत्रानेकेन्द्रियवादे ऽपि घटस्य चाक्षुषं त्वाचं च युगपत्कस्मान्नेत्याशङ्क्य फलबलेन बुभुत्सायाः सहकारित्वाश्रयणेन दोषवारणे त्वेन्द्रियैकत्वपक्षे ऽपि तथैव दोषवारणं संभवतीति भाष्योक्तं दूषणं परिहृत्य करणस्य युगपदनेककक्रियाकारित्वाभावेन युगपदनेकज्ञानवारणेपीन्द्रियैकत्वपक्षेप्येवमेवोपपत्तेः त्वचः करणस्यैकत्वे तस्य प्राप्यकारित्वाप्राप्यकारित्वयोर्विकल्पेन प्राप्यकारित्वे त्वचा ऽप्राप्तानां रूपाणामग्रहणप्रसङ्गादप्राप्य कारित्वे च दूरस्थद्रव्यगतस्पर्शस्यापि ग्रहणप्रसङ्गादेकस्यैव प्राप्यकारित्वाप्राप्यकारित्वयोरनुपपत्तेरनेकेन्द्रियपक्षे एकेन्द्रियग्राह्येषु करणस्वाभाव्येन युगपदनेककक्रियाकारित्वाभावेनोपपादनवदिन्द्रियैकत्वपक्षे समाधानासंभवाच्चैकमिन्द्रियमिति वार्तिकम्।

§ साहचर्यं नाम यस्यैकं विषयग्रहणं तस्य द्वितीयमपीत्यन्धबधिराद्यभावप्रसङ्गः। न्या॰ वा॰।

‖ प्राप्तानां ग्रहणमिति। २ ५।

¶ प्राप्याप्राप्यकारित्वमिति। २। ५।

नुपपत्तेर्विषयमात्रस्य ग्रहणम् । अथापि मन्येत प्राप्ताः स्पर्शादयस्त्वचा गृह्यन्ते रूपाणि त्वप्राप्तानीति एवं सति नास्त्यावरणम् आवरणानुपपत्तेश्च रूपमात्रस्य ग्रहणं व्यवहितस्य चाव्यवहितस्य चेति । दूरान्तिकानुविधानं च रूपोपलब्ध्यनुपलब्ध्योर्न्न स्यात् । अप्राप्तं त्वचा गृह्यते रूपमिति दूरे रूपस्याग्रहणमन्तिके च ग्रहणमित्येतन्न स्यादिति । *प्रतिषेधाच्च† नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते ।

इन्द्रियार्थपञ्चत्वात्‡ ॥ ५५ ॥

अर्थः प्रयोजनं तत् पञ्चविधमिन्द्रियाणां स्पर्शनेनेन्द्रियेण स्पर्शग्रहणे सति न तेनैव रूपं गृह्यतइति रूपग्रहणप्रयोजनं चक्षुरनुमीयते । स्पर्शरूपग्रहणे च ताभ्यामेव न गन्धो गृह्यतइति गन्धग्रहणप्रयोजनं घ्राणमनुमीयते । त्रयाणां ग्रहणे न तेरेव रसो गृह्यतइति रसग्रहणप्रयोजनं रसनमनुमीयते । न चतुर्णां ग्रहणे तैरेव शब्दः श्रूयते इति शब्दग्रहणप्रयोजनं श्रोत्रमनुमीयते । एवमिन्द्रियप्रयोजनस्यानितरेतरसाधनसाध्यत्वात्पञ्चैवेन्द्रियाणि ।

न तदर्थबहुत्वात् ॥ ५६ ॥

न खल्विन्द्रियार्थपञ्चत्वात्पञ्चेन्द्रियाणीति सिद्ध्यति । कस्मात्तेषामर्थानां बहुत्वात् । बहवः खल्वमे इन्द्रियार्थाः स्पर्शास्तावच्छीतोष्णानुष्णाशीता इति । रूपाणि शुक्लहरितादीनि । गन्धा इष्टानिष्टोपेक्षणीयाः । रसाः कटुकादयः । शब्दा वर्णात्मानो ध्वनिमात्राश्च भिन्नाः । तदस्येन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणि तस्येन्द्रियार्थबहुत्वाद्बहूनि इन्द्रियाणि प्रसज्यन्तइति ।

गन्धत्वाद्व्यतिरेकाद्गन्धादीनामप्रतिषेधः ॥ ५७ ॥

---

* एकत्वप्रतिषेधाच्चेति २ । ४ । ५ ।

† एकत्वप्रतिषेधमात्रेणार्थो नानात्वे सिद्धेऽपि नानात्वसिद्धये वक्ष्यमाणो हेतुरप्युच्यतइत्यर्थः । अथ वा प्रतिषेधादित्यस्यायं अन्तरमिति पूरयित्वा स्थापनाहेतुरुपादीयतइति व्याख्यान्तरं वार्तिके ।

‡ अत्र विषयगतं प्रयोजनज्ञानगतं वा पञ्चत्वं व्यधिकरणत्वात् कथमिन्द्रियगतपञ्चत्वसाधकमित्याशङ्क्य कर्तारमात्मानं पक्षीकृत्य रूपादिषु नानाविषयेष्वेकेन करणेनैकस्य विषयीकरणेऽप्यन्यविषयकज्ञानक्रियानिष्पत्तये करणान्तरापेक्षित्वे साध्ये इन्द्रियपञ्चत्वं सिध्यति यथा लोके एकस्य कर्तुरेकेन करणेनैकस्यां क्रियायां पर्यवसितायां क्रियान्तरनिष्पत्तये करणान्तरापेक्षेति वार्तिकम् ।

गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्थानां गन्धादीनां यानि गन्धादियहणानि तान्यसमानसाधनसाध्यत्वाद्* याहकान्तराणि† न प्रयोजयन्ति अर्थसमूहानुमानमुक्तो‡ नार्थैकदेशः । अर्थैकदेशं चाश्रित्य विषयपञ्चत्वमाचं भवान्प्रतिषेधति तस्मादयुक्तोयं प्रतिषेध इति । कथं पुनर्गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्था गन्धादय इति । स्पर्शः खल्वयं त्रिविधः शीत उष्णोऽनुष्णाशीतश्च स्पर्शत्वेन स्वसामान्येन संगृहीतः । गृह्यमाणे च शीतस्पर्शे नोष्णास्यानुष्णाशीतस्य वा स्पर्शस्य यहणं याहकान्तरं प्रयोजयति स्पर्शभेदानामेकसाधनसाध्यत्वाद् येनैव शीतस्पर्शो गृह्यते तेनैवेतरावपीति । एवं गन्धत्वेन गन्धानां रूपत्वेन रूपाणां रसत्वेन रसानां शब्दत्वेन शब्दानामिति । गन्धादियहणानि पुनरसमानसाधनसाध्यत्वाद् याहकान्तराणां प्रयोजकानि । तस्मादुपपन्नमिन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति । यदि सामान्यं संयाहकं प्राप्तमिन्द्रियाणाम् ।

विषयत्वाव्यतिरेकादेकत्वम् ॥ ५८ ॥

विषयत्वेन हि सामान्येन गन्धादयः संगृहीता इति ।

न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥ ५९ ॥

न खलु विषयत्वेन सामान्येन कृतव्यवस्था विषया याहकान्तरनिरपेक्षा एकसाधनयाह्या अनुमीयन्ते । अनुमीयन्ते च पञ्च गन्धादयो गन्धत्वादिभिः स्वसामान्यैः कृतव्यवस्था इन्द्रियान्तरयाह्यास्तस्मादसंबद्धमेतत् । अयमेव चार्थोऽनूद्यते बुद्धिलक्षणपञ्चत्वादिति । बुद्ध्य एव लक्षणानि विषययहणलिङ्गत्वादिन्द्रियाणां तदेतदिन्द्रियार्थपञ्चत्वादित्येतस्मिन्सूत्रे कृतभाष्यमिति । तस्माद् बुद्धिलक्षणपञ्चत्वात्पञ्चेन्द्रियाणि । अधिष्ठानान्यपि खलु पञ्चेन्द्रियाणां सर्वशरीराधिष्ठानं स्पर्शनं स्पर्शयहणलिङ्गं कृष्णतारादिष्ठानं चक्षुः बहिर्निःसृतं रूपयहणलिङ्गं नासाधिष्ठानं घ्राणं जिह्वाधिष्ठानं रसनं कर्णच्छिद्राधिष्ठानं श्रोत्रं गन्धरसरूपस्पर्शशब्दयहणलिङ्गत्वादिति । गतिभेदादपीन्द्रि-

---

* असमानमसाधारणं यत्साधनं घ्राणादि तत्साध्यत्वादेकेन घ्राणेनैव सर्वविधगन्धयहणसंभवादिति यावत् । रूपस्पर्शादीनां त्वेकेन्द्रियग्राह्यत्वं न संभवति द्रुतिलत्वादिति भावः ।

† नेति नास्ति ।

‡ अर्थानां विषयाणां समूह एकजातीयानामिति यावत् । अनुमानमनुमितिसाधनं न तु प्रत्येकं विषया इत्यर्थः ।

यभेदः । कृष्णसारोपनिबद्धं चक्षुर्बहिर्निःसृत्य रूपाधिकरणानि द्रव्याणि प्राप्नोति। स्पर्शनादीनि त्विन्द्रियाणि विषया एवाश्रयोपसर्पणात्प्रत्यासीदन्ति। संतानवृत्त्या शब्दस्य श्रोत्रप्रत्यासत्तिरिति । आकृतिः खलु परिमाणमियत्ता सा पञ्चधा। स्वस्थानमात्राणि घ्राणरसनस्पर्शनानि विषयग्रहणेनानुमेयानि। चक्षुः कृष्णसाराश्रयं बहिर्निःसृतं विषयव्यापि । श्रोत्रं नान्यदाकाशात् तच्च विभु शब्दमात्रानुभवानुमेयं पुरुषसंस्कारोपग्रहाच्चाधिष्ठाननियमेन शब्दस्य व्यञ्जक*मिति । नातिरिति योनिं प्रचक्षते† । पञ्च खल्विन्द्रिययोनयः पृथिव्यादीनि भूतानि तस्मात्प्रकृतिपञ्चत्वादपि पञ्चेन्द्रियाणीति सिद्धम् ।

कथं पुनर्ज्ञायते भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति ।

भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ६० ॥

दृष्टो हि वाय्वादीनां भूतानां गुणविशेषाभिव्यक्तिनियमः । वायुः स्पर्शव्यञ्जकः आपो रसव्यञ्जिकाः तेजो रूपव्यञ्जकं पार्थिवं किञ्चिद् द्रव्यं कस्य चिद् द्रव्यस्य गन्धव्यञ्जकम् । अस्ति चायमिन्द्रियाणां भूतगुणविशेषोपलब्धिनियमः । तेन भूतगुणविशेषोपलब्धेर्मन्यामहे भूतप्रकृतीनीन्द्रियाणि ‡नाव्यक्तप्रकृतीनीति । गन्धादयः पृथिव्यादिगुणा इत्युपदिष्टम् उद्देशश्च पृथिव्यादीनामेकगुणत्वे चानेकगुणत्वे समान इत्यत आह ।

---

* धर्माधर्मसंहितया इष्टानिष्टोपेक्षणीयशब्दसाधनभूतया कर्णशष्कुल्या य आकाशस्य संबन्धस्तत्संबन्धानुविधाय्याकाशं न विवरान्तरेणास्यादिना शब्दमुपलक्षयति नान्यत्रेति तदुपकारप्रतीकारभेदाद्वा उपक्रियते चेति न पुनराकाशनित्यत्वादुपक्रियते न प्रतिक्रियतइति । प्रकृष्टाप्रकृष्टश्रोत्रभेदो ऽप्यत एव । न्या· वा·

† इन्द्रियाणां योनित्वादात्म्यं न पुनस्तत्कार्यत्वमाकाशे संभवति नित्यत्वात् । न्या· वा· ।

‡ तत्र पार्थिवं घ्राणं रूपरसस्पर्शगन्धेषु नियमेन गन्धस्य व्यञ्जकत्वाद् बाह्यपार्थिववद्वर्तते । यथा हि मृगमदादिगन्धव्यञ्जकाः पार्थिवाः कुक्कुटोच्चारादय इत्यर्थः । न चातपेनानेकान्तः । न ह्यातपो गन्धव्यञ्जको ऽपि तु जलाभिभूतो द्रव्याणां गन्धो नोपलभ्यते केवलं जलमातपो ऽपनयति न तु द्रव्यस्य गन्धमभिव्यनक्ति तस्माद्वानेकान्तः । एवं रसनमिन्द्रियमाप्यं गन्धादिषु मध्ये नियमेन रसस्य व्यञ्जकत्वाद् दन्तान्तरस्यन्दमानोदबिन्दुवत् । न खलु विस्पन्दास्यो मोदकादिरसमनुभवति । एवं तैजसं चक्षुर्गन्धादिषु मध्ये नियमेन रूपव्यञ्जकत्वात्प्रदीपादि-

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥ ६१ ॥

अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः* ॥ ६२ ॥

स्पर्शपर्यन्तानामिति विभक्तिविपरिणामः । आकाशस्योत्तरः शब्दः स्पर्शपर्यन्तेभ्य इति । कथं तर्हि तरब्निर्देशः । स्वतन्त्रविनियोगसामर्थ्यात्† । तेनोत्तरशब्दस्य परार्थाभिधानं विज्ञायते । उद्देशसूत्रे हि स्पर्शपर्यन्तेभ्यः परः शब्द इति । तन्त्रं वा स्पर्शस्य विवक्षितत्वात् स्पर्शपर्यन्तेषु नियुक्तेषु योन्यस्तदुत्तरः शब्द इति ।

न सर्वगुणानुपलब्धेः ॥ ६३ ॥

नायं गुणनियोगः साधुः । कस्माद् यस्य भूतस्य ये गुणा न ते तदात्मकेनेन्द्रियेण सर्वउपलभ्यन्ते । पार्थिवेन हि घ्राणेन स्पर्शपर्यन्ता न गृह्यन्ते गन्ध एवैको गृह्यते एवं शेषेष्वपीति । कथं तर्हीमे गुणा विनियोक्तव्या इति ।

ऐकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तराणां तदनुपलब्धिः ॥ ६४ ॥

गन्धादीनामेकैको यथाक्रमं पृथिव्यादीनामेकैकस्य गुणः अतस्तदनुपलब्धिः तेषां तयोः तस्य चानुपलब्धिः । घ्राणेन रसरूपस्पर्शानां रसनेन रूपस्पर्शयोः चक्षुषा स्पर्शस्येति । कथं तर्ह्यनेकगुणानि भूतानि गृह्यन्तइति ।

वत् । एवं वायवीयं त्वगिन्द्रियं गन्धादिषु मध्ये नियमेन स्पर्शस्य व्यञ्जकत्वात् स्वेदोदकबिन्दुशीतस्पर्शव्यञ्जकव्यजनवातवत् । नियमग्रहणं मनोनिवृत्त्यर्थम् । गन्धादिषु मध्ये इति चावधारणसिद्ध्यर्थम् । अन्यथा घ्राणादीनां गन्धत्वादिव्यञ्जकत्वेनावधारणं न स्यादिति । एवं चेन्द्रियपञ्चत्वेन हस्तपादपायूपस्थवाचामिन्द्रियत्वनिषेधोपि गृहीत इन्द्रियलक्षणविरहात् । यत्करीरसंयुक्तं सत्कारकदोषव्यतिरिक्तसाक्षात्प्रतीतिसाधनं तदिन्द्रियमिति हीन्द्रियलक्षणं न चैतदस्ति हस्तादिषु । ज्ञानेन्द्रियाणां तल्लक्षणमिमानि तु कर्मेन्द्रियाणीति चेदुच्यतेषामिन्द्रियत्वे लक्षणान्तरं वक्तव्यम् । शरीराश्रितमसाधारणकार्यकारीन्द्रियमिति लक्षणमिति चेदुच्यतेषामसाधारणं कार्यम् । उक्तं वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानामिति नन्वादानविहरणोत्सर्गास्तावदुस्तादिभिरपि कर्तुं शक्याः । अपि चास्ति कण्ठकूपामाशयपक्वाशयादीनामपि निगरणादि तत्तदसाधारणं कार्यमिति तान्यपीन्द्रियाणि प्रसज्येरन् तस्माद्यत्किं चिदेतदिति । ता॰ टी॰ ।

* नियमार्थं सूत्रे । न्या॰ वा॰ अत एकसूत्रत्वेन लेखः प्रामादिकः ।

† स्वतन्त्रस्यावधारणेयानपेक्षस्य विनियोगो बोधार्थं व्युत्पत्तेः प्रयोक्तव्यतया सामर्थ्याच्छब्देरिति यावत् ।

संसर्गाच्चानेकगुणग्रहणम् ॥ ६५ ॥

अक्षादिसंसर्गाच्च पृथिव्यां रसादयो गृह्यन्ते एवं शेषेष्वपीति। नियमस्तर्हि न प्राप्नोति संसर्गस्यानियमाच्चतुर्गुणा पृथिवी त्रिगुणा आपो द्विगुणं तेज एकगुणो वायुरिति। नियमश्चोपपद्यते कथम्।

विष्टं त्वपरं परेण ॥ ६६ ॥

पृथिव्यादीनां पूर्वपूर्वमुत्तरेणोत्तरेण विष्ट*मतः संसर्गानियम इति। तच्चेतद्भूतसृष्टौ† वेदितव्यं नेतर्हीति।

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥ ६७ ॥

नेति विभूतीं प्रत्याचष्टे। कस्मात्पार्थिवस्य द्रव्यस्याप्यस्य च प्रत्यक्षत्वात्। महत्त्वानेकद्रव्यत्वाद्रूपाच्चोपलब्धिरिति तेजसमेव द्रव्यं प्रत्यक्षं स्यात्‡। न पार्थिवमाप्यं वा रूपाभावात्। तेजसवत्तु पार्थिवाप्ययोः प्रत्यक्षत्वाद् न संसर्गादनेकगुणग्रहणं भूतानामिति। भूतान्तररूपकृतं च पार्थिवाप्ययोः प्रत्यक्षत्वं ब्रुवतः प्रत्यक्षो वायुः प्रसज्यते नियमे वा कारणमुच्यतामिति। रसवत्त्वं वा पार्थिवाप्ययोः प्रत्यक्षत्वात् पार्थिवो रसः षड्विधः आप्यो मधुर एव न चेतत्संसर्गाद्भवितुमर्हति। रूपयोर्वा पार्थिवाप्ययोः प्रत्यक्षत्वात्§ तेजसरूपानुगृहीतयोः संसर्गे हि व्यञ्जकमेव रूपं न व्यङ्ग्यमस्तीति। एकानेकविधत्वे च पार्थिवाप्ययोः प्रत्यक्षत्वाद् रूपयोः पार्थिवं हरितलोहितपीताद्यनेकविधं रूपमाप्यं तु शुक्लमप्रकाशकं न चेतदेकगुणानां संसर्गे सत्युपलभ्यतेऽतः कारणमाप्यं चेतत्। अतः परं प्रपञ्चः। स्पर्शयोर्वा पार्थिवतेजसयोः प्रत्यक्षत्वात्

---

* विष्टत्वं संयोगविशेषः । न्या. वा.। संयोगविशेषो व्याप्तिरित्यर्थः । ता. टी.।

† भूतसृष्टिप्रतिपादकेषु पुराणेषु । नेतर्हीति नेदानीमननुभवादित्यर्थः । ता. टी.।

‡ त्रिविधं द्रव्यं चाक्षुषमिष्यते पार्थिवमाप्यं तैजसं च । तच्च रूपवत्त्वेन तेजसमेव चाक्षुषं स्याच्चेतरद्रूपत्वात्। न हि रूपिद्रव्यसंसर्गाच्चाक्षुषत्वमरूपयोरपि पार्थिवाप्ययोरिति युक्तं नभोनभस्वतोरपि चाक्षुषत्वप्रसङ्गात्। अस्ति हि तयोरपि रूपवत्तेजसा संयोग इति । ता. टी.।

§ तेजसरूपानुगृहीतयोः प्रत्यक्षत्वादित्यधिकम् २ । ५ ।

पार्थिवेनुष्णाशीतः स्पर्शः उष्णस्तेजसः प्रत्यक्षो न चेतदेकगुणानामनुष्णाशीतस्पर्शेन वायुना संसर्गेणोपपद्यतइति । अथ वा पार्थिवाप्ययोर्द्रव्ययोर्व्यवस्थितगुणयोः प्रत्यक्षत्वाच् चतुर्गुणं पार्थिवं द्रव्यं त्रिगुणमाप्यं प्रत्यक्षं तेन तत्कारणमनुमीयते तथाभूतमिति* । तस्य कार्यं लिङ्गं कारणभावाद्धिकार्यभाव इति । एवं तेजसवायव्ययोर्द्रव्ययोः प्रत्यक्षत्वाद् गुणव्यवस्थायाः तत्कारणे द्रव्ये व्यवस्थानुमानमिति । दृष्टश्च विवेकः पार्थिवाप्ययोः प्रत्यक्षत्वात् पार्थिवं द्रव्यमबादिभिर्वियुक्तं प्रत्यक्षतो गृह्यते आप्यं च पराभ्यां तेजसं च वायुना न चैकैकगुणं गृह्यतइति निरनुमानं तु विष्टब्धं ह्यपरं परेणेत्येतदिति । नाप्य लिङ्गमनुमापकं गृह्यतइति येनैतदेवं प्रतिपद्येमहि । यच्चोक्तं विष्टब्धं ह्यपरं परेणेति भूतसृष्टौ वेदितव्यं न साम्प्रतमिति नियमकारणाभावादयुक्तम्† । दृष्टं च साम्प्रतमपरं परेण विष्टब्धमिति वायुना च विष्टब्धं तेज इति । विष्टब्धत्वं संयोगः स च द्वयोः समानो‡ वायुना च विष्टब्धत्वात्स्पर्शवत्तेजो न तु तेजसा विष्टब्धत्वाद् रूपवान्वायुरिति नियमकारणं नास्तीति । दृष्टं च तेजसेन स्पर्शेन वायव्यस्य स्पर्शस्याभिभवादग्रहणमिति न च तेनैव तस्याभिभव इति । तदेवं न्यायविरुद्धं प्रवादं प्रतिषिध्य न सर्वगुणानुपलब्धेरिति चोदितं समाधीयते ।

पूर्वपूर्वगुणोत्कर्षात्तत्तत्प्रधानम् ॥ ६८ ॥

तस्मान्न सर्वगुणोपलब्धिः घ्राणादीनां पूर्वं पूर्वं गन्धादेर्गुणस्योत्कर्षात्तत्तत्प्रधानम् । का प्रधानता§ विषयग्राहकत्वम् । को गुणोत्कर्षः अभिव्यक्तौ समर्थत्वम् । यथा बाह्यानां पार्थिवाप्यतेजसानां द्रव्याणां चतुर्गुणत्रिगुणद्विगुणानां न सर्वगुणव्यञ्जकत्वं गन्धरसरूपोत्कर्षात्तु यथाक्रमं गन्धरसरूपव्यञ्जक-

---

* तथागुणयमिति २ । ५ ।

† नियमो गन्धश्च वै पृथिव्यामित्येवमादिः तस्य कारणं प्रमाणं नास्ति तद्बाधकस्यैव प्रमाणस्योक्तत्वात् । तस्माद् भूतसृष्टिः कथं चिद्गुपचारतो व्याख्येयेति । ता· टी· ।

‡ अन्यगुणो यदन्यत्रोपलभ्यते तत् किं संयोगादाहो व्याप्तेः । यदि व्याप्तेर्नायोगोलके वन्हिसंपृक्ते वन्हिगुणा रूक्षरत् तयोर्व्याप्यव्यापकभावाभावात् । तस्मादन्यसंयोगो हेतुः स च द्वयोरविशिष्ट इति तेजसा संयुक्तस्य वायोरपि रूपवत्त्वेन चाक्षुषत्वप्रसङ्ग इति । ता· टी· ।

§ चतुर्गुणत्वादि । न्या· वा· ।

त्वम् । एवं घ्राणरसनचक्षुषां चतुर्गुणचिगुणद्विगुणानां नै सर्वगुणग्राहकत्वं गन्ध-रसरूपोत्कर्षात्तु यथाक्रमं गन्धरसरूपग्राहकत्वम् । तस्माद् घ्राणादिभिर्नै सर्वेषां गुणानामुपलब्धि*रिति । यस्तु प्रतिजानीते गन्धगुणत्वाद् घ्राणं गन्धस्य ग्राहकमेवं रसनादिष्वपीति । तस्य यथागुणयोगं घ्राणादिभिर्गुणग्रहणं प्रसज्य-तइति । किं कृतं पुनर्व्यवस्थानं किञ्चित्पार्थिवमिन्द्रियं न सर्वाणि कानि चिदाप्यतैजसवायव्यानि इन्द्रियाणि न सर्वाणीति ।

तद्व्यवस्थानं तु भूयस्त्वात् ॥ ६९ ॥

अर्थनिर्वृत्तिसमर्थस्य प्रविभक्तस्य द्रव्यस्य संसर्गः पुरुषसंस्कारकारितो भूयस्त्वम् । दृष्टो हि प्रकर्षे भूयस्त्वशब्दः प्रकृष्टो यथा विषयो भूयानित्युच्यते। यथा पृथगर्थक्रियासमर्थानि पुरुषसंस्कारवशाद्भिषधिमणिप्रभृतीनि द्रव्याणि निर्वर्त्यन्ते न सर्वं सर्वार्थमेवं पृथग्विषयग्रहणसमर्थानि घ्राणादीनि निर्वर्त्यन्ते न सर्वविषयग्रहणसमर्थानीति । स्वगुणान्नोपलभन्ते† इन्द्रियाणि । कस्मा-दिति चेत् ।

सगुणानामिन्द्रियभावात् ॥ ७० ॥

स्वान् गन्धादीन्नोपलभन्ते‡ घ्राणादीनि§ । केन कारणेनेति चेत् । स्वगुणैः सह घ्राणादीनामिन्द्रियभावात् । घ्राणं स्वेन गन्धेन समानार्थकारिणा सह बाह्यं गन्धं गृह्णाति तस्य स्वगन्धग्रहणं सहकारिवैकल्यान्न भवति । एवं शेषा-णामपि । यदि पुनर्गन्धः सहकारि च स्याद् घ्राणस्य ग्राह्यस्ये‖त्यत आह ।

तैनैव तस्याग्रहणाच्च ॥ ७१ ॥

न गुणोपलब्धिरिन्द्रियाणाम् । यो ब्रूते यथा बाह्यं द्रव्यं चक्षुषा गृह्यते तथा तेनैव चक्षुषा तदेव चक्षुर्गृह्यतामिति तादृगिदं तुल्यो ह्युभयत्र प्रतिपत्ति-हेत्वभाव इति ।

---

* सर्वेषां समवायाविशेषे ऽपि गन्धस्यैव घ्राणे उत्कर्ष इति गन्धमेव गृह्णाति । तेन गन्धवत्त्वनिषेधपरं प्राधान्याभिधानं न पुनर्गन्धवत्त्वं गन्धग्रहणे प्रयोजकमपि तु गन्धस्योत्कर्ष इति सिद्धम् । ता· टी· ।

† घ्राणस्य घ्राणान्तरग्राहकताया अदृष्टत्वाच्चक्षेपः गन्धग्राहतायास्तु दृष्टत्वात्स्वगन्ध-ग्रहणाच्चेपः । ‡ इन्द्रियाणीति २ ।

§ घ्राणादीनि केन कारणेनेति चेत् सहगुणैर्घ्राणादीमा=२ पु· ।

‖ इत्येतद्दोषेति ४ ग्राह्यश्चेत्यत आहेति १ ।

न शब्दगुणोपलब्धेः ॥ ७२ ॥

स्वगुणान्नोपलभन्तइन्द्रियाणीति यतन्न भवति । उपलभ्यते हि स्वगुणः शब्दः श्रोत्रेणेति ।

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ७३ ॥

न शब्देन गुणेन सगुणमाकाशमिन्द्रियं भवति । न शब्दः शब्दस्य व्यञ्जकः न च घ्राणादीनां स्वगुणग्रहणं प्रत्यक्षं नाप्यनुमीयते । अनुमीयते तु श्रोत्रेणाकाशेन शब्दस्य ग्रहणं शब्दगुणत्वं च आकाशस्येति । परिशेषश्चानुमानं वेदितव्यम् । आत्मा तावत् श्रोता न करणं मनसः श्रोत्रत्वे बधिरत्वाभावः पृथिव्यादीनां घ्राणादिभावे सामर्थ्ये श्रोत्रभावे चासामर्थ्यम् । अस्ति चेदं श्रोत्रमाकाशं च शिष्यते परिशेषादाकाशं श्रोत्रमिति* ।

इति श्रीवात्स्यायनीये भाष्ये तृतीयस्याद्यमाह्निकम् ॥

परीक्षितानीन्द्रियाण्यर्थाश्च बुद्धेरिदानीं परीक्षाक्रमः सा किमनित्या नित्या वेति । कुतः संशयः ।

कर्म्माकाशसाधर्म्यात्संशयः ॥ १ ॥

अस्पर्शवत्त्वं ताभ्यां समानो धर्म उपलभ्यते बुद्धौ विशेषश्चोपलभ्यधर्मवत्त्वं विपर्ययश्च यथास्वमनित्यनित्ययोस्तस्यां बुद्धौ नोपलभ्यते तेन संशय इति । अनुपपन्नः खल्वयं संशयः सर्वशरीरिणां हि प्रत्यात्मवेदनीया अनित्या बुद्धिः सुखादिवत् । भवति च संवित्तिर्जानामि जानामि

---

* मनसः श्रोत्रत्वे बधिराद्यभावः सर्वविषयत्वाच्च मनसः सर्वविषयं श्रोत्रं प्राप्नोति । पृथिव्याद्यपि न श्रोत्रम् घ्राणादिभावे विनियोगात् । घ्राणादिविनियुक्ताः पृथिव्यादयः श्रोत्रभावे च घ्राणादीनां तद्वैकल्ये शब्दानुपलब्धिप्रसङ्गः । त्वचः श्रोत्रत्वे बधिराभावः सर्वोपघाते च प्रायणम् । दिक्कालयोः श्रोत्रत्वे च शब्दस्यान्यगुणत्वादग्रहणप्रसङ्गः । तद्गुणत्वमिति चेत्तत्रापि विवादः । यस्य शब्दो गुणस्तदाकाशं भवता संज्ञामात्रं भिद्यते तौ दिक्कालाविति । आकाशप्रत्याख्यानं वा ऽन्यगुणत्वाच्छब्दस्य । यदि शब्दो दिक्कालगुणो भवति आकाशं तर्हि प्रत्याख्यातम् । न हि शब्दमन्तरेणाकाशास्तित्वे लिङ्गमस्ति यथा दिक्कालयोः परापरादि लिङ्गमिति न द्रव्यान्तरं शिष्यतइति । न च गुणानां श्रोत्रभावो युक्तः । न चाकार्याणां सामान्यविशेषसमवायानां सामर्थ्यानुपलब्धेः । न चेदं श्रोत्रं नास्ति शब्दोपलब्धिलिङ्गम् । न्या० वा० ।

अज्ञानिषमिति न चोपजनापायावन्तरेण चैकाल्यव्यक्तिस्ततश्च चैकाल्यव्यक्तेरनित्या बुद्धिरित्येतत्सिद्धम् । प्रमाणसिद्धं चेदं शास्त्रेप्युक्तमिन्द्रियार्थसन्निकर्षोत्पन्नं युगपज् ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्येवमादि तस्मात्संशयप्रक्रियानुपपत्तिरिति । *दृष्टिप्रवादोपालम्भार्थं तु प्रकरणम् । एवं हि पश्यन्तः प्रवदन्ति सांख्याः पुरुषस्यान्तःकरणभूता नित्या बुद्धिरिति । साधनं च प्रचक्षते ।

विषयप्रत्यभिज्ञानात् † ॥ २ ॥

किं पुनरिदं प्रत्यभिज्ञानं पूर्वमज्ञामिषमर्थं तमिमं जानामीति ज्ञानयोः समानेर्थे प्रतिसन्धिज्ञानं प्रत्यभिज्ञानमेतच्चावस्थिताया बुद्धेरुपपन्नम् । नानात्वे तु बुद्धिभेदेष्वुत्पन्नापवर्गिषु प्रत्यभिज्ञानानुपपत्तिः नान्यज्ञातमन्यः प्रत्यभिजानातीति ।

साध्यसमत्वादहेतुः‡ ॥ ३ ॥

यथा खलु नित्यत्वं बुद्धेः साध्यमेवं प्रत्यभिज्ञानमपीति । किं कारणं चेतनधर्मस्य करणेऽनुपपत्तिः । पुरुषधर्मः खल्वयं ज्ञानं दर्शनमुपलब्धिर्बोधः प्रत्ययोऽध्यवसाय इति । चेतनो हि पूर्वज्ञातमर्थं प्रत्यभिजानाति तस्येतस्माद्धेतोर्नित्यत्वं युक्तमिति । करणचेतन्याभ्युपगमे तु चेतनस्वरूपं वचनीयं नानिर्दिष्टस्वरूपमात्मान्तरं शक्यमस्तीति प्रतिपत्तुम् । ज्ञानं चेद्बुद्धेरन्तःकरण-

---

* सांख्यानां हि दर्शने प्रवादो महदन्तःकरणं बुद्धिरिति तदुपालम्भनार्थं प्रकरणमिति । अयमभिप्रायो नेह नित्यानित्यविचारः प्रधानतोऽपि त्वनया द्वारा वृत्तिरतिरिक्ता सांख्याभिमता बुद्धिर्निराक्रियते सामान्यतो बुद्धिमात्रस्य नित्यानित्यत्वविचारेण । यदि हि नित्या बुद्धिः स्यात्ततो वृत्तिभ्य उदयवतीभ्यो व्यतिरिक्तं महत्तत्त्वमन्तःकरणं स्यात् । अथ तु नित्यत्वसाधनानि प्रतिसंधानादीनि न बुद्धिनित्यत्वस्येशते ततो वृत्तय एव बुद्धयो न तदतिरिक्तं बुद्धितत्त्वं सिध्यतीति । ता. टी. ।

† वृत्तिमान् किल विषयं प्रत्यभिज्ञानन्नात्मानमपि प्रत्यभिजानाति न च चेतनो वृत्तिमान् तस्य कूटस्थनित्यत्वात् । अन्यथा तु पूर्वापरावस्थाभेदवाक् चेतनो वृत्तिमान् कूटस्थनित्यः स्यात् । परिणामिनित्यो तु बुद्धिरुदयव्ययवदनेकवृत्तिमती युज्यते इति भावः । ता. टी. ।

‡ वृत्तयो हि वृत्तिमतो भिन्नाः तेन तासामनित्यत्वे ऽपि न वृत्तिमान् कूटस्थाच्च्यवेत । तथा च प्रत्यभिज्ञाता ऽऽत्मैव प्रत्यभिज्ञानाच्चित्यः सिध्यति न त्वन्तःकरणं बुद्धिसंज्ञकं न हि तत्प्रत्यभिज्ञाने प्रकाशतइत्यर्थः । ता. टी. ।

स्याऽभ्युपगम्यते चेतनस्येदानीं किं स्वरूपं को धर्मः किं तत्त्वं ज्ञानेन च बुद्धौ वर्तमानेनायं चेतनः किं करोतीति ।

चेतयतइति चेद् न ज्ञानादर्थान्तरवचनम् । पुरुषश्चेतयते बुद्धिर्जानातीति नेदं ज्ञानादर्थान्तरमुच्यते चेतयते जानीते पश्यति उपलभते इत्येकोऽयमर्थ इति। बुद्धिर्ज्ञापयतीति चेद् अद्धा जानीते पुरुषो बुद्धिर्ज्ञापयतीति सत्यमेतत्। एवं चाभ्युपगमे ज्ञानं पुरुषस्येति सिद्धं भवति न बुद्धेरन्तःकरणस्येति।

प्रतिपुरुषं च शब्दान्तरव्यवस्थाप्रतिज्ञाने प्रतिषेधहेतुवचनम् । *यश्च प्रतिजानीते कश्चित्पुरुषश्चेतयते कश्चिद्बुध्यते कश्चिदुपलभते कश्चित्पश्यतीति पुरुषान्तराणि खल्वियमानि चेतनो बोद्धोपलब्धा द्रष्टेति नैकस्यैते धर्मा इति अत्र कः प्रतिषेधहेतुरिति ।

अर्थस्याभेद† इति चेत् समानम् । अभिन्नार्था एते शब्दा इति तत्र व्यवस्थानुपपत्तिरित्येवं चेन्मन्यसे समानं भवति पुरुषश्चेतयते बुद्धिर्जानीते इत्यत्राप्यर्थो न भिद्यते तत्रोभयोश्चेतनत्वादन्यतरलोप इति । यदि पुनर्बुध्यते ऽनयेति बोधनं बुद्धिर्मन एवोच्यते तच्च नित्यम् अस्त्वेतदेवं न तु मनसो विषयप्रत्यभिज्ञानान्नित्यत्वम् । दृष्टं हि करणभेदे ज्ञातुरेकत्वात् प्रत्यभिज्ञानं सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति । चक्षुर्वत् प्रदीपवच्च प्रदीपान्तरदृष्टस्य प्रदीपान्तरेण प्रत्यभिज्ञानमिति । तस्माज् ज्ञातुरयं नित्यत्वे हेतुरिति । यच्च मन्यते बुद्धेरवस्थिताया यथाविषयं वृतयो ज्ञानानि निश्चरन्ति वृत्तिश्च वृत्तिमतो नान्येति तच्च ।

न युगपदग्रहणात्‡ ॥ ४ ॥

वृत्तिवृत्तिमतोरनन्यत्वे वृत्तिमतोऽवस्थानाद् वृत्तीनामवस्थानमिति यानीमानि विषयग्रहणानि तान्यवतिष्ठन्तइति युगपद् विषयाणां ग्रहणं प्रसज्यतइति ।

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः§ ॥ ५ ॥

अतीते च प्रत्यभिज्ञाने वृत्तिमानप्यतीत इत्यन्तःकरणस्य विनाशः

---

* को ऽपीति २ । † अर्थस्य भेद इति २ ।

‡ वृत्तिमतोऽवस्थानाद् वृत्त्यवस्थानप्रसङ्ग इति सूचार्थः । न्या॰ वा॰

§ वृत्तीनामपगमे वृत्तिमतोऽप्यपगम इति सूचार्थः । न्या॰ वा॰

प्रसज्यते विपर्यये च नानात्वमिति । अविभु चैकं मनः पर्यायेणेन्द्रियैः संयुज्यतइति ।

क्रमवृत्तित्वादयुगपद् ग्रहणम् ॥ ६ ॥

इन्द्रियार्थानां वृत्तिवृत्तिमतोर्नानात्वमिति । एकत्वे च प्रादुर्भावतिरोभावयोरभाव इति ।

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात् ॥ ७ ॥

अप्रत्यभिज्ञानमनुपलब्धिः अनुपलब्धिश्च कस्य चिदर्थस्य विषयान्तरव्यासक्ते मनस्युपपद्यते वृत्तिवृत्तिमतोर्नानात्वादेकत्वे हि अनर्थको व्यासङ्ग इति । विभुत्वे चान्तःकरणस्य पर्यायेणेन्द्रियैः संयोगः ।

न गत्यभावात्* ॥ ८ ॥

प्राप्तानीन्द्रियाण्यन्तःकरणेनेति प्राप्त्यर्थस्य गमनस्याभावः । तच्च क्रमवृत्तित्वाभावादयुगपद् ग्रहणानुपपत्तिरिति । गत्यभावाच्च प्रतिषिद्धं विभुनोऽन्तःकरणस्यायुगपद्ग्रहणं न लिङ्गान्तरेणानुमीयते इति । यथा चक्षुषो गतिः प्रतिषिद्धा सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणात्पाणिचन्द्रमसोर्व्यवधानेन प्रतीघाते सानुमीयतइति सेयं नान्तःकरणे विवादो न तस्य नित्यत्वे । सिद्धं हि मनोन्तःकरणं नित्यं चेति । क्व तर्हि विवादः तस्य विभुत्वे तच्च प्रमाणतोऽनुपलब्धेः प्रतिषिद्धमिति । एकं चान्तःकरणं नाना चेता ज्ञानात्मिका वृत्तयः चक्षुर्विज्ञानं घ्राणविज्ञानं रूपविज्ञानं गन्धविज्ञानम् । एतच्च वृत्तिवृत्तिमतोरेकत्वे ऽनुपपन्नमिति पुरुषो जानीते नान्तःकरणमिति । †एतेन विषयान्तरव्यासङ्गः प्रत्युक्तः । विषयान्तरग्रहणलक्षणो विषयान्तरव्यासङ्गः‡पुरुषस्य नान्तःकरणस्येति केन क्व चिदिन्द्रियेण सन्निधिः केन क्व चिदसन्निधिरित्ययं तु व्यासङ्गो ऽनुज्ञायते मनस इति एकमन्तःकरणं नानावृत्तय इति । सत्यभेदे वृत्तेरिदमुच्यते ।

---

* प्राप्तान्यन्तःकरणेनेन्द्रियाणीति सूत्रार्थः न्या. वा. ।

† यद्यपि सांख्या आचक्षते विषयान्तरव्यासक्ते ऽन्तःकरणे चक्षुरादिसंबद्धस्याप्यर्थस्याज्ञानादन्तःकरणशक्तिर्ज्ञानमिति तन्निराकरणपरं भाष्यम् । ता. टी. ।

‡ अभीष्टविषयो ऽनेकविज्ञानोत्पादः । न्या. वा.

स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः* ॥ ९ ॥

तस्यां वृत्तौ नानात्वाभिमानो यथा द्रव्यान्तरोपहिते स्फटिके अन्यत्वाभिमानो नीलो लोहित इति एवं विषयान्तरोपधानादिति ।

न हेत्वभावात्† । स्फटिकान्यत्वाभिमानवदयं ज्ञानेषु नानात्वाभिमानो गोणो न पुनर्गन्धाद्यन्यत्वाभिमानवदिति हेतुर्नास्ति हेत्वभावादनुपपन्न इति । समानो हेत्वभाव इति चेद् न ज्ञानानां क्रमेणोपजनापायदर्श-

---

* एतदुक्तं भवति । यद्यपि वृत्तयो नाना प्रतिभान्ति तथापि भ्रान्तिरियमेकस्मादन्तःकरणादभिन्नानां नानात्वानुपपत्तेः । तस्मात्स्फटिकस्य यथैकस्यापि तापिच्छजपाकर्णिकारादिकुसुमोपधानाद्विद्र औपाधिक एवमन्तःकरणेऽपि स्वकस्येन्द्रियप्रणाडिकया तत्तदर्थोपरक्तस्यौपाधिकं नानात्वं वृत्तिरिति च प्रत्यय इति च ज्ञानमिति चाख्यायतइत्यर्थः । ता॰ टी॰ ।

† हेत्वभावादिति भाष्यं व्याचष्टे इति तात्पर्यटीकायां दर्शनाच्चेदं सूत्रम् । यो ऽयं दृष्टान्तः स्फटिकवदिति विकल्पो ऽत्र किमयं स्फटिक उपधानभेदेन भिद्यते उत नेति । किं चातः । यदि भिद्यते न दृष्टान्तः । अथ न भिद्यते नानात्वाभिमानः कथम् । यद्युपधानभेदाद् भिन्नमुपधानमिति कथं प्रतिपद्यसे । यदि प्रत्ययभेदाद् व्याघातः । अभिन्ना वृत्तिः प्रत्ययश्च । व्याघातः प्रत्ययपर्यायत्वाद् वृत्तेः । अथ भवतां वृत्तीनां भेदे किं प्रमाणम् । ज्ञानानां क्रमेणोपजनापायदर्शनम् । ज्ञानान्युपजायन्ते ऽपयन्ति चेति दृश्यते । एकानेकविषयत्वाच्च प्रत्ययनानात्वाभिमानस्यैकानेकविषयाधिगतिः । कथमेकस्मिंश्च विषये नानात्वाभिमानः स्फटिके दृष्टान्तः । नानाभूतेषु गन्धादिषु नानात्वाभिमानो दृष्टः । तेन नानात्वाभिमानस्योभयथा दृष्टत्वादिदमेकमिदमनेकमिति न युक्तः प्रत्यय इति । यश्चायमभिन्ने स्फटिके भेदप्रत्ययः सो ऽपि प्रत्ययभेदमन्तरेण न युक्तः । न हि प्रत्ययाभेदवादिनः स्फटिके नीलादिप्रत्ययभेदो युक्त इति । स्फटिके नीलादिप्रत्ययो ऽसंबन्धाच्च युक्तः । न हि नीलं द्रव्यं चक्षुः संनिकृष्टमिति । अथ संनिकृष्टं तदेव नीलं न स्फटिक इति । स्फटिके समानाधिकरणः स्फटिके नीलप्रत्ययो न युक्तः । न नैरन्तर्यदलनात् । नैरन्तर्येणावस्थिते स्फटिकनीलद्रव्ये चक्षुषा संनिकृष्येते । ततः संनिकर्षाच्चीलगुणाध्यारोपेण स्फटिके मिथ्याप्रत्ययो नील इति । यथा सान्तरेष्वन्तरालदलनात्संयुक्तप्रत्यय इति । यस्य च प्रत्ययो न भिद्यते तस्य चीणि प्रमाणानीति शास्त्रं बाध्यते । न हि प्रत्ययाभेदे प्रमाणभेदः संभवति । विषयभेदात् त्रिस्त्रमिति चेदथ मन्यसे विषयस्त्रेधा भिन्नस्तेनानुरञ्जितः प्रत्ययस्त्रेधा भवति । तच्च युक्तं प्रमाणाभेदे विषयभेदानधिगतेः । न हि प्रमाणभेदमन्तरेण विषयभेदो ऽवगन्तुं शक्यतइति । विषयतादात्म्यादिति चेदथ मन्यसे विषय एवासौ तथा ऽवस्थितस्तत्तादात्म्यात्तथा ख्यातिरिति प्रमाणवैयर्थ्यं चेत्र प्रसङ्गात् । एवं सति व्यर्थं प्रमाणं न विषयभेदं प्रमाणभेदो

नात् । क्रमेण ह्रीन्द्रियार्थेषु ज्ञानान्युपजायन्ते चापयन्ति चेति दृश्यते । तस्माद् गन्धाद्यन्यत्वाभिमानवदयं ज्ञानेषु नानात्वाभिमान इति । स्फटिकान्यत्वाभिमानवदित्येतदमृष्यमाणः क्षणिकत्वाद्याह ।

स्फटिकेप्यपरापरोत्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः ॥ १० ॥

स्फटिकस्याभेदेनावस्थितस्योपधानभेदान्नानात्वाभिमान इत्ययमविद्यमानहेतुकः पक्षः । कस्मात् स्फटिकेऽप्यपरापरोत्पत्तेः । स्फटिकेपि अन्या व्यक्तय उत्पद्यन्ते अन्या निरुद्धयन्तइति । कथं क्षणिकत्वाद् व्यक्तीनाम् । क्षणश्चाल्पीयान्कालः*क्षणस्थितिका: क्षणिकाः । कथं पुनर्गम्यते क्षणिका व्यक्तय इति । उपचयापचयप्रबन्धदर्शनाच्छरीरादिषु †पक्तिनिर्वृत्तस्या‡हारस्य शरीरे रुधिरादिभावेनोपचयो ऽपचयश्च प्रबन्धेन प्रवर्त्ततेऽ§ उपचयाद्व्यक्तीनामुत्पादः अपचयाद्व्यक्तिनिरोधः । एवं च सत्यवयवपरिणामभेदेन वृद्धिः शरीरस्य कालान्तरे गृह्यते इति सेयं व्यक्तिविशेषधर्मा व्यक्तिमात्रे वेदितव्य इति ।

नियमहेत्वभावाद्यथादर्शनमभ्यनुज्ञा ॥ ११ ॥

सर्वासु व्यक्तिषु उपचयापचयप्रबन्धः शरीरवदिति नायं नियमः । कस्माद्धेत्वभावात् । नाप्य प्रत्यक्षमनुमानं वा प्रतिपादकमस्तीति । तस्माद्यथादर्शनमभ्यनुज्ञा यत्रयत्रोपचयापचयप्रबन्धो दृश्यते तत्रतत्र व्यक्तीनामपरापरोत्पत्तिरुपचयापचयप्रबन्धदर्शनेनाभ्यनुज्ञायते यथा शरीरादिषु । यत्र यत्र न दृश्यते तत्रतत्र प्रत्याख्यायते यथा गावप्रभृतिषु । स्फटिकेप्युपचयाऽवगम्यति विषयस्तु तादात्म्यात्तथा व्यवतिष्ठतइति । यथा ऽध्यवस्यति तथा चेतयतइति व्याहतः अप्रकारत्वात् । प्रकारवत्येतद् युक्तमप्रकारे न युक्तम् । बुद्धिस्तं प्रत्ययमुपलभतइति च विरोधो ऽधिकरणाधेययोरभेदात् । यः प्रत्ययः स बुद्धिरित्यधिकरणाधेययोरभेदः । एवं च बुद्धिस्तं प्रत्ययमुपलभतइति व्याहतम् ।

न्या. वा. ।

* अल्पीयःकाल इति २ । † पक्तिर्वृत्तस्येति २ ।

‡ अस्य प्रयोगः । प्रतिक्षणं शरीरमन्यच्चान्यच्च भवति । बाह्यप्रत्ययाभेदे सत्यन्ते विशेषदर्शनात् पच्यमानभूमिपाकजवदिति । न्या. वा. । पटस्य कुङ्कुमादिद्रव्यसंयोगे सत्यन्ते ऽरुणिमलक्षणो विशेषो दृश्यते न चास्यारुणिमा प्रतिक्षणभावीत्यत उक्तं बाह्यप्रत्ययाभेदे सतीति । ता. टी. ।

§ वर्तते इति ५ ।

पचयप्रबन्धो न दृश्यते तस्मादयुक्तं स्फटिकेप्यपरापरोत्पत्तिरिति* । यथा चार्कस्य कटुकिम्ना सर्वद्रव्याणां कटुकिमानमापादयेत्तादृगेतदिति । यश्चाशेषनिरोधेनापूर्वोत्पादं निरन्वयं द्रव्यसन्ताने क्षणिकतां मन्यते तस्यैतत् ।

नोत्पत्तिविनाशकारणोपलब्धेः† ॥ १२ ॥

उत्पत्तिकारणं तावदुपलभ्यते अवयवोपचयो वल्मीकादीनां विनाशकारणं चोपलभ्यते घटादीनामवयवविभागः । यस्य त्वनपचितावयवं निरुध्यते अनुपचितावयवं चोत्पद्यते तस्याशेषनिरोधे निरन्वये वा पूर्वोत्पादे न कारणमुभयचाप्युपलभ्यतइति ।

क्षीरविनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुत्पत्तिः ॥ १३ ॥

यथानुपलभ्यमानं क्षीरविनाशकारणं दध्युत्पत्तिकारणं चाभ्यनुज्ञायते तथा स्फटिके परापरासु व्यक्तिषु विनाशकारणमुत्पत्तिकारणं‡ चाभ्यनुज्ञेयमिति ।

लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ १४ ॥

क्षीरविनाशलिङ्गं क्षीरविनाशकारणं दध्युत्पत्तिलिङ्गं दध्युत्पत्तिकारणं च गृह्यते ऽतो नानुपलब्धिः विपर्ययस्तु स्फटिकादिषु द्रव्येषु

---

* सो ऽयं हेतुर्यत्रोपलभ्यते तत्र क्षणिकत्वं साधयद् न पुनः सर्वभावानाम् । ओमिति चेदनेन हेतुना ऽन्यत्वं सिध्येच्च तु क्षणिकत्वम् । हेतोश्चान्यथोपपत्तेः क्षणिकत्वं विना नानुपपत्तिः । पूर्वशरीरावयवा हि आहारावयवसंहिताः पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यमानाः शरीरान्तरमुत्पादयन्तीति युक्तो भेद इत्यहेतुरेषः । क्षणिकत्वमेव भेदहेतुः कुतो नेति चेत्तत्साधनेन निर्दिष्टेन हेतुनैव भेदसिद्धेः कृतं क्षणिकत्वस्य तद्धेतुत्वकल्पनयेति । विशेषदर्शनं चान्यथोपपन्नं क्षणिकत्वे न साधनमिति ।

† उपचयापचयाववस्थितवस्तुविषयौ क्षणिकत्वे सर्वभावानां न संगच्छेयाताम् । न हि जायमानोवर्धत इत्युच्यते विनश्यन्वा ऽपचित इति । **उपचयापचयोत्पत्तिविनाशकारणोपलब्धेरिति सूत्रार्थः** । न्या॰ वा॰ । **उपचयापचयौ च तावुत्पत्तिविनाशकारणे चेति कर्मधारयः** । ता॰ टी॰ । अथ वा ऽत्र कारणपदेनाधारो ग्राह्यः । आधाराधेयभावप्रतीतेर्न क्षणिकत्वम् । प्रयोगश्च कार्यकारणे एककालवर्तिनौ आधाराधेयभावात्कुण्डबदरवदिति । क्षणिकत्वमते आधाराधेयभावो ऽसिद्ध इति चेन्न सिद्धान्तविरोधात् । त्वया ऽपि हि रूपस्य सार्धं आधारो ऽभ्युपगत इति । आधाराधेयभावाभावे ऽपि कार्यकारणभावस्तुलान्तनमनोन्नमनयोर्दृष्ट इति चेन्न । गुरुत्वबद्द्रव्यसंयोगस्येवोभौ प्रति कारणत्वात् ।

‡ वा २ । ५ ।

अपरापरोत्पत्तीनां* न लिङ्गमस्तीत्यनुत्पत्ति†रेवेति‡ । अथ कश्चित्परीहार§माह ।

---

* अपरापरोत्पत्तौ २ । ४ । ५ । † त्यनुवृत्तिरिति ४ । § परिहारमि॰ २ । ५ ।

‡ नन्वत्रापि शीतोष्णस्पर्शभेदाद्यानात्यमग्न्युदकयोरिति चेन्न । तस्याप्तेजोऽवयवानुप्रवेशनिमित्तकत्वेन तस्य स्फटिकगतत्याभावात् । ननु न शैत्योष्णययोरप्तेजोवयवानुप्रवेशनिमित्तकत्वं हेमन्ते ऽनावृतानां काष्ठभूम्यग्न्मनोहानां शैत्यतारतम्यस्य ग्रीष्मे चोष्णयतारतम्यस्यानुपपत्तेः । न हि तेषु क्व चिदधिकावयवानुप्रवेशो क्व चिदल्पावयवानुप्रवेशे कारणं संभवति तस्माद् बाह्यनिमित्तान्तरानपेक्षो भावानां स्वभावादेव भिन्नभिन्नरूपेण परिणाम इति चेन्न । अन्वयव्यतिरेकाभ्यामप्तेजोऽवयवानुप्रवेशे कारणताया दुर्ग्रहत्वात् । स्वभावस्य सर्वदातनत्वेनाहेतुत्वात् । अप्तेजोऽवयवानुप्रवेशे हेतुत्वमुपेत्य स्वभावस्य भेदहेतुत्वे स्वरस्नेहोष्णोरणात्मकानि भूतानीति स्वसिद्धान्तविरोधः । एकस्यैव द्वित्रिस्वभावकत्वेन व्यावर्तकत्वरूपलक्षणत्वासंभवात् । ननु न विशेषमात्रस्य नानात्वसाधकत्वमपि तु विरुद्धविशेषस्य तेन काञ्चने एकदैवोष्णयकाठिन्यचलनानां दर्शनादविरुद्धत्वेन न भेदसाधकता । शैत्योष्णययोस्त्येकदैकत्रादर्शनेन भेदहेतुतेति चेन्न । सामानाधिकरण्याभ्युपगमे लक्षणत्वासंभवस्योक्तत्वात् । न हि काठिन्याटिकमन्यत्रापि विद्यमानं पृथिव्यादीनां लक्षणं भवितुमर्हति । मम तु काठिन्यादेः पृथिव्यादिमात्रवृत्तितया ऽन्यत्रोपलम्भस्य च तत्तदवयवानुप्रवेशेन तत्तदवयवनिष्ठोष्णयादिविषयकतया ऽसाधारण्येन लक्षणत्वस्य नानुपपत्तिः । स्फटिके साध्यं चान्यत्वं परीक्षणीयं कीदृशं तदिति । यदि भेदमात्रं ततः सिद्धसाधनं स्तम्भादिभेदस्येष्टत्वात् । यदि स्फटिकान्तराद्भेदः स न्याय्य दोषः । पूर्वस्फटिकाद्भेद इति चेन्न । प्रतियोग्यप्रसिद्धेः । न हि तस्य क्षणिकस्य प्रतीतिविषयता प्रतीतिकाले ऽभावात् । अथोभयग्राहिसिद्धं पूर्वप्रतीतं स्फटिकान्तरमपेक्ष्य भेदः साध्यते तदा सिद्धसाधनम् । यद्यतीते स्फटिके वर्तमानस्फटिकभेदः हेत्वसिद्धिः अतीतत्वेन स्वभेदस्य तत्रागम्यमाणत्वात् । पूर्वक्षणेतत्क्षणवृत्तित्वविशिष्टयोर्भेदस्य सिद्धत्वेन सिद्धसाधनं च । अथ तस्मिन्नेव भेदः साध्यते तर्हि बाधः । अथैकस्मिन्नयुगपत्कालिकप्रत्ययाविषयत्वं साध्यते तदा दृष्टान्ताभावः । प्रदीपो दृष्टान्त इति चेन्न । तत्र स्वकारणसत्तासंबन्धकालस्य स्वाभिव्यक्तिकालस्यावयवविभागकालस्यावयवसंयोगविनाशकालस्य चानन्तरं द्रव्यविनाशस्य सत्त्वेनैकस्योक्तकालचतुष्टयवृत्तिप्रत्ययाविषयत्वात् । एवं सर्वत्र योज्यम् । अकारणकविनाशानुपपत्तेः । विनाशहेत्वभावाच्च विनाशः सकारणको ऽपि तु भावः स्वभावत एवोत्पन्नो नश्यतीति चेन्न । तथा सति विनाशे तुच्छत्वस्य वा नित्यत्वस्य प्रसङ्गात् । तथा सति भावानां सर्वदातनत्वमत्यन्तानुपलब्धिर्वा स्यात् । अथाविनाशित्वादकारणको विनाश इति चेन्न । हेत्वसिद्धेः । कार्यस्य पुनरुत्पत्तिप्रसङ्गाद्विनाशो ऽविनाशीति चेन्न । कारणसामग्र्यामसत्यां विनाशनाशमात्रेण भावोत्पत्तेरनुपपत्तेः । तस्याभावाभावमात्रत्वाभावात् । अभावस्य सकारणकत्वे ऽपि भावत्वाभावेन नाशाभावोपपत्तेश्च । सकारणकत्वे सति भावस्यैव नाशनियमात् । न च विनाशस्य सकारणकत्वे ऽग्निसंयोगस्य पाकजरूपादुत्पत्तिं प्रति तदाशं प्रति कारणत्वोपगमे जनकस्यैव विनाशकत्वप्रसङ्ग इति वाच्यम् । अग्निसंयोगान्तरस्य तद्विनाशकत्वोपगमात् । ननु जनकसजातीयस्य न विनाशकत्वमिति नियमः । नायं नियमः अङ्कुरजनकस्याप्यग्निसंयोगस्य तद्विनाशकत्वदर्शनात् । अकारणकविनाशाभ्युपगमे पूर्वोक्तदोषाणां दुष्परिहरत्वात् । किं चेदं भावानां क्षणिकत्वं यदि विनाशित्वं तदा सिद्धसाधनम् । यद्यावद्विनाशित्वं तदा विशेषणं व्यर्थं त्वन्मते स्थिरानभ्युपगमात् । अथोत्पत्तिविनाशयोरेककालत्वं तदा ऽनुत्पन्नस्यैव विनाशापत्तिः । अथोत्पन्नस्य विनाश इत्युत्पत्तेः काटाचित्कत्वेन सकारणकत्ववद्विनाशस्यापि सकारणकत्वापत्तौ स्वसिद्धान्तविरोधः । क्षणिक इति मत्वर्थीयश्च कथम् । यदि क्षयो ऽत्र क्षणशब्दार्थः तदा क्षयतदाश्रययोरेककालिकत्वाभावेन भावस्य तद्वत्ताऽनुपपत्तिः । यदि चावस्थान्तरविशिष्टं भावान्तरं क्षणशब्दार्थस्तदापि स एव दोषः । अथ प्राक्तनभाव एव क्षणस्तदापि स एव दोषः स्ववैशिष्ट्यस्य स्वस्मिन्नभावात् । यदि सर्वान्त्यकालः क्षणशब्दार्थस्तर्हि कालाभ्युपगमात्सिद्धान्तविरोधः । तस्य कल्पनामात्रसिद्धत्वे विशेषणत्वानुपपत्तिः । न चात्र दृष्टान्तः प्रदीपादेस्तत्त्वाभावस्य प्राक् साधितत्वात् । अत्रोक्ता हेतवश्चासिद्धा अन्यथासिद्धा विरुद्धा वा उत्पन्नप्रध्वंसिनां विशे-

न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥ १५ ॥

पयसः परिणामो न विनाश इत्येक आह । परिणामश्चावस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिरिति । गुणान्तरप्रादुर्भाव इत्यपर आह । सतो द्रव्यस्य पूर्वगुणनिवृत्तौ गुणान्तरमुत्पद्यत इति । स खल्वेकपक्षीभाव* इव । अयं† तु प्रतिषेधः ।

व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥ १६ ॥

संमूर्छनलक्षणादवयवव्यूहाद् द्रव्यान्तरे दध्युत्पन्ने गृह्यमाणे पूर्वं पयो द्रव्यमवयवविभागेभ्यो निवृत्तमित्यनुमीयते यथा मृदवयवानां व्यूहान्तराद् द्रव्यान्तरे स्थाल्यामुत्पन्नायां पूर्वं मृत्पिण्डद्रव्यं मृदवयवविभागेभ्यो निवर्त्तत इति । मृद्द्रव्यावयवान्वयः पयोदध्नोर्नाशेषनिरोधे निरन्वयो द्रव्यान्तरोत्पादो घटत॥ इति । अभ्यनुज्ञाय च निष्कारणं क्षीरविनाशं दध्युत्पादं च प्रतिषेध उच्यत इति ।

वत्त्वाऽनुपपत्तेः। तदभ्युपगमे तु विशेषाश्रयकालवर्त्तिनि क्षणिकत्वस्याभावाद्धेतोश्च सत्त्वाद् व्यभिचारः । अन्ते विशेषदर्शनस्य हेतुत्वे तु विनाशकाले विशेषानुपलब्ध्यर्थाधः । अर्थान्तरं वस्त्वेवान्तरशब्दार्थस्तथा सत्येकस्मिन्यिशेषाभ्युपगमेन तस्य स्वयंसाधकतया विरुद्धत्वम् । दीपस्य दशाभेदेन दर्शनादर्शनयोस्तत्तद्देशभेदेनोत्पादविनाशहेतुकत्ववद् देवदत्तादेरपि देशभेदेन दर्शनादर्शनयोस्तत्र तत्रोत्पादविनाशहेतुकत्वमिति तु न । दृष्टान्तदार्ष्टान्तिकयोरुभयोरपि तत्तद्देशसंयोगविभागनिमित्तकत्वेनोत्पादविनाशहेतुकत्वाभावात् । प्रदीपस्य तद्देशउत्पन्न सन्न एव ध्वस्तस्य संस्कारानाधारत्वेन देशान्तरे उत्पत्तुमयोग्यत्वात् । यदप्याकाशे क्षिप्तानां पाषाणानां चातुस्यकालपातदर्शनात्क्षणिकविलक्षणावस्थावत्त्वं कल्प्यत इति । तदपि न क्व चिद् गुरुत्वप्रयत्नक्षेपाणां समुदितानां क्व चिद् गुरुत्वप्रयत्नयोरेव क्व चिद्गुरुत्वमात्रस्य पाते करणस्य वैलक्षण्यादेव पातवैलक्षण्योपपत्तेः । स्वैर्यमाणां त्वाधाराधेयभावः । न हि कार्यकाले ऽविद्यमानं कारणं तदाधारः संभवति न चानाधारं कार्यमिति । अतश्च विप्रतिपत्तिविषया अयुगपत्कालाः प्रत्यया एकविषया अभ्रान्ततत्प्रत्ययसामानाधिकरण्ये सति समानशब्दवाच्यत्वात् । वर्तमानैकक्षणानेकपुरुषप्रत्ययवत् । यथा वर्तमानैकक्षणविषयाणामनेकपुरुषप्रत्ययानामभ्रान्ततत्प्रत्ययविषयाणामेकविषयकत्वमेवमयुगपत्कालानामप्यभ्रान्ततत्प्रत्ययविषयाणामप्येकविषयत्वमिति । प्रत्यात्मं प्रत्यया नानैककर्तृका अप्रतिसंधानप्रख्याढ्यवदत्तादिप्रत्ययवदिति । रूपरसगन्धस्पर्शप्रत्यया एकानेककनिमित्ता ममेति प्रतिसंधानात् कृतसमयानां बहूनां वर्तमानैकक्षणानेकविज्ञानवदिति । श्रवणनाट्यतनविज्ञानान्येकसंततावेकानेकनिमित्तानि ममेति प्रतिसंधानात्पूर्ववदिति ।

* पक्षद्वयेपि द्रव्यमवतिष्ठते एकस्य तिरोभावाभिव्यक्ती अपरस्य विनाशप्रादुर्भावाविति दृष्टान्तोपमार्थः ।

† अयन्तु प्रतिषेध इ० २ । ५ ।

॥ न ह्यनपवृक्तस्य पूर्वावस्थातो ऽभिव्यक्त्यनभिव्यक्ती भवतो विनाशप्रादुर्भावौ वेति तस्मादयुक्तमवस्थितस्य परिणाम इति । न्या० वा० ।

क्व चिद्विनाशकारणानुपलब्धेः क्व चिच्चोपलब्धेरनेकान्तः ॥१७॥

क्षीरदधिवन्निष्कारणो विनाशोत्पादो स्फटिकव्यक्तीनामिति नायमेकान्त इति। कस्माद् हेत्वभावाद् नात्र हेतुरस्ति । अकारणो विनाशोत्पादो* स्फटिकादिव्यक्तीनां क्षीरदधिवद् न पुनर्यथा†विनाशकारणभावात्‡ कुम्भस्य विनाश उत्पत्तिकारणाभावच्चा§नुत्पत्तिरेवं स्फटिकादिव्यक्तीनां ‖विनाशोत्पत्तिकारणभावाद्विनाशोत्पत्तिभाव इति ।

निरधिष्ठानं¶ च **दृष्टान्तवचनम् । गृह्यमाणयोर्विनाशोत्पादयोः स्फटिकादिषु स्यादयमाश्रयवान् दृष्टान्तः क्षीरविनाशकारणानुपलब्धिवद्दध्युत्पत्तिवच्चेति†† तौ तु न गृह्येते तस्मान्निरधिष्ठानोयं दृष्टान्त इति ।

अभ्यनुज्ञाय च स्फटिकस्योत्पादविनाशौ योत्र साधकस्तस्याभ्यनुज्ञानादप्रतिषेधः । कुम्भवन्न निष्कारणो विनाशोत्पादौ स्फटिकादीनामित्यभ्यनुज्ञेयोयं दृष्टान्तः प्रतिषेद्धुमशक्यत्वात् । क्षीरदधिवत्तु निष्कारणौ विनाशोत्पादाविति शक्योयं प्रतिषेद्धुं कारणतो विनाशोत्पत्तिदर्शनात् । क्षीरदध्योर्विनाशोत्पत्तौ पश्यता यत्कारणमनुमेयं कार्यलिङ्गं हि कारणमित्युपपन्नमनित्या‡‡बुद्धिरिति ।

इदं तु चिन्त्यते कस्येयं बुद्धिरात्मेन्द्रियमनोर्थानां गुण§§ इति । प्रसिद्धो‖‖पि खल्वयमर्थः परीक्षाशेषं प्रवर्त्तयामीति प्रक्रियते । सेयं बुद्धौ सन्निकर्षोत्पत्तेः संशयः विशेषस्यायहणादिति । तचायं विशेषः ।

---

* विनाशोत्पादौ स्फटिकादिव्यक्तीनामिति कस्माद् हेत्वभावाद् नात्र हेतुरस्ति स्वकारणौ विनाशोत्पादौ च स्फटिकादिरिति २ । † यथेति नास्ति १ । ४ ।

‡ कारणाभावादिति ४ । § चानुत्पत्तिरिति १ चोत्पत्तिरिति २ । ४ । ५ ।

‖ विनाशकारणोत्पत्तिभावादिति २ ।

¶ को ऽधिष्ठानार्थः । आश्रयार्थः किमुक्तं भवति निरधिष्ठानमिति धर्मो नास्तीति यावदुक्तं भवति । न हि स्फटिकस्योत्पादविनाशौ प्रतिक्षणमुपलभ्येते यत इयं चिन्ता भवेत् किमेतौ सकारणकावाहो स्विदकारणकाविति । यथा ऽनभ्युपगतशब्दतत्त्वं प्रति कश्चिद् ब्रूयात्कृतकत्वादनित्यः शब्द इति तादृगेतदिति । धर्म्यसिद्धेश्च दृष्टान्ताभाव इति च समानम् । न्या. वा. ** चेति नास्ति ।

†† दध्युपलब्धिवच्चेति १ दध्युत्पत्तिकारणानुपलब्धिवच्चेति ५ ।

‡‡ इतश्चानित्या बुद्धिः गुणत्वे सति प्रत्यक्षाया व्यापकद्रव्यसमवायात् शब्दवत् । जातिमत्त्वे सत्यस्मदादिप्रत्यक्षत्वादाश्रितत्वाद् शब्दवत् । न्या. वा. ।

§§ न गुणभावासिद्धेः अनित्यत्वे सत्यचाक्षुषप्रत्यक्षत्वाद् गुणभावः । सन्निकर्षोत्पत्तेः संशय इति । न्या. वा. ।

‖‖ प्रसिद्धोपि चेति २ । ५ ।

नेन्द्रियार्थयोस्तद्विनाशेपि ज्ञानाऽवस्थानात् ॥ १८ ॥

नेन्द्रियाणामर्थानां वा गुणो ज्ञानं तेषां विनाशे ज्ञानस्य भावात्। भवति खल्विदमिन्द्रियेर्थे च विनष्टे ज्ञानमद्राक्षमिति। न च ज्ञातरि विनष्टे ज्ञानं भवितुमर्हति। अन्यत् खलु वै तदिन्द्रियार्थसन्निकर्षजं ज्ञानं यदिन्द्रियार्थविनाशे न भवति। इदमन्यदात्ममनःसन्निकर्षजं* तस्य युक्तो भाव इति। स्मृतिः खल्वियमद्राक्षमिति पूर्वदृष्टविषया न च विज्ञातरि नष्टे पूर्वोपलब्धेः स्मरणं युक्तं न चान्यदृष्टमन्यः स्मरति। न च मनसि ज्ञातर्यभ्युपगम्यमाने शक्यमिन्द्रियार्थयोर्ज्ञातृत्वं प्रतिपादयितुम्। अस्तु तर्हि मनोगुणो ज्ञानम्।

युगपज् ज्ञेयानुपलब्धेश्च न मनसः ॥ १९ ॥

युगपज् ज्ञेयानुपलब्धिरन्तःकरणस्य लिङ्गं† तच्च युगपज् ज्ञेयानुपलब्ध्या †यदनुमीयते अन्तःकरणं न तस्य गुणो ‡ज्ञानम्। कस्य तर्हि ज्ञस्य वशित्वात्। वशी ज्ञाता वश्यं करणं§ ज्ञानगुणत्वे वा करणभावनिवृत्तिः। घ्राणादिसाधनस्य च ज्ञातुर्गन्धादिज्ञानभावादनुमीयते अन्तःकरणसाधनस्य सुखादिज्ञानं स्मृतिश्चेति तच्च यत्‖ ज्ञानगुणं मनः¶ स आत्मा यतु सुखाद्युपलब्धिसाधनमन्तःकरणं मनस्तदिति संज्ञाभेदमात्रं नार्थभेद इति। युगपज् ज्ञेयानुपलब्धेश्च योगिन इति वा चार्थः। योगी खलु ऋद्धौ प्रादुर्भूतायां विकरणधर्मा निर्माय

---

* आत्ममनःसन्निकर्षं आत्ममनसोः सन्निकर्षजमिति २। † यदिति नास्ति १।४।

‡ तत् खलु युगपज् ज्ञेयानुपलब्ध्या समधिगतं मनो नातस्तद्गुणो ज्ञानम्। विशेषणोपादानादन्तःकरणबहुत्वप्रसङ्ग इति चेन्न सर्वेन्द्रियस्य निमित्तत्वान्मननिमित्तत्वात्। सर्वमिन्द्रियं मननिमित्तत्वान्मन इत्युच्यते। एवं च सति विशेषणं युक्तं युगपज्ज्ञेयानुपलब्ध्या समधिगतं मनो न तस्य गुणो ज्ञानमिति। एवमपि व्यर्थं विशेषणमन्यस्यानभ्युपगमात्। यदि तस्यान्तःकरणस्य न भवत्यन्यस्य तर्हि साधनस्य ज्ञानं गुण इति प्राप्तम्। अन्यस्यानभ्युपगमात्। अन्यस्योपपत्तेरप्रतिषेधः। अनवस्थितत्वात्प्रमाणप्रमेयभावस्य यदाऽयं योगी पुरुषान्तरेण पुरुषान्तरं परिच्छिनत्ति तदा पुरुषान्तरपरिच्छेदे पुरुषान्तरं साधनमिति तस्य ज्ञानं गुणो भवतीति युक्तं विशेषणमिति। तस्माच्च तस्य गुणो ज्ञानमिति। न्या० वा०।

§ न चैवं ज्ञातरि नियमो ज्ञाता वश्यैव वश्यपि भवतीति। अचेतने तु नियमः अचेतनं सर्वं वश्यमिति। वश्यं मनोऽचेतनत्वाद् घ्राणवदिति। न्या० वा०।

‖ यत्तु २। ¶ मन इति नास्ति ४।

सेन्द्रियाणि शरीरान्तराणि तेषु तेषु युगपज् ज्ञेयान्युपलभते तच्चैतद्विभौ ज्ञातर्युपपद्यते नाणौ मनसीति । विभुत्वे वा मनसो ज्ञानस्य नात्मगुणत्व-प्रतिषेधः । विभु* च मनस्तदन्तःकरणभूतमिति तस्य सर्वेन्द्रियैर्युगपत् संयोगाद्युपगज् ज्ञानान्युत्पद्येरन्निति ।

तदात्मगुणत्वेपि तुल्यम् ॥ २० ॥

विभुरात्मा सर्वेन्द्रियैः संयुक्त इति युगपज् ज्ञानोत्पत्तिप्रसङ्ग इति ।

इन्द्रियैर्मनसः सन्निकर्षाभावात्तदनुत्पत्तिः† ॥ २१ ॥

गन्धाद पलब्धेरिन्द्रियार्थसन्निकर्षवदिन्द्रियमनःसन्निकर्षोपि कारणं तस्य चायौगपद्यमणुत्वान्मनसः । अयौगपद्यादनुत्पत्तिर्युगपज्‡ ज्ञानानामात्मगुणत्वेपीति । यदि पुनरात्मेन्द्रियार्थसन्निकर्षमात्राद्§ गन्धादिज्ञानमुत्पद्यते ।

नोत्पत्तिकारणानपदेशात् ॥ २२ ॥

आत्मेन्द्रियसन्निकर्षमात्राद् गन्धादिज्ञानमुत्पद्यते इति नायमुत्पत्ति-कारणमपदिश्यते येनैतत्प्रतिपद्येमहीति‖ ॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ २३ ॥

तदात्मगुणत्वेपि तुल्यमित्येतदनेन समुच्चीयते । द्विविधो हि गुणना-शहेतुः गुणानामाश्रयाभावो विरोधी च गुणः । नित्यत्वादात्मनो ऽनुपपन्नः पूर्वः विरोधी च बुद्धेर्गुणो न गृह्यते तस्मादात्मगुणत्वे सति बुद्धेर्नित्यत्वप्रसङ्गः ।

---

* विभु मनस्तदन्तःकरणभूतमिति ४ । ५ विभुत्वमन्तःकरणभूतमिति १ ।
† तदनुपपत्तिरिति ४ । ‡ युगपदिति नास्ति २ । ५ ।
§ मात्रं कारणमिति २ । ५ गन्धादिज्ञानमिति च नास्ति ।
‖ अस्मादेवोत्पद्यतामिति न कारणमपदिश्यतइति सूत्रार्थः । आत्मेन्द्रि-यार्थसन्निकर्षाज्ज्ञानमुत्पद्यतइत्ययुगपदुत्पत्तौ वा न कारणान्तरमपदिश्यतइति । विदेहप्रत्ययानुत्पत्तौ वा यदेन्द्रियमर्थेन बहिरवस्थितेन संबध्यते आत्मसंबन्धो ऽपि तत्रास्तीति कस्माद्विदेहप्रत्याख्याने च केवलमात्मा स्मृत्यादिकारणमिति कस्माच्च युगपदुत्पत्तिः स्मृतीनाम् । यदा चेन्द्रियमात्मा ऽर्थेन युगपत्सम्बद्धौ तदा किमिन्द्रियार्थसन्निकर्षः कारणमुतात्मार्थसन्निकर्ष उतात्मेन्द्रियसन्निकर्ष इति कार-णानपदेश इति न्या· वा· ।

अनित्यत्वग्रहाद्बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् ॥ २४ ॥

अनित्या बुद्धिरिति सर्वशरीरिणां प्रत्यात्मवेदनीयमेतत्। गृह्यते च बुद्धिसन्तानस्तच्च बुद्धेर्बुद्ध्यन्तरं विरोधो गुण इत्यनुमीयते यथा* शब्दसन्ताने शब्दः शब्दान्तरविरोधीति†। असंख्येयेषु ज्ञानकारितेषु संस्कारेषु स्मृतिहेतुष्वात्मसमवेतेष्वात्ममनसोश्च सन्निकर्षे समाने स्मृतिहेतौ सति न कारणस्यायौगपद्यमस्तीति. युगपत्स्मृतयः प्रादुर्भवेयुः यदि बुद्धिरात्मगुणः स्यादिति। तच्च कश्चित्सन्निकर्षस्यायौगपद्यमुपपादयिष्यन्नाह।

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ॥ २५ ॥

ज्ञानसाधनः संस्कारो ज्ञानमित्युच्यते ज्ञानसंस्कृतैरात्मप्रदेशैः पर्यायेण मनः संनिकृष्यते। आत्ममनःसन्निकर्षात्स्मृतयोपि पर्यायेण भवन्तीति।

नान्तःशरीरवृत्तित्वान्मनसः ॥ २६ ॥

सदेहस्यात्मनो मनसा संयोगो विपच्यमानकर्माशयसहितो जीवनमिष्यते तच्चास्य प्राक् प्रायणादन्तःशरीरे वर्तमानस्य मनसः ‡ शरीराद्बहिर्ज्ञानसंस्कृतैरात्मप्रदेशैः संयोगो नोपपद्यतइति।

साध्यत्वादहेतुः ॥ २७ ॥

विपच्यमानकर्माशयमाचं जीवनमेवं च सति साध्यमन्तःशरीरवृत्तित्वं मनस§ इति।

---

* तथा २।

† बुद्धेरनित्यत्वे साधिते बुद्ध्यन्तरात्संस्काराद्वा विनाश इति बोध्यम्। तस्या युगपदुत्पत्तिप्रतिषेधेऽपि युगपत्स्मृतेरप्रतिषेधाद् द्वितीयक्षणोत्पत्तया बुद्ध्या प्रथमक्षणोत्पत्तया बुद्धेर्नाशः शब्दवत्। अन्त्ययोस्तु बुद्धिशब्दयोः स्थितेर्हेत्यभावात्संस्काराद्वा कालाद्वा विनाशः। कारणायौगपद्यनिमित्तकश्चेज् ज्ञानयौगपद्यविरहः स्मृतीनां युगपदुत्पत्तिः प्राप्नोति कारणायौगपद्यात्। अत्र कारणस्य युगपदनेककक्रियानिवृत्तौ सामर्थ्यविरहादिति परिहारो मुख्यः। स्मृतिर्न युगपदुत्पद्यतेऽर्थपरिच्छेदत्वादनुभववदिति वा।

‡ मनसः शरीरासमवेतत्वेऽपि संयोगमात्रस्यातिप्रसक्तत्वेऽपि चेन्द्रियार्थसन्निकर्षस्य मनःकार्यस्य शरीराद् बहिः सत्त्वेन शरीरान्तरेण कार्यकारित्वनियमाभावेऽपि च येनात्मना यच्छरीरं कर्मोपार्जितं तत्संयुक्तस्य मनसो वैशिष्टयकज्ञानादिलक्षणकार्यकारित्वं न तदसंयुक्तस्येति शरीरान्वितत्वं मनसो नान्यदित्यर्थः।

§ अशरीरं मनः पुरुषार्थासमर्थमिति साध्यमेतत्। न्या॰ वा॰

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ॥ २८ ॥

सुस्मूर्षया खल्वयं मनः प्रणिदधानः चिरादपि कं चिदर्थं स्मरति स्मरतश्च शरीरधारणं दृश्यते आत्ममनःसन्निकर्षजश्च प्रयत्नो द्विविधो धारकः प्रेरकश्च निःसृते च शरीराद्बहिर्मनसि धारकस्य प्रयत्नस्याभावाद् गुरुत्वात्पतनं स्यात् शरीरस्य *स्मरत इति ।

न तदाशुगतित्वान्मनसः ॥ २९ ॥

आशुगति मनस्तस्य बहिः शरीरादात्मप्रदेशेन ज्ञानसंस्कृतेन सन्निकर्षः प्रत्यागतस्य च प्रयत्नोत्पादनमुभयं† युज्यतइति उत्पाद्य वा धारकं प्रयत्नं शरीरान्निःसरणं मनसो ऽतस्तचोपपन्नं धारणंमिति ।

न स्मरणकालानियमात् ॥ ३० ॥

किं चित्क्षिप्रं स्मर्यते किं चिच्चिरेण यदा चिरेण तदा सुस्मूर्षया मनसि धार्यमाणे चिन्ताप्रबन्धे सति कस्य चिदर्थस्य लिङ्गभूतस्य चिन्तनमाराधितं‖ स्मृतिहेतुर्भवति । तच्चैतच्चिरनिश्चरिते मनसि नोपपद्यतइति । शरीरसंयोगानपेक्षश्चात्ममनःसंयोगो न स्मृतिहेतुः शरीरस्य ¶भोगायतनत्वाद् उपभोगायतनं पुरुषस्य ज्ञातुः शरीरं न ततो निश्चरितस्य मनस आत्मसंयोगमात्रं ज्ञानसुखादीनामुत्पत्तौ कल्पते कृप्तौ वा शरीरवैयर्थ्य**मिति ।

आत्मप्रेरणयदृच्छाजनिताभिश्च न संयोगविशेषः ॥ ३१ ॥

आत्मप्रेरणेन वा मनसो बहिः शरीरात् संयोगविशेषः स्याद् यदृच्छया वा ऽऽकस्मिकतया जनया वा मनसः सर्वथा चानुपपत्तिः । कथं स्मर्तव्यत्वा-

---

* शरीरस्यात्मयत्न इति ५ ।

† स्मरणशरीरधारणे युगपद्भवत इति दृष्टम् । दृष्टं च सर्वेण प्रतिपत्तव्यम् । चिरनिश्चरिते च मनसि स्मरतः शरीरधारणं न स्यात् । न्या. वा. ।

‡ उभयतः युज्यतइति २ ।

§ उभयं सिध्यति स्मरणं धारणं च । न्या. वा. । ‖ आरचितमिति २ । ४ । ५ ।

¶ उपभोगायतनत्वादिति २ । ५ ।

** अनियतः स्मृतिकालो ऽतो ऽयुक्तमेतत् । शरीरसंयोगानपेक्षं चात्ममनःसंयोगं स्मृतिकारणं ब्रुवतः शरीरस्य भोगायतनत्वं निवर्तते ततस्तन्निवृत्तौ शरीरोत्पत्तिवैयर्थ्यमिति । न्या. वा. ।

दिच्छातः स्मरणज्ञानासम्भवाच्च । यदि तावदात्मा अमुष्यार्थस्य स्मृतिहेतुः संस्कारः अमुष्मिन्नात्मप्रदेशे समवेतस्तेन मनः संयुज्यतामिति मनः प्रेरयति तदा स्मृत एवासावर्थो भवति न स्मर्तव्यः । न चात्मप्रत्यक्ष आत्मप्रदेश :संस्कारो वा तच्चानुपपन्नात्मप्रत्यक्षेण संवित्तिरिति । सुस्मूर्षया चायं मनः प्रणिदधानश्चिरादपि कं चिदर्थं स्मरति नाकस्मात् । ज्ञत्वं च मनसो नास्ति ज्ञानप्रतिषेधादिति सतच्च ।

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥ ३२ ॥

यदा खल्वयं व्यासक्तमनाः क्व चिद्* दृश्ये शर्करया कण्टकेन वा पादव्यथनमाप्नोति तदात्ममनःसंयोगविशेष गर्पितव्यः । दृष्टं हि दुःखं दुःखवेदनं चेति तच्चायं समानः प्रतिषेधः । यदृच्छया तु विशेषो नाकस्मिकी क्रिया नाकस्मिकः संयोग इति ।

कर्मादृष्टसुपभोगार्थं क्रियाहेतुरिति चेत्समानम् ।

कर्मादृष्टं पुरुषस्थं पुरुषोपभोगार्थं मनसि क्रियाहेतुरेवं दुःखं दुःखसंवेदनं च सिध्यति चेत्येवं चेन्मन्यसे समानं स्मृतिहेतावपि सं|योगविशेषो भवितुमर्हति । तच्च यदुक्तमात्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेष इत्ययमप्रतिषेध इति । पूर्वस्तु प्रतिषेधो नान्तःशरीरवृत्तित्वान्मनस इति । कः खल्विदानीं कारणयौगपद्यसद्भावे युगपदस्मरणस्य हेतुरिति ।

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावादयुगपत्स्मरणम् ॥३३॥

यथा खलवात्ममनसोः सन्निकर्षः संस्कारश्च स्मृतिहेतुरेवं प्रणिधानं लिङ्गादिज्ञानानि तानि च न युगपद्भवन्ति तत्कृता स्मृतीनां युगपदनुत्पत्तिरिति ।

‡प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्ते यौगपद्यप्रसङ्गः ॥ ३४ ॥

यत्खल्विदं प्रातिभमिव ज्ञानं प्रणिधानाद्यनपेक्षं स्मार्तमुत्पद्यते कदाचित्तस्य युगपदुत्पत्तिप्रसङ्गो हेत्वभावात् सतः स्मृतिहेतोरसंवेदनात् प्रातिभेन समानाभिमानः । बह्वर्थविषये वै चिन्ताप्रबन्धे कश्चिदेवार्थः कस्य चित्स्मृतिहेतुः तस्यानुचिन्तनात् तस्य स्मृतिर्भवति न चायं स्मर्ता सर्वं स्मृतिहेतुं संवेदयते एवं मे स्मृतिरुत्पन्नेत्यसंवेदनात्प्रातिभमिव ज्ञानमिदं स्मार्त(मित्यभिमन्यते न त्वस्ति प्रणिधानाद्यपेक्षं स्मार्तामति ।

---

* देशे २ । ४ । ५ । † समिति नास्ति २ । ४ । ‡ इदं सू॰ न वृत्तिकारसम्मतमिति ।

प्रातिभे कथमिति चेत् पुरुषकर्मविशेषा)दुपभोगवन्नियमः* ॥

प्रातिभमिदानीं ज्ञानं युगपत् कस्मान्नोत्पद्यते यथोपभोगार्थं कर्म युगपदुपभोगं न करोति एवं पुरुषकर्मविशेषः प्रतिभाहेतुर्न युगपदनेकं प्रातिभं ज्ञानमुत्पादयति ।

हेत्वभावादयुक्तमिति चेद् न करणस्य प्रत्ययपर्यायेसामर्थ्यात् ॥

उपभोगवन्नियम इत्यस्ति दृष्टान्तो हेतुर्नास्तीति चेन्मन्यसे न करण-प्रत्ययपर्यायेसामर्थ्याद् नैकस्मिन् ज्ञेये युगपदनेकं ज्ञानमुत्पद्यते । न चानेकस्मिंस्तदिदं दृष्टेन प्रत्ययपर्यायेणानुमेयं करणसामर्थ्यमित्यंभूतमिति न ज्ञातुर्विकरणधर्मणो देहनानात्वे प्रत्ययप्रयोगपद्यादिति । अयं च द्वितीयः प्रतिषेधः व्यवस्थितशरीरस्य चानेकज्ञानसमवायादेकप्रदेशे युगपदनेकार्थस्मरणं स्यात् क्व चिदे†वावस्थितशरीरस्य ज्ञातुरिन्द्रियार्थप्रबन्धेन न ज्ञानमनेकमेकस्मिन्नात्मप्रदेशे समवैति । तेन यदा मनः संयुज्यते तदा ज्ञातपूर्वस्यानेकस्य युगपत् स्मरणं प्रसज्यते‡ । प्रदेशसंयोगपर्यायाभावादिति । आत्मप्रदेशानामद्रव्यान्तरत्वादेकार्थसमवायस्याविशेषे स्मृतियौगपद्यप्रतिषेधानुपपत्तिः । शब्दसन्ताने तु श्रोत्राधिष्ठानप्रत्यासत्त्या शब्दश्रवणवत्संस्कारप्रत्यासत्त्या§ मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिप्रसङ्गः । पूर्वं एव तु प्रतिषेधो नानेकज्ञानसमवायादेकप्रदेशे युगपत् स्मृतिप्रसङ्ग¶ इति । पुरुषधर्मो ज्ञानमन्तःकरणस्येच्छाद्वेषप्रयत्नसुखदुःखानि धर्मा इति कस्य चिद्दर्शनं तत्प्रतिषिध्यते ।

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ॥ ३५ ॥

अयं खलु जानीते तावदिदं सुखसाधनमिदं मे दुःखसाधनमिति ज्ञातं‖ स्वस्य सुखसाधनमाप्तुमिच्छति दुःखसाधनं हातुमिच्छति ¶प्राप्तुमिच्छा-

---

* ( ) एतन्मध्यगः पाठः २ पु. नास्ति । † क्व चिदेशे इति २ । ५ ।

‡ प्रसज्यतेति २ । ५ ।

§ का प्रत्यासत्तिः न हि संस्काराणां संनिकृष्टविप्रकृष्टभावो ऽस्ति समानदेशत्वात् । न ब्रूमः संनिकृष्टता प्रत्यासत्तिः । अपि तु संस्कारस्य सहकारिकारणसमवधानं प्रत्यासत्तिः । यथा शब्दाः सन्तानवर्त्तिनः सर्वत्रैवाकाशे समवयन्ति समानदेशत्वे ऽपि यस्योपलब्धेः कारणानि सन्ति स उपलभ्यते नेतरे तथा संस्कारेष्वपीति । न्या. वा. ।

‖ ज्ञात्वा सुखसाधनमिति ४ । ५ । ¶ प्राप्तीच्छेति ४ ।

युक्तस्यास्य* सुखसाधनावाप्तये समीहाविशेष आरम्भो जिहासाप्रयुक्तस्य दुःखसाधनपरिवर्जनं निवृत्तिरेवं ज्ञानेच्छाप्रयत्नद्वेषसुखदुःखानामेकेनाभिसंबन्धः। एककर्तृत्वं ज्ञानेच्छाप्रवृत्तीनां समानाश्रयत्वं च तस्माज् ज्ञस्येच्छाद्वेषप्रयत्नसुखदुःखानि धर्मा नाचेतनस्येति† आरम्भनिवृत्त्येश्च प्रत्यगात्मनि दृष्टत्वात् परत्रानुमानं वेदितव्यमिति। अत्र भूतचैतनिक आह।

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः‡ ॥ ३६ ॥

आरम्भनिवृत्तिलिङ्गाविच्छाद्वेषाविति यस्यारम्भनिवृत्तौ तस्येच्छाद्वेषौ तस्य ज्ञानमिति प्राप्तं पार्थिवाप्यतेजसवायवीयानां शरीराणामारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति चैतन्यम्।

परश्वादिष्वारम्भनिवृत्तिदर्शनात्§ ॥ ३७ ॥

शरीरचैतन्यनिवृत्तिः आरम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति प्राप्तं परश्वादेः करणस्यारम्भनिवृत्तिदर्शनाच्चैतन्यमिति। अथ शरीरस्येच्छादिभिर्योगः परश्वादेस्तु करणस्यारम्भनिवृत्तौ व्यभिचरतः न तर्ह्ययं हेतुः पार्थिवाप्यतेजसवायवीयानां शरीराणामारम्भनिवृत्तिदर्शनादिच्छाद्वेषज्ञानैर्योग इति। अयं तर्ह्यन्यो ऽर्थस्तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः पृथिव्यादीनां भूतानामारम्भस्तावत्‖ स स्थावरशरीरेषु तदवयवव्यूहलिङ्गः प्रवृत्तिविशेषः लोष्टादिषु लिङ्गाभावात् प्रवृत्तिविशेषाभावो निवृत्तिः आरम्भनिवृत्तिलिङ्गाविच्छाद्वेषाविति। पार्थिवाद्येष्वणुषु तद्दर्शनादिच्छाद्वेषयोस्तद्योगाज् ज्ञानयोग इति सिद्धं भूतचैतन्यमिति।

---

* इच्छतीति १ नास्ति।

† एतदुक्तं भवति। ज्ञानसामानाधिकरण्येनोपलब्धेरन्यदीयानामिच्छादीनामन्यस्याप्रत्यक्षीकरणात्तत्करणे वा मैत्रगतानां चैत्रेण ग्रहणप्रसङ्गादन्तःकरणवृत्तीनां च गुणान्तराणां नित्याप्रत्यक्षत्वादात्माश्रिता एवेच्छादयो नान्तःकरणाश्रया इति। ता॰ टी॰।

‡ प्रवृत्तिनिवृत्तिभ्यां सामानाधिकरण्याच्छरीरादिष्वप्रसङ्गः इति सूत्रार्थः। न्या॰ वा॰।

§ अनेकान्तो वाक्यार्थः। न्या॰ वा॰।

‖ त्रसत्सु स्थावरशरीरेषु २। त्रसस्था॰ ४। आरभस्तु स स्थावर ब॰ १।

कुम्भादिष्वनुपलब्धेरहेतुः ॥ ३८ ॥

कुम्भादिमृदवयवानां व्यूहलिङ्गः प्रवृत्तिविशेष आरम्भः सिकतादिषु प्रवृत्तिविशेषाभावो निवृत्तिः । न च मृत्सिकतानामारम्भनिवृत्तिदर्शनादिच्छा-द्वेषप्रयत्नज्ञानैर्योगः तस्मात्तल्लिङ्गत्वादिच्छाद्वेषयोरित्यहेतुरिति ।

नियमानियमौ तु तद्विशेषकौ ॥ ३९ ॥

तयोरिच्छाद्वेषयोर्नियमानियमौ* विशेषकौ भेदकौ ज्ञस्येच्छाद्वेषनि-मित्ते प्रवृत्तिनिवृत्ती न स्वाश्रये किं तर्हि प्रयोज्याश्रये । तच्च प्रयुज्यमानेषु भूतेषु प्रवृत्तिनिवृत्ती स्तः न सर्वेष्वित्यनियमोपपत्तिः । यस्य तु †ज्ञत्वाद्भूता-नामिच्छाद्वेषनिमित्ते आरम्भनिवृत्ती स्वाश्रये तस्य नियमः स्यात् । यथा भूतानां गुणान्तरनिमित्ता प्रवृत्तिर्गुणप्रतिबन्धाच्च निवृत्तिर्भूतमात्रे भवति नियमेनैवं भूतमात्रे ज्ञानेच्छाद्वेषनिमित्ते प्रवृत्तिनिवृत्ती स्वाश्रये स्यातां न तु भवतः तस्मात् प्रयोजकाश्रिता ज्ञानेच्छाद्वेषप्रयत्नाः प्रयोज्याश्रये तु प्रवृत्ति-निवृत्ती इति सिद्धम् । एकशरीरे ज्ञातृबहुत्वं निरनुमानं भूतचैतनिकस्यैक-शरीरे बहूनि भूतानि ज्ञानेच्छाद्वेषप्रयत्नगुणानीति ज्ञातृबहुत्वं प्राप्तम् । ओमिति ब्रुवतः प्रमाणं नास्ति यथा नानाशरीरेषु नानाज्ञातारो बुद्ध्यादिगुणव्यवस्था-नात् । एवमेकशरीरेपि बुद्ध्यादिव्यवस्थानुमानं स्याज् ज्ञातृबहुत्वस्येति‡ ।

---

* प्रयुज्यमानभूतविषयत्वं प्रवृत्तिनिवृत्त्योर्नियमः । यानि भूतानि प्रयु-ज्यन्ते तेष्वेव प्रवृत्तिनिवृत्ती भवतो न सर्वेषु । यदि पुनर्ज्ञत्वाद् भूतानां प्रवृत्तिनि-वृत्ती स्यातां भूतमात्रे स्याताम् । यथा गुरुत्वादिभ्यः । यानि गुरुत्वादिमन्ति भूतानि तानि स्वगुणात्पतन्तीति नियमश्च दृष्टः । तस्मान्न भूतानि चेतनानीति ।
न्या· वा· ।

† ज्ञत्वाद्भूतानामि २ । ५ । ज्ञानाद्भूतानामि ४ ।

‡ यथा हि मदिरावयवेष्वपि प्रत्येकमेव मदशक्तिरस्ति न पुनः समुदा-यमात्रसमवायिनी एवं शरीरावयवेष्वपीति प्रत्येकमेव चैतन्येन भवितव्यम् । न च वैयात्यात्कायसमुदायाश्रयमेव चैतन्यं नावयवाश्रयमिति शक्यमास्थातुं त्रिचतुराव-यवच्छेदे ऽपि चैतन्योपलम्भात् । तस्मादवयवानां प्रत्येकं चैतन्ये शरीरैकस्मिन् यावच्छेदे ऽपि चैतन्योपलम्भात् । तस्मादवयवानां प्रत्येकं चैतन्ये शरीरैकस्मिन् बहवश्चेतनाः स्युः । भवतु किं नो बाध्यतइति चेन्न विरुद्धाभिप्रायत्वे स्वतन्त्रा-णां न किं चिदपि कार्यं जायेत । न च बहूनामेकाभिप्रायनियमो दृष्टः काकता-लीयन्यायेन स्यादेकाभिप्रायत्वं न पुनरस्य नियमो दृष्टचर इति प्रसिद्धत्वादेतद् दूषणमुपेत्य वार्तिककृता प्रत्ययव्यवस्थाऽनुमानं न भवेदिति दूषणमुक्तम् । एक-

दृष्टश्चान्यान्यगुणनिमित्तः प्रवृत्तिविशेषो भूतानां सेानुमानमन्यत्रापि ॥

*दृष्टः करणलक्षणेषु भूतेषु परश्वादिषु उपादानलक्षणेषु† च मृत्प्रभृतिष्वन्यगुणनिमित्तः प्रवृत्तिविशेषः सेानुमानमन्यचापि स स्थावरशरीरेषु तदवयवव्यूहलिङ्गः प्रवृत्तिविशेषः‡ भूतानामन्यगुणनिमित्त इति । स च गुणः प्रयत्नसमानाश्रयः संस्कारो धर्माधर्मसमाख्यातः सर्वार्थः पुरुषार्थाराधनाय प्रयोजको भूतानां प्रयत्नवदिति । आत्मास्तित्वहेतुभिरात्मनित्यत्वहेतुभिश्च भूतचैतन्यप्रतिषेधः कृतो वेदितव्यः । नेन्द्रियार्थयोस्तद्विनाशेपि ज्ञानावस्थानादिति च समानः प्रतिषेध इति । क्रियामात्रं क्रियोपरममात्रं चारम्भनिवृत्ती इत्यभिप्रेत्योक्तं तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवादेष्वप्रतिषेधः§ । अन्यथा त्विमे आरम्भनिवृत्ती आख्याते न च तथाविधे पृथिव्यादिषु दृश्येते तस्मादयुक्तं तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवादेष्वप्रतिषेध इति भूतेन्द्रियमनसां समानः प्रतिषेधो मनस्तूदाहरणमात्रम् ॥

यथोक्तहेतुत्वात्पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ॥ ४० ॥

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमित्यतःप्रभृति यथोक्तं संगृह्यते तेन भूतेन्द्रियमनसां चैतन्यप्रतिषेधः पारतन्त्र्यात् । परतन्त्राणि भूतेन्द्रियमनांसि धारणप्रेरणव्यूहनक्रियासु प्रयत्नवशात्प्रवर्तन्ते चैतन्ये पुनः स्वतन्त्राणि स्युरिति । ॥अकृताभ्यागमाच्च प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति चैतन्ये भूतेन्द्रियमनसां परकृतं कर्म्म पुरुषेणोपभुज्यतइति स्याद् अचैतन्ये

स्मिन् शरीरे प्रत्ययानां परस्परप्रतिसंधानं पश्यामो न शरीरान्तरइति व्यवस्था सेयं यद्येकस्मिन् शरीरएक एव चेतनो न च शरीरान्तरे ततो भवेच्चान्यथेत्यर्थः । ता॰ टी॰ ।

* दृष्टश्चान्यगुणनिमित्त इति २।४।५। † भूप्रभृतिषु इति २।५ पुस्तके चो नास्ति।

‡ प्रतिषेध इति २।

§ हिताहितप्राप्तिपरिहारहेतुः परिस्पन्दः प्रवृत्तिविशेषः । सेा ऽयं प्रयोगः त्रसस्थावरशरीरेषु प्रवृत्तिः स्वाश्रयव्यतिरिक्ताश्रयगुणनिमित्ता प्रवृत्तिविशेषत्वात् परश्वादिगतप्रवृत्तिवत् । ता॰ टी॰ ।

॥ शरीरस्य चैतन्ये कर्तुर्भस्मीभावेन फलानुपभोगो ऽकर्तुः शरीरान्तरस्याकृतफलाभ्यागम इत्यर्थः ।

तु तत्साधनस्य स्वकृतकर्म्मफलोपभोगः पुरुषस्येत्युपपद्यतइति । अयायं सिद्धोपसंग्रहः* ॥

परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥ ४१ ॥

आत्मगुणो ज्ञानमिति प्रकृतम् । परिशेषो नाम प्रसक्तप्रतिषेधे अन्यचाप्रसङ्गाच्छिष्यमाणे संप्रत्ययः । भूतेन्द्रियमनसां प्रतिषेधे द्रव्यान्तरं न प्रसज्यते शिष्यते चात्मा तस्य गुणो ज्ञानमिति ज्ञायते । यथोक्तहेतूपपत्तेश्चेति दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनामात्मप्रतिपत्तिहेतूनामप्रतिषेधा†दिति । परिशेषज्ञापनार्थं प्रकृतस्थापनादिज्ञानार्थं च यथोक्तहेतूपपत्तिवचनमिति । अथ वोपपत्तेश्चेति हेत्वन्तरमेवेदं नित्यः खल्वयमात्मा यस्मादेकस्मिन् शरीरे धर्मं चरित्वा कायभेदात्‡ स्वर्गं देवेषूपपद्यते अधर्मं चरित्वा देहभेदाद् नरकेषूपपद्यते इति । उपपत्तिः शरीरान्तरप्राप्तिलक्षणा सा सति सत्त्वे नित्ये चाश्रयवती । बुद्धिप्रबन्धमात्रे तु निरात्मके निराश्रया नोपपद्यतइति । एकसत्त्वाधिष्ठानश्चानेकशरीरयोगः संसार उपपद्यते शरीरप्रबन्धोच्छेदश्चापवर्गो मुक्तिरित्युपपद्यते । बुद्धिसंततिमात्रे त्वेकसत्त्वानुपपत्तेर्ने कश्चिद्दीर्घमध्वानं संधावति न कश्चिच्छरीरप्रबन्धाद्विमुच्यतइति संसारापवर्गानुपपत्तिरिति । बुद्धिसंततिमात्रे च सत्त्वभेदात्सर्वमिदं प्राणिव्यवहारजातमप्रतिसंहित‖मव्यावृत्तमपरिनिष्ठितं च स्यात् । ततः स्मरणाभावान्नान्यदृष्टमन्यः स्मरतीति । स्मरणं च खलु पूर्वज्ञातस्य समानेन ज्ञाना ग्रहणमज्ञासि-

---

* उपसंहार इत्यर्थः । ता॰ टी॰ ।

† उपपत्तिपदार्थव्याख्यानमप्रतिषेधादिति । ता॰ टी॰ ।

‡ भेदाद्विनाशादिति । ता॰ टी॰ । § स्वर्गेषूप॰ ५ । २

‖ पूर्वेद्युरर्धकृतानामपरेद्युः परिसमापना दृष्टा समारब्धं ममैव समापनीयमिति प्रतिसंधाय । अप्रतिसंधाने तु न समापयेयुः । परिसमापने वा चैत्रारब्धमचैत्रः समापयेत् । यतः स्वयमारब्धात् परारब्धमव्यावृत्तमविशिष्टं स्वस्यापि परत्वात् । अपरिनिष्ठितं च कर्मजातं स्यात् । तथा हि । वैश्यस्तोमे वैश्य एवाधिकारी न ब्राह्मणराजन्यौ एवं राजसूये राजैव न ब्राह्मणो वैश्यो वा । एवं सोमसाधनके ब्राह्मण एवाधिकृतो न राजन्यवैश्यौ शूद्रश्चानधिकृत एवेति परिनिष्ठा सा बुद्धिसंततिमात्रे न स्यात् । कुतः । सल्लक्षणानां सर्वेषामेव त्रैलोक्यवैलक्षण्येन भेदात् । अन्यापोहसामान्यस्य च व्यावर्तितत्वादित्यर्थः । ता॰ टी॰ ।

षममुमर्थं ज्ञेयमिति सोयमेको ज्ञाता पूर्वज्ञातमर्थं गृह्णाति तच्चास्य ग्रहणं स्मरणमिति तद् बुद्धिप्रबन्धमात्रे निरात्मके नोपपद्यते ॥

स्मरणं त्वात्मनो ज्ञस्वाभाव्यात्* ॥ ४२ ॥

उपपद्यते इति आत्मन एव स्मरणं न बुद्धिसंततिमात्रस्येति । तुशब्दो ऽवधारणे कथं ज्ञस्वभावत्वाज् ज्ञ इत्यस्य स्वभावः स्वो धर्मः अयं खलु ज्ञास्यति जानाति अज्ञासीदिति त्रिकालविषयेणानेकेन ज्ञानेन संबध्यते तच्चास्य त्रिकालविषयं ज्ञानं प्रत्यात्मवेदनीयं ज्ञास्यामि जानामि अज्ञासिषमिति वर्त्तते तदस्यायं स्वो धर्मस्तस्य स्मरणं† न बुद्धिप्रबन्धमात्रस्य निरात्मकस्येति । स्मृतिहेतूनामयौगपद्यादुगपदस्मरणमित्युक्तम्‡ । अथ केभ्यः स्मृतिरुत्पद्यतइति स्मृतिः खलु ।

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसंबन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ॥ ४३ ॥

सुस्मूर्षया मनसो धारणं प्रणिधानं सुस्मूर्षितलिङ्गचिन्तनं चार्थस्मृतिकारणम्§ । निबन्धः खल्वेकग्रन्थोपयमोर्थानाम् एकग्रन्थोपयताः खल्वर्था अन्योन्यस्मृतिहेतव आनुपूर्व्येणेतरथा‖वा भवन्तीति । धारणाशास्त्रकृतो वा प्रज्ञातेषु वस्तुषु स्मर्तव्यानामुपनिःक्षेपो निबन्धश्¶ इति । अभ्यासस्तु

---

* त्रिकालव्यापिनो ज्ञानशक्तिरेव ज्ञस्वाभाव्यं तद्धाकाशादिभ्यो व्यावृत्तं त्रिकालव्यापि स्वरूपमेवात्मनः । ता· टी· ।

† स्यात्यमिति ९ ।

‡ स्मृतिहेतूनामयौगपद्यादित्येतत् सिंहावलोकितन्यायेन पृच्छत्यनन्तरसूत्रमवतारयितुम् । ता· टी· ।

§ तेषु तेषु प्रसक्तस्य मनसस्ततो निवारणमित्यर्थः । सुस्मूर्षितलिङ्गानुचिन्तनं वा साक्षाद्वा तत्र धारणं तल्लिङ्गे वा प्रयत्न इत्यर्थः । ता· टी· ।

‖ यथा नियहस्थानानां स्मृत्वा प्रमाणानां स्मरति । ता· टी· ।

¶ धारणशास्त्रं जैगीषव्यादिप्रोक्तं तत्कृतो ज्ञातेषु वस्तुषु नाडीचक्रहृत्पुण्डरीककण्ठकूपनासायतालुललाटब्रह्मरन्ध्रादिषु स्मर्तव्यानां बीजसंस्थानाभरणभृतां च देवतानामुपनिक्षेपः समारोपः । तथा च तत्र तत्र देवताः समारोपितास्तत्तद्विषयत्वयहणात्स्मर्यन्तइत्यर्थः । ता· टी· ।

समाने विषये ज्ञानानामभ्यावृत्तिरभ्यासजनितः संस्कार* आत्मगुणोभ्यास-शब्दनोच्यते स च स्मृतिहेतुः समान इति । लिङ्गं पुनः संयोगि समवाय्येकार्थसमवायि विरोधि चेति । संयोगि यथा धूमोग्नेः गोर्विषाणं पाणिः पादस्य रूपं स्पर्शस्य† अभूतं भूतस्येति । लक्षणं‡ पश्चवयवस्थं गोरस्य स्मृतिहेतुः बिदानामिदं गर्गाणामिदमिति । सादृश्यं चिचगतं प्रतिरूपकं देवदत्तस्येत्येवमादि । परिग्रहात्स्वेन वा स्वामी स्वामिना वा स्वं स्मर्यते । आश्रयाद् ग्रामण्या तदधीनं संस्मरति । आश्रितात् तदधीनेन ग्रामण्यमिति । संबन्धाद् अन्तेवासिना युक्तं गुरुं स्मरति ऋत्विजा याज्यमिति । आनन्तर्यादिति करणीयेष्वर्थेषु । वियोगाद् येन विप्रयुज्यते तद्वियोगप्रतिसंवेदी भृशं स्मरति । एककार्यात् कर्त्रन्तरदर्शनात्§ कर्त्रन्तरे स्मृतिः । विरोधाद् विजिगीषमाणयोरन्यतरदर्शनादन्यतर:‖ स्मर्यते । अतिशयाद् येनातिशय उत्पादितः । प्राप्तेः यतोनेन¶ किं चित्प्राप्तमाप्तव्यं वा भवति तमभीक्ष्णं स्मरति । व्यवधानात् कोशादिभिरभिभूतीनि स्मर्यन्ते सुखदुःखाभ्यां तद्धेतुः स्मर्यते । इच्छाद्वेषाभ्यां यमिच्छति यं च द्वेष्टि तं स्मरति । भयाद् यतो बिभेति । आर्थत्वाद् येनार्थो भोजनेनाच्छादनेन वा । क्रियया रथेन रथकारं स्मरति । रागाद् यस्यां स्त्रियां रक्तो भवति तामभीक्ष्णं स्मरति । धर्माज् जात्यन्तरस्मरणमिह चाधीतश्रुतावधारणमिति । अधर्मात्प्रागनुभूतदुःखसाधनं स्मरति । न**चैतेषु निमित्तेषु ††युगपत्संवेदनानि भवन्तीति युगपदस्मरणमिति । ‡‡निदर्शनं चेदं स्मृतिहेतूनां न परिसंख्यानमिति । अनित्यायां च बुद्धौ उत्पन्नापवर्गित्वात् कालान्तरावस्थानाच्च नित्यानां संशयः किमुत्पन्नापवर्गिणी बुद्धिः शब्दवदाहो स्वि-

---

* अत्र च स्मृतिहेतूनां न समावेशो विवक्षितः । तेन संस्कारेण स्मृतिकारणानां सर्वेषामेव प्रणिधानादीनां समावेश एव निबन्धनादिभिस्तु यथायोगं समावेशासमावेशावूहनीयाविति ता· टी· ।

† एकस्यावयविनो ऽर्थस्य समवायो ऽत्रेति समासे पाणिः पादस्येत्युदाहरणम् । एकस्मिंश्चर्थे समवायोस्येति समासे तु रूपं स्पर्शस्येति ।

‡ स्वाभाविकाविनाभावयुक्तं लिङ्गं सांकेतिकं तु चिन्हमिति विशेषः । ता· टी· । § कर्त्रन्तरबोधनाद् इति २ । ‖ अन्यतरत् २ । ¶ येन २ ।

** नेति नास्ति २ । †† अव्यवहिते २ ।

‡‡ ननून्मादादयोपि स्मृतिहेतवो लोकसिद्धास्तत् किं ते ऽपि नोक्ता इत्यत आह । ता· टी· ।

त्कालान्तरावस्थायिनी कुम्भवदिति । *उत्पन्नापवर्गिणीति पक्षः परिगृह्यते कस्मात् ।

कर्मानवस्थायिग्रहणात् ॥ ४४ ॥

कर्मणोनवस्थायिनो ग्रहणादिति क्षिप्रस्येषोरापतनात् क्रियासंतानो गृह्यते प्रत्यर्थनियमाच्च बुद्धीनां क्रियासंतानवद्बुद्धिसंतानोपपत्तिरिति । †अवस्थितग्रहणे च व्यवधीयमानस्य प्रत्यक्षनिवृत्तेः । अवस्थिते च कुम्भे गृह्यमाणे सन्तानेनैव बुद्धिर्वर्तते प्रागव्यवधानात् तेन व्यवहिते प्रत्यक्षं ज्ञानं निवर्तते कालान्तरावस्थाने तु बुद्धेर्दृश्यव्यवधानेपि प्रत्यक्षमवतिष्ठतेति । स्मृतिश्चालिङ्गं बुद्ध्यवस्थाने संस्कारस्य बुद्धिजस्य स्मृतिहेतुत्वात् । यश्च मन्येतावतिष्ठते बुद्धिः दृष्टा हि बुद्धिविषये स्मृतिः सा च बुद्धावनित्यायां कारणाभावान्न स्यादिति तदिदमलिङ्गं कस्माद् बुद्धिजो हि संस्कारो गुणान्तरं स्मृतिहेतुर्न बुद्धिरिति ।

हेत्वाभावादयुक्तमिति चेद् बुद्ध्यवस्थानात् प्रत्यक्षत्वे स्मृत्यभावः ।

यावदवतिष्ठते बुद्धिस्तावदसौ बोद्धव्यार्थः प्रत्यक्षः प्रत्यक्षे च स्मृतिरनुपपन्नेति‡ ॥

अव्यक्तग्रहणमनवस्थायित्वाद्विद्युत्संपाते रूपाव्यक्तग्रहणवत् ॥ ४५ ॥

यदुत्पन्नापवर्गिणी बुद्धिः प्राप्तमव्यक्तं बोद्धव्यस्य ग्रहणं यथा विद्युत्संपाते वैद्युतस्य प्रकाशस्यानवस्थानादव्यक्तं रूपग्रहणमिति व्यक्तं तु द्रव्याणां ग्रहणं तस्मादयुक्तमेतदिति ॥

---

* अन्येभ्यो विनाशिभ्य आशुतरं विनश्यतीति । न त्वयमर्थः उत्पद्येत्यनन्तरं ध्वंसतइति । कः पुनरत्र न्यायः आशुतरविनाशिनी बुद्धिः जातिमत्त्वे सति अस्मदादिप्रत्यक्षत्वे सति व्यापकद्रव्यसमवायाच्छब्दवदिति । आत्मत्वे व्यभिचारवारणायाद्यं विशेषणम् । आत्मगतपरममहत्परिमाणे व्यभिचारवारणाय द्वितीयम् । घटादौ व्यभिचारवारणाय विशेष्यं व्यापकत्वविशेषणं च । अथ वा ऽऽशुतरविनाशिनी बुद्धिः गुणत्वे सत्यबाह्यकरणप्रत्यक्षत्वात् सुखवदिति । सुखत्वादौ व्यभिचारवारणाय विशेषणम् । न्या॰ वा॰ ता॰ टी॰ ।

† अव्यवहितेति २ ।

‡ बुद्धेः स्थिरत्वे घटप्रत्यक्षानन्तरं व्यवधाने ऽपि घटं साक्षात्करोमीत्यनुव्यवसायप्रसङ्गः । कालान्तरे स्मृतिस्तु तज्जन्यसंस्कारनिमित्तिका न बुद्धिस्थैर्यनिमित्तिका । स्मृतेरेव बुद्धेरनवस्थायित्वम् । प्रत्यक्षनिरोधे सति तत्पूर्वकविषयप्रतिसंधेरेव स्मृतित्वात् प्रत्यक्षस्थैर्ये तदनुपपत्तेः ।

हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा ॥ ४६ ॥

उत्पन्नापवर्गिणी बुद्धिरिति प्रतिषेद्धव्यं त*देवाभ्यनुज्ञायते विद्युत्संपाते रूपाव्यक्तयहणवदिति । यचाव्यक्तयहणं तचोत्पन्नापवर्गिणी बुद्धिरिति ।

ग्रहणे हेतुविकल्पाद् ग्रहणविकल्पो न बुद्धिविकल्पात् ॥ ४७ ॥

यदिदं क्व चिदव्यक्तं क्व चिद्यक्तं यहणमयं यहणहेतुविकल्पाद् यचानवस्थितो यहणहेतुः तचाव्यक्तं यहणं यचावस्थितस्तच व्यक्तं† न तु बुद्धेरवस्थानानवस्थानाभ्यामिति । कस्मादर्थयहणं हि बुद्धिर्यच तदर्थयहणमव्यक्तं व्यक्तं वा बुद्धिः सेति । विशेषायहणे च सामान्ययहणमाचं व्यक्तयहणं तच विषयान्तरे बुद्ध्यन्तरानुत्पत्तिर्निमित्ताभावात् । यच समानधर्मयुक्तश्च धर्मो गृह्यते विशेषधर्मयुक्तश्च तद्व्यक्तं यहणं यच तु विशेषे ऽगृह्यमाणे सामान्ययहणमाचं तदव्यक्तं यहणम् । समानधर्मयोगाच्च विशिष्टधर्मयोगो विषयान्तरं तच यत्तु यहणं न भवति तद्यहणं निमित्ताभावाद् न बुद्धेरनवस्थानादिति । यथाविषयं च यहणं व्यक्तमेव प्रत्यर्थनियतत्वाच्च बुद्धीनां सामान्यविषयं च यहणं स्वविषयं प्रतिव्यक्तं‡ विशेषविषयं च यहणं स्वविषयं प्रतिव्यक्तं प्रत्यर्थनियता हि बुद्धयः तदिदमव्यक्तयहणं देशितं क्व विषये बुद्ध्यनवस्थानकारितं स्यादिति ।

धर्मिणस्तु धर्मभेदे बुद्धिनानात्वस्य भावाभावाभ्यां तदुपपत्तिः ।

धर्मिणः खल्वर्थस्य समानाश्च धर्मा विशिष्टाश्च तेषु प्रत्यर्थनियता नानाबुद्धयः ता उभय्यो यदि धर्मिणि वर्तन्ते तदा व्यक्तं यहणं धर्मिणमभिप्रेत्य । यदा तु सामान्ययहणमाचं तदा ऽव्यक्तं यहणमिति§ एवं धर्मिणमभिप्रेत्य व्यक्ताव्यक्तयोर्यहणयोरुपपत्तिरिति न वे॥दमव्यक्तं यहणं बुद्धेर्बोद्धव्यस्य वानवस्थायित्वादुपपद्यतइति । इदं हि न¶ ।

---

* तदेकत्रेति २ ।

† विद्युत्संपातकाले आलोकसंयोगेनैकस्याः सामान्यविषयिण्या बुद्धेरुत्पादे ऽपि द्वितीयक्षणे आलोकसंयोगाभावेन सहकारिकारणवैकल्येन विशेषविषयकबुद्धेरनुत्पादादव्यक्तं यहणमिति भावः ।

‡ प्रत्यव्यक्तमिति २ ।

§ यहणमेव धर्मिणमभिप्रेत्य एवं व्यक्ताव्यक्तयोरुपपत्तिरिति २ । ॥ न चेदमिति २ ।

¶ अनेकान्ताच्च । नायमेकान्तो ऽस्ति विषययहणहेतोर्यो ह्यस्यानवस्थानं तचाव्यक्तयहणम् । न्या· वा· ।

प्रदीपार्चिःसंतत्यभिव्यक्तग्रहणवत्तद्ग्रहणम् ॥ ४८ ॥

अनवस्थायित्वेपि बुद्धेस्तेषां द्रव्याणां ग्रहणं व्यक्तं प्रतिपत्तव्यम् । कथं प्रदीपार्चिःसंतत्यभिव्यक्तग्रहणवत् प्रदीपार्चिषां संतत्या वर्तमानानां ग्रहणानवस्थानं ग्राह्यानवस्थानं च प्रत्यर्थनियतत्वाद्वा बुद्धीनां यावन्ति प्रदीपार्चींषि तावत्यो बुद्धय इति । दृश्यते चाच व्यक्तं प्रदीपार्चिषां ग्रहणमिति । चेतना शरीरगुणः सति शरीरे भावादसति चाभावादिति ।

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥ ४९ ॥

सांशयिकः सति भावः* स्वगुणेष्वपि द्रवत्वमुपलभ्यते परगुणश्चोष्णता तेनायं संशयः किं शरीरगुणश्चेतना शरीरे गृह्यते अथ द्रव्यान्तरगुण इति। न शरीरगुणश्चेतना कस्मात् ।

यावच्छरीरभावित्वाद्रूपादीनाम्† ॥ ५० ॥

न रूपादिहीनं शरीरं गृह्यते चेतनाहीनं तु गृह्यते यथोष्णताहीना आपः तस्मान्न शरीरगुणश्चेतनेति ।

‡संस्कारवदिति चेद् न कारणानुच्छेदात्§ ।

यथाविधे द्रव्ये संस्कारः §तथाविध एवापरमो न तच्च कारणोच्छेदादत्यन्तं‖ संस्कारानुपपत्तिर्भवति यथाविधे शरीरे चेतना गृह्यते तथाविध एवात्यन्तोपरमश्चेतनाया गृह्यते तस्मात्संस्कारवदित्यसमः समाधिः। अथापि शरीरस्थं चेतनोत्पत्तिकारणं¶ स्याद् द्रव्यान्तरस्थं वा उभयस्थं वा तन्न नि-

---

* न सति भावाच्छरीरगुणत्वं चेतनायाः सिध्यति सति भावस्यान्यगुणत्वेऽपि दर्शनात् । न तावत्संयोगविभागसंस्काराः कर्मगुणाः अथ च सति कर्मणि भावोऽसति चाभाव इति । तद्गुणत्वं च तत्रोपलब्ध्या सिध्यति यद्यत्र वर्तमानमुपलभ्यते रूपादिकं तत्तस्य गुण इति । अथ सति भावादित्येन शरीरे चेतनोपलब्धिं ब्रूयात्तस्याप्यसिद्धता दोषः । न हि शरीरे चेतनोपलभ्यते चेतनामात्रं तूपलभ्यते तच्च संदिग्धं किं शरीरे उतान्यस्मिंचिति । न्या· वा· ।

† दृष्टान्तसूत्रं वैधर्म्येण । न्या· वा· ।

‡ यथा संस्कारः शरीरगुणो न च यावच्छरीरं वर्तते तथा चेतनापि। न्या· वा· ।

§ संस्कारस्य न शरीरमात्रं कारणम् । तस्य नोदनादिकारणसंनिधाने तदभावे च भावाभावौ युक्तौ । न्या· वा· । ‖ दत्यन्ता–२ ।

¶ अथ मन्यसे यथैव संस्कारस्य कारणमसंनिहितमेवं चेतनाकारणमपीति तदयुक्तम् । विकल्पानुपपत्तेः । यच्छरीरे चेतनोत्पत्तिकारणं तत्किं शरीर-

यमहेत्वभावात् । शरीरस्येन कदा चिच्चेतनोत्पद्यते कदा चिन्नेति नियमे हेतुर्नास्तीति । द्रव्यान्तरस्येन च शरीरएव चेतनोत्पद्यते न लोष्टादिष्वित्यच नियमहेतुरस्तीति । उभयस्य* निमित्तत्वे शरीरसमानजातीयद्रव्ये चेतना नोत्पद्यते शरीरएव चोत्पद्यते इति नियम†हेतुर्नास्तीति । यच्च मन्येत सति श्यामादिगुणे द्रव्ये श्यामाद्युपरमो दृष्टः एवं चेतनोपरमः स्यादिति ।

न पाकजगुणान्तरोत्पत्तेः ॥ ५१ ॥

नात्यन्तरूपोपरमो द्रव्यस्य श्यामे रूपे निवृत्ते पाकजं गुणान्तरं रक्तं रूपमुपपद्यते शरीरे तु चेतनामाचोपरमो ऽत्यन्तमिति । अथापि ।

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ ५२ ॥

यावत्सु द्रव्येषु पूर्वगुणप्रतिद्वन्द्विसिद्धिस्तावत्सु पाकजोत्पत्तिर्दृश्यते पूर्वगुणेः सह पाकजानामवस्थानस्याग्रहणात् । न च शरीरे चेतनाप्रतिद्वन्द्विसिद्धौ सहानवस्थायि गुणान्तर‡ गृह्यते येनानुमीयेत तेन चेतनाया विरोधः । तस्मादप्रतिषिद्धा चेतना यावच्छरीरं वर्तेत न तु वर्तते तस्मान्न शरीरगुणश्चेतना इति । इतश्च न शरीरगुणः चेतना ।

शरीरव्यापित्वात् ॥ ५३ ॥

शरीरं शरीरावयवाश्च सर्वं चेतनोत्पत्त्या व्याप्ता इति न क्व चिदनुत्पत्तिश्चेतनायाः शरीरवच्छरीरावयवाश्चेतना इति प्राप्तं चेतनबहुत्वं तच्च यथा प्रतिशरीरं चेतनबहुत्वे सुखदुःखज्ञानानां व्यवस्था लिङ्गमेवमेकशरी-

---

स्यमुत द्रव्यान्तरस्यम् । शरीरस्यमपि च यावद्द्रव्यभावि उत नैमित्तिकमिति । यदि यावद्द्रव्यभावि न कदा चिच्चेतनाहीनं शरीरमुपलभ्येत निमित्तस्य संनिहितत्वात् । अथ नैमित्तिकं यच्छरीरे चेतनोत्पत्तेर्निमित्तस्य कारणं तत्रापि चेतनावत्त्वसङ्गः । अथ द्रव्यान्तरवृत्तिकारणं शरीरे चेतनां करोति न द्रव्यान्तरेष्वित्यत्रापि नियमहेतुर्वक्तव्यः । द्रव्यान्तरस्थं नित्यमनित्यं वा । अनित्यमपि कालान्तरस्थायि प्रतिक्षणध्वंसि वेति चेतनावत्त्वसङ्गः । न्या. वा. ।

* उभयस्यस्येति ५ उभयतस्तच्चि० २ । † नियमे १ ।

‡ अथ मन्यसे शरीरे ऽचेतना गुणान्तरमिति तन्न । रूपतो ऽनिर्देशात् । यत्तदचेतनत्वं तच्चेतनाविपरीतं धर्मभूतं वस्तु उत चेतनाप्रतिषेधमात्रमिति । यदि विपरीतं चेतनावत्संवेद्यं स्यात् । अथ चेतनप्रतिषेधमात्रं तन्न गुण इति । न्या. वा.

रेपि* स्याद् न तु भवति । तस्मान्न शरीरगुणश्चेतनेति । यदुक्तं न क्व चिच्छरीरावयवे चेतनाया अनुत्पत्तिरिति† स न ।

केशनखादिष्वनुपलब्धेः‡ ॥ ५४ ॥

केशेषु नखादिषु चानुत्पत्तिश्चेतनाया इति अनुपपन्नं शरीरव्यापित्वमिति ।

त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः ॥ ५५ ॥

इन्द्रियाश्रयत्वं शरीरलक्षणं त्वक्पर्यन्तं जीवमनःसुखदुःखसंवित्त्यायतनभूतं शरीरं तस्मान्न केशादिषु चेतनोत्पद्यते । अर्थकारितस्तु शरीरोपनिबन्धः केशादीनामिति§ । इतश्च न शरीरगुणश्चेतना ।

शरीरगुणवैधर्म्यात् ॥ ५६ ॥

द्विविधः शरीरगुणो ऽप्रत्यक्षश्च गुरुत्वम् । इन्द्रियग्राह्यश्च रूपादिः विधान्तरं तु चेतना नाप्रत्यक्षा संवेद्यत्वाद् नेन्द्रियग्राह्या मनोविषयत्वात् तस्माद् द्रव्यान्तरगुण इति ।

न रूपादीनामितरेतरवैधर्म्यात् ॥ ५७ ॥

यथेतरेतरविधर्माणो रूपादयो न शरीरगुणत्वं जहत्येवं रूपादिवैधर्म्याच्चेतना शरीरगुणत्वं न हास्यतीति ।

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ॥ ५८ ॥

अप्रत्यक्षत्वाच्चेति यथेतरेतरविधर्माणो रूपादयो न द्वैविध्यमतिवर्तन्ते तथा रूपादिवैधर्म्याच्चेतना न द्वैविध्यमतिवर्तेत यदि शरीरगुणः स्यादिति । अतिवर्तते तु तस्मान्न शरीरगुण‖ इति भूतेन्द्रियमनसां ज्ञान-

---

* । २ अपिर्नास्ति । † (सा) नास्ति २ ।

‡ दृष्टान्तसूत्रम् । न्या· वा· । न करचरणादयश्चेतनाः शरीरावयवत्वात् केशनखादिवदिति । ता· टी· ।

§ शरीरावयवत्वं केशनखादीनां हेतुरसिद्धः । इन्द्रियाश्रयत्वं हि शरीरलक्षणं तच्च शरीरं समवेतं तेनेन्द्रियाश्रयेणावश्यं भवितव्यं त्वक्पर्यन्तावयवसमूहस्तथा न तु केशनखादयस्तादृशा इति न शरीरावयवा इत्यर्थः । ता· टी· ।

‖ चेतना शरीरगुणत्वाभाववती बाह्यकरणाजन्यप्रत्यक्षविषयत्वात्सुखादिवदिति प्रयोगः ।

प्रतिषेधात् । सिद्धे सत्यारम्भो विशेषज्ञापनार्थः । बहुधा परीक्ष्यमाणं तत्त्वं सुनिश्चिततरं भवतीति । परीक्षिता बुद्धिः मनस इदानीं परीक्षाक्रमः *तत्प्रतिशरीरमेकमनेकमिति विचारे ।

ज्ञानायौगपद्यादेकं मनः ॥ ५९ ॥

अस्ति खलु† वै ज्ञानायौगपद्यमेकैकस्येन्द्रियस्य यथाविषयं करणस्यैकप्रत्ययनिर्वृत्तौ सामर्थ्यान्न तदेकत्वे मनसो लिङ्गं यत्तु खल्विद‡मिन्द्रियान्तराणां विषयान्तरेषु ज्ञानायौगपद्यमिति तल्लिङ्गम् । कस्मात्सम्भवति खलु वै बहुषु मनःस्विन्द्रियमनःसंयोगयौगपद्यमिति ज्ञानयौगपद्यं स्यात् । न तु भवति तस्माद्विषये प्रत्ययपर्यायादेकं मनः§ ।

न युगपदनेकक्रियोपलब्धेः ॥ ६० ॥

अयं खल्वध्यापकोधीते व्रजति क्रमशब्दं धारयति पन्थानं पश्यति शृणोत्या‖रण्यजान् शब्दान् बिभेति¶ व्यालिङ्गानि बुभुत्सते स्मरति च गन्तव्यं संस्त्यायन**मिति क्रमस्याग्रहणाद्युगपदेताः क्रिया इति प्राप्तं मनसो बहुत्वमिति ।

अलातचक्रदर्शनवत्तदुपलब्धिराशुसंचारात् ॥ ६१ ॥

आशुसंचारादलातस्य†† भ्रमतो‡‡ विद्यमानः क्रमो न गृह्यते क्रमस्याग्रहणादविच्छेदबुद्ध्या चक्रवद्बुद्धिर्भवति§§ । तथा बुद्धीनां क्रियाणां चाशुवृत्तित्वाद्विद्यमानः क्रमो न गृह्यते क्रमस्याग्रहणाद्युगपत् क्रिया भवन्तीति अभिमानो भवति । किं पुनः क्रमस्याग्रहणाद् युगपत् क्रियाभिमानः अथ युगपद्भावादेव युगपदनेकक्रियोपलब्धिरिति । नात्र विशेषप्रतिपत्तेः कारणमुच्यते||| उक्तमिन्द्रियान्तराणां विषयान्तरेषु पर्यायेण बुद्धयो भवन्तीति तच्चाप्रत्याख्ये-

---

* तत्किमिति १ । ४ । ५ । † २ । खल्विति नास्ति । ‡ ४ इदमिति नास्ति ।

§ यदि बहूनि मनांसि स्युः प्रतीन्द्रियं मनसः संबन्ध इति युगपदनेकार्थसंनिधाने युगपदनेकज्ञानानि यत्त्वेकेन्द्रियग्राह्येषु ज्ञानानामयुगपद्भावः स न मनस एकत्वे लिङ्गम् । करणत्वात्तद्भवतीत्युक्तम् । न्या. वा ।

‖ अरण्येति १ । २ । ४ । ¶ बिभ्यद्व्यालिङ्गानि १ । ४ ।

** स्थानीयमिति २ । ५ । स्थानीयमिति ४ । †† अलातचक्रस्येति ५ । ‡‡ संभ्रमत इति ४ । §§

§§ भवतीति इति २ । ४ । ५ । ||| उच्यतइति इति २ । ४ । ५ ।

यमात्मप्रत्यक्षत्वात्। अथापि दृष्टश्रुतानर्थांश्चिन्तयतः क्रमेण बुद्धयो वर्तन्ते न युगपदनेनानुमातव्यमिति। वर्णपदवाक्यबुद्धीनां तदर्थबुद्धीनां चाशुवृत्तित्वात् क्रमस्याग्रहणम्। कथं वाक्यस्येषु खलु वर्णेषूच्चरत्सु प्रतिवर्णं तावच्छ्रवणं भवति श्रुतं वर्णमेकमनेकं वा पदभावेन प्रतिसंधत्ते प्रतिसंधाय पदं व्यवस्यति पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते पदसमूहप्रतिसंधानाच्च वाक्यं व्यवस्यति संबद्धांश्च पदार्थान् गृहीत्वा वाक्यार्थं प्रतिपद्यते। न चासां* क्रमेण वर्तमानानां बुद्धीनामाशुवृत्तित्वात् क्रमो गृह्यते तदेतदनुमानमन्यच्च बुद्धिक्रियायौगपद्याभिमानस्येति। न चास्ति† मुक्तसंशयं‡ युगपदुत्पत्तिर्बुद्धीनां यया मनसो बहुत्वमेकशरीरे ऽनुमीयतइति।

यथोक्तहेतुत्वाच्चाणु§ ॥ ६२ ॥

अणु मन एकं चेति धर्मसमुच्चयो ज्ञानायौगपद्यात्। महत्त्वे मनसः सर्वेन्द्रियसंयोगाद्युगपद्विषयग्रहणं स्यादिति। मनसः खलु‖ भोः सेन्द्रियस्य शरीरे वृत्तिलाभो नान्यच्च शरीरात्। ज्ञातुश्च पुरुषस्य शरीरायतना बुद्ध्यादयो विषयोपभोगो जिहासितहानमीप्सितावाप्तिश्च सर्वं च शरीराश्रया व्यवहाराः। तच्च खलु विप्रतिपत्तेः संशयः किमयं पुरुषकर्मनिमित्तः शरीरसर्गः आहोश्¶ भूतमात्रादकर्मनिमित्त इति। श्रूयते खल्वच्च विप्रतिपत्तिरिति। तचेदं तत्त्वम्।

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ६३ ॥

पूर्वशरीरे या प्रवृत्तिर्वाग्बुद्धिशरीरारम्भलक्षणा। तत्पूर्वकृतं कर्मोक्तं तस्य फलं तज्जनितौ धर्माधर्मौ। तत्फलस्यानुबन्ध आत्मसमवेतस्यावस्थानं

---

* न चासौ २।

† न चास्योभयपक्षसंप्रतिपत्त्या युगपदुत्पत्तिर्यया बहुत्वं मनसः प्रतिपद्येमहीति। न्या॰ वा॰।

‡ युक्तिः संशयादिति २। मुक्तसंशया इति ४।

§ य एवैकत्वे मनसो हेतुरुक्तो ऽनेनैवाणु मनो ऽवसातव्यमिति। न्या॰ वा॰।

‖ मनसः खलु भोः सेन्द्रियस्य शरीरे वृत्तिः। शरीरे विचारिते मन एव विचारितं भवतीत्यतः शरीरं पुनर्विचार्यते। न्या॰ वा॰। मन एवाधिकरणविचारेणापि परीक्ष्यतइति नासंबन्धः शरीरोत्पत्तिनिमित्तविचारस्य। परीत्य दृष्ट्वा हि परीक्षा सापि रूपतः संबन्धितश्च। शरीरं च मनःसंबन्धि तदधिकरणत्वान्मनसः। तस्मान्मनस एवेयं परीक्षा या शरीरस्येत्यर्थः। ता॰ टी॰। ¶ अथ वा इति ५।

तेन प्रयुक्तेभ्यो भूतेभ्यस्तस्योत्पत्तिः* शरीरस्य न स्वतन्त्रेभ्य इति । यदधिष्ठानोऽयमात्मायमहमिति† मन्यमानो यचाभियुक्तो यचोपभोगतृष्णया विषयानुपलभमानो धर्माधर्मौ संस्करोति तदस्य शरीरं तेन संस्कारेण धर्माधर्मलक्षणेन भूतसहितेन (यतिते)‡स्मिन् शरीरे उत्तरं§ निष्पद्यते निष्पन्नस्य चास्य‖ पूर्वशरीरवत्पुरुषार्थक्रिया पुरुषस्य च¶ पूर्वशरीरवत् प्रवृत्तिरिति कर्मापेक्षेभ्यो भूतेभ्यः शरीरसर्ग सत्येतदुपपद्यते इति । दृष्टा च पुरुषगुणेन प्रयत्नेन प्रयुक्तेभ्यो भूतेभ्यः पुरुषार्थक्रियासमर्थानां द्रव्याणां **रथप्रभृतीनामुत्पत्तिः तथा††नुमातव्यं शरीरमपि पुरुषार्थक्रियासमर्थमुत्पद्यमानं पुरुषस्य गुणान्तरापेक्षेभ्यो भूतेभ्य उत्पद्यते‡‡ इति । अत्र नास्तिक आह ।

भूतेभ्यो मूर्त्युपादानवत्तदुपादानम्§§ ॥ ६४ ॥

यथा कर्मनिरपेक्षेभ्यो भूतेभ्यो निर्वृत्ता मूर्तयः सिकता‖‖शर्कराषाणगैरिकाञ्जनप्रभृतयः पुरुषार्थकारित्वादुपादीयन्ते तथा कर्मनिरपेक्षेभ्यो भूतेभ्यः शरीरमुत्पन्नं पुरुषार्थकारित्वादुपादीयतइति ।

¶¶न साध्यसमत्वात् ॥ ६५ ॥

यथा शरीरोत्पत्तिरकर्मनिमित्ता साध्या तथा सिकताशर्करापाषाणगैरिकाञ्जनप्रभृतीनामप्यकर्मनिमित्तः सर्गः साध्यः साध्यसमत्वादसाधनमिति*† । भूतेभ्यो मूर्त्युत्पादनवदिति चानेन साम्यम् ।

---

* तस्य शरीरस्योत्पत्तिरिति २ । ५ । † यदहमिति २ । ‡ ( ) नास्ति २ ।
§ शरीरान्तरम् निष्पाद्यते इति २ । ५ । ‖ तस्येति २ । ५ । ¶ चो नास्ति २ । ५ ।
** सक्प्रभृतीनामिति २ । ५ । †† तयेति २ । ५ ।

‡‡ पुरुषगुणाप्रेरितभूतपूर्वकं शरीरं कार्यत्वे सति पुरुषार्थक्रियासामर्थ्यात् । यत्पुरुषार्थसमर्थं तत्पुरुषगुणाप्रेरितभूतपूर्वकं दृष्टं यथा रथादि पुरुषगुणेन प्रयत्नेन प्रेरितैर्भूतैरारभ्यमाणं पुरुषार्थक्रियासमर्थं दृष्टं तथा च शरीरं तस्मादिदमपि सापेक्षैर्भूतैरारभ्यते । सुखदुःखनिमित्तत्वाद् घटादिवत् । हृतश्च कार्यत्वाद्वास्यादिवदिति । वास्यादिकरणप्रत्यक्षत्वे सति रूपादिमत्त्वाद् घटादिवदेव । न्या· वा· ।

§§ पुरुषार्थक्रियासामर्थ्यादित्यस्य हेतोरनैकान्तिकत्वद्वारकं सूत्रम् । न्या· वा· ।

‖‖ पाषाणशर्करा इति २ ।

¶¶ साधनपक्षे दृष्टान्तमात्रत्वादसिद्धम् । अथ पक्षः निरपेक्षाणि भूतानि शरीरमारभन्ते पुरुषार्थक्रियासामर्थ्यात् सिकतादिवदिति तच्च न । न्या· वा· ।

*† सिकतादीनामपि कर्मनिमित्तकः सर्ग इत्येतस्माद्धेतोः सिध्यतीति ।

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६६ ॥

विषमश्चायमुपन्यासः। कस्माद् निर्बीजा इमा मूर्तय उत्पद्यन्ते बीजपूर्विका तु शरीरोत्पत्तिः। मातापितृशब्देन लोहितरेतसी बीजभूते* गृह्येते तच्च सत्त्वस्य गर्भवासानुभवनीयं कर्म पित्रोश्च पुत्रफलानुभवनीये कर्मणी मातुर्गर्भाश्रये शरीरोत्पत्ति भूतेभ्यः प्रयोजयन्तीत्युपपन्नं बीजानुविधानमिति।

तथा ऽऽहारस्य ॥ ६७ ॥

उत्पत्तिनिमित्तत्वादिति प्रकृतम्। भुक्तं पीतमाहारस्तस्य पक्तिनिर्वृत्तं रसद्रव्यं मातृशरीरे चोपचिते बीजे गर्भाशयस्थे बीजसमानपाकं† माचया चोपचयो बीजे ‡यावद्व्यूहसमर्थः संचय इति। संचितं चार्बुदमांसपेशीकलललकण्डर§शिरः‖पाण्यादिना च व्यूहेनेन्द्रियाधिष्ठानभेदेन व्यूह्यते व्यूहे च गर्भेनाऽऽवतारितं रसद्रव्यमुपचीयते यावत्प्रसवसमर्थमिति। न ¶चायमन्नपानस्य स्थाल्यादिगतस्य कल्पतइति। यतस्मात्कारणात्कर्मनिमित्तत्वं शरीरस्य विज्ञायतइति।

प्राप्तौ चानियमात् ॥ ६८ ॥

न सर्वौ दंपत्योः संयोगो गर्भाधानहेतुर्दृश्यते तच्चासति कर्मणि न भवति सति च भवतीत्यनुपपन्नो नियमाभाव इति कर्मनिरपेक्षेषु भूतेषु शरीरोत्पत्तिहेतुषु नियमः स्यात् न ह्यच कारणाभाव इति। अथापि।

**शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म†† ॥ ६९॥

यथा खल्विदं शरीरं धातुप्राणसंवाहिनीनां नाडीनां शुक्रान्तानां

तथा चोभयपक्षसंप्रतिपन्नो रथादिर्दृष्टान्तः पुरुषगुणप्रेरितभूतपूर्वको ऽस्ति न तथा ऽकर्मनिमित्तसर्गपक्षे दृष्टान्तो ऽस्तीति। न्या॰ वा॰।

* ननु मातापितरौ शरीरोत्पत्तौ न साक्षात्कारणमत आह। ता॰ टी॰।

† पाकमात्रं चेति २। ‡ पाचनव्यूहेति २। ४।

§ कण्डूल २ कयडरा ४ कण्डर ५ कडर ९।

‖ पाणिपादादिनेति २। ¶ इदमिति २। ५।

** नन्वात्मनां विभुत्वात्सकलशरीरैः संबन्धादिदं शरीरमस्येवात्मन इति नियमे को हेतुरित्यस्योत्तरद्वारकं सूत्रम्। †† निमित्ते कर्माशये इति २।

धातूनां च स्नायुत्वगस्थिशिरापेशीकललकण्डराणां च शिरोबाहूदराणां *सक्थ्नां च कोष्ठगानां च वातपित्तकफानां च मुखकण्ठहृदयामाशयपक्वाशयाधःस्रोतसां च परमदुःखसंपादनीयेन सन्निवेशेन व्यूहनमशक्यं† पृथिव्यादिभिः कर्मनिरपेक्षैरुत्पादयितुमिति कर्मनिमित्ता शरीरोत्पत्तिरिति विज्ञायते । एवं च प्रत्यात्मनियतस्य निमित्तस्याभावान्निरतिशयैरात्मभिः संबन्धात्सर्वात्मनां च समानैः पृथिव्यादिभिरुत्पादितं शरीरं पृथिव्यादिगतस्य च नियमहेतोरभावात् सर्वात्मनां सुखदुःखसंवित्त्यायतनं§ समानं प्राप्नम् । यत्तु प्रत्यात्मं व्यवतिष्ठते तच्च शरीरोत्पत्तिनिमित्तं कर्म‖ व्यवस्थाहेतुरिति विज्ञायते । परिपच्यमानो हि प्रत्यात्मनियतः कर्माशयो यस्मिन्नात्मनि वर्तते तस्यैवोपभोगायतनं शरीरमुत्पाद्य व्यवस्थापयति । तदेवं शरीरोत्पत्तिनिमित्तवत्संयोगनिमित्तं कर्मेति विज्ञायते । प्रत्यात्मव्यवस्थानं तु शरीरस्यात्मना संयोगं प्रचक्ष्महे¶ इति ॥

एतेनानियमः प्रत्युक्तः** ॥ ७० ॥

††यो ऽयमकर्मनिमित्ते शरीरसर्गे सत्यनियम इत्युच्यते अयं शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्मत्यनेना (नियमः)‡‡ प्रत्युक्तः । कस्तावदयं नियमः यथैकस्यात्मनः शरीरं तथा सर्वेषामिति नियमः । §§अन्यस्या-

---

* मत्तान्तकोष्ठाङ्गानाञ्चेति २ ।
† व्यूहितुम् २ व्यूहितम् ५ ।
‡ कर्मनिरपेक्षैरिति २ ।
§ संवित्तिसाधनमिति २ । ५ ।

‖ येनैव कर्मणा शरीरमुत्पाद्यते तदेव संयोगं नियमयति । अकर्मनिमित्ते शरीरसर्गे यथोक्तदोष इति । न्या· वा· ।

¶ कर्मणास्तदात्मसंबन्धित्वनियमस्तु संयोगनिमित्तकः । संयोगे ऽपि तदात्मसंबन्धित्वनियमो मनोनिमित्तकः यस्यात्मनो यन्मनस्तेन यः संयोगो जन्यते स तस्येति । मनसस्तदीयभावस्तु कर्मनिमित्तकः अनादित्वाच्च संसारस्य न चक्रकम् । संयोगप्रचयसंसर्गः २ पा· ।

** तदेवमात्मगुणनिबन्धने शरीरसर्गे व्यवस्था दर्शिता । ये तु मेनिरे न कर्मनिबन्धनः शरीरसर्गो ऽपि तु प्रकृत्यादिनिबन्धनः । प्रकृतयो हि स्वयमेव धर्माधर्मरूपनिमित्तानपेक्षाः सत्त्वरजस्तमोरूपतया प्रवृत्तिशीलाः स्वं स्वं विकारमारभन्ते प्रतिबन्धापगममात्रे तु धर्माधर्मावपेक्षन्ते । तद्यथा कृषीवलः केदाराद्यां पूर्णात्केदारान्तरमपूर्णमापिप्लावयिषुरपां सेतुमात्रं भिनत्ति । तास्तु निम्नाभिसर्पणस्वभावा अपहतसेतवः स्वयमेव केदारमाप्लावयन्ति एवमाप्लावयन्ति प्रकृतयो ऽपि विकारानिति । यथाहुः निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदिति तान्नत्याह । ता· टी· ।

†† सो ऽयमकर्मनिमित्तशरीरसर्गे मते नियम इ· २ ।

‡‡ ( ) नास्ति । १ । २ । ४ । ५

§§ द्विवारं नास्ति ४ अन्यस्यान्यथान्यथेति २ ।

न्यथान्यस्यान्यथेत्यनियमे भेदो व्यावृत्तिर्विशेष इति । दृष्टा च जन्मव्यावृत्तिरुच्चाभिजनो निकृष्टाभिजन इति प्रशस्तं निन्दितमिति व्याधिबहुलमरोगमिति समग्रं विकलमिति पीडाबहुलं सुखबहुलमिति पुरुषातिशयलक्षणोपपन्नं विपरीतमिति प्रशस्तलक्षणं निन्दितलक्षणमिति पट्विन्द्रियं मृद्विन्द्रियमिति । सूक्ष्मश्च भेदो ऽपरिमेयः सोयं जन्मभेदः प्रत्यात्मनियतात्कर्मभेदादुपपद्यते असति कर्मभेदे प्रत्यात्मनियते निरतिशयित्वादात्मनां समानत्वाच्च पृथिव्यादीनां पृथिव्यादिगतस्य नियमहेतोरभावात्सर्वं* सर्वात्मनां प्रसज्येत न त्विदमित्थंभूतं जन्म तस्मान्नाकर्मनिमित्ता शरीरोत्पत्तिरिति ॥

†उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः ॥ ७१ ॥

कर्मनिमित्ते शरीरसर्गे तेन शरीरेणात्मनो वियोग उत्पन्नः । कस्मात्कर्मक्षयोपपत्तेः । उपपद्यते खलु कर्मक्षयः सम्यग्दर्शनात् प्रक्षीणे मोहे वीतरागः पुनर्भवहेतुकर्म कायवाङ्मनोभिर्न करोति इत्युत्तरस्यानुपचयः पूर्वोपचितस्य विपाकप्रतिसंवेदनात्प्रक्षयः । एवं प्रसवहेतोरभावात् पतितेस्मिन् शरीरे पुनः शरीरान्तरानुपपत्तेरप्रतिसंधिः‡ । अकर्मनिमित्ते तु शरीरसर्गे §भूतक्षयानुपपत्तेस्तद्वियोगानुपपत्तिरिति ॥

तददृष्टकारितमिति चेत्‖ *पुनस्तत्प्रसङ्गो ऽपवर्गे ॥ ७२ ॥

अदर्शनं खल्वदृष्टमित्युच्यते अदृष्टकारिता भूतेभ्यः **शरीरोत्पत्तिः । न जात्वनुत्पन्ने शरीरे द्रष्टा निरायतनो दृश्यं पश्यति तच्चास्य दृश्यं द्विविधं विषयश्च नानात्वं चाव्यक्तात्मनोस्तदर्थः†† शरीरसर्गः तस्मिन्नवसिते चरितार्थानि भूतानि न शरीरमुत्पादयन्तीत्युपपन्नः शरीरवियोग इति । एवं चेन्मन्यसे पुनस्तत्प्रसङ्गो ऽपवर्गे पुनः शरीरोत्पत्तिः प्रसज्यतइति या चानुत्पन्ने

---

* सर्वं सर्वमिति २ ।

† न केवलमकर्मनिमित्ते शरीरसर्गे साधारणविषयत्वस्त्वं दोषः अपि तु मोक्षो ऽपि न स्यादिति दर्शयितुं स्वपक्षे मोक्षमुपपादयति । ता॰ टी॰ ।

‡ शरीरान्तरानुत्पत्तिरप्रतिसन्धिरिति २ । § भूतकर्मेति २ ।

‖ उपभोग्यशब्दाद्यदर्शनं प्रकृतिपुरुषभेदादर्शनं चादृष्टमुच्यते तत्कारितमित्यर्थः । ता॰ टी॰ । ¶ ५ सूत्रद्वयम ।

** भूतग्रहणमुपलक्षणार्थम् । ता॰ टी॰ । †† आत्मानात्मनोरिति २ ।

शरीरे दर्शनानुत्पत्तिरदर्शनाभिमता या चापवर्गे शरीरनिवृत्तौ दर्शनानुत्पत्तिरदर्शनभूता नैतयोरदर्शनयोः क्व चिद्विशेष इत्यदर्शनस्यानिवृत्तेरपवर्गे* पुनः शरीरोत्पत्तिप्रसङ्ग इति (चरितार्थता विशेष इति चेत्)।

न करणाकरणयोरारम्भदर्शनात् ॥ ७३ ॥

चरितार्थानि भूतानि दर्शनावसानान्न शरीरान्तरमारभन्तइत्ययं विशेष एवं चेदुच्यते न करणाकरणयोरारम्भदर्शनात्। चरितार्थानां †भूतानां विषयोपलब्धिकरणात्पुनःपुनः शरीरारम्भो दृश्यते प्रकृतिपुरुषयोर्नानात्वदर्शनस्याकरणान्निरर्थकः शरीरारम्भः पुनःपुनर्दृश्यते। तस्मादकर्मनिमित्तायां भूतसृष्टौ‡ न दर्शनार्था शरीरोत्पत्तिर्युक्ता युक्ता तु कर्मनिमित्त सर्गे दर्शनार्था शरीरोत्पत्तिः। कर्मविपाकः संवेदनं दर्शनमिति तददृष्टकारितमिति चेत् कस्य चिद्दर्शनमदृष्टं नाम परमाणूनां गुणविशेषः क्रियाहेतुस्तेन प्रेरिताः परमाणवः संमूर्छिताः शरीरमुत्पादयन्तीति तन्मनः§ समाविशति स्वगुणेनादृष्टेन प्रेरितं‖ समनस्के शरीरे द्रष्टृरूपलब्धिर्भवतीति। एतस्मिन् वै दर्शने गुणानुच्छेदात्पुनस्तत्प्रसङ्गो ऽपवर्गे ऽपवर्गे शरीरोत्पत्तिः परमाणुगुणस्यादृष्टस्यानुच्छेद्यत्वादिति¶।

मनःकर्मनिमित्तत्वाच्च संयोगानुच्छेदः ॥ ७४ ॥

मनोगुणेनादृष्टेन समावेशिते मनसि संयोगव्युच्छेदो** न स्यात् तच्च††

किंकृतं शरीरादपसर्पणं मनस इति। (तदिदं दृष्टान्तस्य साध्यसमत्वमभिधीयते इति अथ वा नाकृताभ्यागमप्रसङ्गाद् अणुश्यामता दृष्टान्ते)‡‡ कर्माशयक्षये तु §§कर्माशयान्तराद्विपच्यमानादपसर्पणोपपत्तिरिति। अदृष्टादेवापसर्पणमिति

---

* यथा प्रागदर्शनमेवं निरोधसमाधेः पश्चादप्यदर्शनमित्यपवृक्तो ऽपि पुनः संसरेदित्यर्थः। ता. टी.। ( ) नास्ति २ चरितार्थाविशेष इति चेदिति १। ४।

† भानानामिति २। ‡ सृष्टाविति २। § तत्र मनः २। ५। ‖ प्रेरिते २। ४।

¶ अपरे त्वार्हता अदृष्टं परमाणुगुणं वर्णयन्ति पार्थिवादीनामणूनां मनसश्च गुणो ऽदृष्टं तत्र पार्थिवाद्या अणवः स्वादृष्टप्रयुक्ताः शरीरमारभन्ते मनश्च स्वगुणप्रयुक्तं शरीरमाविशति तच्च स्वकादेवादृष्टात् पुद्गलस्य सुखदुःखोपभोगं साधयति न तु पुद्गलस्य धर्मो ऽदृष्टमिति सांख्यवत्तेषामपि दिगम्बराणां पुनस्तत्प्रसङ्गो ऽपवर्ग एतदुपपादयति। ता. टी.।

** संयोगाद्व्युच्छेदइति २।

†† तत्र २। ‡‡ ( ) अस्मिन्नधिकः २। §§ कर्मान्तरादिति २।

चेद् यो ऽदृष्टः शरीरोपसर्पणहेतुः स एवापसर्पणहेतुरपीति* । नैकस्य जीवनप्रायणहेतुत्वानुपपत्तेः । एवं च सति एको दृष्टो जीवनप्रायणयोर्हेतुरिति प्राप्तं नैतदुपपद्यते ।

†नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ ७५ ॥

विपाकसंवेदनात् कर्माशयक्षये शरीरपातः प्रायणं कर्माशयान्तराच्च पुनर्जन्म भूतमाचातु कर्मनिरपेक्षाच् शरीरोत्पत्तौ क्रमस्य क्षयाच् शरीरपातः प्रायणमिति प्रायणानुपपत्तेः खलु वै नित्यत्वप्रसङ्गं‡ विद्मः यादृच्छिके तु प्रायणे प्रायणभेदानुपपत्तिरिति । पुनस्तत्प्रसङ्गे ऽपवर्गइत्येतत्समाधित्सुराह ।

§श्रवणश्यामतानित्यत्ववदेतत्स्यात् ॥ ७६ ॥

यथा श्रवणः श्यामता नित्या अग्निसंयोगेन प्रतिबिद्धा न पुनरुत्पद्यते एवमदृष्टकारितं शरीरमपवर्गे पुननोत्पद्यतइति ।

नाकृताभ्यागमप्रसङ्गात् ॥ ७७ ॥

नायमस्ति दृष्टान्तः कस्माद् अकृताभ्यागमप्रसङ्गात् । अकृतं‖ प्रमाणतो ऽनुपपन्नं तस्याभ्यागमो ऽभ्युपपत्तिर्व्यवसायः यतच् च दृष्टान्तेन प्रमाणतो ऽनुपपन्नं मन्तव्यम् । तस्माच्चायं दृष्टान्तो न प्रत्यक्षं न चानुमानं किं चिदुच्यतइति । तद्विदं दृष्टान्तस्य साध्यसमत्वमभिधीयतइति¶ । अथ वा **नाकृताभ्यागम-

---

* अपसर्पणं मनस इति २ ।

† ननु सदकरणं नित्यमिति कथं शरीरं सकारणं नित्यं भवेदित्यत आह । ता· टी· ।

‡ प्रायणानुपपत्तिं ब्रूमो विनाशानुपपत्तेरित्यर्थः । ता· टी· ।

§ अकारणत्वादित्यस्य हेतोरनैकान्तिकत्वेन प्रत्यक्षनिष्ठते । ता टी· ।

‖ प्रमाणेनाविषयीकृतमकृतं प्रत्युत प्रत्यक्षागमविप्रतिषिद्धमिति यावत् । ता· टी· ।

¶ न च परमाणुश्यामता ऽप्यकारणा पार्थिवरूपत्वान्नोहितादिवदित्यनुमानेन तस्या अपि पाकजत्वाभ्युपगमादिति भावः । ता· टी· ।

** यथाश्रुति वा सूत्रार्थः । अकृतस्य कर्मणः फलोपभोगप्रसङ्गादिति । यदा खलु परमाणुगुण एव नित्यः शरीराद्यारम्भकस्तदासौ नित्यत्वाच्च केन चित्क्रियते तस्याकृतस्यैव फलं पुरुषैरुपभुज्येत ततश्चायमास्तिकानां विहितनिषिद्धप्रवृत्तिनिचयो ऽनर्थकः शास्त्रप्रणयनं चानर्थकं भवेदिति भावः । ता· टी· ।

प्रसङ्गाद् अणुश्यामतादृष्टान्तेनाकर्मनिमित्तां शरीरोत्पत्तिं समादधानस्याकृताभ्यागमप्रसङ्गः । अकृते सुखदुःखहेतौ कर्मणि पुरुषस्य सुखं दुःखमभ्यागच्छतीति प्रसज्येत । ओमिति ब्रुवतः प्रत्यक्षानुमानागमविरोधः । प्रत्यक्षविरोधस्तावद्विद्वमिदं सुखदुःखं प्रत्यात्मवेदनीयत्वात् प्रत्यक्षं सर्वशरीरिणाम् । को भेदः तीव्रं मन्दं चिरमाशु नानाप्रकारमेकप्रकारमिति एवमादिर्विशेषः । न चास्ति प्रत्यात्मनियतः सुखदुःखहेतुविशेषः न चासति हेतुविशेषे फलविशेषो दृश्यते । कर्मनिमित्ते तु* सुखदुःखयोगे कर्मणां तीव्रमन्दतोपपत्तेः कर्मसञ्चयानां चोत्कर्षापकर्षभावान्नानाविधैकविधभावाच्च कर्मणां सुखदुःखभेदोपपत्तिः । सेयं हेतुभेदाभावाद् दृष्टः सुखदुःखभेदो न स्यादिति प्रत्यक्षविरोधः । तथा ऽनुमानविरोधः दृष्टं हि पुरुषगुणव्यवस्थानात्सुखदुःखव्यवस्थानम् । यः खलु चेतनावान् साधननिर्वर्तनीयं सुखं बुद्ध्वा तदीप्सन् साधनावाप्तये प्रयतते स सुखेन युज्यते न विपरीतः । यश्च साधननिर्वर्तनीयं दुःखं बुद्ध्वा तज्जिहासुः साधनपरिवर्जनाय यतते† स च दुःखेन त्यज्यते न विपरीतः । अस्ति चेदं यत्नमन्तरेण चेतनानां सुखदुःखव्यवस्थानं तेनापि चेतनगुणान्तरव्यवस्थाकृतेन‡ भवितव्यमित्यनुमानम् । तदेतदकर्मनिमित्ते सुखदुःखयोगे विरुध्यते इति । तच्च गुणान्तरमसंवेद्यत्वाददृष्टं विपाककालानियमाच्चाव्यवस्थितम् । बुद्ध्यादयस्तु संवेद्याश्चापवर्गिणश्चेति । अथागमविरोधः बहु खल्विदमार्षमृषीणामुपदेशजातमनुष्ठानपरिवर्जनाश्रयमुपदेशफलं च शरीरिणां वर्णाश्रमविभागेनानुष्ठानलक्षणा प्रवृत्तिः परिवर्जनलक्षणा निवृत्तिः तच्चोभयमेतस्यां§ दृष्टौ नास्ति कर्म सुचरितं दुश्चरितं वा कर्मनिमित्तः पुरुषाणां सुखदुःखयोग‖ इति विरुध्यते । सेयं पापिष्ठानां मिथ्यादृष्टिरकर्मनिमित्ता शरीरसृष्टिरकर्मनिमित्तः सुखदुःखयोग# इति ।

इति वात्स्यायनीये न्यायभाष्ये तृतीयोध्यायः ॥ ३ ॥

---

* तुर्नास्ति २ । † यतेत ४ । ५ । ‡ न कृतेनेति २ । ५ ।
§ एतस्यादृष्टे इति २ । ‖ प्रयोग इति २ । # प्रयोग इति २ ।

प्रवर्त्तनालक्षणा दोषा इत्यनेन दोषलक्षणेनावरुध्यते दोषेषु मोह इति।

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः* ॥ ९ ॥

द्रव्याणां गुणानां वा ऽनेकविधविकल्पो निमित्तनैमित्तिकभावे तुल्यजातीयानां दृष्ट इति ।

दोषानन्तरं प्रेत्यभावस्तस्यासिद्धिः । आत्मनो नित्यत्वात् । न खलु नित्यं किं चिज्जायते म्रियतइति जन्ममरणयोर्नित्यत्वादात्मनो ऽनुपपत्तिः उभयं च प्रेत्यभाव इति तचायं सिद्धानुवादः ।

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ १० ॥

नित्योयमात्मा प्रेति पूर्वशरीरं जहाति म्रियतइति प्रेत्य च पूर्वशरीरं हित्वा भवति जायते शरीरान्तरमुपादत्तइति तच्चैतदुभयं पुनरुत्पत्तिः प्रेत्यभावः (इत्यचोक्तं पूर्वशरीरं हित्वा शरीरान्तरोपादानं प्रेत्यभाव) इति तच्चैतन्नित्यत्वे संभवतीति । यस्य तु सत्त्वोत्पादः सत्त्वनिरोधः प्रेत्यभावः तस्य कृतहानमकृताभ्यागमश्च दोषः । उच्छेदहेतुवादे चर्षयुपदेशाश्चानर्थका इति । कथमुत्पत्तिरिति चेत् ।

व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात् ॥ ११ ॥

केन प्रकारेण किंधर्मकात्कारणाद्व्यक्तं शरीरादयुत्पद्यतइति व्यक्ताद्व्यक्तसमाख्यातात्पृथिव्यादितः परमसूक्ष्मान्नित्याद्व्यक्तं शरीरेन्द्रियविषयोपकरणाधारं प्रत्यक्षतं द्रव्यमुत्पद्यते । व्यक्तं च खल्विन्द्रियग्राह्यं तत्सामान्यात्कारणमपि व्यक्तम् । किं सामान्यम् रूपादिगुणयोगः रूपादिगुणयुक्तेभ्यः पृथिव्यादिभ्यो नित्येभ्यो रूपादिगुणयुक्तं शरीरादयुत्पद्यते† । प्रत्यक्षप्रामाण्याद् दृष्टो हि रूपादिगुणयुक्तेभ्यो मृत्प्रभृतिभ्यस्तथाभूतस्य द्रव्यस्योत्पादः

---

* यथा बुद्धिर्बुद्ध्यन्तरनिमित्तं बुद्धिजातीया च । तुर्यादयो द्रव्यनिमित्तं द्रव्यजातीयाः । नोदनाद्यभिघातसंयुक्तसंयोगाः संस्कारस्य गुणा इति न्या॰ वा॰ ।

( ) २ पु॰ नास्ति ।

† अरूपस्यापि कपालद्वयसंयोगस्य रूपवद्घटादिकारणत्वदर्शनादनेकान्त इति चेन्न गवादेर्व्यक्तस्य रूपादिमत्सामर्थ्यपूर्वकत्वव्याप्तेः । ‡ प्रकृतिभ्य इति ४ ।

तेन चादृष्टस्यानुमानमिति । रूपादीनामन्वयदर्शनात् प्रकृतिविकारयोः पृथिव्यादीनां नित्यानामतीन्द्रियाणां कारणभावोनुमीयतइति ।

न घटाद् घटानिष्पत्तेः ॥ १२ ॥

इदमपि प्रत्यक्षं न खलु व्यक्ताद् घटाच्चक्तो घट उत्पद्यमानो दृश्यते इति व्यक्ताद् व्यक्तस्यानुत्पत्तिदर्शनान्न व्यक्तं कारणमिति ।

व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः ॥ १३ ॥

न वयमः सर्वं सर्वस्य कारणमिति किन्तु यदुत्पद्यते व्यक्तं द्रव्यं तत्तथाभूतादेवोत्पद्यतइति । व्यक्तं च तन्मृद् द्रव्यं कपालसंज्ञकं यतो घट उत्पद्यते न चेतन्निह्नुवानः क्व चिदभ्यनुज्ञां लब्धुमर्हतीति* । तदेतत्तत्त्वम् । अतः परं प्रावादुकानां दृष्टयः प्रदर्श्यन्ते ।

अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥ १४ ॥

असतः सदुत्पद्यतइत्ययं पक्षः कस्मात् । उपमृद्य प्रादुर्भावात् । नामृद्य बीजमङ्कुर उत्पद्यते नानुपमृद्य न चेद्बीजापमर्दोङ्कुरकारणम् अनुपमर्देपि बीजस्याङ्कुरोत्पत्तिः स्यादिति । अत्राभिधीयते ।

व्याघातादप्रयोगः† ॥ १५ ॥

उपमृद्य प्रादुर्भावादित्ययुक्तः प्रयोगो व्याघातात् । यदुपमृद्नाति‡ न तदुपमृद्य प्रादुर्भवितुमर्हति विद्यमानत्वात् । यच्च प्रादुर्भवति न तेनाप्रादुर्भूतेनाविद्यमानेनोपमर्दइति ।

नातीतानागतयोः कारकशब्दप्रयोगात् ॥ १६ ॥

अतीते चानागते चाविद्यमाने कारकशब्दाः§ प्रयुज्यन्ते । पुत्रो जनिष्यते जनिष्यमाणं पुत्रमभिनन्दति पुत्रस्य जनिष्यमाणस्य नाम करोति अभूत्कुम्भो भिन्नं कुम्भमनुशोचति भिन्नस्य कुम्भस्य कपालानि‖ अजाताः

---

* प्रत्यक्षकारणापलापी न कस्मिंश्चिदपि दर्शने संवादं लब्धुं योग्यः स्यादित्यर्थः ।

† प्रादुर्भावस्योपमर्दोत्तरकालिकत्वेनोपमर्दात्पूर्वमविद्यमानस्योपमर्दे हेतुत्वोक्तिर्व्याहतेत्यर्थः ।

‡ यदुपमृद्नाति इति १ । ४ । ५ ।

§ कारकशब्दः प्रयुज्यते २ ।

‖ भिन्नस्य कुम्भस्य कपालानीति यद्यपि न साक्षात्कारकशब्दस्तथापि षष्ठ्या संबन्धाभिधानात्तस्य क्रियागर्भत्वात्क्रियायाश्च कारकनान्तरीयकत्वात्पारम्पर्येण कारकशब्दता द्रष्टव्या । ता· टी-।

पुचाः पितरं तापयन्तीति बहुलं भाक्ताः प्रयोगा दृश्यन्ते । का पुनरियं भक्तिः आनन्तर्यं भक्तिः आनन्तर्यसामर्थ्यादुपमृद्य प्रादुर्भावार्थः प्रादुर्भविष्यन्नङ्कुर उपमृद्गा*तीति भाक्तं कर्तृत्वमिति ।

न विनष्टेभ्यो ऽनिष्पत्तेः† ॥ १७ ॥

न विनष्टाद्बीजादङ्कुर उत्पद्यतइति तस्मान्नाभावाद्भावोत्पत्तिरिति ।

क्रमनिर्देशादप्रतिषेधः ॥ १८ ॥

उपमर्दप्रादुर्भावयोः पौर्वापर्यनियमः क्रमः स खल्वभावाद्भावोत्पत्तेर्हेतुर्निर्दिश्यते स च न प्रतिषिध्यतइति‡ । व्याहतव्यूहानामवयवानां पूर्वव्यूहनिवृत्तौ व्यूहान्तराद् द्रव्यनिष्पत्तिर्नाभावात् । बीजावयवाः कुतश्चिन्निमित्तात्प्रादुर्भूतक्रियाः पूर्वव्यूहं जहति व्यूहान्तरं चापद्यन्ते व्यूहान्तरादङ्कुर उत्पद्यते । दृश्यन्ते खलु अवयवास्तत्संयोगाश्चाङ्कुरोत्पत्तिहेतवः । न चानिवृत्ते पूर्वव्यूहे बीजावयवानां शक्यं व्यूहान्तरेण भवितुमित्युपमर्दप्रादुर्भावयोः पौर्वापर्यनियमः क्रमः तस्मान्नाभावाद्भावोत्पत्तिरिति । न चान्यद्बीजावयवेभ्योऽङ्कुरोत्पत्तिकारणमित्युपपद्यते बीजोपादाननियम इति§ अथापर आह ।

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्‖ ॥ १९ ॥

पुरुषोयं समीहमानो नावश्यं समीहाफलं प्राप्नोति तेनानुमीयते पराधीनं पुरुषस्य कर्मफलाराधनमिति यदधीनं स ईश्वरः । तस्मादीश्वरः कारणमिति ।

---

* उपमृद्नातीति २ ।

† बीजविनाशश्चेदङ्कुरोत्पादहेतुरथ विनष्टे बीजे तदवयवेषु परस्परविच्छिन्नेषु असति तेषां व्यूहान्तरे कस्मादङ्कुरो न भवति मतिं तु तेषां व्यूहे भवति तस्माद्विनष्टेभ्यो ऽङ्कुरानुत्पत्तिरसति व्यूहे न बीजविनाशः कारणमिति सूत्रार्थः । ता॰ टी॰ ।

‡ अनन्यप्रयुक्तमानन्तर्यं कार्यकारणभावसाधनमिदं तु व्यूहान्तरानन्तर्यप्रयुक्तमिति नाभावस्य कारणत्वं गमयितुमर्हतीत्यर्थः । ता॰ टी॰ ।

§ बीजावयवोपादाने ऽवर्जनीयतया बीजमात्रस्यादशक्यप्रत्याख्यानमित्यर्थः । ता॰ टी॰ ।

‖ मा भूदयं नामरूपप्रपञ्चः शून्यतोपादानो ऽपि तु ब्रह्मोपादानो भविष्यति ब्रह्मैव प्रपञ्चरूपेण परिणमते मृत्तिकैव घटशरावोदञ्चनादिभावेन । न चैवं नित्यत्वव्याघातः परिणामे ऽपि तत्त्वानपायाद् तल्लक्षणत्वाच्च नित्यतायाः । यदाह

न पुरुषकर्माभावे फलानिष्पत्तेः* ॥ २० ॥

ईश्वराधीना चेत्फलनिष्पत्तिः स्याद्यपि तर्हि पुरुषस्य समीहामन्तरेण फलं निष्पद्येतेति† ।

‡तत्कारितत्वादहेतुः ॥ २१ ॥

पुरुषकारमीश्वरोनुगृह्णातिऽ फलाय पुरुषस्य यतमानस्येश्वरः फलं संपादयतीति । यदा न संपादयति तदा पुरुषकर्माफलं भवतीति । तस्मा-

---

यस्मिंस्तत्वं न विहन्यते तदपि नित्यमित्येकं दर्शनम् । अपरं च ब्रह्मैवानाद्यविद्योपधानभेदाच्चामरूपप्रपञ्चभेदेन विवर्तते मुखमिवैकमनेकमणिकृपाणादर्शभेदाच्चैकविधप्रतिबिम्बभेदेनेति । तदेतद्दर्शनद्वयमनेन सूचितम् । ईश्वरो ब्रह्म ईशनायोगात् । चेतनाशक्तिः क्रियाशक्तिश्चेशना सा चास्ति ब्रह्मणीति ब्रह्मेश्वरः कारणं जगतः । श्रूयते हि तदैक्षत बहुस्यां प्रजायेयेति । सा चेयं श्रुतिः चेतनस्य जगत्कारणतामाह । न चाभावो वा प्रधानं वा परमाणवो वा चेतयन्ते । ननु जीवा एव चेतनास्तत्कर्मनिबन्धनो नामरूपप्रपञ्चो भविष्यति कृतमत्र भगवतेश्वरेणेत्यत उक्तं पुरुषकर्माफल्यदर्शनात् । पुरुषश्चेच्चेतयते नैव निष्फलं कर्मारभेत । निष्फलं विद्वान् प्रवर्तमानः कथं चेतनो नाम । तस्मात्पुरुषकर्माफल्यदर्शनादीश्वरः कारणमित्यर्थः । ता. टी. ।

* न तावन्मृत्तिकेव नामरूपप्रपञ्चरूपेण ब्रह्म परिणमते । तद्धि सर्वात्मना वा परिणमतएकदेशेन वा तत्र सर्वात्मना परिणामे तत्त्वविघातादनित्यत्वम् । एकदेशेन परिणामे सावयवत्वात्तदेवानित्यत्वम् । अथ तत्त्वेनानुगतस्यापरिणामस्तच्च ब्रह्म न तर्हि ब्रह्मणः परिणामः । न च निर्भागस्यैकस्य स्वसंवेदनप्रत्यक्षस्य विपरीतज्ञानगोचरत्वसंभवः । सामान्यतो यहे रूपविशेषायहे च तदन्यरूपारोपेण विभ्रमो दृष्टः शुक्तिरजतादौ । न जातु शुक्तिरूपं विद्वान् रजतमिति विपर्यस्यति । न च निरंशे स्वसंवेदनप्रत्यक्षे ब्रह्मणि तत्स्वरूपायहः सामान्ययहो वा भवति तस्मादीश्वरो जगद्रूपेण विवर्ततइत्ययुक्तम् । निमित्तं तु स्यादीश्वरो जगतः । स चेदनपेक्ष एव जगत्कारणमित्युच्यते तन्नेदमुपतिष्ठते । ता. टी. ।

† ततश्च कर्मलोपोऽनिर्मोक्षश्च । ईश्वरस्यैकरूपत्वादेकरूपा क्रियेति । अथेश्वरः कारणभेदानुविधानेन कार्यं निर्वर्तयति यदपेक्षते तच्च करोतीति प्राप्तं न हि कुलालो दण्डादि करोति । एवं कर्मसापेक्षश्चेदीश्वरो जगदुत्पत्तिकारणं स्यात्कर्मणीश्वरो नेश्वरः स्यात् । ता. टी. । तथा च तत्तत्कारणानि नेश्वरेण प्रयुज्यन्तदत्यनेकान्तो वक्ष्यमाणो हेतुरिति । ता. टी. ।

‡ तदेवमीश्वरोपादानत्वं ब्रह्मविवर्तत्वं च निरपेक्षेश्वरनिमित्तत्वं च प्रत्याख्यायाभिमतं पक्षं गृह्णाति । ता. टी. ।

§ यद्यथाभूतं यस्य यदा विपाककालस्तत्तथा तदा विनियुङ्क्ते । न्या. वा.

दीश्वरकारितत्वादहैतुः* । पुरुषकर्माभावे फलानिष्पत्तेरिति † गुणविशिष्टमात्मान्तरमीश्वरः ‡तस्यात्म(कल्पा)त्कल्पान्तरानुपपत्तिः§ अधर्ममिथ्याज्ञानप्रमादहान्या धर्मज्ञानसमाधिसंपदा च विशिष्टमात्मान्तरमीश्वरः तस्य च धर्मसमाधिफलमणिमाद्यष्टविधमैश्वर्यम् । संकल्पानुविधायी चास्य धर्मः॥ प्रत्यात्मवृत्तीन् धर्माधर्मसंचयान् पृथिव्यादीनि च भूतानि प्रवर्तयति । एवं च स्वकृताभ्यागमस्यालोपेन¶ निर्माणप्राकाम्यमीश्वरस्य स्वकृतकर्मफलं वेदि-

---

* परमाणूपादानस्य जगतः पुरुषकर्मापेक्ष ईश्वरो निमित्तं यच्च तेनापेक्षणीयं पुरुषकर्म तदपीश्वरनिमित्तमेव । न च यदपेक्षते तस्यानिमित्तं वास्यादेस्तत्सहकारिणस्तन्निमित्तकत्वदर्शनात् । तस्मादीश्वरकारितत्वात्पुरुषकारस्य तत्सहाय ईश्वरो निमित्तकारणं जगत इत्यस्य पक्षस्य निराकरणे पुरुषकर्माभावे फलानिष्पत्तेरित्यहेतुः निरपेक्षेश्वरनिमित्तत्वे तु हेतुरेवेत्यर्थः । ता· टी· ।

† संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धय एव तस्य गुणाः । न्या· वा· । बुद्धिवदिच्छाप्रयत्नावप्यस्य नित्यौ सकर्तृकत्वसाधनान्तर्गतौ मन्तव्यौ । ज्ञानचिकीर्षाप्रयत्नसमवायलक्षणत्वात्कर्तृत्वस्य । तेषां च परस्पराविनाभावादन्यतरसिद्धावितरयोः सिद्धिः । ता· टी· ।

‡ आत्मकल्पादित्यत्रात्मप्रकारादात्मजातीयादिति यावत् । ता· टी· ।

( ) कल्पादिति २· नास्ति

§ नन्वात्मान्तराण्यनित्यज्ञानयोगीनि दृष्टानि तद्वैलक्षण्यादीश्वरो नात्मजातीयो भवितुमर्हतीत्यत आह आत्मकल्पादिति । यद्यप्यात्मान्तराण्यनित्यज्ञानयोगीनि अयं च नित्यबुद्ध्यादियुक्तः तथाप्यात्मजातीय एव बुद्ध्यादिगुणयोगित्वात् । अन्यथा तोयादिपरमाणूनामतोयादित्वप्रसङ्गो नित्यरूपादियोगात् । करकादिगतानां रूपादीनामनित्यत्वोपलब्धेरिति । ता· टी· । ईश्वरसमवेतबुद्धेर्नित्यत्वं च धर्मिग्राहकमानेन सिद्धम् । बुद्धिमत्कारणाधिष्ठिताः परमाणवः प्रवर्तन्तइति । नन्वनेन बुद्धिमत्तामात्रं सिध्यति न तु बुद्धेर्नित्यत्वमपीति चेच्च । प्रत्यर्थनियमासंभवात् । ये खलु प्रत्यर्थनियता बुद्धिभेदास्ते शरीरादिकारणासंनिधाने सति भवन्ति न त्वियं प्रत्यर्थनियता युगपदनेककार्योत्पत्तेः । यथा स्थावरभेदस्यानेकस्य युगपदुत्पाद इति । ननु बुद्धिमत्त्वेनैव शरीरित्वमपीश्वरस्य स्याज्जीवानां तथा दर्शनादिति चेच्च । कल्प्यमानस्य शरीरस्यानित्यत्वाङ्गीकारे तस्य धर्मादिनिमित्तकत्वापत्तौ तत्तच्छरीरसंबन्धयत्तदेश्वरस्यानीश्वरत्वप्रसङ्गः कारणस्य धर्मस्य नित्यत्वानित्यत्वविकल्पेनानवस्थाशरीरनित्यत्वयोरापत्तिश्च । शरीरस्य नित्यत्वे तु दृष्टविरोधस्य तदवस्थतया शरीरकल्पनावैयर्थ्यम् । बुद्धिनित्यताश्रयणेनैव कार्योपपत्तेः । बुद्धित्वं शरीरव्याप्यमिति तु न । जन्यत्वस्योपाधित्वात् । ईश्वरबुद्धिचिकीर्षाकृतीनां नित्यत्वे युगपत्सर्वकार्योत्पादप्रसङ्गस्तु तत्तत्सहकारिधर्माधर्मकालवशेषादिघटितसामर्थ्यावैकल्येन निरसनीयः ।

‖ नन्वस्य कर्मानुष्ठानाभावात्कुतो धर्मः । तथा चाणिमादिकमस्यैश्वर्यं कार्यरूपं विनैव कर्मणेत्यकृताभ्यागमप्रसङ्ग इत्यत आह । ता· टी· ।

¶ मा भूद् वाह्यानुष्ठानं संकल्पलक्षणानुष्ठानजनितधर्मफलमस्यैश्वर्यं जगद्धिर्माणफलमिति नाकृताभ्यागमप्रसङ्ग इत्यर्थः । ता टी· । ईश्वरस्य ज्ञानक्रियाशक्ती

तव्यम् आप्तकल्पश्चायं* यथा पिताऽपत्यानां तथा पितृभूत ईश्वरो भूतानाम् । न चात्मकल्पादन्यः कल्पः सम्भवति । न तावदस्य बुद्धिं विना कश्चिद्धर्मो लिङ्गभूतः शक्य उपपादयितुम्† । आगमाच्च ‡द्रष्टा बोद्धा सर्वज्ञाता ईश्वर इति । बुद्ध्यादिभिश्चात्मलिङ्गैर्निरुपाख्यमीश्वरं प्रत्यक्षानुमानागमविषयातीतं कः शक्त उपपादयितुम् । स्वकृताभ्यागमलोपेन§ च प्रवर्तमानस्यास्य यदुक्तं प्रतिषेधजातमकर्मनिमित्ते शरीरसर्गे तत्सर्वं प्रसज्यतइति । अपर इदानीमाह ।

नित्ये इत्यैश्वर्यं नित्यमणिमादिकं त्वनित्यं तदभिप्रायं च भाष्यस्य धर्मफलत्वाभिधानम् । नात ऐश्वर्यनित्यत्वे धर्मवैयर्थ्यमनित्यत्वे तत्कारणकल्पनया ऽनवस्येति चोद्यावकाशः । प्रत्यात्मवृत्तिधर्माधर्मसंनिधयाधिष्ठानं संकल्पानुविधायिन ईश्वरधर्मस्य प्रयोजनम् । अभ्युपेत्येश्वरधर्ममेतदुक्तं भाष्यकृता । परमार्थतस्तु नेश्वरस्य धर्मसद्भावे प्रमाणमस्ति नित्याभ्यामेव ज्ञानक्रियाशक्तिभ्यां सकलकार्योत्पत्तिसिद्धेरित्याशयेन न चेश्वरधर्मो ऽस्तीति वार्तिकमिति । ता· टी· ।

* स्यादेतत् । प्रयोजनं विना प्रेक्षावतां न प्रवृत्तिः । न च प्राप्तसकलप्राप्तव्यस्यास्ति प्रापणीयं किं चिदीश्वरस्य तस्मात्कृतमस्य जगन्निर्माणेनेत्यत आह । आप्तकल्पश्चेति । मा भूदस्य भगवतः स्वार्थः परानुग्रहार्थं प्रवत्स्यतीत्यर्थः । ता· टी· ।

+ प्रधानपरमाणुकर्मादिकं प्राक् प्रवृत्तेर्बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते ऽचेतनत्वाद्वास्यादिवदित्यनुमानेन हीश्वरो बुद्धिमत्त्वेनैव सिध्यति । तस्य बुद्ध्यनङ्गीकारे तु स एव न सिध्येदिति भावः ।

‡ दृष्टो बोद्धेति २ ।

§ स्यादेतत् । यदि कारुण्यादीश्वरो जगन्निर्माणे प्रवर्तते हन्त भोः सुखिनमेव सृजेच्च दुःखिनम् । न च क्षेत्रज्ञगतधर्माधर्मसहकारितया निर्माणवैचित्र्यं वाच्यमधर्मस्य तदनधिष्ठितस्य स्वकार्याकरणेन कारुणिकेनाधिष्ठानायोगात् । तस्मात्सुखदुःखादिभेदेन जगद्वैचित्र्यदर्शनाच्चानुकम्याप्रयुक्त ईश्वरः करोतीत्यत आह । स्वकृताभ्यागमलोपेन प्रवर्तमानस्येति । अयमभिसंधिः । कारुणिकोऽप्ययमात्मान्तरातिशायिधर्महमपि न वस्तूनां सामर्थ्यमन्यथाकर्तुं पारयति । तस्माद्धर्मेणोत्पत्तिमता नेश्वरप्रभावादपि नित्येन भवितुं युक्तं न च स्वफलविरोधिना फलमप्रदाय विनष्टुमपि शक्यम् । अतः क्षेत्रज्ञानां नियतिमलङ्घयतेश्वरेणाधर्मः शक्यो ऽनधिष्ठातुं तस्मात्कारुणिकोप्ययं वस्तुस्वभावमनुविधीयमानो धर्माधर्मसहकारी जगद्वैचित्र्यं विधत्ते । तदिदमुक्तं स्वकृतेत्यादि । पुरुषैर्यत्कृतं तत्फलाभ्यागमलोपेन प्रवर्तमानस्येत्यर्थः । ता· टी· । ईश्वरप्रवृत्तिः क्रीडार्थमित्येके । क्रीडाया अप्यानन्दफलकत्वाच्चित्याप्तकामस्य क्रीडाऽनुपपत्तेर्विभूतिख्यापनार्थमित्यन्ये । विभूतिख्यापने ऽपि प्रयोजनानुपपत्तेः तत्स्वाभाव्यात्प्रवर्तत इत्यदुष्टमिति वार्तिकम् । प्रवृत्तिस्वाभाव्येऽपि सहकारिधर्माधर्मैकालविशेषसंनिधानासंनिधानवशेन युगपत्सर्वकार्योत्पाद उपपादनीयः । अत्रेश्वरानुमानप्रक्षेपासक्षिराकरणं च वार्तिकतात्पर्यटीकयोर्विस्तरेण कृतं विस्तरभयाच्चेहोद्धृतं तत एवावगन्तव्यम् ।

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादि-दर्शनात्* ॥ २२ ॥

अनिमित्ता शरीराद्युत्पत्तिः (कण्टकतैक्ष्ण्यादिदर्शनात्) कण्टकस्य तैक्ष्ण्यं पर्वतधातूनां चिचता †यावृणां श्लक्ष्णता निर्निमित्तं चोपादानं दृष्टं तथा शरीरसर्गोपीति ।

अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ २३ ॥

अनिमित्ततो भावोत्पत्तिरित्युच्यते यतश्चोत्पद्यते तन्निमित्तम् । अनिमित्तस्य निमित्तत्वान्नानिमित्ता भावोत्पत्तिरिति ।

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥ २४ ॥

अन्यद्धि(निमित्तमन्यच्च)‡ निमित्तप्रत्याख्यानं न च प्रत्याख्यानमेव प्रत्याख्येयं यथा ऽनुदकः कमण्डलुरिति नोदकप्रतिषेध उदकं भवतीति । स खल्वयं§ वादो ऽकर्मनिमित्तः शरीरादिसर्ग इत्येतस्मान्न भिद्यते अभेदात्तत्प्रतिषेधेनैव प्रतिषिद्धो वेदितव्य इति । अन्ये तु मन्यन्ते ।

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ २५ ॥

किमनित्यं नाम यस्य कदा चिद् भावस्तदनित्यम् । उत्पत्तिधर्मकमनुत्पन्नं नास्ति विनाशधर्मकं ‖चाविनष्टं नास्ति । किं पुनः सर्वं भौतिकं च शरीरादि अभौतिकं च बुद्ध्यादि तदुभयमुत्पत्तिविनाशधर्मकं विज्ञायते तस्मात्तत्सर्वमनित्यमिति ।

नानित्यतानित्यत्वात् ॥ २६ ॥

यदि तावत्सर्वस्यानित्यता नित्या तन्नित्यत्वान्न सर्वमनित्यम् । अथानित्या तस्यामविद्यमानायां सर्वं नित्यमिति ।

---

* कण्टकादीनां संस्थानभेदवतां निमित्तादर्शनेनानिमित्ततां मन्वानस्तेनैव दृष्टान्तेन शरीरादीनामपि संस्थानवतामनिमित्ततां मन्वानः पूर्वपक्षयति । अनिमित्तत इति । अदृश्यमाननिमित्तानां शरीरकण्टकादीनां पत्तनिःक्षेपात्पत्तेश्च व्यभिचारानुद्भावनादुद्भावने वा सर्वानुमानोच्छेदप्रसङ्गात्सर्वत्र तस्य सुलभत्वादुभयमिदृनिमित्तवत्पटदृष्टान्तेन संस्थानवत्त्वात् कण्टकशरीरादीनामपि निमित्तवत्त्वमिति राद्धान्तः । ता· टी· । ( ) २ पु· नास्ति । † यावृणाः इति २ । ५ । ( ) ‡ नास्ति २ ।

§ कस्मात्पुनः पूर्वपक्षः स्वयं सूत्रकारेण न निराकृत इत्यत आह । ता· टी· ।

‖ त्वेति ५ ।

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥ २७ ॥

तस्या अनित्यताया अप्यनित्यत्वम् । कथं यथा अग्निर्दाह्यं विनाश्यानुविनश्यति एवं सर्वस्यानित्यता सर्वं विनाश्यानुविनश्यतीति ।

नित्यस्याप्रत्याख्यानं यथोपलब्धि व्यवस्थानात् ॥ २८ ॥

अयं खलु वादो नित्यं प्रत्याचष्टे नित्यस्य च प्रत्याख्यानमनुपपन्नम् । कस्माद् यथोपलब्धि व्यवस्थानाद् यस्योत्पत्तिविनाशधर्मकत्वमुपलभ्यते प्रमाणतस्तदनित्यं यस्य नोपलभ्यते तद्विपरीतम् । न च परमसूक्ष्माणां भूतानामाकाशकालदिगात्ममनसां तद्गुणानां च केषां चित्सामान्यविशेषसमवायानां चोत्पत्तिविनाशधर्मकत्वं प्रमाणत उपलभ्यते *तस्मान्नित्यान्येतानीति । अयमन्य एकान्तः ।

सर्वं नित्यं पञ्चभूतनित्यत्वात्† ॥ २९ ॥

भूतमात्रमिदं सर्वं तानि च नित्यानि भूतोच्छेदानुपपत्तेरिति ।

‡नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३० ॥

उत्पत्तिकारणं चोपलभ्यते विनाशकारणं च तत्सर्वनित्यत्वे व्याहन्यतइति ।

§तल्लक्षणावरोधादप्रतिषेधः ॥ ३१ ॥

यस्योत्पत्तिविनाशकारणमुपलभ्यतइति मन्यसे न तद्भूतलक्षणहीनमर्थान्तरं गृह्यते भूतलक्षणावरोधाद्भूतमात्रमिदमित्ययुक्तोयं प्रतिषेध इति ।

---

* सर्वस्य पक्षत्वे परमाणवाकाशादिषु हेत्वभावेन भागासिद्धिः कस्य चित्पक्षत्वे सिद्धसाधनमिति वार्तिकम् ।

† पञ्चभूतात्मकं खल्वेतद् गोघटादिकार्यमुपलभ्यते । व्यपदिशन्ति हि मृद् घटो मृच्छरीरमिति । भूतानि च नित्यानि तेषामुच्छेदस्य नैयायिकैरनभ्युपगमात् । तेन भूतात्मनां गोघटादीनां नित्यतेति पूर्वपक्षः । ता. टी. ।

‡ भूतेभ्यो भौतिकानि भिन्नानि न हि परमसूक्ष्माः परमाणवो गोघटादयः परमाणुवत्तेषामतीन्द्रियत्वे सर्वायग्रहणप्रसङ्गादित्युक्तं द्वितीयाध्याये । तस्माद्ग्रहणायग्रहणावरुद्धधर्मयोगादन्ये भौतिका भूतेभ्यः । तथा च तेषामुत्पत्तिविनाशकारणोपलब्धेर्न नित्यत्वं भूतनित्यत्वे ऽपीति सिद्धान्तमाह । ता. टी. ।

§ भूतसारूप्येण तादात्म्यं मन्यमानः पुनरपि पूर्वपक्षवाद्याह । ता. टी. ।

नोत्पत्तितत्कारणोपलब्धेः* ॥ ३२ ॥

कारणसमानगुणस्योत्पत्तिः कारणं चोपलभ्यते । न चैतदुभयं नित्यविषयं न चोत्पत्तितत्कारणोपलब्धिः शक्या प्रत्याख्यातुं न चाविषया का चिदुपलब्धिः । उपलब्धिसामर्थ्यात्कारणेन समानगुणं कार्यमुत्पद्यतइत्यनुमीयते । स खलूपलब्धेर्विषय इति । एवं च तल्लक्षणावरोधोपपत्तिरिति । †उत्पत्तिविनाशकारणप्रयुक्तस्य ज्ञातुः प्रयत्नो दृष्ट इति । प्रसिद्धश्चावयवी तद्धर्मा उत्पत्तिविनाशधर्मा चावयवी सिद्ध इति । ‡शब्दकर्मबुद्ध्यादीनां चाव्याप्तिः पञ्चभूतनित्यत्वात् तल्लक्षणावरोधाच्चेत्यनेन शब्दकर्मबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च न व्याप्ताः तस्मादनेकान्तः§ ।

॥स्वप्नविषयाभिमानवद् मिथ्योपलब्धिरिति चेद् भूतोपलब्धौ तुल्यम् । यथा स्वप्ने विषयाभिमान एवमुत्पत्तिकारणाभिमान इति । एवं चैतद्भूतोपलब्धौ तुल्यं पृथिव्याद्युपलब्धिरपि स्वप्नविषयाभिमानवत् प्रसज्यते ।

पृथिव्याद्यभावे सर्वव्यवहारविलोप इति चेत् तदितरत्र समानम् । उत्पत्तिविनाशकारणोपलब्धिविषयस्याप्यभावे सर्वव्यवहारविलोप इति सेयं नित्यानामतीन्द्रियत्वादविषयत्वाच्चोत्पत्तिविनाशयोः स्वप्नविषयाभिमानवदित्यहेतुरिति । ¶अवस्थितस्योपादानस्य धर्ममात्रं निवर्तते धर्ममात्रमुपजायते स खलूत्पत्तिविनाशयोर्विषयः** । यच्चोपजा-

---

* भूतसारूप्यं गोघटादीनां भूतकार्यत्व ऽप्युपपद्यमानं न भूतात्मकत्वमवगमयतीत्याशयवानाह । ता॰ टी॰ ।

† अपि च यद्युत्पत्तिविनाशौ भावानां न वस्तुसन्तौ कथं प्रेक्षावतामभिमतोत्पत्तिकारणे ऽनभिमतविनाशकारणे च तदर्थिनां प्रवृत्तिरित्याह । ता॰ टी॰ ।

‡ अपि चाव्यापको हेतुरित्याह । ता॰ टी॰ ।

§ अव्यापकश्चानेकान्त उक्तः । पक्षो हि सर्वं नित्यमिति । तस्मिंश्चस्य सत्त्वासत्त्वाभ्यामनेकान्तः । अनेकः सत्त्वासत्त्वलक्षणो ऽन्तो ऽस्येत्यनेकान्त इति । ता॰ टी॰ ।

॥ असति बाधके मिथ्यात्वकल्पनायामतिप्रसङ्ग इत्यमुमर्थं शङ्कानिराकरणाभ्यामाह । ता॰ टी॰ ।

¶ तदेवं सांख्यानां मतमपास्य स्वायंभुवानां मतं दूषयति । ता॰ टी॰ ।

** त्रिविधः खल्वयं धर्मिणः परिणामो धर्मलक्षणावस्थारूपः । तद्यथा । सुवर्णं धर्मि तस्य परिणामो वर्धमानरुचकादिः । धर्मस्य तु लक्षणपरिणामो ऽनागतादिः । यदा खल्वयं सुवर्णकारो वर्धमानकं भङ्क्त्वा रुचकमारचयति तदा वर्धमा-

यते* तत्प्रागप्युपजननादस्ति यच्च निवर्तते तन्निवृत्तमप्यस्तीति† एवं च सर्वस्य नित्यत्वमिति ।

न व्यवस्थानुपपत्तेः‡ ॥ ३३ ॥

अयमुपजनः इयं निवृत्तिरिति (व्यवस्था नोपपद्यते उपजातनिवृत्तयोर्विद्यमानत्वात् । अयं धर्म उपजातो ऽयं निवृत्त इति) सद्भावाविशेषादव्यवस्था इदानीमुपजननिवृत्ती नेदानीमिति कालव्यवस्था नोपपद्यते सर्वदा विद्यमानत्वाद् । अस्य धर्मस्योपजननिवृत्ती नास्येति व्यवस्थानुपपत्तिः उभयोरविशेषाद् । अनागतो ऽतीत इति§ च कालव्यवस्थानुपपत्तिः वर्तमानस्य सद्भावलक्षणत्वाद् । अविद्यमानस्यात्मलाभ उपजनो विद्यमानस्यात्महानं निवृत्तिरित्येतस्मिन्नुक्ते नैते दोषाः । तस्माद्यदुक्तं प्रागप्युपजननादस्ति निवृत्तं चास्ति तदयुक्तमिति । अयमन्य एकान्तः‖ ।

सर्वं पृथग्भावलक्षणपृथक्त्वात् ॥ ३४ ॥

नक्रो वर्तमानलक्षणं हित्वा ऽतीतलक्षणमापद्यते । रूचकस्त्वनागतलक्षणं हित्वा वर्तमानतामापद्यते । वर्तमानतामापन्न एव तु रूचको नवपुराणभावमापद्यमानो ऽवस्थापरिणामवान् भवति । नवपुराणात्रस्याश्च वर्तमानलक्षणाश्रया लक्षणपरिणामाः । सो ऽयं त्रिविधः परिणामो धर्मिणः । धर्मलक्षणावस्थाश्च धर्मिणो भिन्नाश्चाभिन्नाश्च । तथा च धर्म्यभेदात्तन्नित्यत्वेन नित्या भेदाच्चोत्पत्तिविनाशविषयत्वमित्युभयमुपपन्नमिति । ता. टी. ।

* ननु यद्युपजनापायधर्मकत्वं धर्माणां हन्तोत्पत्तेः प्राक् तेषामसत्त्वाद्विनाशाच्चोर्ध्वमसत्त्वात्कथं सर्वनित्यत्वसिद्धिरित्यत आह । ता. टी. ।

† धर्मरूपेणेति शेषः । ता. टी. ।

‡ उपजनापाययोः स्वरूपतो कालतो विशेषतश्च संबन्धितो ऽनागतत्वादितश्च व्यवस्थानुपपत्तेरित्यर्थः । एतदुक्तं भवति । न तावद्भेदाभेदौ परस्परपरीहारव्यवस्थितधर्मावेकत्र समवेतः । तस्मादुपजानापायव्यवस्थायै भेदं धर्मलक्षणावस्थानां धर्मिणा इच्छता तेषामनित्यत्वमभ्युपेतव्यम् । सांख्यवत्सत्कार्याभ्युपगमेन तु नित्यत्वव्यवस्थापने यच्चिवर्तते तच्चिवृत्तमप्यस्तीति ब्रुवाणो भवान् प्रष्टव्यो भवति किमुक्तं भवति यदि ब्रूषे पूर्वमुपलब्धं पश्चाच्चोपलभ्यते तस्यापूर्वविशेषोत्पादः पूर्वविशेषप्रच्यवो ऽभ्युपेय इति व्याघातः । अथाविर्भावो ऽभिव्यक्तिस्तथापि पूर्वदोषानिवृत्तिरसती भवतीति । ता. टी. । ( ) २ पु. नास्ति. § अनागते ऽतीते चेति २ ।

‖ बौद्धानाम् । ता. टी. ।

सर्वं नाना न कश्चिदेको भावो विद्यते । कस्माद् भावलक्षणपृथक्त्वात् । भावस्य लक्षणमभिधानं येन लक्ष्यते भावः स समाख्याशब्दः तस्य पृथग्विषयत्वात् । सर्वो भावसमाख्याशब्दः समूहवाची कुम्भ इति संघाशब्दो गन्धरसरूपस्पर्शसमूहे बुध्नपार्श्वग्रीवादिसमूहे च वर्तते निदर्शनमात्रं चेदमिति* ।

नानेकलक्षणैरेकभावनिष्पत्तेः ॥ ३५ ॥

अनेकविधलक्षणैरिति मध्यमपदलोपी समासः । गन्धादिभिश्च गुणैर्बुध्नादिभिश्चावयवैः संबद्ध एको भावो निष्पद्यते गुणव्यतिरिक्तं च द्रव्यमवयवातिरिक्तश्चावयवीति । विभक्तन्यायं चैतदुभयमिति† । अथापि ।

लक्षणव्यवस्थानादेवाप्रतिषेधः ॥ ३६ ॥

न कश्चिदेको भाव इत्ययुक्तः प्रतिषेधः । कस्मात् लक्षणव्यवस्थानादेव । यदिह लक्षणं भावस्य संघाशब्दभूतं तदेकस्मिन्व्यवस्थितं यं कुम्भमद्राक्षं तं स्पृशामि यमेवास्राक्षं तं‡ पश्यामीति । नाणुसमूहो गृह्यतइति अणुसमूहे चागृह्यमाणे यद्गृह्यते तदेकमेवेति ।

अथाप्येतदनूक्तं नास्त्येको भावो यस्मात्समुदायः । एकानुपपत्तेर्नास्त्येव समूहः नास्त्येको भावो यस्मात्समूहे भावशब्दप्रयोगः "एकस्यानुपपत्तेः§ समूहो नोपपद्यते एकसमुच्चयो हि समूह इति व्याहतत्वादनुपपन्नं नास्त्येको भाव इति । यस्य प्रतिषेधः प्रतिज्ञायते समूहे भावशब्दप्रयोगादिति हेतुं ब्रुवता स एवाभ्यनुज्ञायते । एकसमुच्चयो हि समूह इति । समूहे भावशब्दप्रयोगादिति च समूहमाश्रित्य प्रत्येकं समूहि‖प्रतिषेधो नास्त्येको भाव इति । सोयमुभयतो व्याघातादात्मिञ्जनवाद इति । अयमपर एकान्तः¶ ॥

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ ३७ ॥

यावद्भावजातं तत्सर्वमभावः । कस्माद् भावेष्वितरेतराभावसिद्धेः ।

---

* अस्य प्रयोगः । कुम्भशब्दो ऽनेकविषय एकपदत्वात् सेनाशब्दवदिति । न्या· वा· ।

† सर्वस्य पक्षीकरणाद् दृष्टान्ताभावः । आधाराधेयभावेनानुपपन्नानां कटादीनामवयविनश्च ग्रहणादन्यथासिद्धः । नञः प्रसज्यप्रतिषेधपर्युदासविषयत्वेनाव्यवस्थानाच्च विरुद्धः । न्या· वा· ।

‡ अस्राक्षमिति ५ । § तत्समूहद्धति २ । ५ । ‖ समूहप्र· द्धति ५ ।

¶ संप्रति शून्यतावादिनमुत्थापयति । ता· टी· ।

असन् गौरश्वात्मना ऽनश्वो गौरसन्नश्वो गवात्मना ऽगौरश्च इत्यसत्प्रत्ययस्य प्रतिषेधस्य च भावशब्देन सामानाधिकरण्यात् सर्वमभाव*इति ।

प्रतिज्ञावाक्ये पदयोः प्रतिज्ञाहेत्वोश्च व्याघातादयुक्तम्† ।

अनेकस्याशेषता सर्वशब्दस्यार्थो भावप्रतिषेधश्चाभावशब्दस्यार्थः । पूर्वं सोपाख्यमुत्तरं निरुपाख्यं‡ तच्च समुपाख्यायमानं कथं निरुपाख्यमभावः स्यादिति न जात्वभावो निरुपाख्यो ऽनेकतया ऽशेषतया शक्यः प्रतिज्ञातुमिति सर्वमेतदभाव इति चेद् यदिदं सर्वमिति मन्यसे तदभाव इति एवं चेदनिवृत्तो व्याघातः अनेकमशेषं चेति नाभावप्रत्ययेन शक्यं भवितुम् । अस्ति चायं प्रत्ययः सर्वमिति तस्मान्नाभाव इति । प्रतिज्ञाहेत्वोश्च व्याघातः सर्वमभाव इति भावप्रतिषेधः प्रतिज्ञाभावेष्वितरेतराभावसिद्धेरिति हेतुः भावेष्वितरेतराभावमनुज्ञायाश्रित्य चेतरेतराभावसिद्धौ सर्वमभाव इत्युच्यते । यदि सर्वमभावो भावेष्वितरेतराभावसिद्धेरिति नोपपद्यते अथ भावेष्वितरेतराभावसिद्धिः सर्वमभाव इति नोपपद्यते । सूत्रेण चाभिसम्बन्धः ॥

न स्वभावसिद्धेर्भावानाम्‖ ॥ ३८ ॥

न सर्वमभावः । कस्मात् स्वेन भावेन सद्भावाद्भावानां स्वेन धर्मेण भावा भवन्तीति प्रतिज्ञायते । कश्च स्वो धर्मो भावानां द्रव्यगुणकर्मणां

---

* प्रमाणादयः खल्वमी परस्परानात्मतया असदिति प्रत्ययस्य नञश्च गोचरा अनुभूयन्ते । अतस्तद्वाचिनां शब्दानां तत्सामानाधिकरण्यं ततः प्रमाणादयो ऽसन्तः अनुत्पन्नप्रध्वस्तपटवत् । अपि चामी भावा नित्या अनित्या वा नित्यत्वे सर्वसामर्थ्यरहितस्यासत्त्वं न हि नित्यं क्व चित्कार्यउपयुज्यते क्रमाक्रमानुपपत्तेरित्युक्तम् । अनित्यत्वे तु विनाशस्वभावाश्चेद् द्वितीयादिक्षणेष्विव प्रथमक्षणे ऽपि न त्युक्तम् । अनित्यत्वे तु विनाशस्वभावाश्चेद् द्वितीयादिक्षणेष्विव प्रथमक्षणे ऽपि न स्युः सत्त्वे वा नामी विनाशस्वभावाः । अतत्स्वभावत्वे वा क्षणान्तरे ऽपि न नश्येयुः । नो खलु नीलं स्वकारणादुपजातं जातु कारणसहस्रैरपि पीतं कर्तुं शक्यमिति विनाशस्वभावकत्वमकामेनापि अनित्यानामेषितव्यम् । तस्माद्भावानां शून्यतैव पारमार्थिकी कल्पितया त्ववस्तुसत्या सन्त इव भासन्तइति युक्तमुत्पश्यामः । ता टी· ।

† एतदुक्तमिति २ । ४ । ५ ।

‡ न ह्यत्यन्तासच्चिरुपाख्यं सर्वमिति वा भाव इति वा ऽभिमानस्य गोचरः असद्वा ऽनिर्वचनीयं वा न ख्यातिगोचरो ऽपि तु सदेव सदन्तरात्मना तथा च कुतो ऽत्यन्तासतः कल्पनागोचरत्वमपीति । ता· टी· । § निरूपाख्यमिति २ । ५ ।

‖ स्वो भावो धर्मो द्रव्यादीनां सदादिः अथ वा स्वभावः स्वरूपं भावानां येनामी भावाः स्वभावाद् व्यावर्तन्ते तस्य सिद्धेः । अथ वा ऽसन्निति प्रत्ययस्य

सदादि सामान्यं द्रव्याणां क्रियावदित्येवमादिर्विशेषः स्पर्शपर्यन्ताः पृथिव्या इति च प्रत्येकं चानन्तो भेदः । सामान्यविशेषसमवायानां च विशिष्टा धर्मा गृह्यन्ते। सोयमभावस्य निरुपाख्यत्वात् संप्रत्यायको ऽर्थभेदो न स्यात् । अस्ति त्वयं तस्मान्न सर्वमभाव इति । अथ वा न स्वभावसिद्धेर्भावानामिति स्वरूपसिद्धेरिति । गौरिति प्रयुज्यमाने शब्दे जातिविशिष्टं द्रव्यं गृह्यते नाभावमात्रं* यदि च सर्वमभावः गौरित्यभावः प्रतीयेत । गोशब्देन चाभाव उच्येत (तस्मात्तु† गोशब्देन चाभाव उच्यते) यस्मात्तु गोशब्दप्रयोगे द्रव्यविशेषः प्रतीयते नाभावस्तस्मादयुक्तमिति। अथ वा न स्वभावसिद्धेरिति असन् गौरश्वात्मनेति गवात्मना कस्मान्नोच्यते अवचनाद्गवात्मना गौरस्तीति स्वभावसिद्धिः अनश्वो ऽश्व इति वा गौरगौरिति वा कस्मान्नोच्यते। अवचनात्स्वेन रूपेण विद्यमानता द्रव्यस्येति विज्ञायते ‡अव्यतिरेके प्रतिषेधे च भावानामसंयोगादिसम्बन्धो व्यतिरेको ऽचाऽव्यतिरेको ऽभेदाख्यसम्बन्धः प्रत्ययसामानाधिकरण्यं§ यथा न सन्ति कुण्डे बदराणीति। असन् गौरश्वात्मना ऽनश्वो गौरिति च गवाश्वयोरव्यतिरेकः प्रतिषिध्यते गवाश्वयोरेकत्वं नास्तीति । तस्मिन्प्रतिषिध्यमाने भावेन गवा सामानाधिकरण्यमसत्प्रत्ययस्यासन् गौरश्वात्मनेति यथा न सन्ति कुण्डे बदराणीति कुण्डे बदरसंयोगे प्रतिषिध्यमाने सद्विरसत्प्रत्ययस्य सामानाधिकरण्यमिति ।

गव्यश्वात्मनेति विशेषणाद्गौरित्यस्य गां परिहृत्याश्वादिभिः संबन्धाद् गोभावसिद्धेरेवमश्वादिष्वपीति स्वभावसिद्धेर्भावानां नाभाव इत्यर्थः । ता॰ टी॰ ।

* नाभाव इति अथ वा न स्वभावसिद्धिमात्रमिति २ ।

† नेति च ( ) ४ । ५ । नास्ति ।

‡ अव्यतिरेकप्रतिषेधे च भावानामसत् इत्यधिकम् ५ ।

§ असच्छब्दः खलु भावविशेषणं सद्वेत्याभिधत्ते यत्रमसत्प्रत्ययो ऽप्यभावविशेषणं सद्वेत्यालम्बते । यथा शुक्लशब्दः शुक्लगुणविशिष्टे पटे वर्तते तथा चासत्प्रत्ययाभिधानयोरुपपत्तं भाववाचिना पदेन सामानाधिकरण्यमित्यर्थः । भावश्च कश्चित्रित्यः कश्चिदनित्यः तत्र नित्यस्यार्थक्रियाकारित्वमुपपादितं क्षणभङ्गभङ्गे । अनित्योपि न विनाशस्वभावो भावः कारणान्तरात्तु विनश्यति । यत्तूक्तं न शक्यं नीलं पीतं कर्तुमिति तत्र ब्रूमः शक्य एव नीलः पीतः कर्तुम् । श्यामश्यामः कुम्भो वह्निसंयोगाद्रक्तः । अथ नीलत्वं न शक्यं पीतत्वं कर्तुं ननु भावोपि नाभावः शक्यः कर्तुमिति यथैककुम्भाधिकरणौ श्यामत्वरक्तत्वे पर्यायेण भवतः एवं कपालाधिकरणौ कुम्भभावाभावाविति न दोषः । ता॰ टी॰ ।

न स्वभावसिद्धिरापेक्षिकत्वात्* ॥ ४९ ॥

अपेक्षाकृतमापेक्षिकम् । ह्रस्वापेक्षाकृतं दीर्घं दीर्घापेक्षाकृतं ह्रस्वं न स्वेनात्मनावस्थितं किं चित्कस्माद् अपेक्षासामर्थ्यात् तस्मान्न स्वभावसिद्धिर्भावानामिति ।

व्याहतत्वादयुक्तम्‡ ॥ ५० ॥

यदि ह्रस्वापेक्षाकृतं दीर्घं किमिदानीमपेक्ष्य ह्रस्वमिति गृह्यते । अथ दीर्घापेक्षाकृतं ह्रस्वं दीर्घमनापेक्षिकम् । एवमितरेतराश्रययोरेकाभावेन्यतराभाव† इति दीर्घापेक्षाव्यवस्थानुपपन्ना । स्वभावसिद्धावसत्यां समयोः परिमण्डलयोर्वा द्रव्ययोरापेक्षिके दीर्घत्वह्रस्वत्वे कस्मान्न भवतः अपेक्षायामनपेक्षायां च द्रव्ययोरभेदः । यावती द्रव्ये अपेक्षमाणे तावती एवानपेक्षमाणे नान्यतरच्च भेदः । आपेक्षिकत्वे तु सत्यन्यतरच्च विशेषोपजनः स्यादिति । किमपेक्षासामर्थ्यमिति चेद् द्वयोर्ग्रहणे ऽतिशयग्रहणोपपत्तिः । द्वे द्रव्ये पश्यन्नेकच्च विद्यमानमतिशयं गृह्णाति तद्दीर्घमिति व्यवस्यति यच्च हीनं गृह्णाति तद्ध्रस्वमिति व्यवस्यतीति । एतच्चापेक्षासामर्थ्यमिति । अथेमे संख्येकान्ताः§ । सर्वमेकं सदविशेषात्‖ । सर्वं

---

* सर्वं हि भिन्नस्वभावा भावा भिन्नत्वं च तेषामन्यापेक्षं तथा हि नीलं भिन्नं पीताद्यपेक्षया न तु स्वभावतः । एवं ह्रस्वत्वदीर्घत्वे परापरत्वे पितापुत्रादयः परापेक्षा द्रष्टव्याः । यत्र परापेक्षं न तद्भाविकं यथा जपाकुसुमापेक्षः स्फटिकस्यारुणिमेत्याक्षेपः । ता. टी. ।

† दीर्घमनापेक्षिकम् एवमितरेतराश्रययोरेकाभावे ऽन्यतराभावादुभयं किमिति गृह्यते अथ दीर्घापेक्षो उभयाभाव इति ५ ।

‡ सतोरेव वस्तुनोः परस्परापेक्षं ह्रस्वत्वदीर्घत्वादिकं न वस्तुन्यसति घटतइत्यर्थः । किंच न सर्वेषां भावानां सापेक्षत्वं यथा रूपादीनामिति हेतोः पक्षाव्यापकत्वम् । अपि च । सर्वमभाव इति प्रतिज्ञायामुपन्यस्तहेतोः सत्त्वाङ्गीकारे व्याघातः । असत्वे साध्यासिद्धिः । प्रयुज्यमानस्य वाक्यस्यार्थं सत्त्वेनाङ्गीकृते व्याघातः । असत्त्वे तु वाक्यस्य निरर्थकत्वम् । सर्वमभावः सर्वं भाव इत्यनयोर्वाक्ययोरर्थभेदे ऽभ्युपगते व्याघातः अनभ्युपगते तु विशेषोपादानवैयर्थ्यम् ।

§ संख्या एकान्ता येषु वादेषु ते तथोक्ताः । ता. टी. ।

‖ इदमस्याकूतम् । न तावदयं नामरूपप्रपञ्चः प्रकाशाद्भिन्नः सन् प्रकाशितुमर्हति जडस्य स्वयं प्रकाशासम्भवात् । न च प्रकाशयोगात्प्रकाशतइति युक्तं न ह्यत्वान्तरेण प्रकाशेनास्य कश्चिद्योगः सम्भवति । विषयविषयिभावः संबन्ध इति

द्वेधा नित्यानित्यभेदात्*। सर्वं चेधा ज्ञाता† ज्ञानं ज्ञेयमिति। सर्वं चतुर्द्धा प्रमाता प्रमाणं प्रमेयं प्रमितिरिति‡। एवं यथासम्भवमन्येऽपीति§ तच्च परीक्षा।

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ॥ ४१ ॥

चेन्न। तत्राकिञ्चित्करस्य विपर्ययत्वासम्भवात् न चार्थं ज्ञानं फलं जनयतीति साम्प्रतम्। अतीतानागतयोरर्थयोस्तदसम्भवात्। न च न तयोर्विषयभावः। तस्माज् ज्ञानाद्विचस्य नामरूपप्रपञ्चस्य न प्रकाशसम्भव इति ज्ञानस्यैवायं विवर्त इति युक्तमुत्पश्यामः। न च प्रकाशात्मानो घटपटादय एवोदयव्ययधर्मिणः परस्परव्यावृत्ताः सन्त्विति साम्प्रतम्। तद्व्यावृत्तिग्रहणे प्रमाणाभावात्। सा हि यद्यतो व्यावर्तते तदुभयग्रहे गृह्येत। न च विज्ञानानि विलक्षणानि स्वरूपमात्रावस्थितानि परस्परवार्त्ताऽनभिज्ञानि ज्ञानान्तरमपि गृहीतुमुत्सहन्ते प्रागेव स्वस्माद् व्यावर्तयितुम्। न च निषेध्यनिषेधाधिकरणग्रहकरणो व्यावृत्तिग्रहः स्वकारणेन समसमयोत्पादो भवितुमर्हति। तादृशोः सव्येतरविषाणयोरिव कार्यकारणभावाभावात्। न चैकं विज्ञानं क्षणिकं निषेध्यनिषेधाधिकरणं गृहीत्वा पश्चाद्द्वयं गृह्णातीति युक्तं क्षणिकस्य क्रमाक्रमवद्व्यापारायोगात्। न चैकं विज्ञानं निषेध्यनिषेधाधिकरणं गृह्णाति अथ ज्ञानान्तरं निषेधतीति युक्तं चैत्रागृहीतेपि तस्मिन् मैत्रस्य निषेधज्ञानप्रसङ्गात्। न च ज्ञानस्वरूपग्रह एवास्य निषेधग्रह इति साम्प्रतम्। एवं हि स भवेद्यदि स्वरूपतदन्यव्यावृत्त्योरेकत्वं स्यात् तत्र व्यावृत्तिस्वभावो वा भावो भावस्वरूपा वा व्यावृत्तिः। तत्र पूर्वस्मिन् कल्पे व्यावृत्तेस्तुच्छत्वात् तत्स्वभावाभावभेदास्तुच्छाः स्युः ततश्च वचोभङ्ग्यन्तरेण शून्यवादप्रसङ्गः। इतरस्मिंस्तु कल्पे विधिरूपो भाव एव व्यावृत्तिरिति विधिरूपतया च ते न व्यावर्तन्तइति न व्यावृत्ता भावाः परस्परं परमार्थतः। तदिदमुक्तं सदविशेषादिति। अनाद्यनिर्वचनीयाविद्यानिबन्धनं तु भावानां भेदं न व्यासेधामः। न च ज्ञातुरपि ज्ञानाद्भेदयाहकमस्ति प्रमाणमुक्तादेवाविशेषात्। यस्माच्च ज्ञेयानां परस्परतश्च ज्ञानाद्भेदः नापि ज्ञातुर्ज्ञानाद्दस्ति भेदो नापि ज्ञानानामन्योन्यस्य तस्मात्प्रकाश एव प्रपञ्चो ब्रह्मत्यद्वैतसिद्धिः। ता॰ टी॰।

* न हि नित्यानित्याभ्यामन्यो राशिरस्ति यमाश्रित्य पदार्थास्तित्वादिके व्यवतिष्ठेरन्निति। ता॰ टी॰।

† ज्ञप्तिरपि ज्ञायमानत्वाज् ज्ञेयान्नातिरिच्यतइति भावः। ता॰ टी॰। एवं चात्र ज्ञानपदं ज्ञानसाधनपरम्।

‡ यदि प्रमितिर्नाम तत्त्वं प्रमाणादिभ्यो भिन्नं नास्तीयते प्रमायाः प्रधानक्रियाया अभावात्कथं प्रमात्रादयः। कथं च प्रधानक्रियामन्तरेण कर्त्राक्यता स्यात्। कारकवैचित्र्यं वा। प्रमायाः फलत्वावस्थाया उपरि प्रमेयत्वं न वारयामः न चैतावता तत्त्वान्तरं न भवतीति। ता॰ टी॰।

§ प्रकृतिपुरुषाविति वा पञ्च स्कन्धा इति वा पशुपाशतदुच्छेदेश्वरा इति वेत्यादयः। ता॰ टी॰।

यदि साध्यसाधनयोर्नानात्वमेकान्तो न सिद्धयति व्यतिरेकाद् । अथ साध्यसाधनयोरभेदः एवमप्येकान्तो न सिध्यति साधनाभावात् न हि तमन्तरेण कस्य चित्सिद्धिरिति* ।

न कारणावयवभावात् ॥ ४२ ॥

न संख्यैकान्तानामसिद्धिः कस्मात्कारणस्यावयवभावात्† । अवयवः कश्चित् साधनभूत इत्यव्यतिरेकः । एवं द्वैतादीनामपीति ॥

---

† अनवयवेन सर्वं चेदेकं द्वेधा त्रेधा चतुर्धा वेति प्रतिज्ञार्थः तदतिरिक्तं साधनं वाच्यं न हि साध्यमेव साधनं भवति तथा च साधनस्य व्यतिरेकान्न संख्यैकान्तसिद्धिः । न च किं चिदपि स्वसंवेदनमस्ति ज्ञानप्रदीपादीनामपि परसंवेद्यत्वात् । यथा च ज्ञानातिरिक्तोऽप्यर्थो विषयस्तथा विज्ञानवादनिराकरणावसरे वक्ष्यते । न च विज्ञानादर्थभेदोऽशक्यग्रहः । तथा हि नीलमुपलभइत्यनहंकारास्पदमपीतादिरूपं नीलं प्रत्यात्ममनुभवगोचरः । एवं नीलादीनामपि परस्परमन्यथा घटमानयेति देशितो लोचने निमील्य शयीत । शयीथा इति देशितस्तोयमेवाहरेत्कस्य चित्कथं चिद्विवेकाभावात् । न चानिर्वचनीयाविद्यानिबन्धनोऽयं भेदव्यवहार इति साम्प्रतम् । अनिर्वचनीयख्यातेः पूर्वमेवापाकृतत्वात् । तस्मात्सर्वजनसंवेदनसिद्धोऽयं भेदप्रत्ययो न कारणमुखनिरीक्षणेन युक्तो निराकर्त्तुमपि तु स्पष्टदृष्टकार्यभेदप्रत्ययात्तादृशं तत्कारणं कल्पनीयं यादृशेन कारणेन प्रपञ्चप्रत्ययोऽप्रत्यूहमुत्पत्तुमर्हति तच्च प्रत्यक्षमेव । तथा हि । तत्रीलं परिच्छिन्दत्पीतादिभ्योऽप्यं भेदं परिच्छिनत्ति संयुक्तविशेषणलक्षणादिन्द्रियार्थसन्निकर्षात् । नीलं हि नीलमित्यनुभवन्नयं पीतं च पीतमित्यनुभवन् स्मरन्वा शक्नोति निषेध्यनिषेधाधिकरणतया समाकलयितुं रूपमात्रेणागृहीतपरस्परभेदमपि । न हि तत्र भेदेन प्रथतइत्यभेदेन प्रथेत येनानयोर्नीलपीतयोर्गृहीतस्वरूपयोरवध्यवधिमद्भावो न स्यात् । तथा च तौ गृहीत्वा प्रत्यक्षेण शक्नोत्ययमनयोर्भेदं ग्रहीतुमित्यसाम्प्रतमेतत् । अन्योन्यसंश्रयाद्भेदो न प्रमान्तरसाधनः । तस्मिन्निदं नार्यमिति वस्तुभेदं विना न धीरिति । एतेन प्रमातुरपि प्रमाया भेदो व्याख्यातः । प्रमातारश्चानेकविधसुखदुःखोपभोगव्यवस्थानाद्बुधिरान्धादिकोविदजालामुक्तसंसारिविभागोपपत्तेश्च भेदवन्तोऽनुमीयन्ते । एकस्मिन्नपर्यायेण विरुद्धधर्मसंसर्गाभावात् । कल्पनया कथं चित्सम्भाव्यमानोऽप्ययं गोमयपायसीयन्यायमावहति । तदेवं प्रत्यक्षादिविरोधादनुपपन्नार्थाः श्रुतय एकमेवाद्वितीयमित्याद्याः प्रथमां वृत्तिमुल्लङ्घ्य जघन्यामालम्बन्ते यजमानः प्रस्तर आदित्यो वै यूपवदिति । तस्माद्वैतमिति । साध्यात्साधनभेदेन च संख्यान्तरैकान्ता अप्यपाकृता इत्युक्तम् । ता. टी. ।

† एकस्य च द्वयादीनां वा कश्चिदेकदेशः साधनं तथा च न संख्यान्तरं न च साधनाभाव इत्यर्थः । ता. टी. ।

निरवयवत्वादहेतुः ॥ ४३ ॥

कारणस्यावयवभावादित्यहेतुः कस्मात्सर्वमेकमित्यनपवर्गेण प्रतिज्ञाय कस्य चिदेकत्वमुच्यते तच्च व्यपवृक्तोवयवः* साधनभूतो नोपपद्यते† एवं द्वैतादिष्वपीति । ते खल्विमे संख्यैकान्ता विशेषकारितस्या‡र्थभेदविस्तारस्य प्रत्याख्यानेन वर्त्तन्ते प्रत्यक्षानुमानागमविरोधान्मिथ्यावादा भवन्ति । अथाभ्यनुज्ञानेन वर्त्तन्ते समानधर्मकारितोर्थसंग्रहो विशेषकारितश्चार्थभेद इति एवमेकान्तत्वं जहतीति । ते §खल्वेते तत्त्वज्ञानप्रविवेकार्थमेकान्ताः परीक्षिता‖ इति । प्रेत्यभावानन्तरं फलं तस्मिन् ।

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥ ४४ ॥

पचति दोग्धीति सद्यः फलमोदनपयसी कृषति वपतीति कालान्तरे फलं सस्याधिगम इति । अस्ति चेयं क्रिया अग्निहोत्रं जुहुयात्स्वर्गकाम इति एतस्याः फले संशयः ।

¶न सद्यः कालान्तरोपभोग्यत्वात् ॥ ४५ ॥

---

* यद्यव्यक्तो ऽवयव इति २ ।

† यदि साध्यस्य कश्चिदवयवो भवेत्र संख्यैकान्तः स्यादिति । सर्वमेकमित्येतस्मिन् प्रतिज्ञातेर्थे न किं चिद्व्यावर्तते यतस्तत्साधनं स्यादित्यर्थः । ता॰ टी॰ ।

‡ वक्रकोटरपाण्यादिविशेषकारितो यो ऽर्थविशेषः स्थाणुपुरुषादिस्तत्प्रत्याख्यानेनेत्यर्थः । ता॰ टी॰ ।

§ स्यश्चित्ते इति २

‖ अद्वैतत्वादिष्वेकान्तेषु प्रेत्यभावो न तात्त्विको भवेदपि तु काल्पनिकः केवलं प्रेत्यभावो ऽपि तु षोडशापि पदार्थाः तस्मादेतेषां यत्तत्त्वज्ञानं तत्प्रविवेकेन ज्ञानप्रविवेक इति तदर्थमेते परीक्षिता इति । ता॰ टी॰ ।

¶ कर्मानन्तरं दुःखं लोकपङ्क्त्यादिकं चोपलभ्यते प्रशंसन्ति हि लौकिका धार्मिको ऽयं साधुतम इति । तत्किमेतदेवास्य फलमस्तु अथामुष्मिकं स्वर्गादीति । किं तावत्प्राप्तं स्वर्गादिफलत्वे कर्मणः स्वरूपेणाकारणत्वाच्चिरनिर्वृत्ते तस्मिंस्तदुत्पत्तेरपूर्वकल्पनायां च प्रधानाङ्गापूर्वाणि भूयांसि कल्पनीयानि । न च तान्युत्पन्नमात्राणि जनयन्ति तत्सहकार्यन्तराणि कल्पनीयानीत्यदृष्टकल्पनागौरवात्तदनन्तरं दृष्टफलबाधनाच्च नास्यामुष्मिकं स्वर्गादि फलमपि त्वनन्तरदृश्यमानमेव । तत्रापि दुःखफलत्वउपदेशव्याघातान्लोके पङ्क्तिलाभस्यमत्यादिकमेव फलं तच्च सुखहेतुतया स्वर्गादिफलत्वेनोच्यते दृष्टो हि सुखहेतौ स्वर्गपदप्रयोगो लोके यथा चन्दनं स्वर्गः सूक्ष्माणि वासांसि स्वर्ग इति प्राप्तम् । एवं प्राप्ते ब्रूमः । स्वर्गपदस्य तावदर्थवादतो यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषो-

स्वर्गः फलं श्रूयते तच्च भिन्ने ऽस्मिन्देहभेदादुत्पद्यतइति न सद्यः ग्रामादिकामानामारम्भफलमिति ।

कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ॥ ४६ ॥

ध्वस्तायां प्रवृत्तौ प्रवृत्तेः फलं न कारणमन्तरेणोत्पत्तुमर्हति न खलु वै विनष्टात्कारणात्किं चिदुत्पद्यतइति ।

प्राङ् निष्पत्तेर्वृक्षफलवत्तत्स्यात् ॥ ४७ ॥

यथा फलार्थिना वृक्षमूले सेकादि परिकर्म क्रियते तस्मिंश्च प्रध्वस्ते पृथिवीधातुरब्धातुना संगृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्यं निर्वर्तयति स द्रव्यभूतो रसो वृक्षानुगतः पाकविशिष्टो व्यूहविशेषेण सन्निविशमानः पर्णादि फलं निर्वर्तयति एवं परिषेकादि कर्म चार्थवत् । न च विनष्टात्फलनिष्पत्तिः । तथा प्रवृत्त्या संस्कारो*धर्माधर्मलक्षणो जन्यते स जातो निमित्तान्तरानुगृहीतः कालान्तरे फलं निष्पादयतीति उक्तञ्चैतत् पूर्वकृतफलानुबन्धात्तदुत्पत्तिरिति । तदिदं प्राङ् निष्पत्तेर्निष्पद्यमानम् ।

नासन्न सन्न सदसत्सदसतोर्वैधर्म्यात् ॥ ४८ ॥

प्राङ् निष्पत्तेर्निष्पत्तिधर्मकं नासद् उपादाननियमात् । कस्य चिदुत्पत्तये किं चिदुपादेयं न सर्वं सर्वस्येत्यसद्भावे नियमो नोपपद्यतइति । न सत् प्रागुत्पत्तर्विद्यमानस्योत्पत्तिरनुपपन्नेति सदसत् न सदसतोर्वैधर्म्यात्सदित्यर्थाभ्यनीतं च तत्सुखं स्वःपदास्पदमिति सुखं प्रति वाचकत्वमवधारितम् । न च तद्वाचकत्वेनैव चन्दनादेरपि तत्प्रयोगोपपत्तावनेकार्थत्वकल्पना युक्ता । यथाहुरन्यायश्चानेकार्थत्वमिति । तस्मान्मुख्योयं स्वर्गशब्द उक्तभेदे सुखे । तस्मात्स्वर्गकाम इत्यत्र मुख्यार्थसम्भवे नोपचरितार्थता युक्ता । न चानेकार्थकल्पनाभयान्मुख्यार्थपरित्यागो न्याय्यः । प्रमाणसिद्धे नियोगपर्यनुयोगानुपपत्तेः । यथाहुः । श्रुतसिद्ध्यर्थमश्रुतोपलक्षौ यत्नवता भवितव्यं न तु श्रुतशैथिल्यमादरणीयमिति । तथा प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि । न चानन्तरदृश्यमानं लोकपङ्क्त्यादि होमाद्यनुष्ठानफलमपि तु तदुपलम्भफलमदाम्भिकानां प्रच्छन्नमनुतिष्ठतामपि लोके पङ्क्त्यादेरभावात् । तस्मात्सुष्ठूक्तं न सद्य इति ता. टी. ।

* नैष पुरुषसंस्कारः स्नानादिजन्य इव बोद्धव्यो ऽपि तु पुरुषधर्मतामात्रेण संस्कार इत्युच्यते । परमार्थतस्त्वयं धर्मः पुरुषाश्रयो ऽपि कर्मणा फले जनयितव्ये तस्य वास्तवव्यापार इति । ता. टी. ।

नुज्ञा असदिति अर्थप्रतिषेधः एतयोर्व्याघातो वैधर्म्ये व्याघातादव्यतिरेकानुपपत्तिरितिप्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा । कस्मात् ।

उत्पादव्ययदर्शनात्* ॥ ४९ ॥

यत्पुनरुक्तं प्रागुत्पत्तेः कार्यं नासदुपादाननियमादिति ।

बुद्धिसिद्धं तु तदसत्† ॥ ५० ॥

इदमस्योत्पत्तये समर्थं न सर्वमिति प्रागुत्पत्तेर्नियतकारणं कार्यं बुद्ध्या सिद्धमुत्पत्तिनियमदर्शनात् । तस्मादुपादाननियमस्योपपत्तिः सति तु कार्ये प्रागुत्पत्तेरुत्पत्तिरेव नास्तीति ।

‡आश्रयव्यतिरेकाद्वृक्षफलोत्पत्तिवदित्यहेतुः ॥ ५१ ॥

मूलसेकादि परिकर्म फलं चोभयं वृक्षाश्रयं कर्म चेह शरीरे फलं चामुचेत्याश्रयव्यतिरेकादहेतुरिति ।

§प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥ ५२ ॥

प्रीतिरात्मप्रत्यक्षत्वादात्माश्रया तदाश्रयमेव कर्म धर्मसंज्ञितं धर्मस्यात्मगुणत्वात् तस्मादाश्रयव्यतिरेकानुपपत्तिरिति ।

‖न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्द्देशात् ॥ ५३ ॥

पुत्रादिफलं निर्द्दिश्यते न प्रीतिः यामकामो यजेत पुत्रकामो यजेतेति तच्च यदुक्तं प्रीतिः फलमित्येतदयुक्तमिति ।

---

* यथा नित्यस्वरूपायाश्चितिशक्तेर्नोत्पादो न व्यय एवं फलस्यापि नित्यस्य तौ न स्यातामित्यर्थः । ता· टी· ।

† तदसद् भाविकार्यमनेनैव कारणेन जन्यते नान्येनेत्यनुमानबुद्धिसिद्धमेवेत्यर्थः । ता· टी· ।

‡ देहाद्व्यतिरिक्तमात्मानं नित्यं परलोकिनमसन्तं मन्यमान आह । ता· टी· ।

§ अस्त्यात्मा स्वर्गोपभोगसमर्थः शरीरव्यतिरिक्तः कर्तेत्युपपादितमित्याशयवानाह । ता टी· ।

‖ अस्तु स्वर्गाद्यात्माश्रयं तथाप्यव्यापको हेतुः पुत्रादिफलेभ्यो निवृत्तेरिति दर्शयति । ता· टी· ।

तत्संबन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः* ॥ ५४ ॥

पुत्रादिसंबन्धात् फलं प्रीतिलक्षणमुत्पद्यतइति पुत्रादिषु फलवदुपचारः । यथान्ने प्राणशब्दोन्नं वै प्राणा इति ।

फलानन्तरं दुःखमुद्विग्नमुक्तं च बाधनालक्षणं दुःखमिति तत्किमिदं† प्रत्यात्मवेदनीयस्य सर्वजन्तुप्रत्यक्षस्य सुखस्य प्रत्याख्यानमाहो स्विदन्यः कल्प इति । अन्य इत्याह । कथं न वै सर्वलोकसाक्षिकं सुखं शक्यं प्रत्याख्यातुम् । अयं तु जन्ममरणप्रबन्धानुभवनिमित्ताद् दुःखान्निर्विण्णस्य दुःखं जिहासतो दुःखसंज्ञाभावनोपदेशो दुःखहानार्थ इति । कया युक्त्या सर्वे खलु सत्त्वनिकायाः सर्वाण्युत्पत्तिस्थानानि सर्वः पुनर्भवो बाधनानुषक्तो दुःखसाहचर्याद्बाधनालक्षणं दुःखमित्युक्तमृषिभिर्दुःखसंज्ञाभावनमुपदिश्यते। अत्र च हेतुरुपादीयते ।

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ॥ ५५ ॥

जन्म जायतइति शरीरेन्द्रियबुद्धयः शरीरादीनां संस्थानविशिष्टानां प्रादुर्भाव उत्पत्तिः विविधा च बाधना हीना मध्यमा उत्कृष्टा चेति। उत्कृष्टा नारकिणां तिरश्चां तु मध्यमा मनुष्याणां हीना देवानां हीनतरा वीतरागाणां च । एवं सर्वमुत्पत्तिस्थानं‡ विविधबाधनानुषक्तं पश्यतः सुखे तत्सा-

---

* स्वर्गोऽपि यावत्स्वर्गतया न काम्यते किं तु भोग्यतयां । एवं सति कैव कथा पुत्रादिष्वपि तेपि भोग्यतयैव काम्यन्ते न तु स्वरूपं भोग्यमिति तत्साध्यं सुखं भोग्यं तस्मात्पुत्रादिसंबन्धात्तदुत्पत्तेः सुखोत्पत्तेस्तेषु फलप्रयोगः । ता. टी.

† भवतु बाधनालक्षणं दुःखमनुभूयमानं यत्पुनरिदं प्रत्यात्ममनुकूलवेदनीयं सुखं तत्कथं दुःखमनुभवविरोधात् । शरीरेन्द्रियबुद्धयश्च यदि दुःखहेतुतया दुःखं कस्मात्सुखहेतुतया सुखमेव न भवन्ति । सेयमतिभीरुता सकललोकयात्राविरोधिनी । तस्मान्मांसार्थी वैकः कण्ठतालूद्धृत्य मांसमश्नन्नानर्थं कण्टकजन्यमाप्नोत्येवं प्रेक्षावान् दुःखमुद्धृत्येन्द्रियादिसाधनं सुखं भोक्ष्यते। सन्ति च विविधदुःखपरिवर्जनहेतवो दृष्टाः परिदृष्टसामर्थ्या अन्वयव्यतिरेकाभ्यामित्यभिप्रायवान् पूर्वपक्षी गुडजिह्विकया संशयान इव पृच्छति । ता. टी. ।

‡ उत्पत्तिः सुखदुःखहेतुभूता विषयसंपत्तिः । तस्याः स्थानानि भुवनानि आ सत्यलोकादा चावीचेरिति । एतदुक्तं भवति। यदि दुःखपरिवर्जनेन शक्येत सुखमुपादातुं ततस्तादृशमनुकूलवेदनीयं कः प्रेक्षावान् प्रजह्यात् । न च तादृश-

धनेषु च शरीरेन्द्रियबुद्धिषु दुःखसंज्ञा व्यवतिष्ठते। दुःखसंज्ञाव्यवस्थानात्सर्वलोकेष्वनभिरतिसंज्ञा भवति। अनभिरतिसंज्ञामुपासीनस्य सर्वलोकविषया तृष्णा विच्छिद्यते* तृष्णाप्रहाणात्सर्वदुःखाद्विमुच्यतइति। यथा विषयोगात्पथ्यो विषमिति बुध्यमानो नोपादत्ते अनुपाददानो मरणदुःखं नाप्नोति। दुःखोद्देशस्तु न सुखस्य प्रत्याख्यानं कस्मात्।

†न सुखस्यान्तरालनिष्पत्तेः ॥ ५६ ॥

न खल्वयं दुःखोद्देशः सुखस्य प्रत्याख्यानम्। कस्मात् सुखस्यान्तरालनिष्पत्तेः। निष्पद्यते खलु बाधनान्तरालेषु सुखं प्रत्यात्मवेदनीयं शरीरिणां तदशक्यं प्रत्याख्यातुमिति। अथापि।

बाधनानिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः ॥ ५७ ॥

सुखस्य दुःखोद्देशेनेति प्रकरणात् पर्येषणं प्रार्थनाविषयार्जनतृष्णा पर्येषणस्य दोषो यदयं वेदयमानः प्रार्थयते तस्य प्रार्थितं न संपद्यते संपद्य वा विपद्यते न्यूनं वा संपद्यते बहुप्रत्यनीकं वा संपद्यतइत्येतस्मात्पर्येषणदोषान्नानाविधो मानसः संतापो भवत्येवं वेदयतः पर्येषणदोषाद्बाधनाया अनिवृत्तिः। बाधनाऽनिवृत्तेर्दुःखसंज्ञाभावनमुद्दिश्यते अनेन कारणेन दुःखं जन्म न तु सुखस्याभावादिति। अथाप्येतदुक्तं कामं कामयमानस्य यदा कामः समृध्यते। अथैनमपरः कामः क्षिप्रमेव प्रबाधते। अपि चेदुदनेमि‡ समन्ताद्भूमिमालभते स गवाश्वां न स तेन धनेन धनेषी तृप्यति किं नु सुखं धनकाम इति।

दुःखविकल्पे सुखाभिमानाच्च§ ॥ ५८ ॥

नास्ति सुखं क्व चिदपि सर्वस्य दुःखाविनाभाविनः केवलस्योपादातुमशक्यत्वात्। तस्माच्चेदं सुखस्य प्रत्याख्यानमपि तु सुखएव दुखःभावनमुपदिश्यते ऋषिणा। ता॰ टी॰।

* विलिप्यतइति २। † सुखस्याप्यन्तरालनिष्पत्तेः ४।

‡ समन्तादुदनेमि यथा भवति तथा भूमिं लभतइति योजना। ता॰ टी॰।

§ ननु यद्यन्तरालसुखान्यनुभवति तथापि दुःखबभेदमाकलयन् अनुपदिष्टोपि स्वयमेव निवत्स्यति श्रुतमस्य दुःखभावनोपदेशेनेत्यत आह। दुःखविकल्पे सुखाभिमानाच्च। अविवेकिनामिति शेषः। ता॰ टी॰।

दुःखसंज्ञाभावनोपदेशः क्रियते । अयं खलु सुखसंवेदने व्यवस्थितः सुखं परमपुरुषार्थं मन्यते न सुखादन्यन्निःश्रेयसमस्ति सुखे प्राप्ते चरितार्थः कृतकरणीयो भवति । मिथ्यासंकल्पात्सुखे तत्साधनेषु च विषयेषु संरज्यते संरक्तः सुखाय घटते घटमानस्यास्य जन्मजराव्याधिप्रायणानिष्टसंयोगेष्टवियोगप्रार्थितानुपपत्तिनिमित्तमनेकविधं यावद् दुःखमुत्पद्यते तं दुःखविकल्पं सुखमित्यभिमन्यते । सुखानुभूतं दुःखं न दुःखमनापाद्य* शक्यं सुखमवाप्तुं तादर्थ्यात्सुखमेवेदमिति सुखसंज्ञोपहृतप्रज्ञो जायस्व म्रियस्व संधावेति† संसारं नातिवर्तते । तदस्याः सुखसंज्ञायाः प्रतिपक्षो दुःखसंज्ञाभावनमुपदिश्यते दुःखानुषङ्गाद् दुःखं जन्मेति‡ नोच्यते सोयमेवं वाच्ये यदेवमाह§ दुःखमेव जन्मेति तेन सुखाभावं ज्ञापयतीति । जन्मविनियहार्थीयो‖ वै खल्वयमेवशब्दः कथं न दुःखं जन्म स्वरूपतः किं तु दुःखोपचाराद् एवं सुखमपीति एतदनेनैव निर्वर्त्यते न तु दुःखमेव जन्मेति ।

दुःखोपदेशानन्तरमपवर्गः स प्रत्याख्यायते ।

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः¶ ॥ ५९ ॥

ऋणानुबन्धान्नास्त्यपवर्गः । जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान्** जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति ऋणानि तेषामनुबन्धः स्वकर्मभिः संबन्धः कर्मसंबन्धवचनाज् जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ चेति जरया ह एष तस्मात्सत्राद्विमुच्यते मृत्युना ह वेति । ऋणानुबन्धादपवर्गानुष्ठानकालो नास्तीत्यपवर्गाभावः । क्लेशानुबन्धान्नास्त्यपवर्गः क्लेशानुबद्ध एवायं म्रियते क्लेशानुबद्धश्च जायते नास्य क्लेशानुबन्धविच्छेदो गृह्यते । प्रवृत्त्यनुबन्धान्नास्त्यपवर्गः जन्मप्रभृ-

---

* अनासाद्य इति ५ । † सन्धावतीति । संबाधाचेति ४ ।

‡ एवकारः किमर्थ इत्यर्थः । ता. टी. । § यदेवं ग्राह २ ।

‖ जन्मविनियहो जन्मविनिवृत्तिः स एवार्थोऽत्र वर्ततइति जन्मविनियहार्थीयः यथा मत्स्यर्थीय इति । एतदुक्तं भवति । जन्म दुःखमेवेति भावयितव्यं न मनागपि सुखबुद्धिः कर्तव्या अनेकानर्थपरम्परापातेनापवर्गेप्रत्यूहप्रसङ्गादिति । ता. टी.

¶ अनुबन्धः सर्वदा करणीयता । न्य. वा. । ** ऋणवा जायतइति २ । ५ ।

त्ययं यावत्प्रायणं वाग्बुद्धिशरीरारम्भेणाविमुक्तो गृह्यते तच्च यदुक्तं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति तदनुपपन्न*मिति। अत्राभिधीयते। यत्तावदृणानुबन्धादिति ऋणैरिव ऋणैरिति।

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः ॥ ६० ॥

ऋणैरिति नायं प्रधानशब्दः। यच्च खल्वेकः प्रत्यादेयं ददाति द्वितीयश्च प्रतिदेयं गृह्णाति तत्रास्य दृष्टत्वात् प्रधानमृणशब्दः। न चैतदिहोपपद्यते प्रधानशब्दानुपपत्तेः गुणशब्देनायमनुवाद ऋणैरिव ऋणैरिति। प्रयुक्तोपमं चैतद् यथा ऽग्निर्माणवक इति। अन्यच्च दृष्टश्चायमृणशब्द इह प्रयुज्यते यथाग्निशब्दो माणवके। कथं गुणशब्देनानुवादः निन्दाप्रशंसोपपत्तेः। कर्मलोपे ऋणीव ऋणादानान्निन्द्यते कर्मानुष्ठाने च ऋणीव ऋणदानात्प्रशस्यते स एवोपमार्थ इति। जायमान इति गुणशब्दो विपर्यये ऽनधिकारात्। जायमानो ह वै ब्राह्मण इति च शब्दो गृहस्थः संपद्यमानो जायमान इति यदायं गृहस्थो जायते तदा कर्मभिरधिक्रियते मातृतो जायमानस्यानधिकारात्। यदा तु मातृतो जायते कुमारो न तदा कर्मभिरधिक्रियते अर्थिनः शक्तस्य (चाधिकारात्। अर्थिनः कर्मभिरधिकारः कर्मविधौ कामसंयोगस्मृतेः अग्निहोत्रं जुहुयात्स्वर्गकाम इत्येवमादि शक्तस्य†) च प्रवृत्तिसंभवात्। शक्तस्य कर्मभिरधिकारः प्रवृत्तिसंभवात्। शक्तः खलु विहिते कर्मणि प्रवर्तते नेतर इति। उभयाभावस्तु प्रधानशब्दार्थे। मातृतो जायमाने कुमारे उभयमर्थिता शक्तिश्च न भवतीति। न भिद्यते च लौकिकाद्वाक्याद्वैदिकं वाक्यं प्रेक्षापूर्वकारिपुरुषप्रणीतत्वेन। तच्च लौकिकस्तावदपरीक्षको ऽपि न जातमात्रं कुमारकमेवं ब्रूयादधीष्व यजस्व ब्रह्मचर्यं चरेति। कुत एष ऋषिरुपपन्नानवद्यवादी उपदेशार्थेन प्रयुक्त उपदिशति न खलु वै नर्तकोन्ध्येषु प्रवर्तते न गायनो बधिरेष्विति। उपदिष्टार्थविज्ञानं‡ चोपदेशविषयः यश्चोपदिष्टमर्थं विजानाति

---

* तत्र ऋणत्रयापाकरणेनैव वयःसमाप्तमोक्षनिवेशक्षणो नास्तीत्यपवर्गाभाव इत्यर्थः। नानुच्छिन्ननिदानः संसारः शक्य उच्छेत्तुमित्यर्थः। ता॰ टी॰।

† ( ) २ नास्ति। ‡ विज्ञाता चोपदेशविषय इति २। ५।

तं प्रत्युपदेशः क्रियते न चैतदस्ति जायमानकुमारके इति । गार्हस्थ्यलिङ्गं च मन्त्रब्राह्मणं कर्माभिवदति यच्च मन्त्रब्राह्मणं कर्माभिवदति *तत्पत्नीसंबन्धादिना† गार्हस्थ्यलिङ्गेनोपपन्नं तस्माद्गृहस्थोयं जायमानोऽभिधीयते इति ।

अर्थित्वस्य चाविपरिणामे जरामर्यवादोपपत्तिः§ ।

यावच्चास्य फलेनार्थित्वं न विपरिणमते न निवर्तते तावदनेन कर्मानुष्ठेयमित्युपपद्यते जरामर्यवादस्तं प्रतीति जरया ह वेत्यायुषस्तुरीयस्य चतुर्थस्य प्रव्रज्यायुक्तस्य वचनं जरया ह वा एष एतस्माद्विमुच्यतइति । आयुषस्तुरीयं चतुर्थं प्रव्रज्यायुक्तं जरेत्युच्यते । तत्र हि प्रव्रज्या विधीयते अत्यन्तजरासंयोगे जरया ह वेत्यनर्थकम् अशक्तो विमुच्यतइत्येतदपि नोपपद्यते स्वयमशक्तस्य बाह्यां शक्तिमाह । अन्तेवासी वा जुहुयाद् ब्रह्मणा स परिक्रीत: क्षौरहोता वा जुहुयाद्वपनेन स परिक्रीत इति । अथापि‖ विहितं वानूद्येत¶ कामाद्वार्थः परिकल्प्येत विहितानुवचनं "न्याय्यमिति** । ऋणवानिवास्वतन्त्रो गृहस्थः कर्मसु प्रवर्ततइत्युपपन्नं वाक्यस्य सामर्थ्यम् । फलस्य हि साधनानि प्रयत्नविषयो न फलं†† तानि संपन्नानि फलाय

---

* तत्कर्मेति ख । † गार्हस्थ्यस्य लिङ्गं पत्नी यस्मिन् कर्मणि तत्तथोक्तम् । ता· टी·

‡ परिणामे इति ख ।

§ तेन यद्ब्रह्मचर्यापाकरणेन वयःपर्यवसानाचास्ति मोक्षावसर इति तदपाकृतं भवति । ता· टी· ।

‖ यद्यपि गृहस्थस्य यज्ञान्तराणि सन्ति तथापि जायमान ऋणैस्त्रिभिरिति वाक्यं बालस्यापि यज्ञादि विधास्यतीत्येतामाशङ्कां विमर्शपूर्वकमपाकरोति । ता· टी· ।

¶ वानुद्येतेति ख ।

** न तावज्जायमानो ह वै इत्यादिवाक्ये विधिविभक्तिरस्ति तेन सिद्धानुवादः स्वरसतः प्रतीयते । यदि तु तस्यार्थस्य सिद्धिर्वाक्याद्वा प्रमाणान्तराद्वा कथमपि न कल्पेत ततो वचनानि त्वपूर्वत्वादिति न्यायेन विधित्वमस्य कल्पेत । सन्ति तु शतशस्तदर्थविधायकानि वाक्यानि विधिविभक्तिमन्तीति को जात्वस्येच्छामात्रेण विध्यर्थतां कल्पयेत् । तस्माद्विहितानुवचनमेव न्याय्यमिति जायमानशब्दो जघन्यवृत्तिरिति युक्तमुत्पश्यामः । ता· टी· ।

†† अयमभिप्रायः विधिर्हि स्वव्यापारे पुरुषं कर्तृतया नियुङ्क्ते प्रयत्नश्चास्य व्यापारः । स च निर्विषयो न शक्यो निर्वर्तयितुमिति स्वविषयमर्पयते न चास्य साक्षात्फलं प्रयत्नविषयो भवितुमर्हति तदुद्देश्यतामात्रेण तु भवेच्च चैतावता प्रयत्नोऽस्य निर्वर्त्यते यावद्यं साक्षादभिनिर्वर्तनीयं न प्राप्नोति तदुपायश्चास्य साक्षा-

कल्प्यन्ते*। विहितं च जायमानं विधीयते च जायमानं तेन यः संबद्ध्यते सोयं जायमान इति । **प्रत्यक्षविधानाभावादिति चेद् न प्रतिषेधस्यापि प्रत्यक्षविधानाभावादिति** । प्रत्यक्षतो विधीयते गार्हस्थ्यं ब्राह्मणेन यदि चाश्रमान्तरमभविष्यत्तदपि व्यधास्यत्† प्रत्यक्षतः । प्रत्यक्षविधानाभावान्नास्त्याश्रमान्तरमिति न प्रतिषेधस्य प्रत्यक्षविधानाभावात् । न प्रतिषेधोपि वै ब्राह्मणेन प्रत्यक्षतो विधीयते न सन्त्याश्रमान्तराणि एक एव गृहस्थाश्रम इति प्रतिषेधस्य प्रत्यक्षतो ऽश्रवणादयुक्तमेतदिति ।

अधिकाराच्च विधानं विद्यान्तरवत् । यथा शास्त्रान्तराणि स्वे स्वे ऽधिकारे प्रत्यक्षतो विधायकानि नार्थान्तराभावाद्§ एवमिदं ब्राह्मणं गृहस्थशास्त्रं स्वे ऽधिकारे प्रत्यक्षतो विधायकं नाश्रमान्तराणामभावादिति । ऋग्ब्राह्मणं चापवर्गाभिधाय्यभिधीयते । ऋचश्च ब्राह्मणानि चापवर्गाभिवादीनि भवन्ति । ऋचश्च तावत्कर्मभिर्मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमिच्छमानाः । अथापरे ऋषयो मनीषिणः ‖परं कर्मभ्यो ऽमृतत्वमानशुः¶ । न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । परेण नाकं निहितं** गुहायां विभ्राजते तद्यतयो विशन्ति । वेदाहमेतं पुरुषं महान्तमादित्यवर्णं†† तमसः परस्तात् । तमेव विदित्वा ऽति मृत्युमेति नान्यः पन्था विद्यतेयनाय । अथ ब्राह्मणानि त्रयो धर्मस्कन्धा यज्ञो ऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासीति तृतीयो ऽत्यन्तमात्मानमाचार्यकुले ऽवसादयन्सर्वएवैते पुण्यलोका भवन्ति

दभिनिर्वर्तनीय इति फलोद्देशप्रवृत्तस्य पुरुषप्रयत्नस्य तद्देवोपायो विषयः । न च बालस्यापि तदुपायमविदुषस्तत्र सामर्थ्यमस्ति । असमर्थश्चाकर्ता कथमेनं प्रयत्नेन व्याप्नुयादव्याप्नुवंश्च कथमधिकारीति जायमानशब्दो जघन्यवृत्तिरेव न्याय्य इति सिद्धम् । ता॰ टी॰ । * कल्पन्ते इति २ । ५ । † व्यधास्यत २ । ४ ।

‡ न चाविधानेन तत्प्रतिषेधानुमानमित्याह । अधिकाराच्चेति । ता॰ टी॰ । अत एवास्य सूत्रत्वं नास्तीति मत्वा सूत्राङ्को न निवेशितः ।

§ प्राप्यान्तराभावादिति २ नाप्यान्तराभावादिति ५ । ‖ परं इति २ ।

¶ प्रेत्यभावमित्यर्थः । परं कर्मभ्य इति कर्मपरित्यागमपवर्गसाधनं सूचयति । अमृतत्वमिति चापवर्गः । ता॰ टी॰ ।

** नाकं परेण अविद्यातः परमित्यर्थः । निहितं गुहायामिति लौकिकप्रमाणागोचरत्वं दर्शयति । अविद्या तमः । ता॰ टी॰ ।

†† नित्यप्रकाशमित्यर्थः । तदनेनेश्वरप्रणिधानस्यापवर्गोपायत्वमुक्तम् । ता॰ टी॰ ।

ब्रह्मसंस्थोमृतत्वमेति । एतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीति । अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तथाक्रतु*-र्भवति यथाक्रतुर्भवति† तत्कर्म कुरुते (यत्कर्म कुरुते तदभिसंपद्यत) इति कर्मभिः संसरणमुक्त्वा प्रकृतमन्यदुपदिशन्ति इति नु‡ कामयमानो ऽथाकामयमानो यो ऽकामो निष्काम आत्मकाम आप्तकामो भवति न तस्य प्राणा उत्क्रामन्ति इहैव समवनीयन्ते§ ब्रह्मैव सन् ब्रह्माप्येतीति । तच्च यदुक्तमृणानुबन्ध्यादपवर्गाभाव इत्येतदयुक्तमिति‖ । ये चत्वारः पथयो देवयाना इति च चातुराश्रम्यश्रुतेरैकाश्रम्यानुपपत्तिः फलार्थिनश्चेदं ब्राह्मणं जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ चेति कथम् ।

¶समारोपणादात्मन्यप्रतिषेधः ॥ ६१ ॥

प्राजापत्यामिष्टिं निरुप्य तस्यां सार्ववेदसं** हुत्वा आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेदिति श्रूयते तेन विजानीमः प्रजावित्तलोकैषणा(भ्यो†† व्युत्थितस्य निवृत्ते फलार्थित्वे समारोपणं विधीयतइति । एवं च ब्राह्मणानि सोन्यद् व्रत‡‡मुपाकरिष्यमाणो याज्ञवल्क्यो मैत्रेयीमिति§§ होवाच प्रव्रजिष्यन्वाअरे अहमस्मात्स्थानादस्मि हन्त ते ऽनया कात्यायन्या सहान्तं करवाणीति । अथाप्युक्तानुशासनासि मैत्रेयि एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेति ।

पात्रचयान्तानुपपत्तेश्च फलाभावः ॥ ६२ ॥

जरामर्यं च कर्मण्यविशेषेण कल्प्यमाने सर्वस्य पात्रचयान्तानि कर्माणीति प्रसज्यते तत्रैषणाव्युत्थानं न श्रूयेत‖‖ । एतद्ध स्म वै तत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोयमात्मायं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणा)-

---

* क्रतुः संकल्पः । ता· टी· । † तथा तत्कर्म कुरुते ४ । ( ) न तदभिसंपद्यतइति २ ।
‡ तु इति २ । § समवलीयन्तइति ४ । ‖ एतदुक्तमिति ४ ।
¶ आत्मन्यग्नीनां समारोपणाद्ऋणानुबन्धेनापवर्गस्याप्रतिषेधः । तदनेन श्लोकेन प्रत्यक्षविधानं प्रव्रज्याया अपि दर्शितम् । ता· टी· । ** सर्ववेदसं गृहीत्वेति २ ।
†† २ । ४ । पुस्तकयोर्नास्ति । ‡‡ वृत्तमिति । §§ मैत्रेयीति होवाचेति ।
‖‖ श्रूयते इति २ ।
( ) एतन्मध्यगो ग्रन्थो मुद्रितपुस्तके नास्ति । कलिकाताऽऽनीतलिखितपुस्तकेऽपि त्रुटितः । अन्येषु लिखितेषु त्रिष्वपि पुस्तकेषु दृश्यते । न्यायवार्तिके तात्पर्यटीकायां च पात्रचयेत्यादिसूत्रमुपलभ्यते ।

याश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति । एषणाभ्यश्च व्युत्थितस्य पापचया-न्तानि कर्माणि नोपपद्यन्ते इति । नाविशेषेण कर्तुः प्रयोजकफलं भवतीति चातुराश्रम्यविधानाच्चेतिहासपुराणधर्मशास्त्रेष्वैकाश्रम्यानुपपत्तिः । **तदप्रमाणमिति चेद् न (प्रमाणेन प्रामाण्याभ्यनुज्ञानात्)** प्रमाणेन खलु ब्राह्मणेनेतिहासपुराणस्य प्रामाण्यमभ्यनुज्ञायते ते वा खल्वेते अथर्वाङ्गिरस एतदितिहासपुराणमभ्यवदन्नितिहासपुराणं पञ्चमं वेदानां वेद इति । तस्मादयुक्तमेतदप्रामाण्यमिति । अप्रामाण्ये च* धर्मशास्त्रस्य प्राणभृतां व्यवहारलोपाल्लोकोच्छेदप्रसङ्गः । दृष्टृप्रवक्तृसामान्याच्चाप्रामाण्यानुपपत्तिः । यच्च मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खल्वितिहासपुराणस्य धर्मशास्त्रस्य चेति । विषयव्यवस्थानाच्च यथाविषयं प्रामाण्यमन्यो मन्त्रब्राह्मणस्य विषयोऽन्यश्चेतिहासपुराणधर्मशास्त्राणामिति । यच्चो मन्त्रब्राह्मणस्य लोकवृत्तमितिहासपुराणस्य लोकव्यवहारव्यवस्थानं धर्मशास्त्रस्य विषयः । तच्चैकेन सर्वं† व्यवस्थाप्यतइति यथाविषयमेतानि प्रामाण्यानीन्द्रियादिवदिति । यत्पुनरेतत् क्लेशानुबन्धस्याविच्छेदादिति ।

सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ॥ ६३ ॥

यथा सुषुप्तस्य खलु स्वप्नादर्शने रागानुबन्धः सुखदुःखानुबन्धश्च विच्छिद्यते तथापवर्गेपीति‡ । यतश्च ब्रह्मविदो मुक्तस्यात्मनो रूपमुदाहरन्तीति । यदपि प्रवृत्त्यनुबन्धादिति ।

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ६४ ॥

प्रक्षीणेषु रागद्वेषमोहेषु प्रवृत्तिर्न प्रतिसन्धानाय । प्रतिसन्धिस्तु पूर्वजन्मनिवृत्तौ पुनर्जन्म तच्चादृष्टकारितं तस्यां प्रहीणायां§ पूर्वजन्माभावे जन्मान्तराभावेाप्रतिसन्धानमपवर्गः । **॥कर्मवैफल्यप्रसङ्गइति चेद् न कर्मविपाकप्रतिसंवेदनस्याप्रत्याख्यानात्।** पूर्वजन्मनिवृत्तौ पुनर्जन्म न भवतीत्युच्यते न

( ) ४ नास्ति । * वा इति ५ । † न सर्वमिति २ । ५ ।

‡ एतावांस्तु मुक्तावस्थायां विशेषः यदस्यां क्लेशवासनापि नास्ति सुषुप्तावस्थायां प्रलयावस्थायां च क्लेशविच्छेदे ऽपि तद्वासनास्तीति । ता० टी० ।

§ जन्मान्तराप्रतिसंधानमिति २ । ॥ कर्मवैफल्यप्रसङ्ग इति १ । ४ ।

तु कर्मविपाकप्रतिसंवेदनं प्रत्याख्यायते सर्वाणि पूर्वकर्माणि ह्यन्ते* जन्मनि विपच्यन्तइति ।

न क्लेशसंततेः स्वाभाविकत्वात् ॥ ६५ ॥

नोपपद्यते क्लेशानुबन्धविच्छेदः कस्मात्क्लेशसंततेः स्वाभाविकत्वात् । अनादिरियं क्लेशसंततिः न चानादिः शक्य उच्छेत्तुमिति । अत्र कश्चित्परीहारमाह ।

प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेप्यनित्यत्वम् ॥ ६६ ॥

यथानादिः प्रागुत्पत्तेरभाव उत्पन्नेन भावेन निवर्त्यते एवं स्वाभाविकी क्लेशसंततिरनित्येति ।

श्रुण्श्यामतानित्यत्ववद्वा† ॥ ६७ ॥

अपर आह । यथा ऽनादिरणुश्यामता अथ चाग्निसंयोगादनित्या तथा क्लेशसंततिरपीति । सतः खलु धर्मो नित्यत्वमनित्यत्वं च तत्त्वं‡ भावे ऽभावे भाक्तमिति । अनादिरणुश्यामतेति हेत्वभावादयुक्तम्§ । अनुत्पत्तिधर्मकमनित्यमिति नाच हेतुरस्तीति । अयं तु समाधिः ।

न संकल्पनिमित्तत्वाच्च रागादीनाम् ॥ ६८ ॥

कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्चेति‖ समुच्चयः । मिथ्यासंकल्पेभ्यो रञ्जनीयकोपनीयमोहनीयेभ्यो¶ रागद्वेषमोहा उत्पद्यन्ते कर्म च सत्त्वनिकायनिर्वर्तकं नैयमिकान् रागद्वेषमोहान्निर्वर्त्तयति नियमदर्शनात् । दृश्यते हि कश्चित्सत्त्वनिकायो रागबहुलः कश्चिन्मोहबहुल इति इतरेतरनिमित्ता च रागादीनामुत्पत्तिः । मूढो रज्यति मूढः कुप्यति रक्तो मुह्यति कुपितो मुह्यति । सर्वमिथ्यासंकल्पानां तत्त्वज्ञानादनुत्पत्तिः कारणानुत्पत्तौ च कार्यानुत्पत्ते-

---

* त्यन्ते इति २ । ५ ।

† यदेतच् श्यामं तदचस्येत्यागमः पार्थिवानां परमाणूनां श्यामतामनादिमाह अचपदेन मृदो ऽभिधानादिति भावः । ता· टी· ।

‡ नित्यत्वयत्त्यभावे इति २ ।

§ श्रुणश्यामता कार्या पृथिवीरूपत्वाल्लोहितादिवदिति प्रत्युतानित्यताहेतुरस्ति पुरुषप्रयत्नजन्यलोहितरूपवैलक्षण्येन त्वस्याप्रयत्नपूर्वकत्वमात्रेणानादित्वाभिधानमिति नागमविरोधः । ता· टी· । ‖ इतरेतरनिमित्ता चेति २ । ४ ।

¶ भव्यगेयादिपाठात्कर्तरि क्यप् । ता टी· ।

रिति। रागादीनामत्यन्तमनुत्पत्तिरिति। अनादिश्च क्लेशसंततिरित्य*युक्तं सर्वेइमे खल्वाध्यात्मिका भावा अनादिना प्रबन्धेन प्रवर्त्तन्ते शरीरादयो न जात्वच कश्चिदनुत्पन्नपूर्वः प्रथमत उत्पद्यते ऽन्यच तत्त्वज्ञानात्। न चैवं सत्यनुत्पत्तिधर्मकं किञ्चिद्व्ययधर्मकं प्रतिज्ञायतइति। कर्म च †सत्त्वनिकाय-निर्वर्तकं तत्त्वज्ञानकृतान्मिथ्यासंकल्पविघातान्न रागाद्युत्पत्तिनिमित्तं भवति सुखदुःखसंवित्तफलं तु भवतीति।

इति श्रीवात्स्यायनीये न्यायभाष्ये चतुर्थाध्यायस्याद्यमाह्निकम्।

किं नु खलु ‡भोः यावन्तो विषयास्तावत्सु प्रत्येकं तत्त्वज्ञानमुत्पद्यते अथ क्व चिदुत्पद्यतइति। कश्चाच विशेषः। न तावदेकैकच यावद्विषयमुत्पद्यते ज्ञेयानामानन्त्यात्§। नापि क्व चिदुत्पद्यते यच नोत्पद्यते तच्चानिवृत्तो मोह‖ इति मोहशेषप्रसङ्गः। न चान्यविषयेण तत्त्वज्ञानेनान्यविषयो मोहः शक्यः प्रतिषेद्धुमिति¶। मिथ्याज्ञानं वै खलु **मोहो न तत्त्वज्ञानस्यानुत्पत्तिमात्रं तच्च मिथ्याज्ञानं यच विषये प्रवर्त्तमानं†† संसारबीजं भवति स

---

* इत्यप्युक्तम्। ४। † निकायेन जातिरुपलक्ष्यते। ता॰ टी॰।

‡ तदेवं संशयप्रमाणप्रमेयादीनि परीक्षितानि प्रयोजनाद्यो ऽपि यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्ग इत्यतिदेशेन परीक्षित इति योऽशार्थि प्रमाणादयः परीक्षिताः। तेषां तत्त्वज्ञानं निःश्रेयसाधिगमहेतुरित्युक्तम्। तत्रापि प्रमेयतत्त्वज्ञान मात्मादिः-श्रेयसहेतुरितरेषां तु तत्त्वज्ञानाङ्गतयेत्युक्तम्। इदमिदानीं परीक्ष्यते किं प्रत्येकमात्मादीनां तत्त्वज्ञानं निःश्रेयसाधिगमहेतुरुत कस्य चिदेषामेकदेशस्येति। ता॰ टी॰।

§ इयत्ताप्रत्ययाविषयत्वात्।

‖ यत्र मोहस्तत्र रागद्वेषाविति। रागद्वेषमोहाश्च बन्धनमित्यनिर्मोक्षप्रसङ्गः। न्या॰ वा॰।

¶ एवमपवर्गः प्राणिमात्रे भवति। न्या॰ वा॰।

** वै पूर्वपक्षाक्षमायां खलुशब्दो हेत्वर्थे। अयुक्तः पूर्वपक्षो यस्मान्मिथ्याज्ञानं मोह इति। न तत्त्वज्ञानमज्ञाननिवृत्तिमात्रेण निःश्रेयसोपयोग्यपि तु संसारनिदानोच्छेदद्वारेण दृष्टेनैव न च तत्त्वज्ञानं संसारहेतुरपि तु मिथ्याज्ञानं तदुच्छिन्दद्विरोधितया तत्त्वज्ञानमपवर्गहेतुरिति। ता॰ टी॰।

†† स्वसंबन्धिनो ह्यात्मादयो विपर्ययेण पर्यिच्छेदाः संसारहेतव इति तद्विषयमेव मिथ्याज्ञानमपनेयं नात्माद्यन्तरविषयं तेन तत्र मिथ्याज्ञानं मा निवर्तिष्ट निवर्तंतां वा स्वात्मादिदृष्टान्तेन न तु तस्य संसारनिवृत्तिं प्रत्युपयोगः यस्य तूपयोगस्तस्य तत्त्वज्ञानं न दुष्करमिति। ता॰ टी॰।

विषयस्तत्त्वतो ज्ञेय इति । किं पुनस्तन्मिथ्याज्ञानम् अनात्मन्यात्मग्रहः अहमस्मीति मोहोऽहङ्कार इति । अनात्मानं खल्वहमस्मीति पश्यतो दृष्टिरहङ्कार इति । किं पुनस्तदर्थजातं यद्विषयोऽहङ्कारः । शरीरेन्द्रियमनोवेदनाबुद्धयः । कथं तद्विषयोऽहङ्कारः संसारबीजं भवति । अयं खलु शरीराद्यर्थजातमहमस्मीति व्यवसितः तदुच्छेदेनात्मोच्छेदं मन्यमानोऽनुच्छेदतृष्णापरिप्लुतः पुनः पुनस्तदुपादत्ते तदुपाददानो जन्ममरणाय यतते तेनावियोगान्नात्यन्तं दुःखाद्विमुच्यत इति । यस्तु दुःखं दुःखायतनं दुःखानुषक्तं सुखं च सर्वमिदं दुःखमिति पश्यति स दुःखं परिजानाति परिज्ञातं च दुःखं प्रहीणं भवत्यनुपादानात् सविषान्नवत् । एवं दोषान्* कर्म च दुःखहेतुरिति पश्यति । न चाप्रहीणेषु दोषेषु दुःखप्रबन्धोच्छेदेन शक्यं भवितुमिति दोषान् जहाति प्रहीणेषु च दोषेषु न प्रवृत्तिः प्रतिसंधानायेत्युक्तम् । प्रेत्यभावफलदुःखानि च ज्ञेयानि व्यवस्थापयति कर्म च दोषांश्च प्रहेयान् । अपवर्गोऽधिगन्तव्यस्तस्याधिगमोपायस्तत्त्वज्ञानम् । एवं चतसृभिर्विधाभिः प्रमेयं विभक्तमासेवमानस्याभ्यस्यतो भावयतः सम्यग्दर्शनं यथाभूतावबोधस्तत्त्वज्ञानमुत्पद्यते । एवं च ।

†दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥ १ ॥

शरीरादि दुःखान्तं प्रमेयं दोषनिमित्तं तद्विषयत्वान्मिथ्याज्ञानस्य । तदिदं तत्त्वज्ञानं तद्विषयमुत्पन्नमहङ्कारं निवर्तयति समानविषये तयोर्विरोधात् । एवं तत्त्वज्ञानाद् दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति । स चायं शास्त्रार्थसंग्रहो‡नूद्यते नापूर्वो विधीयत इति । प्रसङ्ख्यानानुपूर्व्या §तु खलु ।

दोषनिमित्तं रूपादयो विषयाः संकल्पकृताः ॥ २ ॥

कामविषया इन्द्रियार्था इति रूपादय उच्यन्ते ते मिथ्या संकल्प्यमाना रागद्वेषमोहान् प्रवर्तयन्ति तान्पूर्वं प्रसंचक्षीत । तांश्च प्रसंचक्षाणस्य रूपादि-

---

* दोषादिति । २ । † अर्थगतिं परिशोधयात्रार्थं सूत्रं पठति । ता. टी. ।

‡ शास्त्रतात्पर्यसंग्रहो द्वितीयसूत्रेणानूद्यतइत्यर्थः । ता. टी. ।

§ प्रसंख्यानं समाधिजं तत्त्वज्ञानं तच्च विषये सुकरमिति तत्रैव प्राथमिकस्य प्रथमं यत्नो युक्तः । ता. टी. ।

विषयो मिथ्या*संकल्पो निवर्तते। तन्निवृत्तावध्यात्मं शरीरादि प्रसंचक्षीत। तत्प्रसङ्खानादध्यात्मविषयो ऽहङ्कारो निवर्तते। सेयमध्यात्मं बहिश्च विवक्तचित्तो विहरन्मुक्त इत्युच्यते। †अतः परं का चित्संज्ञा हेया का चिद्भावयितव्येत्युपदिश्यते नार्थनिराकरणमर्थापादानं वा। कथमिति।

तन्निमित्तं त्ववयव्यभिमानः ॥ ३ ॥

तेषां दोषाणां निमित्तं त्ववयव्यभिमानः। सा च खलु स्त्रीसंज्ञा(मपरिष्कारा पुरुषस्य पुरुषसंज्ञा च स्त्रियाः परिष्कारश्च निमित्तसंज्ञा अनुव्यञ्जनसंज्ञा च) निमित्तसंज्ञा दन्तोष्ठं चक्षुर्नासिकम् अनुव्यञ्जनसंज्ञा इत्थं दन्तौ इत्थमोष्ठाविति सेयं संज्ञा कामं वर्धयति तदनुषक्तांश्च दोषान् ‡विवर्जनीयान् वर्जनं त्वस्याः भेदेनावयवसंज्ञा केशलोममांसशोणितास्थिस्नायुशिराकफपित्तोच्चारादिसंज्ञा तामशुभसंज्ञेत्याचक्षते। तामस्य भावयतः कामरागः प्रहीयते सत्येव च द्विविधे§ विषये का चित्संज्ञा भावनीया का चित्परिवर्जनीयेत्युपदिश्यते यथा विषसंपृक्ते ऽन्ने ऽन्नसंज्ञोपादानाय विषसंज्ञाप्रहाणायेति। अथेदानीमर्थं निराकरिष्यतावयव्युपपाद्यते‖।

विद्याऽविद्याद्वैविध्यात् संशयः ॥ ४ ॥

सदसतोरुपलम्भाद्विद्या द्विविधा सदसतोरनुपलम्भादविद्यापि

---

* कः पुनरेषां मिथ्यासंकल्पः। असाधारणप्रत्ययोत्पत्तिनिमित्तत्वेन ममैवैतदिति व्यवसायस्तानसाधारणतया प्रसंचक्षीत नैते ममैव चौराग्निदायादसाधारणा एवेति। न्या॰ वा॰।

† अन्ये खल्ववयविसंज्ञां निवर्तयन्तो ऽवयविनमेव प्रत्याचक्षते तान् प्रत्याचक्षाण आह। ता॰ टी॰।

( ) २ पुस्तके नास्ति।

‡ दोषा विवर्जनीया इति २।

§ द्विविध एवासौ कामिनीलक्षणो विषयः तथापि रागादिप्रहाणार्थमवयवादिसंज्ञागोचरत्वं परित्यज्याशुभसंज्ञागोचरत्वमस्योपादीयते वैराग्योत्पादनायेत्यर्थः। ता॰ टी॰।

‖ विज्ञानवादिना ऽवयविनिराकरणमुपपाद्यते। अर्थविशेषे खल्ववयवानुव्यञ्जनमज्ञे तत्रार्थमात्रस्याभावात्कुतो ऽवयवानुव्यञ्जनमज्ञे तत्रिराकरणाय प्रथमावयवी निराक्रियते पश्चात्परमाणुः ततश्च ज्ञानमात्रमर्थरहितं सिद्धं भवतीत्यभिप्रायः। ता॰ टी॰।

द्विविधा* । उपलभ्यमाने ऽवयविनि विद्या द्वैविध्यात्संशयः अनुपलभ्यमाने चाविद्याद्वैविध्यात्संशयः । सेयमवयवी यद्युपलभ्यते अथापि नोपलभ्यते न कथं चन संशयान्मुच्यते इति ।

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥

तस्मिन्ननुपपन्नः संशयः । कस्मात् पूर्वोक्तहेतूनामप्रतिषेधादस्ति द्रव्यान्तरारम्भ इति ।

वृत्त्यनुपपत्तेरपि तर्हि न संशयः ॥ ६ ॥

†संशयानुपपत्तिर्नास्त्यवयवीति । तद्विभजते ।

कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥ ७ ॥

एकैकोऽवयवो न तावत् कृत्स्ने ऽवयविनि‡ वर्तते तयोः §परिमाणभेदादवयवान्तरसंबन्धाभावप्रसङ्गाच्च । नाप्यवयव्येकदेशेन न ह्यस्यान्ये अवयवा एकदेशभूताः सन्तीति । अथावयवेष्वेवावयवी वर्तते ।

तेषु चावृत्तेरवयव्यभावः ॥ ८ ॥

न तावत्प्रत्यवयवं वर्तते तयोः परिमाणभेदाद् द्रव्यस्य चैकद्रव्यत्वप्रसङ्गात्‖ । नाप्येकदेशे सर्वेष्वन्यावयवाभावात् । तदेवं न युक्तः संशयो नास्त्यवयवीति ।

---

* उपलब्धिर्विद्या ऽनुपलब्धिश्चाविद्या । सच्चोपलभ्यते यथा तडागगतं तोयममच्चोपलभ्यते यथा मरुमरीचिकायामुदकं सच्च नोपलभ्यते यथा चिरनिखातं भूमौ निधादि असच्च नोपलभ्यते यथा भूतले दृश्यमाने तत्तुल्योपलम्भयोग्यो घटादिस्तद्वैवं विद्याऽविद्याद्वैविध्यादवयविनि संशयः । ता. टी. ।

† वृत्त्यनुपपत्तेरपि तर्हि । १ । ४ । ५ ।

‡ वृत्तास्तिष्ठति शाखादिषु शाखादयो वा वृक्षइति लौकिकीं प्रतिपत्तिमनुरुध्येदम् ।

§ अणुपरिमाणो ऽवयवो महापरिमाणो ऽवयवीत्यणुपरिमाणेन महापरिमाणस्याव्याप्तेः । एकद्रव्यश्चावयवः प्राप्नोति एकावयवविवृत्तित्वात् । न चैकद्रव्यं द्रव्यमविनश्यदाधारमस्ति । कृतकनित्यत्वप्रसङ्गात् । ता. टी. ।

‖ एकावयववृत्तित्वात् एकद्रव्यो ऽवयवी प्राप्नोति । एकद्रव्यश्चावयवी एकेन द्रव्येणारभ्यतइति सततोत्पत्तिप्रसङ्गः । किं चैकद्रव्यवृत्तित्वादेकद्रव्यं द्व्यणुकमेकस्मिन् परमाणौ वर्ततइति कारणविभागविनाशाभावाच्चित्यं प्राप्नोति । उत्पत्तिमच्च नित्यं चेति न दृष्टान्तो ऽस्ति । न्या. वा. ।

पृथक् चावयवेभ्यो ऽवृत्तेः ॥ ९ ॥

पृथक् चावयवेभ्यो धर्मिभ्यो धर्मस्य ग्रहणादिति समानम् ।

***न चावयव्यवयवाः ॥ १० ॥**

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ११ ॥

किं प्रत्यवयवं कृत्स्नो ऽवयवी वर्त्तते अथैकदेशेनेति नोपपद्यते प्रश्नः । कस्मादेकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेः । कृत्स्नमित्यनेकस्याशेषाभिधानम् एकदेश इति नानात्वे कस्य चिदभिधानं तावेमौ कृत्स्नैकदेशशब्दौ भेदविषयौ नैकस्मिन्नवयविन्युपपद्येते भेदाभावादिति । अन्यावयवाभावान्नैकदेशेन वर्त्ततइत्यहेतुः ।

अवयवान्तराभावेप्यवृत्तेरहेतुः† ॥ १२ ॥

अवयवान्तराभावादिति यद्यप्येकदेशो ऽवयवान्तरभूतस्य ‡तथाप्यवयवे ऽवयवान्तरं वर्त्तत नावयवीति। अन्यो§ ऽवयवीति अन्यावयवभावे ऽप्यवृत्तेरवयविनो नैकदेशेन वृत्तिरन्यावयवाभावादित्यहेतुः । वृत्तिः कथमिति चेद् एकस्यानेकचाश्रयाश्रितसंबन्धलक्षणा प्राप्तिः । आश्रयाश्रितभावः कथमिति चेद् यस्य यतो ऽन्यचात्मलाभानुपपत्तिःस आश्रयः न कारणद्रव्येभ्यो ऽन्यच कार्यद्रव्यमात्मानं लभते विपर्ययस्तु कारणद्रव्येष्विति । **नित्येषु कथमिति चेद्** (**अनित्येषु दर्शनात्सिद्धम्** । नित्येषु द्रव्येषु कथमाश्रयाश्रयिभाव इति चेद्॥)

---

* यस्तु मन्येत अवयवानां धर्ममात्रमवयवी न त्ववयवेभ्यो ऽत्यन्तं भिन्नो ऽभिन्नो वा । भिन्नत्वे गवाश्ववद्दुर्मर्धर्मिभावानुपपत्तेः । अभिन्नत्वे ऽपि धर्मिरूपवत्तदनुपपत्तेः । तस्मात् कथं चिद्भिन्नो ऽभिन्नः कथं चिद्धर्ममात्रमवयवानामवयवीति तं प्रत्याह । न चावयव्यवयवाः । न तावद्भेदाभेदौ परस्परविरोधात्मानावेकत्र समवेत इत्युक्तम् नाप्यात्यन्तिके ऽभेदे धर्मधर्मिभावः । तस्माद्यथा ऽऽत्यन्तिकभेदे ऽपि केषां चिदेव कार्यकारणभावस्तथा केषां चिदेव धर्मधर्मिभाव इत्येषितव्यम् । तथा च दूषणमित्यर्थः । ता॰ टी॰ ।

† एकदेशेन चावयवी न स्वावयवेषु वर्तंतइत्यत्र प्रतिज्ञार्थे ऽवयवान्तराभावादित्यहेतुः । कस्माद्यद्यप्यवयवान्तरमवयविनो भवत्यथाप्यवयवान्तराण्येवावयविनो ऽवयवान्तरे वर्तन्ते किमायानमवयविशरीरेति । एकं चानेकत्र वर्तंतइति प्रतिजानानः किं कात्स्न्र्येन किमेकदेशेनेति नानुयोज्यः । कस्माद्धभयेन कात्स्न्र्येनैकदेशेन वा नानात्वैकार्थसमवायित्वादिना एकस्यावयविनो व्याघातात् । ता॰ टी॰

‡ भूतस्यात्तथापीति १ । § नास्ति १ । ४ । ‖ ( ) २ नास्ति

अनित्येषु (द्रव्यगुणेषु*) दर्शनादाश्रयाश्रितभावस्य नित्येषु सिद्धिरिति । तस्मादवयव्यभिमानः प्रतिषिद्धयते निःश्रेयसकामस्य नावयवी यथा रूपादिषु मिथ्यासंकल्पो न रूपादय इति । सर्वाग्रहणमवयवसिद्धेरिति प्रत्यवस्थिते। † ऽप्येतदाह ।

केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः ॥ १३ ॥

यथैकैकः केश (स्तैमिरिकेण‡) नोपलभ्यते केशसमूहस्तूपलभ्यते तथैकैको ऽणुर्नोपलभ्यते अणुसंचयस्तूपलभ्यते तदिदमणुसमूहविषयं ग्रहणमिति ।

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथा भावो नाविषये प्रवृत्तिः ॥ १४ ॥

यथाविषयमिन्द्रियाणां पटुमन्दभावाद्विषयग्रहणानां पटुमन्दभावो भवति । चक्षुः खलु प्रकृष्यमाणं नाविषयं गन्धं गृह्णाति निकृष्यमाणं च न स्वविषयात् प्रच्यवते । सेयं तैमिरिकः कश्चिच्चक्षुर्विषयं केशं न गृह्णाति कश्चिद्गृह्णाति केशसमूहम् । उभयं ह्यतैमिरिकेण चक्षुषा गृह्यते परमाणवस्त्वतीन्द्रिया (इन्द्रियाविषयभूताः§) न केन चिदिन्द्रियेण गृह्यन्ते समुदितास्तु गृह्यन्तइत्यविषये प्रवृत्तिरिन्द्रियस्य प्रसज्येत । न जात्वर्थान्तरमणुभ्यो गृह्यतइति । ते खल्विमे परमाणवः संनिहिता‖ गृह्यमाणा अतीन्द्रियत्वं जहति वियुक्ताश्चागृह्यमाणा इन्द्रियविषयत्वं न लभन्तइति । सेऽयं द्रव्यान्तरानुत्पत्तावतिमहान् व्याघात ¶इत्युपपद्यते द्रव्यान्तरं यद्ग्रहणस्य विषय इति । **संचयमात्रं विषय इति चेद् न **संचयस्य संयोगभावात्तस्य चातीन्द्रियस्याग्रहणादयुक्तम् ।** संचयः खल्वनेकस्य संयोगः स च गृह्यमाणाश्रयो गृह्यते नातीन्द्रियाश्रयः भवति ह्येदमनेन संयुक्तमिति तस्मादयुक्तमेतदिति । गृह्यमाणस्य चेन्द्रियेण विषयस्यावरणाद्यनुपलब्धिकारणमुपलभ्यते तस्मान्नेन्द्रियदौर्बल्यादनुपलब्धिरणूनाम् । यथा नेन्द्रियदौर्बल्याच्चक्षुषाऽनुपलब्धिर्गन्धादीनामिति ।

---

* ( ) २ नास्ति ।
§ ( ) २ नास्ति ।
¶ इत्युच्यते इति २ ।
† व्यवस्थितेपीदमाह २ ।
‖ सन्धिता अतीन्द्रियत्वं जहतीति १ ।
** संचयसंयोगभावादिति २ ।
‡ ( ) २ नास्ति ।

***अवयवावयविप्रसङ्गश्चैवमा प्रलयात्† ॥ १५ ॥**

यः खल्ववयविनो ऽवयवेषु वृत्तिप्रतिषेधादभावः सो ऽयमवयवस्यावयवेषु प्रसज्यमानः सर्वप्रलयाय वा कल्पेत निरवयवाद्वा परमाणुतो निवर्त्तेत उभयथा चोपलब्धिविषयस्याभावः तदभावादुपलब्ध्यभावः उपलब्ध्याश्रयश्चायं वृत्तिप्रतिषेधः स आश्रयं व्याघ्नन्नात्मघाताय कल्पतइति । अथापि ।

न प्रलयो ऽणुसद्भावात् ॥ १६ ॥

अवयवविभागमाश्रित्य वृत्तिप्रतिषेधादभावः प्रसज्यमानो निरवयवात्परमाणोर्निवर्त्तते न सर्वप्रलयाय कल्पते‡ निरवयवत्वं खलु परमाणोर्विभागैरल्पतरप्रसङ्गस्य यतो नाल्पीयस्तचावस्थानात् । लोष्टस्य खलु प्रविभज्यमानावयवस्याल्पतरमल्पतमं§मुत्तरमुत्तरं भवति स चायमल्पतरप्रसङ्गः‖ यस्मान्नाल्पतरमस्ति यः परमोल्पस्तच निवर्त्तते यतश्च नाल्पीयोस्ति तं परमाणुं प्रचक्ष्महइति ।

¶परं वा त्रुटेः ॥ १७ ॥

**अवयवविभागस्यानवस्थानाद् द्रव्याणामसंख्येयत्वात् त्रुटित्वनिवृत्तिरिति । अथेदानीमानुपलम्भिकः सर्वं नास्तीति मन्यमान आह ।

---

* अपि चायं वृत्तिविकल्प आश्रयव्याघातादयुक्त इत्याह । ता· टी· ।

† अत्र त्रयः पक्षाः सम्भवन्ति । यो ऽयमवयवेष्ववयववृत्तिविकल्पानुपपत्त्या ऽवयविनो ऽभावप्रसङ्ग आपाद्यते स प्रलयाद्वा निवर्त्तते परमाणो वा न क्व चिदपि निवर्त्तते वेति । तत्र प्रथमद्वितीयविकल्पावाश्रित्येदं सूत्रम् । यद्येष वृत्तिविकल्पः स्थूले घटादावेवं तदवयवेषु तदवयवेष्विति तदभावात्प्रलये व्यवतिष्ठेत । न च प्रलयः सर्वाख्यारहितो दर्शनविषयः संभवतीति दर्शनविषयाभावादनाश्रयो विकल्प आत्मानमेव न लभते । उपलक्षणं चेदमा प्रलयादिति आ परमाणोरित्यपि द्रष्टव्यम् । परमाणूनामतीन्द्रियत्वेन दर्शनविषयत्वाभावादनाश्रयता विकल्पस्य तदवस्थैव तदिदमुक्तम् । ता· टी· ।

‡ कल्प्यते इति ४ ।

§ अल्पतराल्पतममिति २ । ५ । ‖ प्रसङ्गे इति २ ।

¶ अथानन्तमेवायमवयवविभागः कस्माच भवतीत्यत आह । यदि त्रुटेः परं द्वित्रिपदके ऽवयवविभागो नावतिष्ठते ततो ऽवयवविभागस्यानवस्थानाद् द्रव्याणामसंख्येयत्वात् त्रुटित्वनिवृत्तिः त्रुटिरपि हि सुमेरुणा तुल्यपरिमाणः स्यात् । न खल्वनन्तावयवत्वे कश्चिद्विशेष इत्यर्थः । ता· टी·

** अवयविभागस्यानवस्थानेति २ ।

आकाशव्यतिभेदात् तदनुपपत्तिः ॥ १८ ॥

तस्याणोर्निरवयवस्य (नित्य*) स्यानुपपत्तिः । कस्माद् आकाश-व्यतिभेदात् । अन्तर्बहिश्चाणुराकाशेन समाविष्टो व्यतिभिन्नो† व्यतिभेदा-त्सावयवः सावयवत्वादनित्य इति ।

आकाशासर्वगतत्वं वा ॥ १९ ॥

अथैतन्नेष्यते परमाणोरन्तर्नास्त्याकाशमित्यसर्वगतत्वं प्रसज्यते इति ।

अन्तर्बहिश्च कार्यद्रव्यस्य ‡कारणान्तरवच-नादकार्ये तदभावः ॥ २० ॥

अन्तरिति पिहितं कारणान्तरैः कारणमुच्यते । बहिरिति च व्यव-धायकमव्यवहितं कारणमेवोच्यते । तदेतत्कार्यद्रव्यस्य संभवति नाणोरकार्य-त्वात् । अकार्ये हि परमाणावन्तर्बहिरित्यस्याभावः । यच्च चास्य भावो ऽणु-कार्यं तन्न परमाणुः यतो हि नान्यतरमस्ति स परमाणुरिति ।

§शब्दसंयोगविभवाच्च सर्वगतम् ॥ २१ ॥

यच्च क्व चिदुत्पन्नाः शब्दा विभवन्त्याकाशे तदाश्रया भवन्ति मनोभिः परमाणुभिस्तत्कार्यैश्च संयोगा विभवन्त्याकाशे नासंयुक्तमाकाशेन किं चिन्मू-र्तद्रव्यमुपलभ्यते तस्मान्नासर्वगतमिति ।

‖अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥ २२ ॥

¶संसर्पता प्रतिघातिना द्रव्येण न व्यूह्यते यथा काष्ठेनोदकम् । कस्माद् निरवयवत्वात् । सर्पच्च प्रतिघातिद्रव्यं न विष्टभ्नाति नास्य क्रियाहेतुं गुणं प्रतिबध्नाति । कस्माद् अस्पर्शत्वात् विपर्यये हि विष्टम्भो दृष्ट इति (सावयवे**) स्पर्शवति द्रव्ये दृष्टं धर्मं विपरीते नाशङ्कितुमर्हति ।

अणवयवस्याणुतरत्वप्रसङ्गादणुकार्यप्रतिषेधः ॥

---

* ( ) ४ नास्ति । † व्यतिभिन्ने । इति २ ।

‡ कारणान्तरं कारणविशेषः तस्य वचनमित्यर्थः । ता. टी. ।

§ सर्वसंयोगाच्चेति १ । ४ ।

‖ स्यादेतत् । आकाशं चेत्सर्वगतं ततो मूर्तिमतां द्रव्याणां व्यूहान्तराधा-दनं च जलौघस्येव नावादिना भवेद् न चास्ति तस्माच्च सर्वगतत्वमित्यत आह । ता. टी. ।

¶ संयताप्रतिघातिनेति १ । ४ । ** ( ) नास्ति ४ स भवान् इति ५ ।

सावयवत्वे चाणोरण्ववयवो ऽणुतर इति प्रसज्यते । कस्मात्कार्यकारणद्रव्ययोः परिमाणभेददर्शनात् । तस्मादण्ववयवस्याणुतरत्वं यस्तु सावयवे ऽणुकार्ये तदिति । तस्मादणुकार्यमिदं प्रतिषिध्यतइति । कारणविभागाच्च कार्यस्यानित्यत्वं नाकाशव्यतिभेदात् । लोष्टस्यावयवविभागादनित्यत्वं नाकाशसमावेशादिति ।

***मूर्त्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥ २३ ॥**

परिच्छिन्नानां हि स्पर्शवतां संस्थानं त्रिकोणं चतुरस्रं समं परिमण्डलमित्युपपद्यते यत्तत्संस्थानं सो ऽवयवसन्निवेशः परिमण्डलाश्चाणवस्तस्मात्सावयवा इति ।

†संयोगोपपत्तेश्च ॥ २४ ॥

मध्ये सन्नणुः पूर्वापराभ्याम् अणुभ्यां संयुक्तस्तयोर्व्यवधानं कुरुते । व्यवधानेनानुमीयते पूर्वभागेन पूर्वेणाणुना संयुज्यते परभागेन परेणाणुना संयुज्यते यौ तौ पूर्वापरौ भागौ तावस्यावयवौ गवं सर्वतः संयुज्यमानस्य सर्वतो भागा अवयवा इति । ‡यत्तावन्मूर्तिमतां संस्थानोपपत्तेरवयवसद्भाव इति अत्रोक्तं किमुक्तम् । विभागाल्पतरप्रसङ्गस्य यतो नाल्पीयस्तच्च निवृत्तेरण्ववयवस्य चाणुतरत्वप्रसङ्गादणुकार्यप्रतिषेध इति । यत्पुनरेतत्संयोगोपपत्तेश्चेति स्पर्शवत्त्वाच्छ्यवधानमाश्रयस्य चाव्याप्या भागभक्तिः । उक्तं चात्र स्पर्शवानणुः स्पर्शवतोरण्वोः प्रतिघाताच्छ्यवधायको न सावयवत्वात् । स्पर्शवत्त्वाच्च व्यवधाने सत्यणुसंयोगो नाश्रयं व्याप्नोतीति भागभक्तिर्भवति भागवानिवायमिति । उक्तं चात्र विभागे ऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्तचावस्थानात् तदवयवस्य चाणुतरत्वप्रसङ्गादणुकार्यप्रतिषेध इति । मूर्तिमतां च संस्थानोपपत्तेः संयोगोपपत्तेश्च परमाणूनां सावयवत्वमिति हेत्वोः

अनवस्थाकारित्वादनवस्थानुपपत्तश्चाप्रतिषेधः ॥ २५ ॥

---

* पुनः शून्यतावादी प्रत्यवतिष्ठते । ता॰ टी॰ ।

† संस्थानं नाम प्रचयाख्यः संयोगो घटादिवृत्तिर्घटत्वादिजातिव्यक्तिहेतुरिति संयोगः । संयोगमात्रं त्वाप्तिपूर्विका प्राप्तिरिति तस्मादपोनरुक्तत्वम् । ता॰ टी॰ ।

‡ तदेतच्छून्यतामतमपाकरोति । यत्तावदिति । ता॰ टी॰ ।

यावन्मूर्तिमद्यावच्च संयुज्यते तत्सर्वं सावयवमित्यनवस्थाकारिणावेमौ हेतू सा चानवस्था नोपपद्यते । सत्यामनवस्थायां* सत्यौ हेतू स्यातां तस्मादप्रतिषेधोऽयं निरवयवत्वस्येति । विभागस्य च विभज्यमानहानिर्नोपपद्यते तस्मात्प्रलयान्तता नोपपद्यतइति† । अनवस्थायां च प्रत्यधिकरणं द्रव्यावयवानामानन्त्यात् परिमाणभेदानां गुरुत्वस्य चाग्रहणं समानपरिमाणत्वं चावयवावयविनोः परमाणुत्वयवविभागादूर्ध्वमिति । ‡यदिदमभवान्बुद्धीराश्रित्य बुद्धिविषयाः सन्तीति मन्यते मिथ्याबुद्धय एताः । यदि हि तत्त्वबुद्धयः स्युर्बुद्धया विवेचने क्रियमाणे याथात्म्यं बुद्धिविषयाणामुपलभ्येत ।

बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः ॥ २६ ॥

यथा §ऽयं तन्तुरयं तन्तुरिति प्रत्येकं तन्तुषु विविच्यमानेषु नार्थान्तरं किं चिदुपलभ्यते यत्पटबुद्धेर्विषयः स्यात् । याथात्म्यानुपलब्धेरसति विषये पटबुद्धिर्भवर्त्ती॥ मिथ्याबुद्धिर्भवति एवं सर्वत्रेति ।

व्याहतत्वादहेतुः ॥ २७ ॥

यदि बुद्ध्या विवेचनं भावानां न सर्वभावानां याथात्म्यानुपलब्धिः । अथ सर्वभावानां यथात्म्यानुपलब्धिर्न बुद्ध्या विवेचनं भावानां ¶याथात्म्यानुपलब्धिश्चेति व्याहन्यते** । तदुक्तम् अवयवावयविप्रसङ्गश्चैवमा प्रलयादिति ।

---

* सत्यामवस्थायामिति ४ ।

† विभागस्य परमाणवन्तत्वं प्रलयानन्तत्वमनन्तत्वं वा वक्तव्यं तत्राद्ये तत्रैव मूर्तिमत्त्वस्य व्यभिचारः । निरवयवत्वेनाभ्युपगते तस्मिन् मूर्तिमत्त्वस्य सावयवत्वस्य चाभ्युपगमे व्याघातश्च । अन्तयोः पक्षयोर्व्याघातस्त्रुटेरमेयत्वप्रसङ्गो विभागस्य चानाधारत्वप्रसङ्गः । परमाणुत्वेन स्वीकृते सावयवत्वेक्तेः निरवयवद्रव्यानभ्युपगमाच्च । ‡ विज्ञानवाद्याह । यदिदमिति । ता· टी· ।

§ यथा ऽयं तन्तुरयं तन्तुरयं तन्तुरिति २ पुस्तके । || भवतीति १ । २ । ४ । ५ ।

¶ बुद्ध्या विवेचनं चेति २ पुस्तके ऽधिकम् ।

** यस्य विविच्यमानस्य याथार्थ्यानुपलब्धिस्तत् कुतश्चिद्विवेचनीयम् । अबुध्यमाने तदनुपपत्तेः तथा च तेनावधिना क्व चिदवस्थातव्यम् । अनवस्थायां त्रुटेरमेयत्वप्रसङ्गादित्युक्तम् । तस्मात्परमाणुषु वा तत्संयोगेषु वा तेनावस्थातव्यं तथा च यतो विविच्यते भावः स एवास्यावधिर्याथार्थ्येन नोपलभ्यतइति बुद्ध्या विवेचनस्य भावानुपपत्तिव्याघात इति सिद्धम् । ता· टी· ।

तदाश्रयत्वादपृथग्ग्रहणम्* ॥ २८ ॥

कार्यद्रव्यं कारणद्रव्याश्रितं तत्कारणेभ्यः† पृथङ् नोपलभ्यते विपर्यये पृथग्ग्रहणात्। यचाश्रयाश्रितभावो नास्ति तच पृथग्ग्रहणमिति बुद्ध्या विवेचनात्तु भावानां पृथग्ग्रहणमतीन्द्रियेष्वणुषु । यदिन्द्रियेण गृह्यते तदेतया बुद्ध्या विविच्यमानमन्यदिति ।

प्रमाणतश्चार्थप्रतिपत्तेः‡ ॥ २९ ॥

बुद्ध्या विवेचनाद्भावानां याथात्म्योपलब्धिः यदस्ति यथा च (यन्नास्ति यथा च) तत्सर्वं प्रमाणत उपलब्ध्या सिध्यति या च प्रमाणत उपलब्धिस्तद्बुद्ध्या विवेचनं भावानां तेन सर्वशास्त्राणि सर्वकर्माणि सर्वे च शरीरिणां व्यवहारा व्याप्ताः । परीक्षमाणो हि बुद्ध्या ऽध्यवस्यति इदमस्तीदं नास्तीति तच न सर्वभावानुपपत्तिः ।

प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥ ३० ॥

एवं च सति सर्वं नास्तीति नोपपद्यते कस्मात्प्रमाणानुपपत्त्युपपत्तिभ्याम् । यदि सर्वं नास्तीति प्रमाणमुपपद्यते सर्वं नास्तीत्येतद्धन्यते । अथ प्रमाणं नोपपद्यते सर्वं नास्तीत्यस्य कथं सिद्धिः । अथ प्रमाणमन्तरेण सिद्धिः सर्वमस्तीत्यस्य कथं न सिद्धिः ।

‖स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥ ३१ ॥

यथा स्वप्ने न विषयाः सन्त्यथ चाभिमानो भवति एवं न प्रमाणानि प्रमेयानि च सन्त्यथ च प्रमाणप्रमेयाभिमानो भवति ।

मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥ ३२ ॥

¶हेत्वभावादसिद्धिः ॥ ३३ ॥

---

* तन्तूनामनेकत्वेन ज्ञानं पटस्य त्वेकत्वेनेति पृथग्ग्रहणमस्त्येव । पटस्य तत्तवस्तन्तूनां चांशत्र इत्याधारभेदो ऽपि । पटस्यान्यत्रादर्शने तु तदाश्रितत्वं तन्त्रमिति न तदभेदगमकमित्यर्थः ।

† तत्कारणेभ्य इति ५ । ‡ प्रमाणतश्चार्थप्रतिषेधः २ । ( ) २ नास्ति ।

‖ यदुक्तं प्रमाणोपपत्त्यनुपपत्तिभ्यां न सर्वभावानुपपत्तिरिति तत्र प्रत्यवतिष्ठते विज्ञानवादी । ता टी· । ¶ तदेतद् दूषयति । ता· टी· ।

स्वप्नान्ते विषयाभिमानवत्प्रमाणप्रमेयाभिमानो न पुनर्जागरितान्ते विषयोपलब्धिवदित्यत्र हेतुर्नास्ति। हेत्वभावादसिद्धिः। स्वप्नान्ते* चासन्तो विषया उपलभ्यन्तइत्यत्रापि हेत्वभावः। **प्रतिबोधे ऽनुपलम्भादिति चेत् प्रतिबोधविषयोपलम्भादप्रतिषेधः।** यदि प्रतिबोधे ऽनुपलम्भात्स्वप्ने विषया न सन्तीति तर्हि यइमे प्रतिबुद्धेन विषया उपलभ्यन्ते उपलभात्सन्तीति विपर्यये हि हेतुसामर्थ्यमुपलम्भाभावे सत्यनुपलम्भादभावः सिध्यति उभयथा त्वभावे†नानुपलम्भस्य सामर्थ्यमस्ति यथा प्रदीपस्याभावादूपस्यादर्शनमिति। तत्र भावेनाभावः समर्थ्यतइति। **स्वप्नान्तविकल्पे च हेतुवचनम्।** स्वप्नविषयाद्याभिमानवदिति ब्रुवता स्वप्नान्तविकल्पे हेतुर्वाच्यः। कश्चित्स्वप्नाः‡ भयोपसंहितः कश्चित्प्रमोदोपसंहितः कश्चिदुभयविपरीतः कदा चित्स्वप्नमेव न पश्यतीति। निमित्तवतस्तु स्वप्नविषयाभिमानस्य निमित्तविकल्पाद्विकल्पोपपत्तिः।

स्मृतिसंकल्पवच्च स्वप्नविषयाभिमानः॥ ३४॥

पूर्वोपलब्धविषयः॥ यथा स्मृतिश्च संकल्पश्च पूर्वोपलब्धविषयौ न तस्य प्रत्याख्यानाय कल्पेते तथा स्वप्ने विषयग्रहणं पूर्वोपलब्धविषयं न तस्य प्रत्याख्यानायेति कल्पतइति। एवं दृष्टविषयश्च स्वप्नान्तो जागरितान्तेन यः सुप्तः स्वप्नं पश्यति स एव जागत्स्वप्नदर्शनानि प्रतिसंधत्तइदमद्राक्षमिति। तत्र जाग्रद्बुद्धिवृत्तिवशात्स्वप्नविषयाभिमानो मिथ्येति व्यवसायः। सति च

---

* अन्तशब्दो ऽवयववचनो ऽप्याश्रितत्वमात्रेणावस्थायां प्रयुक्तः तेन स्वप्नावस्थायां जागरितावस्थायामित्यर्थः। एतदुक्तं भवति। स्वप्नविज्ञानस्यायाथार्थ्यमिच्छता बाधकमन्तरेण तदनुपपत्तेर्जागत्प्रत्ययो ऽस्य बाधको वक्तव्यः। न चासावसमीचीनस्तं बाधितुमुत्सहतइति समीचीनत्वं जागत्प्रत्ययानामभ्युपगन्तव्यं तथा च जागरितान्ते विषयोपलब्धिवदित्युपपन्नम्। ता. टी.।

† स्वप्नजागरितावस्थयोरुभयोरपि विषयाभावाभ्युपगमे ऽनुपलब्धेरभावग्रहकत्वमपि न सिध्येद्योग्यताया अभावादिति भावः।

‡ स्वप्ने–इति १।४।

§ स्वप्नवैचित्र्यस्य कादाचित्कत्वेन सहेतुकत्वाच्चिमित्तवैचित्र्यस्यावश्याभ्युपगन्तव्यत्वेन तेनैव विषयसत्तासिद्धेः सर्वशून्यता बाधितेति भावः।

‖ उपलभ्यो विषय इति ४।

¶ पूर्वोपलब्धेरुपजीव्यत्वेन तद्बाधकत्वानुपपत्तेरिति भावः।

प्रतिसंधाने या जाग्रतो बुद्धिवृत्तिस्तद्वशादयं व्यवसायः स्वप्नविषयाभिमानो मिथ्येति। **उभयाविशेषे तु साधनानर्थक्यम्।** यस्य स्वप्नान्तजागरितान्तयोरविशेषस्तस्य स्वप्नविषयाभिमानवदिति साधनमनर्थकं तदाश्रयप्रत्याख्यानात्। अतस्मिंस्तदिति च व्यवसायः प्रधानाश्रयः अपुरुषे स्थाणौ पुरुष इति व्यवसायः स प्रधानाश्रयो (न खलु पुरुषे ऽनुपलब्धे पुरुष इत्यपुरुषे व्यवसायो भवति एवं स्वप्नविषयस्य व्यवसायो हस्तिनमद्राक्षं पर्वतमद्राक्षमिति प्रधानाश्रयो) भवितुमर्हति। एवं च सति।

मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात्स्वप्नविषयाभिमान-
प्रणाशवत्प्रतिबोधे* ॥ ३५ ॥

स्थाणौ पुरुषो ऽयमिति व्यवसायो मिथ्योपलब्धिः (अतस्मिंस्तदिति ज्ञानं स्थाणौ स्थाणुरिति व्यवसायस्तत्त्वज्ञानं तत्त्वज्ञानेन च मिथ्योपलब्धिर्निवर्त्यते नार्थः स्थाणुपुरुषसामान्यलक्षणः यथा प्रतिबोधे या ज्ञानवृत्तिस्तया स्वप्नविषयाभिमानो†) निवर्त्यते नार्थो विषयसामान्यलक्षणः तथा मायागन्धर्वनगरमृगतृष्णिकाणामपि या बुद्धयो ऽतस्मिंस्तदिति व्यवसायास्तचाप्यनेनैव कल्पेन मिथ्योपलब्धिविनाशस्तत्त्वज्ञानान्नार्थप्रतिषेध इति। उपादानवच्च मायादिषु मिथ्याज्ञानं प्रज्ञापनीयसरूपं च द्रव्यमुपादाय साधनवान्परस्य मिथ्या ऽध्यवसायं करोति सा माया नीहारप्रभृतीनां नगरसरूपसन्निवेशे‡ दूरान्नगरबुद्धिरुत्पद्यते विपर्यये तदभावात्। सूर्यमरीचिषु भौमेनोष्मणा संसृष्टेषु स्यन्दमानेषूदकबुद्धिर्भवति सामान्यग्रहणाद् अन्तिकस्थस्य विपर्यये तदभावात्। क्व चित् कदा चित् कस्य चिच्च भावान्ननिमित्तं मिथ्याज्ञानं दृष्टं च बुद्धिद्वैतं मायाप्रयोक्तुः परस्य च दूरान्तिकस्थयोर्गन्धर्वनगरमृगतृष्णिकासु सुप्तप्रतिबुद्धयोश्च स्वप्नविषये तदेतत्सर्वस्याभावे निरूपाख्यतायां निरात्मकत्वे नोपपद्यतइति।

---

* एवं सति मिथ्याज्ञानस्य प्रधानाश्रयत्वे सति मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानाद् बाधकात् स्वप्नविषयाभिमानप्रणाशवत्प्रतिबोधे न त्वर्थस्य सामान्यस्यापीति शेषः। ता॰ टी॰।

† २ ( ) नास्ति।

‡ स्वरूपेति ४।

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात्* ॥ ३६ ॥

मिथ्याबुद्धेश्चार्थवदप्रतिषेधः । कस्माद् निमित्तोपलम्भात् सद्भावोपलम्भाच्च । उपलभ्यते मिथ्याबुद्धिनिमित्तं मिथ्याबुद्धिश्च प्रत्यात्ममुत्पन्ना गृह्यते संवेद्यत्वात् तस्मान्मिथ्याबुद्धिरप्यस्तीति ।

†तत्त्वप्रधानभेदाच्च मिथ्याबुद्धे‡र्द्वैविध्योपपत्तिः ॥ ३७ ॥

तत्त्वं स्थाणुरिति प्रधानं पुरुष इति तत्त्वप्रधानयोरलोपाद्भेदात् स्थाणौ पुरुष इति मिथ्याबुद्धिरुत्पद्यते सामान्यग्रहणात् । एवं पताकायां बलाकेति लोष्ट§ कपोत इति न तु‖समाने विषये मिथ्याबुद्धीनां समावेशः सामान्यग्रहणाव्यवस्थानात् । यस्य तु निरात्मकं निरुपाख्यं सर्वं तस्य समावेशः प्रसज्यते । गन्धादौ च प्रमेये गन्धादिबुद्धयो मिथ्याभिमतास्तत्त्वप्रधानयोः सामान्यग्रहणस्य चाभावात्तत्त्वबुद्धय एव भवन्ति तस्मादयुक्तमेतत् प्रमाणप्रमेयबुद्धयो मिथ्येति । दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तम् ।

अथ कथं तत्त्वज्ञानमुत्पद्यतइति ।

¶समाधिविशेषाभ्यासात् ॥ ३८ ॥

स तु प्रत्याहृतस्येन्द्रियेभ्यो** मनसो††धारकेण प्रयत्नेन धार्यमाणस्यात्मना संयोग‡‡स्तत्त्वबुभुत्साविशिष्टः सति हि तस्मिन्निन्द्रियार्थेषु बुद्धयो नोत्पद्यन्त तदभ्यासवशात्तत्त्वबुद्धिरुत्पद्यते । यदुक्तं सति हि तस्मिन् इन्द्रियार्थेषु बुद्धयो नोत्पद्यन्ते इत्येतत् ।

§§नार्थविशेषप्राबल्यात् ॥ ३९ ॥

---

* अर्थे हि निषिद्धे तद्भवेदप्येतत् तद्भवस्थापने तदुदेवाप्रत्यूहं बुद्धिसद्भावोऽपि सिध्यति । ता. टी. ।

† मिथ्याबुद्ध्या तन्निमित्तं लक्ष्यते तेन मिथ्याबुद्धिनिमित्तस्य द्वैविध्यमित्यर्थः । ता. टी. । ‡ मिथ्याबुद्धिर्द्वैविध्योपपत्तिरिति २ । § लोष्ठेति १ । ४ ।

‖ असमाने इति २ पा. । ¶ समाधितत्त्वाभ्यासादिति तात्पर्यटीकाधृतः पाठः ।

** इन्द्रियार्थेभ्य इति २ । ५ ।

†† अनेन विक्षेपं निवर्तयति । ता. टी. ।

‡‡ अयं खलु सुषुप्तावस्थायामस्तीत्यत उक्तम् । ता. टी. ।

§§ इन्द्रियविषयैरुपहतमनसो न धारणा तथा च तदभ्यासाभावाच्च तत्त्वसाक्षात्कार इति सूत्रार्थः ता. टी. ।

अनिच्छतो ऽपि बुद्ध्युत्पत्तेर्नैतदुक्तम् । कस्माद् अर्थविशेषप्राबल्याद् अबुभुत्समानस्यापि बुद्ध्युत्पत्तिर्दृष्टा यथा स्तनयित्नुशब्दप्रभृतिषु तत्र समाधिविशेषो नोपपद्यते ।

***क्षुदादिभिः प्रवर्त्तनाच्च ॥ ४० ॥**

क्षुत्पिपासाभ्यां शीतोष्णाभ्यां व्याधिभिश्चानिच्छतो ऽपि बुद्धयः प्रवर्त्तन्ते तस्मादैकाग्र्यानुपपत्तिरिति । अस्त्वनत्समाधिं विहाय व्युत्थानं व्युत्याननिमित्तं समाधिप्रत्यनीकं च सति त्वेतस्मिन् ।

†पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ४१ ॥

पूर्वकृतो जन्मान्तरोपचितस्तत्त्वज्ञानहेतुर्धर्मप्रविवेकः‡ फलानुबन्धो योगाभ्याससामर्थ्यं निष्फले ह्यभ्यासे नाभ्यासमादियेरन् । दृष्टं हि लौकिकेषु कर्मस्वभ्याससामर्थ्यम् । प्रत्यनीकपरिहारार्थं च ।

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः§ ॥ ४२ ॥

योगाभ्यासजनितो धर्मो जन्मान्तरे ऽप्यनुवर्तते प्रचयकाष्ठागते‖ तत्त्वज्ञानहेतौ धर्मे प्रकृष्टायां समाधिभावनायां तत्त्वज्ञानमुत्पद्यतइति । दृष्टश्च समाधिना ऽर्थविशेषप्राबल्याभिभवः नाहमेतदश्रौषं नामहेतदज्ञासिषमन्यत्र मे मनो ऽभूदित्याह लौकिक इति ।

यद्यर्थविशेषप्राबल्यादनिच्छतो ऽपि बुद्ध्युत्पत्तिरनुज्ञायते ।

अपवर्गेप्येवं प्रसङ्गः ॥ ४३ ॥

मुक्तस्यापि बाह्यार्थसामर्थ्याद् बुद्धय उत्पद्येरन्निति ।

न निष्पन्नावश्यम्भावित्वात्¶ ॥ ४४ ॥

कर्मवशान्निष्पन्ने शरीरे चेष्टेन्द्रियार्थाश्रये निमित्तभावादवश्यंभावी बुद्धीनामुत्पादः न च प्रबलो ऽपि सन् बाह्यो**र्थ आत्मनो बुद्ध्युत्पादे समर्थो भवति तस्येन्द्रियेण संयोगाद्बुद्ध्युत्पादे सामर्थ्यं दृष्टमिति ।

---

* क्षुधादिभिरिति क्व चित् ।

† पूर्वकृतः समाधिः । तस्य फलं संस्कारः तस्यानुबन्धः स्थेमा तस्मादिति सूत्रार्थः । ता॰ टी॰ ।

‡ प्रविविच्यते विशिष्यतइति प्रविवेकः धर्मश्चासौ प्रविवेकश्चेति धर्मप्रविवेकः । ता॰ टी॰ । § योगाभ्यासोपदेशादिति २ । ‖ काष्ठां गते इति २ ।

¶ पूर्वपक्षिणः सिद्धान्तसूत्रम् । ता॰ टी॰ । सति शरीरे बाह्यविशेषयोर्ज्ञानोत्पत्तिकारणत्वं नान्यथेति सूत्रार्थः । न्या॰ वा॰ । ** बाह्यार्थ इति २ । ५ ।

*तदभावश्चापवर्गे ॥ ४५ ॥

तस्य बुद्धिनिमित्ताश्रयस्य शरीरेन्द्रियस्य धर्माधर्माभावादभावो ऽपवर्गे। तच्च यदुक्तमपवर्गे ऽप्येवं प्रसङ्ग इति तदयुक्तम् । तस्मात्सर्वदुःखविमोक्षो ऽपवर्गः । यस्मात्सर्वदुःखबीजं सर्वदुःखायतनं चापवर्गे विच्छिद्यते तस्मात्सर्वेण दुःखेन विमुक्तिरपवर्गो न निर्बीजं निरायतनं च दुःखमुत्पद्यतइति ।

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥ ४६ ॥

तस्यापवर्गस्याधिगमाय यमनियमाभ्यामात्मसंस्कारः। यमः समानमाश्रमिणां धर्मसाधनं नियमस्तु विशिष्टम्†। आत्मसंस्कारः पुनरधर्महानं धर्मोपचयश्च योगशास्त्राच्चाध्यात्मविधिः प्रतिपत्तव्यः । स पुनस्तपः प्राणायामः प्रत्याहारो ध्यानं धारणेति। इन्द्रियविषयेषु प्रसंख्यानाभ्यासो रागद्वेषप्रहाणार्थः उपायस्तु योगाचार‡विधानमिति ।

§ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः॥ ॥ ४७ ॥

तदर्थमिति प्रकृतम् । ज्ञायते ऽनेनेति ज्ञानमात्मविद्याशास्त्रं¶ तस्य ग्रहणमध्ययनधारणे अभ्यासः सततक्रियाऽध्ययनश्रवणचिन्तनानि तद्विद्यैश्च** सह संवाद इति प्रज्ञापरिपाकार्थं परिपाकस्तु संशयच्छेदनमविज्ञातार्थबोधो†† ऽध्यवसिताभ्यनुज्ञानमिति समापवादः संवादः ।

तद्विद्यैश्च सह संवाद इत्यविभक्तार्थं वचनं विभज्यते ।

तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयात्‡‡ ॥ ४८ ॥

---

* तदभावश्चापवर्गे तस्येति २ । † विशिष्ट इति २ ।

‡ योगाचार एकायकारिता आहारविशेष एकत्रानवस्थानादि इत्यादि यतिधर्मोक्तम् । ता· टी· ।

§ ननु यद्येतत्तत्त्वज्ञानोत्पादक्रमेणापवर्गोपायः कृतं तर्ह्यान्वीक्षिक्येत्यत आह । ता· टी· । ॥ सहेति नास्ति १ । ४ । ५ ।

¶ आत्मविद्या आन्वीक्षिकी । ता· टी· ।

** सहेति नास्ति २ । †† अर्थावबोधोऽध्यवसितेति १ । ४ ।

‡‡ अभिमुखमुपेत्य जानीयात् । ता· टी· ।

एतन्निगदेनैव नीतार्थमिति ।

यदिदं मन्येत पक्षप्रतिपक्षपरिग्रहः प्रतिकूलः परस्येति* ।

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥ ४९ ॥

तमभ्युपेयादिति वर्त्तते । परतः प्रज्ञामुपादित्समानस्तत्त्वबुभुत्साप्रकाशनेन स्वपक्षमनवस्थापयन् स्वदर्शनं परिशोधयेदिति ।

अन्योन्यप्रत्यनीकानि च प्रावादुकानां दर्शनानि† ।

स्वपक्षरागेण चैके न्यायमतिवर्त्तन्ते तच्च ।

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥ ५० ॥

अनुत्पन्नतत्त्वज्ञानानामप्रहीणदोषाणां तदर्थं घटमानानामेतदिति । विद्यानिर्वेदादिभिश्च परेणावज्ञायमानस्य‡ ।

ताभ्यां विगृह्य कथनम्§ ॥ ५१ ॥

विगृह्येति विजिगीषया न तत्त्वबुभुत्सयेति । तदेतद्विद्यापालनार्थं न लाभपूजाख्यात्यर्थमिति‖ ।

इति श्रीवात्स्यायनीये न्यायभाष्ये चतुर्थो ऽध्यायः समाप्तः ॥ ४ ॥

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वमिति संक्षेपेणोक्तं तद्विस्तरेण विभज्यते । ताः खल्विमा जातयः* स्थापनाहेतौ प्रयुक्ते चतुर्विंशतिः प्रतिषेधहेतवः ।

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्य-
प्राप्तिप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशय-
प्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्य-
नुपलब्धिनित्यानित्यकार्यसमाः ॥ १ ॥

साधर्म्येण प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतुतः साधर्म्यसमः† । अविशेषं तच्च तच्चोदाहरिष्यामः । एवं वैधर्म्यसमप्रभृतयोऽपि निर्वक्तव्याः लक्षणं तु ।

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः
साधर्म्यवैधर्म्यसमौ ॥ २ ॥

साधर्म्येणोपसंहारे साध्यधर्मविपर्ययोपपत्तेः साधर्म्येणैव प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतुतः साधर्म्यसमः प्रतिषेधः । निदर्शनं क्रियावानात्मा द्रव्यस्य क्रियाहेतुगुणयोगात् । द्रव्यं लोष्टः क्रियाहेतुगुणयुक्तः क्रियावान् तथा चात्मा तस्मात्क्रियावानिति । एवमुपसंहृते‡ परः साधर्म्येणैव प्रत्यवतिष्ठते निष्क्रिय आत्मा विभुनो द्रव्यस्य निष्क्रियत्वाद् विभु चाकाशं निष्क्रियं च तथा चात्मा तस्मान्निष्क्रिय इति । न चास्ति विशेषहेतुः क्रियावत्साधर्म्यात् क्रियावता भवितव्यं न पुनरक्रियसाधर्म्याद्§ निष्क्रियेणेति ।

---

* तत्र जातिर्नाम स्थापनाहेतौ प्रयुक्ते यः प्रतिषेधासमर्थो हेतुः । न्या· वा· । अत्र प्रतिषेधबुद्ध्या प्रयुक्त इति शेष इति । ता· टी· । यदा वादी परस्य साधनं साध्नोति मन्यते लाभपूजाख्यातिकामश्च भवति तदा जातिं प्रयुङ्क्ते कदा चिदयं जात्युत्तरेणाकुलीकृतो नोत्तरं प्रतिपद्यते उत्तराप्रतिपत्त्या च निगृह्यते। अनभिधाने च जातेरैकान्तजयः परस्येत्यैकान्तिकात्पराजयाद्बरमस्तु संदेह इति युक्तो जातेः प्रयोगः । न्या· वा· ।

† समीकरणार्थं प्रयोगः समः । साधर्म्यमेव समं वैधर्म्यमेव समामिति । समार्थः समीकरणार्थः प्रयोगो द्रष्टव्यः । समीक्रियतां परपक्षो मा वा कारि अयं तु समीकरणार्थं प्रवर्तते यथा लोके कुटुम्बार्थं घटतदिति । न्या· वा· । साधर्म्यमेव समं यस्मिन् प्रयोगइति शेषः । ता· टी ।

‡ एवमुपसंहृते इति २ । § साधर्म्यान्निष्क्रियेणेति ४ ।

विशेषहेत्वभावात्साधर्म्यसमः प्रतिषेधो भवति । अथ वैधर्म्यसमः क्रियाहेतुगुणयुक्तो लोष्टः परिच्छिन्नो दृष्टो न च तथात्मा तस्मान्न लोष्टवत् क्रियावानिति । न चास्ति विशेषहेतुः क्रियावत्साधर्म्यात् क्रियावता भवितव्यं न पुनः क्रियावद्वैधर्म्यादक्रियेणेति विशेषहेत्वभावाद्वैधर्म्यसमः । वैधर्म्येण चोपसंहारे* निष्क्रिय आत्मा विभुत्वात् क्रियावद् द्रव्यमविभु दृष्टं यथा लोष्टो न च तथात्मा तस्मान्निष्क्रिय† इति । वैधर्म्येण प्रत्यवस्थानं निष्क्रियं द्रव्यमाकाशं क्रियाहेतुगुणरहितं दृष्टं न तथात्मा तस्मान्न निष्क्रिय इति । न चास्ति विशेषहेतुः क्रियावद्वैधर्म्यान्निष्क्रियेण भवितव्यं न पुनरक्रियवैधर्म्यात् क्रियावतेति विशेषहेत्वभावाद्वैधर्म्यसमः । क्रियावान् लोष्टः क्रियाहेतुगुणयुक्तो दृष्टः तथा चात्मा तस्मात् क्रियावानिति । न चास्ति विशेषहेतुः क्रियावद्वैधर्म्यान्निष्क्रियो न पुनः क्रियावत्साधर्म्यात् क्रियावानिति विशेषहेत्वभावात्साधर्म्यसमः । अनयोरुत्तरम् ।

गोत्वाद्गोसिद्धिवत्तत्सिद्धिः ॥ ३ ॥

---

* वैधर्म्येण चोपसंहारः २ ।

† अस्ति खल्वात्मनः क्रियाहेतुर्गुणः प्रयत्नो ऽदृष्टं वा । लोष्टस्यापि क्रियाहेतुर्गुणः स्पर्शवद्वेगवद्द्रव्यसंयोग इति एवमुपसंहृते परः साधर्म्येणैव प्रत्यवतिष्ठते । निष्क्रिय आत्मा विभुत्वादाकाशवदिति । अत्र च साधनमाभासमुत्तरं च न जातिः । विभुत्वस्याक्रियत्वेन स्वभावतः प्रतिबन्धात् । तेनैतदुपेक्ष्य वार्तिककार उदाहरणान्तरमाह । यथा ऽनित्यःशब्द उत्पत्तिधर्मकत्वात् । इदं तु सम्यक् साधनमुत्तरं त्वाभासमिति । ता· टी· । यद्यनित्यघटसाधर्म्यादनित्यः नित्येनाप्याकाशेन साधर्म्यममूर्तत्वमस्तीति नित्यः प्राप्त इति । एतस्मिन्नेव हेतावाकाशवैधर्म्यादित्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः नित्यसाधर्म्यमप्याकाशेनामूर्तत्वमतो नित्यः प्राप्तः । अथ मन्यसे सत्यस्मिन् साधर्म्ये न नित्यः न तर्हि वक्तव्यमनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याच्चानित्य इति । सेयं जातिर्विशेषहेत्वभावं दर्शयति विशेषहेत्वभावाच्चानैकान्तिकदेशनाभास इति । एवं वैधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं साधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः । यथा तस्मिन्नेव हेतावाकाशवैधर्म्यादनित्य इत्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः अनित्येन घटेनास्य वैधर्म्यममूर्तत्वमतो नित्यः प्राप्तः तस्मिन्नेव हेतौ घटसाधर्म्यादित्युक्ते यद्यनित्यघटसाधर्म्यादनित्यः वैधर्म्यमप्यस्यास्त्यमूर्तत्वमतो नित्यः प्राप्तः । अथ मन्यसे सत्येतस्मिन् वैधर्म्ये न नित्यः न तर्ह्ययमेकान्तो ऽनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याच्चानित्य इति । सोऽयं विशेषहेत्वभावः । न्या· वा· ।

साधर्म्यमात्रेण वैधर्म्यमात्रेण च साध्यसाधने प्रतिज्ञायमाने स्याद्व्यवस्था सा तु धर्मविशेषे नोपपद्यते* गोसाधर्म्याद्गोत्वाज्जातिविशेषाद्गौः सिध्यति न तु सास्नादिसंबन्धाद् । अश्वादिवैधर्म्याद्गोत्वादेव न गौः सिध्यति न गुणादिभेदात् । तच्चैतत् कृतव्याख्यान†मवयवप्रकरणे प्रमाणानामभिसंबन्धाच्चैकार्थकारित्वं समानं वाक्यइति । हेत्वाभासाश्रया खल्वियमव्यवस्थेति ।

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः‡ ॥ ४ ॥

दृष्टान्तधर्मं साध्ये§ समासञ्जन्‖ उत्कर्षसमः । यदि क्रियाहेतुगुणयोगाल्लोष्टवत् क्रियावानात्मा लोष्टवदेव स्पर्शवानपि प्राप्नोति । अथ न स्पर्शवान् लोष्टवत् क्रियावानपि न प्राप्नोति विपर्यये वा विशेषो वक्तव्य इति । साध्यधर्माभावं दृष्टान्तात् ¶प्रसञ्जतो ऽपकर्षसमः । लोष्टः** खलु क्रियावानविभुर्दृष्टः काममात्मा ऽपि क्रियावानविभुरस्तु विपर्यये वा विशेषो वक्तव्य इति । ख्यापनीयो वर्ण्यो विपर्ययाद्वर्ण्यः । तावेतौ साध्यदृष्टान्तधर्मौ††विपर्यस्यतो वर्ण्यावर्ण्यसमौ भवतः । साधनधर्मयुक्ते दृष्टान्ते धर्मान्तरविकल्पात्साध्यधर्मविकल्पं‡‡प्रसञ्जतो विकल्पसमः । क्रियाहेतुगुणयुक्तं किं चिद् गुरु यथा लोष्टः किं चिल्लघु यथा वायुरेवं क्रियाहेतुगुणयुक्तं किं चित्क्रियावत्स्याद् यथा लोष्टः किं चिदक्रियं यथा ऽऽत्मा विशेषो वा वाच्य इति । हेत्वाद्यवयवसामर्थ्ययोगी धर्मः साध्यः तं दृष्टान्ते प्रसञ्जत:§§ साध्यसमः । यदि यथा लोष्टस्तथा

---

* भवेदेवं यद्यन्वयव्यतिरेकमात्रादेतोर्गमकत्वं स्यात् । ततो विशेषग्रहणाभावात्प्रकरणसमत्वं स्यात् । न त्वेवं भवति स्वाभाविकसंबन्धभाजो गमकत्वात् । स्वभावसंबद्धं च कृतकत्वमनित्यत्वे न त्वमूर्तत्वे तस्य स्वाभाविकसंबन्धो बुद्धिकर्मादौ व्यभिचारात् । तस्माद् गृह्यमाणविशेषत्वान्न प्रकरणसमः । ता. टी. ।

† कृतव्यवस्थानामिति १ । २ । ४ । ५ ।

‡ दृष्टान्ते दृष्टस्य पक्षे ऽनिष्टस्य धर्मस्य साध्येन सहापादनमुत्कर्षसमः । दृष्टान्ते विद्यमानधर्माभावापादनमपकर्षसमः । दृष्टान्तसादृश्यमात्रेण साध्यापादनं वर्ण्यसमः । पक्षसादृश्यमात्रेण दृष्टान्ते साध्याभावापादनमवर्ण्यसमः । पक्षदृष्टान्तयोर्धर्मान्तरेण वैसादृश्यात्साध्यसाधनमसाध्यसाधनं वा विकल्पसमः । दृष्टान्ते दृष्टस्यापि साध्यत्वापादनं साध्यसम इति षड् जातयः ।

§ साध्येनेति १ । ४ । ‖ समासजन इति २ समासञ्जत इति ५ ।

¶ प्रसजतोपकर्षसम इति १ । २ । ५ । ** लोष्ठमिति २ ।

†† विपर्यस्य तावितिं ४ । ‡‡ प्रसजत इति १ । ४ । §§ प्रसजत इति १ । २ । ४ ।

ऽऽत्मा प्राप्तस्तर्हि यथात्मा तथा लोष्ट इति । साध्यश्चायमात्मा क्रियावानिति कामं लोष्ठोपि साध्यः । अथ नैवं तर्हि यथा लोष्टः तथात्मा । एतेषामुत्तरम् ।

किंचित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥ ५ ॥

अलभ्यः सिद्धस्य निन्हवः सिद्धं च किंचित्साधर्म्यादुपमानं यथा गौस्तथा गवय इति तच न लभ्यो गोगवययोर्द्धर्मविकल्पश्चोदयितुम् । एवं साधके धर्मे दृष्टान्तादिसामर्थ्ययुक्ते न लभ्यः साध्यदृष्टान्तयोर्धर्मविकल्पाद्वैधर्म्यात्प्रतिषेधो वक्तुमिति ।

***साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ ६ ॥**

यच्च लौकिकपरीक्षकाणां† बुद्धिसाम्यं तेनाविपरीतो ऽर्थो ऽतिदिश्यते प्रज्ञापनार्थमेवं साध्यातिदेशाद् दृष्टान्तउपपद्यमाने साध्यत्वमनुपपन्नमिति‡ ।

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्या ऽविशिष्टत्वाद-
प्राप्या ऽसाधकत्वाच्च प्राप्यप्राप्तिसमौ ॥ ७ ॥

हेतुः प्राप्य वा साध्यं साधयेदप्राप्य वा । न तावत्प्राप्य प्राप्यामविशिष्टत्वादसाधकः । द्वयोर्विद्यमानयोः प्राप्तौ सत्यां किं कस्य साधकं साध्यं वा अप्राप्य साधकं न भवति नाप्राप्तः प्रदीपः प्रकाशयतीति । प्राप्या प्रत्यवस्थानं प्राप्तिसमः अप्राप्या प्रत्यवस्थानमप्राप्तिसमः§ । अनयोरुत्तरम् ।

घटादिनिष्पत्तिदर्शनात् पीडने चाभि-
चारादप्रतिषेधः ॥ ८ ॥

---

* न हि दृष्टान्तदृष्टसकलधर्मयोगित्वं पक्षस्य सुवचं तथा सति दृष्टान्तदार्ष्टान्तिकभावस्यैवानुपपत्तेः किं तु दृष्टान्तदृष्टसाध्यव्याप्यहेतुमत्तानिश्चयेन साध्यमात्रं पक्षे सिध्यति न तत्समानाधिकरणं धर्मान्तरं नापि पक्षप्रसिद्धधर्मवत्ता दृष्टान्ते साधकाभावादिति भावः ।

† लौकिके परीक्षकाणामिति २ । ५ ।

‡ षण्णां जातीनां प्रत्याख्यानमुक्त्वा वर्ण्यावर्ण्यसाध्यसमानामपरं प्रत्याख्यानमाहेति । ता॰ टी॰ ।

§ पक्षे हेतुसाध्ययोर्वर्तमानतायां साध्यत्वानुपपत्तिरवर्तमानतायां हेतोः साधकत्वानुपपत्तिरिति द्वे जाती । असत्साध्यते न तु सत् । प्राप्तं तु सदसतः प्राप्यसंभवात् । तस्माच्च साध्यम् । अपि च येन यस्य प्राप्तिस्तेन तस्यैक्यमेव । यथा गङ्गा सागरेण संगता सागरेणाभिन्ना । तद्वदेवाभिन्ने चेत्साध्यसाधने नास्ति साध्यसाधनभावः तस्य भेदाधिष्ठानत्वादिति द्रष्टव्यम् । अप्राप्तिसमः स्फुट एवेति । ता॰ टी॰ ।

उभयथा खल्वयुक्तः प्रतिषेधः कर्तृकरणाधिकरणानि प्राप्य मृदं घटादिकार्यं निष्पादयन्ति अभिचाराच्च पीडने सति दृष्टमप्राप्य साधकत्वमिति* ।

दृष्टान्तस्य कारणानपदेशात्† प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ॥ ९ ॥

साधनस्यापि साधनं वक्तव्यमिति प्रसङ्गेन प्रत्यवस्थानं प्रसङ्गसमः‡ प्रतिषेधः । क्रियाहेतुगुणयोगी क्रियावान् लोष्ट इति हेतुर्नोपदिश्यते न च हेतुमन्तरेण सिद्धिरस्तीति प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः । क्रियावानात्मा क्रियाहेतुगुणयोगाद् लोष्टवदित्युक्ते प्रतिदृष्टान्त उपादीयते क्रियाहेतुगुणयुक्तमाकाशं निष्क्रियं दृष्टमिति । कः पुनराकाशस्य क्रियाहेतुर्गुणो वायुना संयोगः संस्कारापेक्षः वायुवनस्पतिसंयोगवदिति । अनयोरुत्तरम् ।

प्रदीपोपा§दानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः ॥ १० ॥

इदं तावदयं पृष्टो वक्तुमर्हति अथ के प्रदीपमुपाददते किमर्थं वेति‖ दिदृक्षमाणा दृश्यदर्शनार्थमिति । अथ प्रदीपं दिदृक्षमाणाः प्रदीपान्तरं कस्मान्नोपाददते अन्तरेणापि प्रदीपान्तरं दृश्यते प्रदीपः तच्च प्रदीपदर्शनार्थं प्रदीपोपादानं निरर्थकम् । अथ दृष्टान्तः किमर्थमुच्यतइति अप्रज्ञातस्य ज्ञापनार्थमिति । अथ दृष्टान्ते कारणापदेशः किमर्थं दृश्यते¶ यदि प्रज्ञापनार्थं प्रज्ञातो दृष्टान्तः । स खलु लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्त इति । तत्प्रज्ञापनार्थः कारणापदेशो निरर्थक इति प्रसङ्गसमस्योत्तरम् । अथ प्रतिदृष्टान्तसमस्योत्तरम् ।

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ११ ॥

प्रतिदृष्टान्तं ब्रुवता न विशेषहेतुरपदिश्यते अनेन प्रकारेण प्रतिदृ-

---

* घटादेर्मृत्पिण्डे प्राप्तस्य समवेतस्य मृत्पिण्डसंयुक्तैरेव दण्डादिभिरुत्पादनादभिचारेण च श्येनादिनोद्देश्यासंयुक्तेनैवोद्देश्यपीडाया जननाच्चोभयथापि प्रत्यवस्थानं युक्तमिति भावः ।

† करणानपदेशादिति १ । ४ ।

‡ साध्यसमो हि दृष्टान्ते साध्यवद् हेत्वाद्यवयवं प्रसञ्जयति पञ्चावयवप्रयोगसाध्यतां दृष्टान्तगतस्यानित्यत्वस्य प्रसञ्जयतीति यावत् । प्रसङ्गसमस्तु दृष्टान्तगतस्यानित्यत्वस्य प्रमाणमात्रसाध्यतामित्यपौनरुक्त्यम् । ता॰ टी॰ ।

§ प्रदीपादानेति १ । ४ । ‖ क्षेति ५ । ¶ मृग्यते २ ।

दृष्टान्तः साधकः न दृष्टान्त इति । एवं प्रतिदृष्टान्तहेतुत्वेनाहेतुर्दृष्टान्त इत्युपपद्यते स च कथमहेतुर्न स्याद्* यद्यप्रतिषिद्धः साधकः स्यादिति ।

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ १२ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्युक्ते अपर आह । प्रागुत्पत्तेरनुत्पन्ने शब्दे प्रयत्नानन्तरीयकत्वम(नित्यत्व)कारणं नास्ति तदभावाद् नित्यत्वं प्राप्तं नित्यस्य चोत्पत्तिर्नास्ति अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः । अस्य उत्तरम् ।

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥ १३ ॥

तथाभावादुत्पन्नस्येति उत्पन्नः खल्वयं शब्द इति भवति । प्रागुत्पत्तेः शब्द एव नास्ति उत्पन्नस्य शब्दभावाच् शब्दस्य सतः प्रयत्नानन्तरीयकत्वमनित्यत्वकारण‡मुपपद्यते कारणोपपत्तेरयुक्तोयं दोषः प्रागुत्पत्तेः कारणाभावादिति§ ।

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात्संशयसमः‖ ॥ १४ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्युक्ते हेतौ संशयेन प्रत्यवतिष्ठते । सति प्रयत्नानन्तरीयकत्वे अस्त्येवास्य नित्येन सामान्येन

---

* मदीयस्य दृष्टान्तस्याभ्युपगमान्न त्वदीयो दृष्टान्त इत्यर्थः । अथैवं प्रयुङ्क्ते यथा मदीयो न दृष्टान्तस्तथा त्वदीय इति तथापि व्याघातान्न दृष्टान्तः मदीयस्यादृष्टान्तत्वे साध्ये प्रतिदृष्टान्तेन हि तेन मदीयस्यादृष्टान्तता साध्या स चैव दृष्टान्तस्तेन मदीयस्यादृष्टान्तता साध्येति व्याहतमित्यर्थः । ता· टी· ।

( ) नास्ति २ । ‡ अनित्यकारणमिति १ । २ । ४ ।

§ ज्ञापकश्चायं हेतुर्न कारकः । ज्ञापके च कारकवत् प्रत्यवस्थानमसंबद्धम् । न्या· वा· ।

कारको हेतुर्निवर्तमानः स्वकार्यं निवर्तयति न तु ज्ञापकः । तदभावे ऽपि भूमौ चिरनिखातायां निध्यादीनामनिवृत्तेरिति । ततश्च विशेषणमनर्थकं प्रागुत्पत्तेरिति । प्रागसतो हि सत्तासंबन्ध उत्पत्तिः । प्रागपि चेदसावभ्युपगतः प्रागिति विशेषणमनर्थकमुत्पत्तेरभावे सदेवानुत्पत्तिधर्मकत्वादित्यर्थः । ता· टी· ।

‖ संशयसमा साधर्म्यसमातो न भिद्यतइति चेन्न । उभयैकसाधर्म्यभेदाद् उभयसाधर्म्यात् संशयसमः एकसाधर्म्यात् साधर्म्यसम इति । न्या· वा· ।

साधर्म्यमैन्द्रियकत्वमस्ति च घटेनानित्येनातो नित्यानित्यसाधर्म्यादनिवृत्तः संशय इति । अस्योत्तरम् ।

साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशये ऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः* ॥ १५ ॥

विशेषाद्वैधर्म्यादवधार्यमाणे ऽर्थे पुरुष इति न स्थाणुपुरुषसाधर्म्यात्संशयो ऽवकाशं लभते । एवं वैधर्म्याद्विशेषात् प्रयत्नानन्तरीयकत्वादवधार्यमाणे शब्दस्यानित्यत्वे नित्यानित्यसाधर्म्यात्संशयो ऽवकाशं न लभते । यदि वै लभेत ततः स्थाणुपुरुषसाधर्म्यानुच्छेदादत्यन्तं संशयः स्यात् । गृह्यमाणे च विशेषे नित्य साधर्म्यं संशयहेतुरिति नाभ्युपगम्यते न हि †गृह्यमाणे पुरुषस्य विशेषे स्थाणुपुरुषसाधर्म्यं संशयहेतुर्भवति ।

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥ १६ ॥

उभयेन नित्येन चानित्येन च साधर्म्यात्पक्षप्रतिपक्षयोः प्रवृत्तिः प्रक्रिया । अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदित्येकः पक्षं प्रवर्तयति द्वितीयश्च नित्यसाधर्म्यात् । एवं च सति प्रयत्नानन्तरीयकत्वादिति हेतुरनित्यसाधर्म्येणोच्यमानेन हेतौ तदिदं प्रकरणानतिवृत्त्या प्रत्यवस्थानं प्रकरणसमः । समानं चैतद्वैधर्म्ये ऽपि उभयवैधर्म्यात् प्रक्रियासिद्धेः प्रकरणसम‡ इति । अस्योत्तरम् ।

प्रतिपक्षात्प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ॥ १७ ॥

उभयसाधर्म्यात् प्रक्रियासिद्धिं ब्रुवता प्रतिपक्षात्प्रक्रियासिद्धिरुक्ता भवति यद्युभयसाधर्म्यं तच्च एकतरः§प्रतिपक्षः इत्येवं सत्युपपन्नः प्रतिपक्षो भवति ।

---

* न सामान्यदर्शनमात्रं संशयस्य कारणमपि तु विशेषादर्शनमहितं विशेषदर्शने तु तद्रहितं न कारणमिति सूत्रार्थः । ता· टी· । † २ हिर्नास्ति ।

‡ उभयेन नित्येनानित्येन च साधर्म्येणोद्भाव्यमानेन प्रक्रियायाः प्रकरणस्यानुमितिप्रयोजकस्य संशयस्येति यावत् । सिद्धेः प्रकरणसमो नाम जातिरित्यर्थः । एवं च नित्यसाधर्म्येणानित्यसाधर्म्येण च प्रत्यवस्थानं प्रकारणसमद्वयम् । एवमेव वैधर्म्येणापि प्रकरणसमद्वयमिति प्रकरणसमचतुष्टयम् ।

§ यद्युभयसाधर्म्यात्स एकतर इति २ ।

प्रतिपक्षोपपत्तेरनुपपन्नः प्रतिषेधो यतः* प्रतिपक्षोपपत्तिः† प्रतिषेधोपपत्तिश्चेति विप्रतिषिद्धमिति । तत्त्वानवधारणाच्च प्रक्रियासिद्धिर्विपर्यये प्रकरणावसानात् तत्त्वावधारणे ह्यवसितं प्रकरणं भवतीति‡ ।

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥ १८ ॥

§ (अहेतुसमः हेतुः) हेतुः साधनं तत्साध्यात् पूर्वं पश्चात्सह वा भवेत् । यदि पूर्वं साधनमसति साध्ये कस्य साधनम् । अथ पश्चाद् असति साधने कस्येदं साध्यम् । अथ युगपत्साध्यसाधने द्वयोर्विद्यमानयोः किं कस्य साधनं किं कस्य साध्यमिति ‖(हेतु)रहेतुना न विशिष्यते । अहेतुना साधर्म्यात् प्रत्यवस्थानमहेतुसमः । अस्योत्तरम् ।

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ १९ ॥

न त्रैकाल्यासिद्धिः । कस्माद् हेतुतः साध्यसिद्धेः । निर्वर्तनीयस्य निर्वृत्तिर्विज्ञेयस्य विज्ञानमुभयं कारणतो दृश्यते सोऽयं महान्प्रत्यक्षविषय उदाहरणमिति । यत्तु खलूक्तमसति साध्ये कस्य साधनमिति यत्तु निर्वर्त्यते यच्च विज्ञाप्यतेश्च तस्येति ।

प्रतिषेधानुपपत्तेः प्रतिषेद्व्याप्रतिषेधः ॥ २० ॥**

पूर्वं पश्चाद्युगपद्वा प्रतिषेध इति नोपपद्यते प्रतिषेधानुपपत्तेः स्थापनाहेतुः सिद्ध इति ।

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ २१ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदिति स्थापिते पक्षे अर्थापत्त्या प्रतिपक्षं साधयतोऽर्थापत्तिसमः†† । यदि प्रयत्नानन्तरीयकत्वा-

---

* यदि २ । ५ ।

† प्रतिषेधो नोपपद्यते अथ प्रतिषेधोपपत्तिः प्रतिपक्षो नोपपद्यते प्रतिपक्षोपपत्तिश्चेत्यधिकम् २ । ५ ।

‡ प्रकरणसमस्य सत्प्रतिपक्षरूपहेत्वाभासत्वेनोक्तत्वादत्र जातित्वेनोक्तिः कथमिति चेत् । स्वसाध्यनिर्णयेन परसाधनविघटनबुद्ध्या प्रतिपक्षसाधनं प्रकरणसमजात्युत्तरं भवति सत्प्रतिपक्षतया वादिनः साधनमनिश्चायकं करोमीति बुद्ध्या प्रतिपक्षसाधनं प्रयुञ्जानो न जातिवादी सदुत्तरवादित्वाद् इति । ता॰ टी॰ । § ( ) २ नास्ति ।

‖ ( ) ४ नास्ति । ¶ विज्ञायते इति २ । ५ । ** चोधिकः ४ ।

†† वादिना प्रयुक्ते हेतौ तद्विपरीतहेतोः साध्याभावसाधकत्वमनुक्तमप्यर्थादापद्यतइति संभाव्य वादितात्पर्यविषयताऽऽपादनेन यत्र प्रतिहेतुः साध्याभावसाधकः इत्यापाद्यते सोऽर्थापत्तिसमः ।

दनित्यसाधर्म्यादनित्यः शब्द इत्यर्थादापद्यते नित्यसाधर्म्यान्नित्य इति अस्ति त्व*स्य नित्येन साधर्म्यमस्पर्शत्वमिति । अस्योत्तरम् ।

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ॥ २२ ॥

अनुपपाद्य† सामर्थ्यमनुक्तमर्थादापद्यतइति ब्रुवतः पक्षहानेरुपपत्तिरनुक्तत्वाद् अनित्यपक्षसिद्धावर्थादापन्नं नित्यपक्षस्य हानिरिति‡ । अनैकान्तिकत्वाच्चार्थापत्तेः उभयपक्षसमा चेयमर्थापत्तिर्यदि नित्यसाधर्म्यादस्पर्शत्वादाकाशवच्च नित्यः शब्दो ऽर्थादापन्नमनित्यसाधर्म्यात् प्रयत्नानन्तरीयकत्वादनित्य इति । न चेयं विपर्ययमाचादेकान्तेनार्थापत्तिः न खलु वै घनस्य§ गावृणां पतनमिति अर्थादापद्यते द्रवाणामपां पतनाभाव इति ।

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात्सद्भावोपपत्तेरविशेषसमः॥ ॥ २३ ॥

एको धर्मः प्रयत्नानन्तरीयकत्वं शब्दघटयोरुपपद्यतइत्यविशेषे उभयोरनित्यत्वे सर्वस्याविशेषः प्रसज्यते । कथं सद्भावोपपत्तेरेको धर्मः सद्भावः सर्वस्योपपद्यते सद्भावोपपत्तेः सर्वाविशेषप्रसङ्गात् प्रत्यवस्थानमविशेषसमः । अस्योत्तरम् ।

¶क्व चिद्धर्मानुपपत्तेः क्व चिच्चोपपत्तेः प्रतिषेधाभावः ॥ २४ ॥

---

* अस्ति चास्येति २ । † अनुपपद्येति २ ।

‡ तदेव खल्वनुक्तं वचनाल्लभ्यते यत्कल्पनमन्तरेण वचनार्थो न घटते यथा पीनो देवदत्तो दिवा न भुङ्क्ते इति । यथा वा यागेन स्वर्गं भावयेदित्युक्तेऽन्तराऽपूर्वं कृत्वेति वाक्यार्थोपपादने तस्य सामर्थ्यात् । न त्वव्यभिचारिणः साधर्म्यात् साध्ये साध्यमाने ऽर्थादुक्त भवति व्यभिचारिणा ऽपि साधर्म्येण साधयितव्यमिति तस्य वाक्यार्थोपपादने ऽसामर्थ्यात् । तदन्तरेण वाक्यार्थोपपत्तेः । यदि पुनरनुपलभ्यमामर्थ्यमनुक्तमात्रं गम्यते ततस्त्वया नित्यत्वापादने शब्दस्योच्यमाने ऽनुच्यमानमनित्यत्व प्रत्येतव्यं तथा च भवदभिमतस्य नित्यत्वस्य व्याहतिः । ता. टी. ।

§ घनोपलानामिति २ । ५ । घनस्य गावृणः पतनमिति १ । ४ ।

|| एकसाधर्म्यात्प्रत्यवस्थानं साधर्म्यसमः समस्तसाधर्म्यात्तु अविशेषसम इति भेदः ।

¶ क्व चिद्धर्मोपपत्तेः क्व चिच्चानुपपत्तेः प्रतिषेधाभाव इति २ ।

** एतदुक्तं भवति । अविनाभावसंपन्नं साधर्म्यं गमकं न तु साधर्म्यमात्रमिति । ता. टी. ।

यथा साध्यदृष्टान्तयोरेकधर्मस्य प्रयत्नानन्तरीयकत्वस्योपपत्तेरनित्यत्वं धर्मान्तरमविशेषो नैवं सर्वभावानां सद्भावोपपत्तिनिमित्तं धर्मान्तरमस्ति येनाविशेषः स्यात् । अथ मतमनित्यत्वमेव धर्मान्तरं सद्भावोपपत्तिनिमित्तं भावानां सर्वेच स्यादित्येवं खलु वै कन्यमाने अनित्याः सर्वे भावाः सद्भावोपपत्तेरिति पक्षः प्राप्नोति तच्च प्रतिज्ञार्थव्यतिरिक्तमन्यदुदाहरणं नास्ति। अनुदाहरणश्च हेतुर्नास्तीति। प्रतिज्ञैकदेशस्य चोदाहरणत्वमनुपपन्नं न हि साध्यमुदाहरणं भवति ततश्च नित्यानित्यभावादनित्यत्वानुपपत्तिः । तस्मात्सद्भावोपपत्तेः सर्वाविशेषप्रसङ्ग इति निरभिधेयमेतद्वाक्यमिति । सर्वभावानां सद्भावोपपत्तेरनित्यत्वमिति ब्रुवता ऽनुज्ञातं शब्दस्यानित्यत्वं तच्चानुपपन्नः प्रतिषेध इति ।

उभयकारणोपपत्तेरुपपत्तिसमः ॥ २५ ॥

यद्यनित्यत्वकारणमुपपद्यते शब्दस्येत्यनित्यः शब्दो नित्यत्वकारणमप्युपपद्यते ऽस्यास्पर्शत्वमिति नित्यत्वमप्युपपद्यते (उभयस्यानित्यत्वस्य नित्यत्वस्य च*) कारणोपपत्त्या प्रत्यवस्थानमुपपत्तिसमः† । अस्योत्तरम् ।

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥ २६ ॥

उभयकारणोपपत्तेरिति ब्रुवता नानित्यत्वकारणोपपत्तेरनित्यत्वं प्रतिषिध्यते यदि प्रतिषिध्यते नोभयकारणोपपत्तिः स्यात् । उभयकारणोपपत्तिवचनादनित्यत्वकारणोपपत्तिरभ्यनुज्ञायते अभ्यनुज्ञानादनुपपन्नः प्रतिषेधः । **व्याघातात्प्रतिषेध इति चेत्समानो व्याघातः ।** एकस्य नित्यत्वानित्यत्वप्रसङ्गं व्याहतं ब्रुवतोक्तः प्रतिषेध इति चेत् स्वपक्षपरपक्षयोः समानो व्याघातः स च नैकतरस्य साधक इति ।

निर्दिष्टकारणाभावेप्युपलम्भादुपलब्धिसमः ॥ २७ ॥

निर्दिष्टस्य‡ प्रयत्नानन्तरीयकत्वस्यानित्यत्वकारणस्याभावे ऽपि वा-

---

* ( ) २ नास्ति ।

† प्रकरणसमायां जातौ पक्षप्रतिपक्षसाधनयोः समानबलत्वे ऽपि प्रतिवाद्दी साधनात् स्वपक्षसिद्धया वादिसाधनदूषणे प्रवर्तते उपपत्तिसमायां तु स्वसाधनेनैवेति विशेषः । ता टी ।

‡ निर्दिष्टप्रयत्नेति १ । ४ ।

युनोदनादृत्तशाखाभङ्गजस्य शब्दस्यानित्यत्वमुपलभ्यते निर्दृष्टस्य साधनस्याभावे ऽपि साध्यधर्मोपलब्ध्या प्रत्यवस्थानमुपलब्धिसमः* । अस्योत्तरम् ।

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः† ॥ २८ ॥

प्रयत्नानन्तरीयकत्वादिति ब्रुवता कारणत उत्पत्तिरभिधीयते न कार्यस्य कारणनियमः । यदि च कारणान्तरादप्युपपद्यमानस्य शब्दस्य तदनित्यत्वमुपपद्यते किमत्र प्रतिषिध्यतइति । न प्रागुच्चारणाद्विद्यमानस्य‡ शब्दस्यानुपलब्धिः कस्मादावरणाद्यनुपलब्धेः यथा विद्यमानस्योदकादेरर्थस्यावरणादेरनुपलब्धिः नैवं शब्दस्याग्रहणकारणेनावरणादिनानुपलब्धिः गृह्यते चेतदस्याग्रहणकारणमुदकादिवन्न गृह्यते तस्मादुदकादिविपरीतः शब्दो ऽनुपलभ्यमान इति ।

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः§ ॥ २९ ॥

तेषामावरणादीनामनुपलब्धिर्नोपलभ्यते अनुपलम्भान्नास्तीत्यभावो ऽस्याः सिध्यति अभावसिद्धौ हेत्वभावात्तद्विपरीतमस्तित्वमावरणादीनामधार्य्यते तद्विपरीतोपपत्तेर्यत्प्रतिज्ञातं न प्रागुच्चारणाद्विद्यमानस्य शब्दस्यानुपलब्धिरित्येतन्न सिध्यति सो ऽयं हेतुरावरणाद्यनुपलब्धेरित्यावरणादिषु चावरणाद्यनुपलब्धौ च ‖ समयानुपलब्ध्या प्रत्यवस्थितो ऽनुपलब्धिसमो भवति। अस्योत्तरम् ।

---

* यद्यपि वर्णात्मकः शब्दो ऽनित्यत्वेन साध्यतया विवक्षितः प्रकरणाद्, नित्यः शब्दः प्रयत्नानन्तरीयकत्वाद् घटवदिति तथा ऽपि शब्दमात्रमनेन पक्षीकृतमित्यारोहणं साधनस्योपलब्धिसमार्थः । ता. टी. ।

† कारणतः प्रयत्नाच् शब्दस्योत्पत्तिनियमो ऽभिधीयते वर्णानामनित्यत्वं साधयितुं न तु कार्यस्य कारणनियमः प्रयत्नादेव सर्वः शब्दो जायते न तु वायुसंयोगजाद् वृत्तभङ्गादिति नियम उच्यते येनाव्यापकत्वं हेतोः स्यादिति सूत्रार्थः । ता. टी. । ‡ अविद्यमानस्येति ४ ।

§ उपलभ्यमानत्वे उपलब्धिरूपतया ऽनुपलब्धित्वानुपपत्तेः । तथा चानुपलब्धेरनुपलम्भादनुपलब्धिर्नास्तीति आवरणादेरावरणानुपलब्धावपि नुपलब्धिरस्तीत्यर्थः । ता. टी. । ‖ समतयेति २ । ५ ।

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः* ॥ ३० ॥

आवरणाद्युपलब्धिर्नास्ति अनुपलम्भादित्यहेतुः । कस्मादनुपलम्भात्मकत्वादनुपलब्धेः उपलम्भाभावमात्रत्वादनुपलब्धेः । यदस्ति तदुपलब्धेर्विषयः उपलब्ध्या तदस्तीति प्रतिज्ञायते । यन्नास्ति तदनुपलब्धेर्विषयः अनुपलभ्यमानं नास्तीति प्रतिज्ञायते । सोऽयमावरणाद्यनुपलब्धेरनुपलम्भाभावोऽनुपलब्धौ स्वविषये प्रवर्तमानो न स्वं †विषयं प्रतिषेधति । अप्रतिषिद्धा ‡चावरणाद्यनुपलब्धिर्हेतुत्वाय कल्पते । आवरणादीनि तु विद्यमानत्वादुपलब्धेः विषयाः तेषामुपलब्ध्या भवितव्यम् । यत्तानि नोपलभ्यन्ते तदुपलब्धेः स्वविषयप्रतिपादिकाया अभावाद् अनुपलम्भादनुपलब्धेर्§विषयो गम्यते न सन्त्यावरणादीनि शब्दस्याग्रहणकारणानीति । अनुपलम्भादनुपलब्धिः सिध्यति विषयः स तस्येति ॥

ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम् ॥ ३१ ॥

अहेतुरिति वर्तते । शरीरे शरीरिणां ज्ञानविकल्पानां भावाभावौ संवेदनीयौ । अस्ति मे संशयज्ञानं नास्ति मे संशयज्ञानमिति एवं प्रत्यक्षानुमानागमस्मृतिज्ञानेषु । सेयमावरणाद्यनुपलब्धिरुपलब्ध्यभावः स्वसंवेद्यो‖ नास्ति मे शब्दस्यावरणाद्युपलब्धिरिति नोपलभ्यन्ते शब्दस्याग्रहणकारणान्यावरणादीनीति । तच्च यदुक्तं तदनुपलब्धेरनुपलम्भादभावसिद्धिरिति एतन्नोपपद्यते ॥

साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥ ३२ ॥

अनित्येन घटेन साधर्म्यादनित्यः शब्द इति ब्रुवतोऽस्ति घटेनानित्येन सर्वभावानां साधर्म्यमिति सर्वस्यानित्यत्वमनिष्टं संपद्यते सोऽयमनित्यत्वेन प्रत्यवस्थानादनित्यसम इति । अस्योत्तरम् ॥

---

* आवरणाद्यनुपलब्धिरावरणादीनामभावं गमयति न त्वात्मनोऽभावमावरणाद्युपलब्धिरूपं न ह्यसावनुपलब्धिरात्मनो येनात्माऽभावं गमयेत् । उपलब्धिरप्युपलभ्यविषया नात्मविषया किं पुनरनुपलब्धिः । तस्मादनुपलब्धिरुपलभ्याभावहेतुर्न हेतुरात्माभावस्य तथा सति सैव न स्यादुपलभ्याभावोऽपीति आवरणं नानुपलब्धिश्च स्यादिति । ता॰ टी॰ ।

† स्वविषयमिति १ । २ । ४ । ५ । ‡ वारणादिति २ । § अनुपलब्धिरिति २ ‖ स्वसंवेद्येति २

साधर्म्यादसिद्धेः प्रतिषेध्यसिद्धिः प्रतिषेध्यसाधर्म्याच्च* ॥३३॥

प्रतिज्ञादित्रयवयुक्तं वाक्यं पक्षनिर्वर्तकं †प्रतिपक्षलक्षणं प्रतिषेधस्तस्य पक्षेण प्रतिषेध्येन साधर्म्यं प्रतिज्ञादियोगः तद्यदनित्यसाधर्म्यादनित्यत्वसिद्धिः‡ साधर्म्यादसिद्धेः प्रतिषेधस्यापि सिद्धिः प्रतिषेध्येन साधर्म्यादिति ।

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथा भावान्नाविशेषः ॥ ३४ ॥

दृष्टान्ते यः खलु धर्मः साध्यसाधनभावेन प्रज्ञायते स हेतुत्वेनाभिधीयते । स चोभयथा भवति§ केन चित्समानः कुतश्चिद्विशिष्टः । सामान्यात्साधर्म्यं विशेषाच्च वैधर्म्यम् । एवं साधर्म्यविशेषो हेतुर्नाविशेषेण साधर्म्यमात्रं वैधर्म्यमात्रं वा साधर्म्यमात्रं वैधर्म्यमात्रं चाश्रित्य भवानाह साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसम इति एतदयुक्तमिति । अविशेषसमप्रतिषेधे च यदुक्तं तदपि वेदितव्यम् ।

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः॥ ३५ ॥

अनित्यः शब्द इति प्रतिज्ञायते तदनित्यत्वं किं शब्दे नित्यमथानित्यं यदि तावत्सर्वदा भवति धर्मस्य सदा भावाद्धर्मिणोऽपि सदा भाव इति‖ नित्यः शब्द इति । अथ न सर्वदा भवति अनित्यत्वस्याभावान्नित्यः शब्दः । एवं नित्यत्वेन प्रत्यवस्थानात्¶नित्यसमः । अस्योत्तरम् ॥

प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः ॥ ३६ ॥**

---

* चेो नास्ति २ । ५ । † निवर्तकमिति २ । ‡ अनित्यत्वस्यासिद्धिरिति २ ।

§ स हेतुः तस्य चोभयथा भावना ऽभिधीयते इति २ स हेतुः स चोभयथा भवतीति ५ ।

‖ धर्मस्य सर्वदा भावाद्धर्मिणोऽपि सर्वदा भावः । न ह्यस्ति संभवः सामान्यसमवायातिरिक्ता धर्मा नित्या धर्मी चानित्य इति । ता. टी. ।

¶ प्रत्यवस्थानाच्चानित्यसम इति १ ।

** उत्पन्नस्य निरोधादभावः शब्दस्यानित्यत्वं तत्र परिप्रश्नानुपपत्तिः । यदि हि निरोधक्रादभावो ऽनित्यत्वं तथापि प्रश्नानुपपत्तिरथाप्यस्मन्मते समवायस्तथा ऽपि तदनुपपत्तिः । अनित्यत्व हि शब्दस्यापरान्तावच्छिन्नसत्तासमवायः न चासौ शब्दाधेयः तस्य स्वतन्त्रत्वादेवेत्यर्थः । ता. टी. ।

प्रतिषेध्ये शब्दे नित्यमनित्यत्वस्य भावादित्युच्यमाने ऽनुज्ञातं शब्दस्यानित्यत्वम् । अनित्यत्वोपपत्तेश्च नानित्यः शब्द इति प्रतिषेधो नोपपद्यते । अथ नाभ्युपगम्यते नित्यमनित्यत्वस्य भावादिति हेतुर्न भवतीति हेत्वभावात्प्रतिषेधानुपपत्तिरिति* उत्पन्नस्य †निरोधादभावः शब्दस्यानित्यत्वं तच्च परिप्रश्नानुपपत्तेः । सो ऽयं प्रश्नः ‡तदनित्यत्वं किं शब्दे सर्वदा भवति अथ नेत्यनुपपन्नः । कस्माद् उत्पन्नस्य यो निरोधादभावः शब्दस्य तदनित्यत्वमेवं च सत्यधिकरणाधेयविभागो व्याघातान्नास्तीति । नित्यानित्यत्वविरोधाच्च नित्यत्वमनित्यत्वं च एकस्य धर्मिणो धर्माविति विरुध्येते न सम्भवतः । तच्च यदुक्तं नित्यमनित्यत्वस्य भावाद् नित्य एव तदवर्तमानार्थमुक्तमिति ॥

प्रयत्नकार्यानेकत्वात्कार्यसमः ॥ ३७ ॥

प्रयत्नानन्तरीयकत्वाऽदनित्यः शब्द इति यस्य प्रयत्नानन्तरमात्मलाभः तत्खल्वभूत्वा भवति यथा घटादिकार्यमनित्यमिति च भूत्वा न भवतीत्येतद्विज्ञायते । एवमवस्थिते प्रयत्नकार्यानेकत्वादिति प्रतिषेध उच्यते । प्रयत्नानन्तरमात्मलाभश्च दृष्टो घटादीनां व्यवधानापोहाच्चाभिव्यक्तिर्व्यवहितानां तत्किं प्रयत्नानन्तरमात्मलाभः शब्दस्याहो ऽभिव्यक्तिरिति विशेषो नास्ति कार्याविशेषेण प्रत्यवस्थानं कार्यसमः । अस्योत्तरम् ॥

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः॥ ॥ ३८ ॥

---

* प्रतिषेधानुपपत्तेरिति २ । † निषेधादिति-विशेषादिति २ । ‡ तदेति ४ ।

§ प्रयत्ननान्तरीयकत्वं प्रयत्नान्तरोत्पादो वा स्यात्प्रयत्नानन्तरोपलम्भो वा स्यात् । न तावत्पूर्वः कल्पः असिद्धत्वात् । तस्मात्प्रयत्नानन्तरोपलम्भ आश्रयः । तत्र कार्यसमप्रतिषेधमाह । प्रयत्नानन्तरमुपलभ्यमानानां प्रयत्नानन्तरमात्मलाभश्च दृष्टो यथा घटादीनां व्यवधानापोहाच्चाभिव्यक्तिर्व्यवहितानां मूलकीलकादीनां तत् किं प्रयत्नानन्तरमात्मलाभः शब्दस्य आहो स्विदभिव्यक्तिरिति विशेषो नास्ति तदेवं कार्याविशेषेण प्रत्यवस्थानं कार्यसमः । ता॰ टी॰ ।

‖ कार्यस्योत्पत्तिलक्षणस्यान्यत्वे ऽभिव्यक्तिलक्षणात् कार्यात् प्रयत्नस्याभिव्यक्तिं प्रत्यहेतुत्वं कस्मादभिव्यक्तिं प्रति हेतुत्वं न भवतीत्यत आह । अनुपलब्धिकारणस्यावरणादेरुपपत्तेः । अभिव्यक्तिहेतुत्वं स्यात् । एवं तु नास्तीति व्यतिरेकपरं द्रष्टव्यम् । यत्र प्रयत्नानन्तरमित्यत्र यत्रतत्रयोर्व्यत्यासः । तत्र प्रयत्नानन्तरमभिव्यक्तिर्यत्रानुपलब्धिकारणं व्यवधानमुपपद्यते ता॰ टी॰ । संशयसमातो न भिद्यतइति चेदुभयसाधर्म्यात्संशयसमः अयं तु न तथा तस्माद् भिद्यते । साधर्म्यसमातो न

सति कार्यान्यत्वे अनुपलब्धिकारणोपपत्तेः* प्रयत्नस्याहेतुत्वं शब्दस्याभिव्यक्त्यै† यच्च प्रयत्नानन्तरमभिव्यक्तिस्तच्चानुपलब्धिकारणं व्यवधानमुपपद्यते व्यवधानापोहाच्च प्रयत्नानन्तरभाविनो ऽर्थस्योपलब्धिलक्षणाभिव्यक्तिर्भवतीति । न तु ‡शब्दस्यानुपलब्धिकारणं किं चिदुपपद्यते यस्य प्रयत्नानन्तरमपोहाच्छब्दस्योपलब्धिलक्षणाभिव्यक्तिर्भवतीति तस्मादुत्पद्यते शब्दो नाभिव्यज्यतइति । हेतोश्चेदनैकान्तिकत्वमुपपाद्यते अनैकान्तिकत्वादसाधकः स्याद् इति । यदि चानैकान्तिकत्वादसाधकम् ॥

§प्रतिषेधे ऽपि समानो दोषः ॥ ३९ ॥

प्रतिषेधो ऽप्यनैकान्तिकः किं चित्प्रतिषेधति किं चिन्नेति अनैकान्तिकत्वादसाधक इति । अथ वा शब्दस्यानित्यत्वपक्षे प्रयत्नानन्तरमुत्पादो नाभिव्यक्तिरिति विशेषहेत्वभावः । नित्यत्वपक्षे ऽपि प्रयत्नानन्तरमभिव्यक्तिर्नोत्पाद इति विशेषहेत्वभावः । सो ऽयमुभयपक्षसमो विशेषहेत्वभाव इत्युभयमप्यनैकान्तिकमिति ॥

सर्वत्रैवम् ॥ ४० ॥

सर्वेषु साधर्म्यप्रभृतिषु प्रतिषेधहेतुषु यच्च‖ यचाविशेषो दृश्यते तच्चोभयोः पक्षयोः समः प्रसज्यतइति ।

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ॥ ४१ ॥

यो ऽयं प्रतिषेधे ऽपि समानो दोषो ऽनैकान्तिकत्वमापद्यते सो ऽयं प्रतिषेधस्य प्रतिषेधे ऽपि समानः । तच्चानित्यः शब्दः प्रयत्नानन्तरीयकत्वादिति साधनवादिनः स्थापना प्रथमः पक्षः । प्रयत्नकार्यानेकत्वात् कार्यसम इति दूष-

---

भिद्यतइति चेन्न हेत्वध्यारोपणात् । साधर्म्यसमा न हेत्वध्यारोपेण प्रवर्तते दूयं त्वन्यथा ऽभिहिते हेतावन्यथाकारं प्रवर्तते न्या· वा· ।

* कारणानुपपत्तेरिति २। पाठान्तरम् । † अभिव्यक्ताविति २। ५। ‡ तुर्नास्ति २।

§ तदेवं जात्युत्तरवादिनं प्रति साधनवादिना सर्वत्रैव सम्यक् समाधानं स्वसाधनस्य वक्तव्यमेवं सति तत्त्वनिर्णये कथापर्यवसानं भवति यदि पुनर्वाद्यपि जातिवादिनं प्रति साधनाभासेन प्रत्यवतिष्ठते ततः षट्पत्त्यां सत्यां न तत्त्वनिर्णयावसाना कथा भवेदिति शिष्यहितः सूत्रकारः समाधानाभासवादिनं प्रति षट्पत्तीमवतारयति । ता· टी· ।

‖ यत्र विशेष इति ४ । यत्र यत्र विशेष इति २ । यत्राविशेष इति ५

णवादिनः प्रतिषेधहेतुना द्वितीयः पक्षः स च प्रतिषेध इत्युच्यते तस्यास्य प्रतिषेधे ऽपि समानो दोष इति तृतीयः* पक्षो विप्रतिषेध उच्यते तस्मिन् प्रतिषेधविप्रतिषेधे ऽपि समानो दोषो ऽनैकान्तिकत्वं चतुर्थः पक्षः ।

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ॥ ४२ ॥

प्रतिषेधं द्वितीयं पक्षं सदोषमभ्युपेत्य तदुद्धारमनुद्धृत्य अनुज्ञाय प्रतिषेधविप्रतिषेधे तृतीयपक्षे समानमनैकान्तिकत्वमिति समानं दूषणं प्रसज्जतो† दूषणवादिनो मतानुज्ञा प्रसज्यतइति पञ्चमः पक्षः ।

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्द्देशे परपक्षदोषाभ्युपगमात्समानो दोष‡ इति ॥ ४३ ॥

स्थापनापक्षे प्रयत्नकार्यत्वानेकत्वा§दिति दोषः स्थापनाहेतुवादिनः स्वपक्षलक्षणो भवति । कस्मात् स्वपक्षसमुत्थत्वात्सो ऽयं स्वपक्षलक्षणं दोषमपेक्षमाणो ऽनुद्धृत्यानुज्ञाय प्रतिषेधे ऽपि समानो दोष इत्युपपद्यमानं दोषं परपक्ष उपसंहरति इत्थं॥ चानैकान्तिकः प्रतिषेध इति हेतुं निर्दिशति । तच्च स्वपक्षलक्षणापेक्ष्योपपद्यमानदोषोपसंहारे हेतुनिर्देशे च सत्यनेन परपक्षोभ्युपगतो भवति । कथं कृत्वा यः परेण प्रयत्नकार्यत्वा¶नेकत्वादित्यादिनानैकान्तिकदोष उक्तः तमनुद्धृत्य प्रतिषेधे ऽपि समानो दोष इत्याह । एवं स्थापनां सदोषामभ्युपेत्य प्रतिषेधे ऽपि समानं दोषं प्रसज्जतः** परपक्षाभ्युपगमात् समानो दोषो भवति यथा परस्य प्रतिषेधं सदोषमभ्युपेत्य ††प्रतिषेधविप्रतिषेधे ऽपि समानो‡‡ दोषप्रसङ्गो मताऽनुज्ञा प्रसज्यतइति तथास्यापि) स्थापनां सदोषामभ्युपेत्य प्रतिषेधे ऽपि समानं दोषं प्रसज्जतो§§ मतानुज्ञा प्रसज्यतइति । स खल्वयं षष्ठः पक्षः तच्चखलु स्थापनाहेतुवादिनः प्रथमतृतीयपञ्चमपक्षाः प्रतिषेधहेतुवादिनः द्वितीयचतुर्थषष्ठपक्षाः । तेषां साध्वसाधुतायां मीमांस्यमानायां चतुर्थषष्ठयोरविशेषात् पुनरुक्तदोषप्रसङ्गः चतुर्थपक्षे समानदो-

---

* नास्ति १ । ४ ।
‡ समानदोषप्रसङ्ग इति ४ ।
‖ चः २ । ५ । नास्ति
** प्रसजत इति १ । २ । ४ ।
‡‡ नास्ति १ ।
† प्रसजत इति १ । २ । ४ ।
§ कार्यानेकत्वादिति १ । २ । ४ । ५ ।
¶ कार्यानेकत्वादिति २ । ४ । ५ ।
†† नास्ति १ । ४ ।
§§ प्रसजत इति १ ।

षत्वं परस्योच्यते प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोष इति । षष्ठे ऽपि परपक्षाभ्युपगमात् समानो दोष इति समानदोषत्वमेवोच्यते नार्थविशेषः कश्चिदस्ति । समानस्तृतीयपञ्चमयोः पुनरुक्तदोषप्रसङ्गः । तृतीयपक्षे ऽपि प्रतिषेधे ऽपि समानो दोष इति समानत्वमभ्युपगम्यते पञ्चमपक्षे ऽपि प्रतिषेधप्रतिषेधे समानो दोषप्रसङ्गो ऽभ्युपगम्यते नार्थविशेषः कश्चिदुच्यतइति । तच्च पञ्चमषष्ठपक्षयोः अर्थविशेषात् पुनरुक्तदोषः । तृतीयचतुर्थयोर्मतानुज्ञा । प्रथमद्वितीययोर्विशेषहेत्वभाव इति षट्पक्ष्यामुभयोरसिद्धिः । कदा षट्पक्षी यदा प्रतिषेधे ऽपि समानो दोष इत्येवं प्रवर्त्तते तदोभयोः पक्षयोरसिद्धिः । यदा तु कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेरित्यनेन तृतीयपक्षो युज्यते तदा विशेषहेतुवचनात् प्रयत्नानन्तरमात्मलाभः शब्दस्य नाभिव्यक्तिरिति सिद्धः* पञ्चमपक्षो न षट्पक्षी प्रवर्त्ततइति ॥

इति श्रीवात्स्यायनीये न्यायभाष्ये पञ्चमाध्यायस्याद्यमाह्निकम् ॥

विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वमिति संक्षेपेणोक्तं तदिदानीं विभजनीयम् । निग्रहस्थानानि खलु पराजयवस्तून्यपराधाधिकरणानि प्रायेण प्रतिज्ञाद्यवयवाश्रयाणि तत्त्ववादिनमतत्त्ववादिनं चाभिसंप्रयन्ते † । तेषां विभागः ।

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगो ऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ १ ॥

तानीमानि द्वाविंशतिधा विभज्य लक्ष्यन्ते ।

---

* सिद्धिः प्रथमपक्षे इति २ ।

† साध्यस्य साधनस्य वा विषयान्तरे ऽबाधितत्वात्प्रकृते तेन हेतुना साधयितुमशक्यं तत्साध्यत्वेन तदसाधकं वा तत्साधनत्वेनोपादानस्य वादिनः कर्तुरेव निग्रहः । तदुपादानं चाज्ञानेन विपरीतज्ञानेन वेति सामान्यतो द्वे एव निग्रहस्थाने ऽवान्तरभेदाः पुनर्द्वाविंशतिः । साधयितुमशक्यस्य साध्यत्वेनोपादानादसाधकस्य च हेतोर्हेतुवाक्ये साधनत्वेनोपादानात्प्रतिज्ञादिविषयकाज्ञानविपरीतज्ञानवतः कर्तुर्निग्रहाश्चिग्रस्थानस्य समवायेन कर्ता ऽधिकरणं विषयतया तु प्रतिज्ञादय इति

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥ २ ॥

साध्यधर्मप्रत्यनीकेन धर्मेण प्रत्यवस्थिते प्रतिदृष्टान्तधर्मं स्वदृष्टान्ते ऽभ्यनुजानन् प्रतिज्ञां जहातीति प्रतिज्ञाहानिः। निदर्शनम् ऐन्द्रियकत्वादनित्यः शब्दो घटवदिति कृते अपर आह। दृष्टमैन्द्रियकत्वं सामान्ये नित्ये कस्मान्न तथा शब्द इति प्रत्यवस्थिते इदमाह यद्यैन्द्रियकं सामान्यं नित्यं कामं घटो*नित्योस्त्विति। स खल्वयं साधकस्य दृष्टान्तस्य नित्यत्वं प्रसञ्जयन्निगमनान्तमेव पक्षं जहाति पक्षं जहत्प्रतिज्ञां जहातीत्युच्यते प्रतिज्ञाश्रयत्वात्पक्षस्येति† ।

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम्‡ ॥ ३ ॥

प्रतिज्ञातार्थो ऽनित्यः शब्दः ऐन्द्रियकत्वाद् घटवदित्युक्ते यो ऽस्य प्रतिषेधः प्रतिदृष्टान्तेन हेतुव्यभिचारः सामान्यमैन्द्रियकं नित्यमिति तस्मिंश्च प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पादिति दृष्टान्तप्रतिदृष्टान्तयोः साधर्म्ययोगे धर्मभेदात्सामान्यमैन्द्रियकं सर्वऽगतमैन्द्रियकत्वसर्वगतो घट इति धर्मविकल्पात्तदर्थनिर्देश इति साध्यसिद्ध्यर्थं कथं यथा घटो ऽसर्वगत एवं शब्दोप्यसर्वगतो घटवदेवानित्य इति तच्चानित्यः शब्द इति पूर्वा प्रतिज्ञा असर्वगत इति द्वितीया प्रतिज्ञा प्रतिज्ञान्तरं तत्कथं निग्रहस्थानमिति। न कर्त्राश्रयस्यापि प्रतिज्ञाद्यवयवाश्रयत्वे न विरोधः। तत्त्ववादिनो ऽपि परोक्तदूषणे आभासत्वाग्रहेण सम्यग्दूषणत्वग्रहेण वा तदाभासत्वाप्रदर्शने निग्रहात्तत्त्ववादिनो ऽपि निग्रहस्थानाश्रयत्वं नानुपपन्नम्।

---

* घटस्तथैव नित्यो ऽस्त्विति २। ५।

† ऐन्द्रियकत्वस्य सामान्ये नित्ये ऽपि प्रदर्शनेन तस्य नित्यत्वव्याप्यता न संभवतीति चोदिते दृष्टान्ते घटे ऽपि नित्यत्वमभ्युपगच्छतो वादिन ऐन्द्रियकत्वस्य नित्यत्वव्याप्यत्वेनावधारणात्तेन हेतुना शब्दे ऽपि नित्यताप्राप्तेः प्रतिज्ञाहानिरिति भावः। वार्तिककारस्तु घटादेर्नित्यत्वाभ्युपगममात्रेण शब्दे ऽपि नित्यत्वाभ्युपगमोन्नयनानुपपत्तेरनित्यत्वव्याप्यत्वासिद्धेरैन्द्रियकत्वे प्रतिदृष्टान्तेन लाभेपि शब्दे ऽनित्यत्वाभ्युपगमस्य वादिना ऽकृतत्वाच्चेदं प्रतिज्ञाहान्युदाहरणं किं तु तथा चोदिते अस्तु शब्दो नित्य इति कथनएव प्रतिज्ञाहानिः। सूत्रं तु दृष्टश्चासावन्ते व्यवस्थित इति दृष्टान्तः स्वश्चासौ दृष्टान्तश्चेति व्युत्पत्त्या दृष्टान्तप्रतिदृष्टान्तशब्दाभ्यां पक्षप्रतिपक्षयोर्विवक्षितत्वात्पक्षपरित्यागे प्रतिज्ञाहानिरिति योज्यमित्याह।

‡ धर्मविकल्पेन तदर्थनिर्देशः प्रतिज्ञान्तरम् २। तदर्थमिति ५।

§ सर्वदा तमिति २।

प्रतिज्ञायाः साधनं प्रतिज्ञान्तरं किं तु हेतुदृष्टान्तौ साधनं प्रतिज्ञायाः तदेतदसाधनोपादानमनर्थकमिति । आनर्थक्यान्निग्रहस्थानमिति* ।

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः† ॥ ४ ॥

गुणव्यतिरिक्तं द्रव्यमिति प्रतिज्ञा । रूपादितोऽर्थान्तरास्यानुपलब्धेरिति हेतुः सोऽयं प्रतिज्ञाहेत्वोर्विरोधः । कथं यदि गुणव्यतिरिक्तं द्रव्यं रूपादिभ्योऽर्थान्तरस्यानुपलब्धिर्नोपपद्यते । अथ रूपादिभ्योऽर्थान्तरस्यानुपलाब्धः गुणव्यतिरिक्तं द्रव्यमिति नोपपद्यते गुणव्यतिरिक्तं च द्रव्यं रूपादिभ्यश्चार्थान्तरस्यानुपलब्धिरिति विरुध्यते व्याहन्यते न संभवतीति ।

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ॥ ५ ॥

अनित्यः शब्दः ऐन्द्रियकत्वादित्युक्ते परो ब्रूयात्सामान्यमैन्द्रियकं न चानित्यमेवं शब्दोप्यैन्द्रियको न चानित्य इति । एवं प्रतिषिद्धे पक्षे यदि ब्रूयात् कः पुनराह अनित्यः शब्द इति । सोऽयं प्रतिज्ञातार्थनिह्नवः प्रतिज्ञासंन्यास इति‡ ।

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ६ ॥

निदर्शनम् एकप्रकृतीदं व्यक्तमिति प्रतिज्ञा कस्माद्धेतोरेकप्रकृतीनां विकाराणां परिमाणाद् मृत्पूर्वकाणां शरावादीनां दृष्टं परिमाणं यावान्प्रकृतेर्व्यूहो भवति तावान्विकार इति दृष्टं च प्रतिविकारं परिमाणम् । अस्ति चेदं

---

* असर्वगतत्वे सत्यैन्द्रियकत्वस्य सामान्यव्यावृत्तस्यानित्यत्वव्याप्यतायां वादिना विवक्षितत्वेऽपि तथाऽनिर्देशादसर्वगतत्वस्य साध्यत्वेन निर्देशात्प्रतिज्ञालक्षणयोगात्प्रतिज्ञायाश्च प्रतिज्ञान्तरासाधकत्वादिदं निग्रहस्थानम् ।

† अत्र प्रतिज्ञाहेत्वोरिति प्रतियोगिद्वयमात्रोपलक्षणपरं तेन दृष्टान्तादयोऽपि प्रतियोगिन उन्नेयाः । एतदुक्तं भवति येषां वाक्यगतानां पदार्थानां मिथो व्याघातः प्रतीयते प्रमाणान्तरं च विरोधकं स विरोधो नाम निग्रहस्थानं लक्ष्यस्य तस्य प्रतिज्ञाग्रहणस्याप्युपलक्षणार्थत्वात् । ता. टी. । अत एव यत्र प्रतिज्ञा हेतुना विरुध्यते प्रतिज्ञा स्वयचनेनैव वा हेतुर्वा दृष्टान्तेन प्रमाणान्तरेण वा प्रतिज्ञाहेतू वा प्रमाणान्तरेण तस्य सर्वस्याप्यनेनैव संग्रह इति वार्तिकम् ।

‡ हेतोः साध्याव्याप्यत्वे प्रतिवादिना प्रदर्शिते तदनैकान्तिकत्वमुद्दिधीर्षुणा साध्यापलापे कृते साध्यस्यैवानिर्देशे तद्व्यभिचारस्यान्यत्र प्रदर्शयितुमशक्यतया तदभ्युपगम्य पश्चात्तद्व्यभिचारप्रदर्शनापेक्षया ऽभ्युपगतसाध्यत्यागस्यैव निग्रहस्थानत्वोद्भावनं प्रथममुपतिष्ठतइति तेनैव प्रत्यवस्थेयमिति भावः ।

परिमाणं प्रतिव्यक्तं तदेकप्रकृतीनां विकाराणां परिमाणात् पश्यामो व्यक्तमनेकप्रकृतीति । अस्य व्यभिचारेण प्रत्यवस्थानं नानाप्रकृतीनामेकप्रकृतीनां च विकाराणां दृष्टं परिमाणमिति । एवं प्रत्यवस्थिते* आह एकप्रकृतिसमन्वये सति शरावादिविकाराणां परिमाणदर्शनात् । सुखदुःखमोहसमन्वितं हीदं व्यक्तं परमिदं गृह्यते तच्च प्रकृत्यन्तररूपसमन्वयाभावे† सत्येकप्रकृतित्वमिति । तदिदमविशेषोक्ते हेतौ प्रतिषिद्धे विशेषं ब्रुवतो हेत्वन्तरं भवति । सति च हेत्वन्तरभावे पूर्वस्य हेतोरसाधकत्वान्निग्रहस्थानं हेत्वन्तरवचने सति यदि हेत्वर्थनिदर्शनो दृष्टान्त उपादीयते नेदं व्यक्तमेकप्रकृति भवति प्रकृत्यन्तरोपादनाद् अथ नोपादीयते दृष्टान्ते हेत्वर्थस्यानिदर्शितस्य साधकभावानुपपत्तेः आनर्थक्याद्धेतोरनिवृत्तं निग्रहस्थानमिति‡ ।

प्रकृतादर्थादप्रतिसंबन्धार्थमर्थान्तरम् ॥ ७ ॥

यथोक्तलक्षणे पक्षप्रतिपक्षपरिग्रहे हेतुतः साध्यसिद्धौ प्रकृतायां ब्रूयान्नित्यः शब्दोऽस्पर्शत्वादिति हेतुः । हेतुर्नाम हिनोतेर्धातोस्तुनि प्रत्यये कृदन्तपदं पदं च नामाख्यातोपसर्गनिपाताः अभिधेयस्य क्रियान्तरयोगाद्विशिष्यमाणरूपः शब्दो नाम क्रियाकारकसमुदायः कारकः सङ्ख्याविशिष्टक्रियाकालयोगाभिधाय्याख्यातं धात्वर्थमात्रं च कालाभिधानविशिष्टं प्रयोगेष्वर्थादभिद्यमानरूपा निपाता उपसृज्यमानाः क्रियाद्योतकाः§ उपसर्गा इत्येवमादि तदर्थान्तरं वेदितव्यमिति॥ ।

---

* उक्तवते । इति २ । † समुच्चयाभावे इति २ ।

‡ साधनान्तरोपादाने पूर्वस्यासामर्थ्यख्यापनान्निग्रहस्थानत्वं सामर्थ्ये वा हेत्वन्तरं व्यर्थमिति । न्या॰ वा॰ । दत्तोत्तरावसरएव वादिनि यदि प्रतिवादी हेतुं व्यभिचारयति वादी तृतीयपदके स्थितो हेतुं विशेषयति तदा साधनान्तरोपादानाच्चिरुह्यतामुतानैकान्तिकसाधनोपादानाच्च तावदनैकान्तिकसाधनोपादानादस्य निग्रहो हेतुविशेषणेन समाहितत्वात्तस्माद्धेत्वन्तरवचनादेव निगृह्यते पूर्वस्य वस्तुतोऽसमर्थस्यासामर्थ्यख्यापनार्थत्वात्सामर्थ्ये वा हेत्वन्तरानर्थक्यमिति । ता॰ टी॰ ।

§ क्रियावद् द्योतका इति २ ।

§ अभ्युपगतार्थासंगतत्वान्निग्रहस्थानम् । न्या॰ वा॰ । यथा च साधनवादिनोऽर्थान्तरं निग्रहस्थानमेवमुत्तरवादिनोऽपि द्रष्टव्यम् । ता॰ टी॰ ।

वर्णक्रमनिर्देशवन्निरर्थकम्* ॥ ८ ॥

यथा नित्यः शब्दः कचटतपाः† जबडदशत्वात् झभञ्घढधषवदिति एवंप्रकारं निरर्थकम् । अभिधानाभिधेयभावानुपपत्तौ अर्थगतेरभावाद् वर्णाः क्रमेण निर्दिश्यन्तइति ।

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥

यद्वाक्यं परिषदा प्रतिवादिना च त्रिरभिहितमपि न विज्ञायते‡ श्लिष्टशब्दमप्रतीतप्रयोगमतिद्रुतोच्चरितमित्येवमादिना कारणेन तदविज्ञातमविज्ञातार्थमसामर्थ्यसंवरणाय प्रयुक्तमिति निग्रहस्थानमिति ।

पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकम्§ ॥ १० ॥

यत्रानेकस्य पदस्य वाक्यस्य वा पौर्वापर्येणान्वययोगो नास्ति इत्यसंबद्धार्थत्वं गृह्यते तत्समुदायार्थस्यापायादपार्थकम् । यथा दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्‖ कुमार्याः पाय्यं तस्याः पिता ¶प्रतिशीनश इति ।

अवयवविपर्यासवचनमप्राप्तकालम् ॥ ११ ॥

प्रतिज्ञादीनामवयवानां यथालक्षणमर्थवशात् क्रमः तत्रावयवविपर्यासेन वचनमप्राप्तकालमसंबद्धार्थं निग्रहस्थानमिति** ।

हीनमन्यतमेनाप्यवयवेन न्यूनम्†† ॥ १२ ॥

---

* वर्णक्रमनिर्देशवदिति वतिः । वर्णक्रमनिर्देशमात्रस्य विवक्षितार्थाबोधकत्ववत्तद्भाषानभिज्ञं प्रति तद्भाषया साध्यनिर्देशे प्रतिवादिनो बोधानुत्पत्तेस्तुल्यत्वात् । एवं च बोधोद्देश्ये बोधाजनकस्य बोधजननयोग्यस्योपादाने एवेदं निग्रहस्थानं तेन कपोलवादित्रादौ नातिप्रसङ्गः ।

† कचटतपानामिति २ ।

‡ वादिना त्रिरभिहितमपि परिषदा प्रतिवादिना च न विज्ञायतइत्यन्वयः । अविज्ञाने हेतुः श्लिष्टशब्दत्वादिः । प्रायेण त्रिरभिधाने बोधानुत्पत्तिर्नोपपद्यतइति त्रिरित्युक्तम् ।

§ वाच्यार्थशून्यत्वं निरर्थकत्वम् । समुदायार्थशून्यत्वमपार्थकत्वम् । इति भेदः ।

‖ अधरोरुकमेतदिति २ । ¶ अप्रतिशीत इति २ ।

** प्रतिज्ञादिप्रयोगस्य क्रमिकतायाः प्रथमाध्याये व्यवस्थापितत्वाद् व्युत्क्रमेण प्रयोगे झटिति विवक्षितार्थासिद्धा ऽर्थक्रमेण शब्दप्रयोगस्य कर्तुमुचितत्वेन तदुल्लङ्घने वादिनो ऽसामर्थ्योद्भावनादिति भावः ।

†† अवयवपञ्चकमध्ये एकतमस्याप्यनुपादाने विवक्षितार्थासिद्धेः प्रथमाध्याये निर्णीतत्वादिति भावः ।

प्रतिज्ञादीनामवयवानामन्यतमेनाप्यवयवेन हीनं न्यूनं निग्रहस्थानं साधनाभावे साध्यासिद्धिरिति ।

हेतूदाहरणाधिक्यमधिक्यम्* ॥ १३ ॥

एकेन कृतत्वाद् अन्यतरस्यानर्थक्यमिति तदेतन्नियमाभ्युपगमे वेदितव्यमि त ।

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥ १४ ॥

अन्यचानुवादाच् शब्दपुनरुक्तमर्थपुनरुक्त वा नित्यः शब्दो नित्यः शब्द इति शब्दपुनरुक्तमर्थपुनरुक्तमनित्यः शब्दो निरोधधर्मको ध्वान इति । अनुवादे त्वपुनरुक्तं शब्दाभ्यासादर्थविशेषोपपत्तेः ।

यथा हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनमिति† ।

‡अर्थादापन्नस्य स्वशब्देन पुनर्वचनम्§ ॥ १५ ॥

पुनरुक्तमिति प्रकृतम् । निदर्शनम् उत्पत्तिधर्मकत्वादनित्यमित्युक्त्वा अर्थादापन्नस्य योभिधायकः शब्दस्तेन स्वशब्देन ब्रूयादनुत्पत्तिधर्मकं नित्यमिति तच्च पुनरुक्तं वेदितव्यम् । अर्थसंप्रत्ययार्थे शब्दप्रयोगे प्रतीतः सोर्थो ऽर्थापत्त्येति ।

विज्ञातस्य परिषदा त्रिरभिहितस्याप्य‖प्रत्युच्चारणमननुभाषणम्¶ ॥ १६ ॥

विज्ञातस्य वाक्यार्थस्य परिषदा प्रतिवादिना त्रिरभिहितस्य यदप्रत्युच्चारणं तदननुभाषणं नाम निग्रहस्थानमिति । अप्रत्युच्चारयन् किमाश्रयं परपक्षप्रतिषेधं ब्रूयात् ।

अविज्ञातं चाज्ञानम् ॥ १७ ॥

विज्ञातार्थस्य परिषदा प्रतिवादिना त्रिरभिहितस्य यदविज्ञातं तदज्ञानं निग्रहस्थानमिति । अयं खल्वविज्ञाय कस्य** प्रतिषेधं ब्रूयादिति ।

---

* एकेन हेतुना दृष्टान्तेन वा साध्यसिद्धौ निष्पन्नायां हेत्वन्तरस्य दृष्टान्तान्तरस्य वा ऽसाधकत्वेनासाधनस्य साधनबुद्ध्या प्रयोगे विप्रतिपत्तेः सत्त्वात् । नियमानभ्युपगमे तु संभवतामनेकेषामपि प्रयोगः । † नास्ति २ । ‡ अत्रापि पूर्ववद्वैयर्थ्येन निग्रहस्थानत्वम् ।

§ पुनरभिधानमिति ५ । ‖ अनुच्चारणमिति ४ ।

¶ दूषयितुमिष्टस्य हेतोर्दृष्टान्तस्य वा ऽप्रत्युच्चारणे झटित्युत्तरमात्राभिधाने दूषणाधिकरणस्याप्रतिपत्तेः यावानंशो दुदूषयिषितस्तावतः प्रत्युच्चारणमवश्यं कार्यमिति भावः ।

** अविज्ञापकस्येति ।

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ १८ ॥

परपक्षप्रतिषेधे* उत्तरं तद्यदा न प्रतिपद्यते तदा निगृहीतो भवति ।

कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपः ॥ १९ ॥

यच्च कर्तव्यं व्यासज्य कथां व्यवच्छिनत्ति इदं मे करणीयं विद्यते तस्मिन्नवसिते पश्चात्कथयामीति† विक्षेपो नाम निग्रहस्थानम् । एकनिग्रहावसानायां कथायां स्वयमेव कथान्तरं प्रतिपद्यतइति ।

‡स्वपक्षदोषाभ्युपगमात् परपक्षे§ दोष-प्रसङ्गो मतानुज्ञा‖ ॥ २० ॥

यः परेण चोदितं दोषं स्वपक्षे ऽभ्युपगम्यानुद्धृत्य वदति भवत्पक्षे ऽपि समानो दोष इति स स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषं प्रसञ्जयन्यत्मनुजानातीति मतानुज्ञा नाम निग्रहस्थानमापद्यतइति ।

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम्¶ ॥ २१ ॥

पर्यनुयोज्यो नाम निग्रहापपत्त्या चोदनीयः तस्योपेक्षणं निग्रहस्थानं प्राप्तो ऽसीत्यननुयोगः । एतच्च कस्य पराजय इत्यनुयुक्तया परिषदा वचनीयं न खलु निग्रहं प्राप्तः स्वकौपीनं विवृणुयादिति ।

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥ २२ ॥

निग्रहस्थानलक्षणस्य मिथ्याऽध्यवसायादनिग्रहस्थाने निगृहीतो ऽसीति परं ब्रुवन् निरनुयोज्यानुयोगाद् निगृहीतो वेदितव्य इति ।

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गो ऽपसिद्धान्तः ॥ २३ ॥**

---

* प्रतिरोधइति ४ । † पश्चात्कथयिष्यामीति २ कथयिष्यामीति ४ ।

‡ स्वपक्षे दोषादिति २ । ४ । § परपक्षदोष इति ४ ।

‖ दूषणोद्धारावसरे तदकरणेन तदप्रतिपत्तेरुच्चयनात् ।

¶ वादिना स्वसाधनगतदूषणस्योद्भावनाऽनुपपत्तेः प्रतिवादिनः स्वेनैव स्वनिग्रहायोगात्परिषदा तदुद्भावनीयम् । सम्यक्साधनोपन्यासे वादिना कृते प्रतिवादिन उत्तराप्रतिपत्तिरप्रतिभा साधनाभासोपन्यासे उत्तराप्रतिपत्तिः पर्यनुयोज्योपेक्षणमिति विशेषः । ता· टी· ।

** प्रतिज्ञातार्थव्यतिरेकेणाभ्युपगतार्थपरित्यागान्निगृह्यते । न्या· वा· । तेन प्रतिज्ञाहानेर्नाभेदः ।

कस्य चिदर्थस्य तथाभावं प्रतिज्ञाय प्रतिज्ञातार्थविपर्ययाद् अनियमात् कथां प्रसज्जयतो ऽपसिद्धान्तो वेदितव्यः । यथा न सदात्मानं जहाति न सते विनाशो नासदात्मानं लभते नासदुत्पद्यतइति सिद्धान्तमभ्युपेत्य स्वपक्षं व्यवस्थापयति । एकप्रकृतीदं व्यक्तं विकाराणामन्वयदर्शनात् । मृदन्वितानां शरावादीनां दृष्टमेकप्रकृतित्वं तथा चायं व्यक्तभेदः सुखदुःखमोहान्वितो दृश्यते तस्मात्समन्वयदर्शनात्सुखादिभि*रेकप्रकृतीदं शरीरमिति । एवमुक्तवाननुयुज्यते अथ प्रकृतिर्विकार‡ इति कथं लक्षितव्यमिति । यस्यावस्थितस्य धर्मान्तरनिवृत्तौ धर्मान्तरं प्रवर्तते सा प्रकृतिः यच्च धर्मान्तरं प्रवर्तते स विकार इति सो ऽयं प्रतिज्ञातार्थविपर्यासाद् अनियमात् कथां प्रसज्जयति प्रतिज्ञातं खल्वनेन नासदाविर्भवति न सत्तिरोभवतीति सदसतोश्च तिरोभावाविर्भावमन्तरेण न कस्य चित्प्रवृत्तिः प्रवृत्त्युपरमश्च भवति । मृद् खल्ववस्थितायां भविष्यति शरावादिलक्षणं धर्मान्तरमिति प्रवृत्तिर्भवति अभूदिति च प्रकृत्युपरमः तदेतन्मृद्धर्माणामपि न स्यात् । एवं प्रत्यवस्थितो यदि सत‖श्चात्महानमसतश्चात्मलाभमभ्युपैति तदस्यापसिद्धान्तो निग्रहस्थानं भवति अथ नाभ्युपैति पक्षो ऽस्य न सिध्यति ।

हेत्वाभासाश्च यथोक्ताः ॥ २४ ॥

हेत्वाभासाश्च निग्रहस्थानानि । किं पुनर्लक्षणान्तरयोगाद् हेत्वाभासाश्च¶ निग्रहस्थानत्वमापन्नाः यथा प्रमाणानि प्रमेयत्वमित्यत आह । यथोक्ता इति । हेत्वाभासलक्षणेनैव निग्रहस्थानभाव इति । तइमे प्रमाणादयः पदार्था उद्दिष्टा लक्षिताः परीक्षिताश्चेति ।

योक्षपादमृषिं न्यायः प्रत्यभाद्वदतां वरम्** ।
तस्य वात्स्यायन इदं भाष्यजातमवर्तयत् ॥

इति श्रीवात्स्यायनीये न्यायभाष्ये पञ्चमो ऽध्यायः ॥ ५ ॥

शुभम् ॥

---

* सुखदुःखादिभिरिति २ । ५ । † विश्वमिति २ । ५ ।
‡ प्रकृतिविकार इति ४ । § प्रतिज्ञानार्थेति २ । ‖ सत इति २ । ५ ।
¶ हेत्वाभासा निग्रहस्थानत्वमापन्ना इति २ । ४ । ५ ।
** अयं श्लोको लिखितपुस्तकेषु २ । ३ । ४ । दृश्यते ।